ओम् । प्राणो ह वाऽअस्योपाꣳशुः । व्यान उपाꣳशुसवन उदान एवान्तर्यामः ॥ १ ॥ अथ यस्मादुपाꣳशुर्नाम । अꣳशुर्वै नाम ग्रहः स प्रजापतिस्तस्यैष प्राणस्तथ्यदस्यैष प्राणस्तस्मादुपाꣳशुर्नाम ॥ २ ॥ तं बर्हिष्यवित्रादृह्णाति । पराञ्चमेवास्मिन्नेतत्प्राणं दधाति सोऽस्यायं पराङेव प्राणो निर्ऋदति तमꣳशुभिः पावयति पूतोऽसदिति षड्भिः पावयति षड्वाऽऋतव ऋतुभिरेवैनमेतत्पावयति ॥ ३ ॥ तदाहुः । यदꣳशुभिरुपाꣳशुं पुनाति सर्वे सोमाः पवित्रपूता अथ केनास्याꣳशवः पूता भवन्तीति ॥ ४ ॥ तानुपनिवपति । यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेति तदस्य स्वाहाकारेणैवाꣳशवः पूता भवन्ति सर्वं वाऽएष ग्रहः सर्वेषाꣳ हि सवनानाꣳ रूपम् ॥ ५ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्ते होचुः सꣳस्थापयाम यज्ञं यदि नोऽसुररक्षसान्यासञ्जेयुः सꣳस्थित एव नो यज्ञः स्यादिति ॥ ६ ॥ ते प्रातःसवनऽएव । सर्वं यज्ञꣳ समस्थापयन्नेतस्मिन्नेव ग्रहे यजुष्टः प्रथमे स्तोत्रे सामतः प्रथमे शस्त्रऽऋक्तस्तेन सꣳस्थितेनैवात ऊर्ध्वं यज्ञेनाचरन्त्स एषोऽप्येतर्हि तथैव यज्ञः संतिष्ठतऽएतस्मिन्नेव ग्रहे यजुष्टः प्रथमे स्तोत्रे सामतः प्रथमे शस्त्रऽऋक्तस्तेन सꣳस्थितेनैवात ऊर्ध्वं यज्ञेन चरति ॥ ७ ॥ स वाऽअष्टौ कृत्वोऽभिषुणोति । अष्टाक्षरा वै गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेवैतत्क्रियते ॥ ८ ॥ स गृह्णाति । वाचस्पतये पवस्वेति प्राणो वै वाचस्पतिः प्राण एष ग्रहस्तस्मादाह वाचस्पतये पवस्वेति वृत्रहोऽअꣳशुभ्यां गभस्तिपूत इति सोमाꣳशुभ्याꣳ ह्येनं पावयति तस्मादाह वृत्रहोऽअꣳशुभ्यामिति

गभस्तिपूत इति पाणी वै गभस्ती पाणिभ्याꣳ ह्येनं पावयति ॥ ९ ॥ अथैकादश कृत्वोऽभिषुणोति । एकादशाक्षरा वै त्रिष्टुत्त्रैष्टुभं माध्यन्दिनꣳ सवनं माध्यन्दिनमेवैतत्सवनं क्रियते ॥ १० ॥ स गृह्णाति । देवो देवेभ्यः पवस्वेति देवो ह्येष देवेभ्यः पवते येषां भागोऽसीति तेषामु ह्येष भागः ॥ ११ ॥ अथ द्वादश कृत्वोऽभिषुणोति । द्वादशाक्षरा वै जगती जागतं तृतीयसवनं तृतीयसवनमेवैतत्क्रियते ॥ १२ ॥ स गृह्णाति । मधुमतीर्न इषस्कृधीति रसमेवास्मिन्नेतद्दधाति स्वदयत्येवैनमेतद्देवेभ्यस्तस्मादेष कृतो न पूयत्यथ यज्जुहोति सꣳस्थापयत्येवैनमेतत् ॥ १३ ॥ अष्टावष्टौ कृत्वः । ब्रह्मवर्चसकामस्याभिषुणुयादित्याङ्गिरष्टाक्षरा वै गायत्री ब्रह्म गायत्री ब्रह्मवर्चसी ह्येव भवति ॥ १४ ॥ तच्चतुर्विꣳशतिं कृत्वोऽभिषुतं भवति । चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावत्तमेवैतत्सꣳस्थापयति ॥ १५ ॥ पञ्च-पञ्च कृत्वः । पशुकामस्याभिषुणुयादित्याङ्गिः पाङ्क्ताः पशवः पशून्ह्येवावरुन्द्धे पञ्च वाऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावत्तमेवैतत्सꣳस्थापयति सोऽएषा मीमाꣳसैवेतरं वेव क्रियते ॥ १६ ॥ तं गृहीत्वा परिमार्ष्टि । नेद्यवश्योतदिति तं न सादयति प्राणो ह्यस्यैष तस्माद्यमसन्नः प्राणाः संचरन्ति यदीत्वभिचरेदथैनꣳ सादयेदमुष्य त्वा प्राणꣳ सादयामीति तथाह तस्मिन्न पुनरस्ति यन्नानुसृजति तेनोऽअध्वर्युश्च यजमानश्च ज्योग्जीवतः ॥ १७ ॥ अथोऽअप्येवैनं दध्यात् । अमुष्य त्वा प्राणमपिदधामीति तथाह तस्मिन्न पुनरस्ति यन्न सादयति तेनो प्राणान्न लोभयति ॥ १८ ॥ स वाऽअन्तरेव सत्स्वाकेति करोति । देवा ह वै बिभयां चक्रुर्यद्वै नः पुरैवास्य ग्रहस्य होमादसुररक्षसानीमं ग्रहं न हन्युरिति तमन्तरेव सन्तः स्वाहाकारेणाजुह्वुस्तꣳ हुतमेव सन्तमग्नावजुह्वुस्तथोऽएवैनमेष एतदन्तरेव सन्त्स्वाहाकारेण जुहोति तꣳ हुतमेव सन्तमग्नौ जुहो-

ति ॥ ११ ॥ अथोपनिष्क्रामति । उर्वन्तरिक्षमन्वेमीत्यन्तरिक्षं वाऽअनु रक्षश्चरत्य-मूलमुभयतः परिक्षिन्नं यथायं पुरुषोऽमूल उभयतः परिक्षिन्नोऽन्तरिक्षमनुचरत्येतद्वै यज्ञुर्ब्रह्म रक्षोहा स एतेन ब्रह्मणान्तरिक्षमभयमनाष्टं कुरुते ॥ २० ॥ अथ वरं वृणीते । बलवद्ध वै देवा एतस्य ग्रहस्य क्रोमं प्रेप्सन्ति तेऽस्माऽएतं वरꣳ समर्धयन्ति क्षिप्रे न इमं ग्रहं जुहवदिति तस्माद्वरं वृणीते ॥ २१ ॥ स जुहोति । स्वांकृतोऽसीति प्राणो वाऽअस्येष ग्रहः स स्वयमेव कृतः स्वयं ज्ञातस्तस्मादाह स्वांकृतोऽसीति विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इति सर्वाभ्यो ह्येष प्रजाभ्यः स्वयं ज्ञातो मनस्त्वाष्ट्विति प्रजापतिर्वै मनः प्रजापतिष्ट्वाश्नुतामित्येवैतदाह स्वाहा त्वा सुभव सूर्यायेति तद्वरꣳ स्वाहाकारꣳ करोति परां देवताम् ॥ २२ ॥ अमुष्मिन्वाऽएतमह्नौषीत् । य एष तपति सर्वं वाऽएष तदेनꣳ सर्वस्यैव परार्ध्यं करोत्यथ यद्वरां देवतां कुर्यात्परꣳ स्वाहाकारꣳ स्याद्ध ह्येवामुष्मादादित्यात्परं तस्माद्वरꣳ स्वाहाकारं करोति परां देवताम् ॥ २३ ॥ अथ जुहूर्ध्वं ग्रहमुन्मार्ष्टि । पराञ्चमेवास्मिन्नेतत्प्राणं दधात्यथोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमार्ष्टि पराञ्चमेवास्मिन्नेतत्प्राणं दधाति देवेभ्यस्त्वा मरीचिपेभ्य इति ॥ २४ ॥ अमुष्मिन्वाऽएतं मण्डलेऽह्नौषीत् । य एष तपति तस्य ये रश्मयस्ते देवा मरीचिपास्तानेवैतत्प्रीणाति तऽएनं देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥ २५ ॥ तस्य वाऽएतस्य ग्रहस्य । नानुवाक्यास्ति न याज्या तं मन्त्रेण जुहोत्येतेनो ह्यस्येषोऽनुवाक्यवान्भवत्येतेन याज्यवानथ यद्यभिचरेद्योऽस्याꣳशुराश्लिष्टः स्याद्वाल्वोर्वारमि वा वासर्सि वा तं जुहुयादेवाꣳशो यस्मै द्वेडे तत्सत्यमुपरिप्लुता भङ्क्ष्येन कृतोऽसौ फडिति यथा ह वै कन्यमानानामपधावेदेवमेषोऽभिषूयमाणानाꣳ स्कन्दति तथा ह तस्य नैव धावन्नापधावत्परिशिष्यते यस्माऽएवं करोति तꣳ सादयति प्राणाय त्वेति प्राणो ह्यस्येषः ॥ २६ ॥ दक्षिणार्धे केके सादयन्ति । एताꣳ ह्येष दिशमनु

संचरतीति तदु तथा न कुर्यादुत्तरार्धꣳ एवैनꣳ सादयेन्नो खेतस्या आकूतेः काचन परास्ति तꣳ सादयति प्राणाय वेति प्राणो वास्यैषः ॥ २७ ॥ अथोपाꣳशुसवनमादत्ते । तं न दशाभिर्न पवित्रेणोपस्पृशति यथा वाद्विः प्रणिक्तमेवं तद्यद्यꣳशुराश्लिष्टः स्यात्पाणिनैव प्रधꣳस्योद्यꣳसमुपनिपादयेद्व्यानाय वेति व्यानो वास्यैषः ॥ २८ ॥ ब्राह्मणम् ॥ १ ॥ ॥

प्राणो ह वाऽअस्योपाꣳशुः । व्यान उपाꣳशुसवन उदान एवान्तर्यामः ॥ १ ॥ अथ यस्मादन्तर्यामो नाम । यो वै प्राणः स उदानः स व्यानस्तमेवास्मिन्नेतत्परायꣳ प्राणं दधाति यदुपाꣳशुं गृह्णाति तमेवास्मिन्नेतत्प्रत्यञ्चमुदानं दधाति यदन्तर्यामं गृह्णाति सोऽस्यायमुदानोऽन्तरात्मन्यतस्तद्यस्यैषोऽन्तरात्मन्यतो यद्वैनेनेमाः प्रजा यतास्तस्मादन्तर्यामो नाम ॥ २ ॥ तमन्तःपवित्राद्गृह्णाति । प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति सोऽस्यायमुदानोऽन्तरात्मन्किꣳ एतेनो ह्यस्याप्युपाꣳशुरन्तःपवित्राद्गृहीतो भवति समानꣳ खेतद्यदुपाꣳशवन्तर्यामौ प्राणोदानौ खेतेनो ह्येवास्यैषोऽपीतरेषु ग्रहेष्वनाक्षिद्रवति ॥ ३ ॥ अथ यस्मात्सोमं पवित्रेण पावयति । यत्र वै सोमः स्वं पुरोहितं बृहस्पतिं जिग्यौ तस्मै पुनर्ददौ तेन सꣳशशाम तस्मिन्पुनर्ददुष्यासीवातिशिष्टमेनो यदीन्नूनं ब्रह्म ध्यानायाभिदध्यौ ॥ ४ ॥ तं देवाः पवित्रेणापावयन् । स मेध्यः पूतो देवानाꣳ हविरभवत्तथोऽ एवैनमेष एतत्पवित्रेण पावयति स मेध्यः पूतो देवानाꣳ हविर्भवति ॥ ५ ॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । इयं वाऽअदितिस्तस्या अदः प्रायणीयꣳ हविरसावादित्यश्चरुस्तद्वै तत्पुरेव सुत्यायै सा खेयं देवेषु सुन्यायामपिवमीषेऽस्त्वेव मेऽपि प्रसुते भाग इति ॥ ६ ॥ ते ह देवा ऊचुः । व्यादिष्टोऽयं देवताभ्यो यज्ञस्त्वयैव ग्रहा गृह्यन्तां देवताभ्यो हूयन्तामिति तथेति सोऽस्या एष प्रसुते भागः ॥ ७ ॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । इयं वाऽउपयाम इयं वाऽइदमन्नाद्यमुपयन्ति पशुभ्यो मनुष्येभ्यो वनस्पतिभ्य इतो वाऽऊ-

र्धा देवा दिवि हि देवाः ॥ ८ ॥ तस्यडुपयामेन ग्रहा गृह्यन्ते । अनयैव तद्गृह्यन्ते ऽथ यद्योनौ सादयतीयं वाऽअस्य सर्वस्य योनिरस्यै वाऽइमाः प्रजाः प्रजाताः ॥ ९ ॥ तं वाऽएतꣳ । रेतो भूतꣳ सोममृत्विजो बिभ्रति यद्वाऽअयोनौ रेतः सिच्यते प्र वै तन्मीयतेऽथ यद्योनौ सादयत्यस्यामेव तत्सादयति ॥ १० ॥ प्राणोदानौ ह वाऽअस्यैतौ ग्रहौ । तयोरुदितेऽन्यतरं जुहोत्यनुदितेऽन्यतरं प्राणोदानयोर्व्याकृत्यै प्राणोदानावेवैतद्व्याकरोति तस्मादेतौ समानावेव सन्तौ नानेवाचक्षते प्राण इति चोदान इति च ॥ ११ ॥ अहोरात्रे ह वाऽअस्यैतौ ग्रहौ । तयोरुदिते ऽन्यतरं जुहोत्यनुदितेऽन्यतरमहोरात्रयोर्व्याकृत्याऽअहोरात्रेऽएवैतद्व्याकरोति ॥ १२ ॥ अहः सन्तमुपाꣳशुम् । तꣳ रात्रौ जुहोत्यहरेवैतद्रात्रौ दधाति तस्मादपि सुतमिश्रायामुषैव किंचित्ख्यायते ॥ १३ ॥ रात्रिꣳ सन्तमन्तर्यामम् । तमुदिते जुहोति रात्रिमेवैतदहन्दधाति तेनो ह्यसावादित्य ऽएवैनेमाः प्रजा न प्रदहति तेनेमाः प्रजास्त्राताः ॥ १४ ॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसीत्युक्त उपयामस्य बन्धुरन्तर्यह मघवन्पाहि सोममितीन्द्रो वै मघवानिन्द्रो यज्ञस्य नेता तस्मादाह मघवन्निति पाहि सोममिति गोपाय सोममित्येवैतदाहोरुष्य राय एषो यज्ञस्वेति पशवो वै रायो गोपाय पशूनित्येवैतदाहेषो यज्ञस्वेति प्रजा वाऽइषस्ता एवैतद्व्यायजूकाः करोति ता इमाः प्रजा यजमाना अर्चत्यः आभ्यत्यश्चरन्ति ॥ १५ ॥ अन्तस्ते द्यावापृथिवी दधामि । अन्तर्दधाम्युर्वन्तरिक्षम् सन्नूर्देवेभिरवरैः परैश्चेति तदेनं वैश्वदेवं करोति तद्यदेनेनेमाः प्रजाः प्राणत्यश्नोदनत्यश्चान्तरिक्षमनुचरन्ति तेन वैश्वदेवोऽन्तर्यामे मघवन्मादयस्वेतीन्द्रो वै मघवानिन्द्रो यज्ञस्य नेता तस्मादाह मघवन्नित्यथ यदन्तरन्तरिति गृह्णात्यन्तस्त्वात्मन्दधऽइत्येवैतदाह ॥ १६ ॥ तं गृहीत्वा परिमार्ष्टि । नेद्यवश्चोतदिति तं न सादयत्युदानो ह्यस्यैष तस्मादयमसन्न उदानः संचरति यदीत्वभिचरेदथैनꣳ सादयेदमुष्य त्वोदानꣳ सादयामीति ॥ १७ ॥ स

यद्युपाꣳशुꣳ सादयेत् । अथैनꣳ सादयेद्यद्युपाꣳशुं न सादयेन्नैनꣳ सादयेद्यद्युपाꣳशु-मपिदध्याद्ध्येनं दध्याद्यद्युपाꣳशुं नापिदध्यान्नैनमपिदध्याद्यथोपाꣳशोः कर्म तथैतस्य समानꣳ क्येतद्यदुपाꣳश्वन्तर्यामौ प्राणोदानौ हि ॥१८॥ ताऽउ ह चरकाः । नानैव मन्त्राभ्यां जुह्वति प्राणोदानौ वाऽअस्यैतौ नानावीर्यौ प्राणोदानौ कुर्म इति वदन्तस्तु तथा न कुर्यान्मोह्यन्ति ह ते यज्ञमानस्य प्राणोदानावपीद्धाऽएनं तूष्णीं जुह्वयात् ॥१९॥ स यद्धाऽउपाꣳशुं मन्त्रेण जुहोति । तद्वास्यैषोऽपि मन्त्रेण हुतो भवति किमु तत्तूष्णीं जुह्वयात्समानꣳ क्येतद्यदुपाꣳश्वन्तर्यामौ प्राणोदानौ हि ॥२०॥ स येनैवोपाꣳशुं मन्त्रेण जुहोति । तेनैवैतं मन्त्रेण जुहोति स्वांकृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा सुभव सूर्यायेत्युक्तो यजुषो बन्धुः ॥२१॥ अथ ह्रुत्वावाञ्चं ग्रहमवमार्ष्टि । इदं वाऽउपाꣳशुꣳ हुत्वोर्ध्वमुन्मार्ष्ट्यथात्रावाञ्चमवमार्ष्टि प्रत्यञ्चमेवास्मिन्नेतद्धुतादं दधाति ॥२२॥ अथ नीचा पाणिना । मध्यमे परिधौ प्रत्यगुपमार्ष्टीदं वा उपाꣳशुꣳ हुत्वोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमार्ष्ट्यथात्र नीचा पाणिना मध्यमे परिधौ प्रत्यगुपमार्ष्टि प्रत्यञ्चमेवास्मिन्नेतद्धुतादं दधाति देवेभ्यस्त्वा मरीचिपेभ्य इति सोऽसावेव बन्धुः ॥२३॥ तं प्रत्याक्रम्य सादयति । उदानाय त्वेत्युदानो ह्यस्यैष तानि वै सꣳस्पृष्टानि सादयति प्राणोदानावेवैतत्सꣳस्पर्शयति प्राणोदानात्संदधाति ॥२४॥ तानि वाऽअनिह्रुयमानानि शेरे । आ तृतीयसवनात्तस्मादिमे मनुष्याः स्वपन्ति तानि पुनस्तृतीयसवने प्रयुज्यन्ते तस्मादिमे मनुष्याः सुप्त्वा प्रबुध्यन्ते तेऽनिशिताश्चराचरा यज्ञस्यैवैतद्विधानु वय-इव ह वै यज्ञो विधीयते तस्योपाꣳश्वन्तर्यामाविव पक्षावात्मोपाꣳशुसवनः ॥२५॥ तानि वाऽअनिह्रुयमानानि शेरे । आ तृतीयसवनात्तायते यज्ञ इति वै तद्यत्तायते तस्मादिमानि वयाꣳसि विगृह्य पक्षावनायुवानानि पतन्ति तानि पुनस्तृतीयसवने प्रयुज्यन्ते तस्मादिमानि वयाꣳसि समासं पक्षावा-

युवानानि पतन्ति यज्ञस्यैवैतद्विधामनु ॥२६॥ ॥ शतम् २३०० ॥ ॥ इयꣳ ह वा ऽऽपाꣳशुः । प्राणो ह्युपाꣳशुरिमाꣳ ह्येव प्राणान्नभिप्राणित्यसावेवान्तर्याम उदानो ह्यन्तर्यामोऽमुꣳ ह्येव लोकमुदनन्नभ्युदनित्यन्तरिक्षमेवोपाꣳशुसवनो व्यानो ह्युपाꣳशुसवनोऽन्तरिक्षꣳ ह्येव व्यनन्नभिव्यनिति ॥२७॥ ब्राह्मणम् ॥२॥ ॥

वाग्घ वाऽअस्यैन्द्रवायवः । एतन्वध्यात्मिन्द्रो ह यत्र वृत्राय वज्रं प्रजहार सोऽबलीयान्मन्यमानो नास्तृषीतीव बिभ्यन्निलयां चक्रे तदेवापि देवा अपन्यलयन्त ॥१॥ ते ह देवा ऊचुः । न वै हतं वृत्रं विद्म न जीवꣳ हन्त न एको वेत्तु यदि हतो वा वृत्रो जीवति वेति ॥२॥ ते वायुमब्रुवन् । अयं वै वायुर्यो ऽयं पवते वायो त्वमिदं विद्धि यदि हतो वा वृत्रो जीवति वा त्वं वै न आशिष्ठोऽसि यदि जीविष्यति त्वमेव क्षिप्रं पुनरागमिष्यसीति ॥३॥ स होवाच । किं मे ततः स्यादिति प्रथमवषट्कार एव ते सोमस्य राज्ञ इति तथेत्येषाय वायुरेनं वृत्रꣳ स होवाच हतो वृत्रो यद्धते कुर्यात तत्कुरुतेति ॥४॥ ते देवा अभ्यसृज्यन्त । यथा वित्तिं वेत्स्यमाना एवꣳ स यमेकोऽलभत स एकदेवत्योऽभवद्यं द्वौ स द्विदेवत्यो यं बहवः स बहुदेवत्यस्तद्यदेनं पात्रैर्व्यगृह्णत तस्माद्ग्रहा नाम ॥५॥ स एषामापूयत् । स एनांकुक्तः पूतिरभिववौ स नालमाङ्कृत्याऽआस नालं भक्षाय ॥६॥ ते देवा वायुमब्रुवन् । वायविमं नो विवाहीमं नः स्वदयेति स होवाच किं मे ततः स्यादिति त्वयैवैतानि पात्राण्याचक्षीरन्निति तथेति होवाच यूयं तु मे सच्युपवातेति ॥७॥ तस्य देवाः । यावन्मात्रमिव गन्धस्यापजघ्रुस्तं पशुष्वदधुः स एष पशुषु कुणपगन्धस्तस्मात्कुणपगन्धान्नापिगृह्णीत सोमस्य ह्येष राज्ञो गन्धः ॥८॥ नोऽएव निष्ठीवेत् । तस्माद्यद्यप्यासक्त-इव मन्येताभिवातं पर्यावर्त्तते सोमः पाप्मा यक्ष्मः स यथा श्रेयस्यायति पापीयान्प्रत्यवरोहेदेवꣳ हास्माद्यक्ष्मः प्रत्यवरोहति ॥९॥ अथेतरं वायुर्व्यवात् । तदस्वदयत्ततोऽलमाङ्कृत्या

ऽआसात्तं भक्षाय तस्मादेतानि नानादेवत्यानि सन्ति वायव्यानीत्याचक्षते सो ऽस्येष प्रथमवषट्कारश्च सोमस्य राज्ञ एतान्युऽएनेन पात्राण्याचक्षते ॥१०॥ इन्द्रो ह वाऽईक्षां चक्रे । वायुर्वै नोऽस्य यज्ञस्य भूयिष्ठभाग्यस्य प्रथमवषट्कारश्च सोमस्य राज्ञ एतान्युऽएनेन पात्राण्याचक्षते हन्तास्मिन्नपिबमिक्षाऽइति ॥११॥ स होवाच । वायवा मास्मिन्ग्रहे भक्षेति किं ततः स्यादिति निरुक्तमेव वाग्वदेदिति निरुक्तं चेद्वाग्वदेदा वा भक्षामीति तत एष ऐन्द्रवायवो ग्रहोऽभवद्वायव्यो ह्येव ततः पुरा ॥१२॥ स इन्द्रोऽब्रवीत् । अर्धं मेऽस्य ग्रहस्येति तुरीयमेव तऽइति वायुरर्धमेव मऽइतीन्द्रस्तुरीयमेव तऽइति वायुः ॥१३॥ तौ प्रजापतिं प्रतिप्रश्नमेयतुः । स प्रजापतिर्ग्रहं द्वेधा चकार स होवाचेदं वायोरित्यथ पुनरर्धं द्वेधा चकार स होवाचेदं वायोरितीदं तवेतीन्द्रं तुरीयमेव भाक्षयां चकार यद्वै चतुर्थं तत्तुरीयं तत एष ऐन्द्रतुरीयो ग्रहोऽभवत् ॥१४॥ तस्य वाऽएतस्य ग्रहस्य । द्वे पुरोरुचौ वायव्यैव पूर्वेन्द्रवायव्युत्तरा द्वेऽअनुवाक्ये वायव्यैव पूर्वेन्द्रवायव्युत्तरा द्वौ प्रैषौ वायव्य एव पूर्व ऐन्द्रवायव उत्तरो द्वे याज्ये वायव्यैव पूर्वेन्द्रवायव्युत्तरैवमेनं तुरीयं-तुरीयमेव भाक्षयां चकार ॥१५॥ स होवाच । तुरीयं-तुरीयं चेन्मामबीभक्षुस्तुरीयमेव तर्हि वाङ्निरुक्तं वदिष्यतीति तदेतत्तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्त्यथैतत्तुरीयं वाचोऽनिरुक्तं यत्पशवो वदन्त्यथैतत्तुरीयं वाचोऽनिरुक्तं यद्वयाꣳसि वदन्त्यथैतत्तुरीयं वाचोऽनिरुक्तं यदिदं क्षुद्रꣳ सरीसृपं वदति ॥१६॥ तस्मादेतदृषिणाभ्यनूक्तम् । चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति ॥१७॥ अथातो गृह्णात्येव । आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार । उपो तेऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वेति ॥१८॥ अथापगृह्य पुनरानयति । इन्द्रवायूऽइमे सुता उप प्रयोभिरागतम् । इन्दवो वामु-

शन्ति हि । उपयामगृहीतोऽसि वायवऽइन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वेति सादयति स यदाह सजोषोभ्यां त्वेति यो वै वायुः स इन्द्रो य इन्द्रः स वायुस्तस्मादाहैष ते योनिः सजोषोभ्यां त्वेति ॥ ११ ॥ ब्राह्मणम् ॥ ३ ॥ ॥

क्रतूदक्षौ ह वाऽअस्य मित्रावरुणौ । एतन्वध्यात्मꣳ स यदेव मनसा कामयतऽइद मे स्यादिदं कुर्वीयेति स एव क्रतुरथ यदस्मै तत्समृध्यते स दक्षो मित्र एव क्रतुर्वरुणो दक्षो ब्रह्मैव मित्रः क्षत्रं वरुणोऽभिगन्तैव ब्रह्म कर्ता क्षत्रियः ॥ १ ॥ ते हैतेऽग्रे नानेवासतुः । ब्रह्म च क्षत्रं च ततः शशाकैव ब्रह्म मित्र ऋते क्षत्राद्वरुणात्स्थातुम् ॥ २ ॥ न क्षत्रं वरुणः । ऋते ब्रह्मणो मित्राय्यङ्ग किं च वरुणः कर्म चक्रेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तत्समानृधे ॥ ३ ॥ स क्षत्रं वरुणः । ब्रह्म मित्रमुपमन्त्रयां चक्रऽउप मावर्तस्व सꣳसृजावहै पुरस्त्वा करवै त्वत्प्रसूतः कर्म करवाऽइति तथेति तौ समसृजेतां तत एष मैत्रावरुणो ग्रहोऽभवत् ॥ ४ ॥ सोऽएव पुरोधा । तस्मान्न ब्राह्मणः सर्वस्यैव क्षत्रियस्य पुरोधां कामयेत सꣳ ह्येतौ सृजेते सुकृतं च दुष्कृतं च नोऽएव क्षत्रियः सर्वमिव ब्राह्मणं पुरोदधीत सꣳ ह्येवैतौ सृजेते सुकृतं च दुष्कृतं च स यत्ततो वरुणः कर्म चक्रे प्रसूतं ब्रह्मणा मित्रेण सꣳ हैवास्मै तदानृधे ॥ ५ ॥ तत्तदवक्लृप्तमेव । यद्ब्राह्मणोऽराजन्यः स्याद्यद्यु राजानं लभेत समृद्धं तदेतद्ध वेवानवक्लृप्तं यत्क्षत्रियोऽब्राह्मणो भवति यद्ध किं च कर्म कुरुतेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तत्समृध्यते तस्माद्ध क्षत्रियेण कर्म करिष्यमाणेनोपसत्तव्य एव ब्राह्मणः सꣳ हैत्रास्मै तद्ब्रह्मप्रसूतं कर्मऽर्ध्यते ॥ ६ ॥ अथातो गृह्णात्येव । अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् । उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वेति ॥ ७ ॥ तं पयसा श्रीणाति । तद्यत्पयसा श्रीणाति वृत्रो वै सोम आसीत्तं यत्र देवा अघ्नंस्तं मित्रमब्रुवंस्त्वमपि हꣳसीति स न चकमे सर्वस्य वाऽअहं मि-

त्रमस्मि न मित्रꣳ सन्नमित्रो भविष्यामीति तं वै त्वा यज्ञाद्यत्तरेष्याम इत्यब्रूपि ब्रून्मीति होवाच तस्मात्पशवोऽपाक्रामन्मित्रꣳ सन्नमित्रोऽभूदिति स पशुभिर्व्यार्ध्यत तमेतद्देवाः पशुभिः समार्धयन्यत्पयसाश्रीणांस्तथोऽएवैनमेष एतत्पशुभिः समर्धयति यत्पयसा श्रीणाति ॥८॥ तदाहुः । शश्वद्ध नैव चकमे हन्तुमिति तद्यदेवात्र पयस्तन्मित्रस्य सोम एव वरुणास्य तस्मात्पयसा श्रीणाति ॥९॥ स श्रीणाति । राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः । तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीमेष ते योनिर्ऋतायुभ्यां त्वेति सादयति स यदाहर्ऋतायुभ्यां त्वेति ब्रह्म वाऽऋतं ब्रह्म हि मित्रो ब्रह्मो ह्यृतं वरुण एवायुः संवत्सरो हि वरुणः संवत्सर आयुस्तस्मादाहैष ते योनिर्ऋतायुभ्यां त्वेति ॥१०॥ ब्राह्मणम् ॥४॥ ॥

श्रोत्रꣳ ह वाऽअस्याश्विनः । तस्मात्सर्वतः परिहारं भक्षयति सर्वतो ह्येनेन श्रोत्रेण शृणोति यत्र वै भृगवो वाङ्गिरसो वा स्वर्गं लोकꣳ समाश्नुवत तच्यवनो वा भार्गवश्च्यवनो वाङ्गिरसस्तदेव ज्ञीर्णिः कृत्यारूपो जघ्ने ॥१॥ शर्यातो ह वाऽइदं मानवो ग्रामेण चचार । स तदेव प्रतिवेशो निविविशे तस्य कुमाराः क्रीडन्त इमं ज्ञीर्णिं कृत्यारूपमनर्थ्यं मन्यमाना लोष्टैर्विपिपिषुः ॥२॥ स शार्यातेभ्यश्चक्रोध । तेभ्योऽसंज्ञां चकार पितेव पुत्रेण युयुधे भ्राता भ्रात्रा ॥३॥ शर्यातो ह वाऽईक्षां चक्रे । यत्किमकरं तस्मादिदमापदीति स गोपालांश्चाविपालांश्च सꣳह्वयितवाऽउवाच ॥४॥ स होवाच । को वोऽद्येह किंचिदद्राक्षीदिति ते होचुः पुरुष एवायं ज्ञीर्णिः कृत्यारूपः शेते तमनर्थ्यं मन्यमानाः कुमारा लोष्टैर्व्यपिन्नन्निति स विदां चकार स वै च्यवन इति ॥५॥ स रथं युक्त्वा । सुकन्याꣳ शार्यातीमुपाधाय प्रसिष्यन्द स आजगाम यत्रऽर्षिरास तत् ॥६॥ स होवाच । ऋषे नमस्ते यन्नावेदिषं तेनाक्ष्णिꣳसिषमियꣳ सुकन्या तया तेऽपक्रुवे संजानीतां मे

ग्राम इति तस्य ह तत एव ग्रामः संज्ञज्ञे स ह तत एव शर्यातो मानव उद्युयुज्ञे नेदपरꣳ हिनसानीति ॥७॥ अश्विनौ ह वाऽइदं भिषज्यन्तौ चेरतुः । तौ सुकन्यामुपेयतुस्तस्यां मिथुनमीषाते तन्न जज्ञौ ॥८॥ तौ होचतुः । सुकन्ये कमिमं जीर्णिं कृत्वानूपमुपशेषऽआवामनुप्रेहीति सा होवाच यस्मै मां पितादात्रिवाहं तं जीवन्तꣳ हास्यामीति तद्धायमृषिराजज्ञौ ॥९॥ स होवाच । सुकन्ये किं वैतदवोचतामिति तस्माऽएतद्व्याचचक्षे स ह व्याख्यात उवाच यदि वैतत्पुनर्ब्रुवतः सा वं ब्रूतान्न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ यदि वा ब्रवतः केनावमसर्वौ स्वः केनासमृद्धाविति सा वं ब्रूतात्पतिं नु मे पुनर्युवाणं कुरुतमथ वां वक्ष्यामीति तां पुनरुपेयतुस्ताꣳ हैतदूचतुः ॥१०॥ सा होवाच । न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ होचतुः केनावमसर्वौ स्वः केनासमृद्धाविति सा होवाच पतिं नु मे पुनर्युवाणं कुरुतमथ वां वक्ष्यामीति ॥११॥ तौ होचतुः । एतꣳ ह्रदमभ्यवहर स येन वयसा कमिष्यते तेनोदेष्यतीति तꣳ ह्रदमभ्यवजहार स येन वयसा चकमे तेनोदेयाय ॥१२॥ तौ होचतुः । सुकन्ये केनावमसर्वौ स्वः केनासमृद्धाविति तौ हꣳ र्षिरेव प्रत्युवाच कुरुक्षेत्रेऽमी देवा यज्ञं तन्वते ते वां यज्ञाद्दर्तयन्ति तेनासर्वौ स्थस्तेनासमृद्धाविति तौ ह तत एवाश्विनौ प्रेयतुस्तावाजग्मतुर्देवान्यज्ञं तन्वानास्तुते बर्हिष्पवमाने ॥१३॥ तौ होचतुः । उप नौ क्लृपधमिति ते ह देवा ऊचुर्न वामुपक्लृपिष्यामहे बꣳ मनुष्येषु सꣳसृष्टमचारिष्टं भिषज्यन्ताविति ॥१४॥ तौ होचतुः । विशीर्णा वै यज्ञेन यन्नधऽइति कथं विशीर्णेत्युप न नौ क्लृपधमथ वो वक्ष्याव इति तथेति ताऽउपाक्लृपत ताभ्यामेतमाश्विनं ग्रहमगृह्णंस्तावधर्यू यज्ञस्याभवतां तावेतद्यज्ञस्य शिरः प्रत्यधत्तां तददस्तद्दिवाकीर्त्यानां ब्राह्मणे व्याख्यायते यथा तद्यज्ञस्य शिरः प्रतिदधतुस्तस्मादेष स्तुते बर्हिष्पवमाने ग्रहो गृ-

क्यते स्तुते हि वक्ष्यमानऽआगच्छताम् ॥ १५ ॥ तौ होचतुः । मुख्यौ वाऽआवां यज्ञस्य स्वो यावध्वर्यूऽइह नाविमं पुरस्ताद्वहं पर्याहरताभि द्विदेवत्यानिति ताभ्यामेतं पुरस्ताद्वहं पर्याजक्रुरभि द्विदेवत्यांस्तस्मादेष दशमो ग्रहे गृह्यते तृतीय एव वषट्क्रियतेऽथ यदश्विनाविती मे हव वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदꣳ सर्वमाप्नुवातां पुष्करस्रजावित्यग्नेरेवास्ये पुष्करमादित्योऽमुष्यै ॥ १६ ॥ अथातो गृह्णात्येव । या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माधीभ्यां त्वेति सादयति तं वै मधुमत्यर्चा गृह्णाति माधीभ्यां त्वेति सादयति तद्यन्मधुमत्यर्चा गृह्णाति माधीभ्यां त्वेति सादयति ॥ १७ ॥ दध्यङ् ह वाऽआभ्यामाथर्वणः । मधु नाम ब्राह्मणमुवाच तदेनयोः प्रियं धाम तदेवैनयोरेतेनोपगच्छात तस्मान्मधुमत्यर्चा गृह्णाति माधीभ्यां त्वेति सादयति ॥ १८ ॥ तानि वाऽएतानि । श्लक्ष्णानि पात्राणि भवन्ति राक्षावमैन्द्रवायवपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्विदेवत्यमन्नकावं मैत्रावरुणपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्विदेवत्यमौष्टमाश्विनपात्रं तत्तस्य द्वितीयं रूपं तेन तद्विदेवत्यमथ यदश्विनाविति मुख्यौ वाऽअश्विनावौष्टमिव वाऽइदं मुखं तस्मादौष्टमाश्विनपात्रं भवति ॥ १९ ॥ ब्राह्मणम् ॥ ५ ॥ प्रथमोऽध्यायः [२५.] ॥ ॥

चक्षुषी ह वाऽअस्य शुक्रामन्थिनौ । तद्वाऽएष एव शुक्रो य एष तपति तद्यदेष एतत्तपति तेनैष शुक्रश्चन्द्रमा एव मन्थी ॥ १ ॥ तꣳ सक्तुभिः श्रीणाति । तदेनं मन्थं करोति तेनोऽएष मन्थ्येतौ ह वाऽआसां प्रजानां चक्षुषी म यद्वैतौ नोदियातां न क्वैवेह स्वौ चन पाणी निर्जानीयुः ॥ २ ॥ तयोरत्तैवान्यतरः । आद्योऽन्यतरोऽत्तैव युक्र आद्यो मन्थी ॥ ३ ॥ तयोरत्तैवान्यतरमनु । आद्योऽन्यतरमन्वत्तैव शुक्रमन्वाद्यो मन्थिनमनु तौ वाऽअन्यस्मै गृह्येतेऽअन्यस्मै क्ष्येते शꣳएडामर्कावित्यसुररक्षसे ताभ्यां गृह्येते देवताभ्यो क्ष्येते तद्यत्तथा ॥ ४ ॥ यत्र वै

देवाः । असुररक्षसान्यपजघ्निरे तदेतावेव न शेकुरुपक्रन्तुं यद्ध स्म देवाः किं च कर्म कुर्वते तद्ध स्म मोक्षयित्वा क्षिप्रꣳएव पुनरुपद्रवतः ॥५॥ ते ह देवा ऊचुः । उपजानीत यथेमावपक्रनामक्ष्याꣳइति ते होचुर्ग्रहावेवाभ्यां गृह्णाम तावभ्यवैष्यतस्तौ स्वीकृत्यापक्रनिष्यामक्ष्याꣳइति ताभ्यां ग्रहौ जगृहुस्तावभ्यवैतां तौ स्वीकृत्यापाघ्नत तस्माद्गृहीतामर्काभ्यामिति गृह्यते देवताभ्यो ह्रूयेते ॥६॥ अपि होवाच याज्ञवल्क्यः । नो स्विद्देवताभ्य एव गृह्णीयामाꣳ विजितन्नूपमिव होदमिति तद्धैस तन्मीमाꣳसामेव चक्रे नेत्तु चकार ॥७॥ इमामु ह्येके शुक्रस्य पुरोरुचं कुर्वन्ति । अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमानꣳइति तदेतस्य रूपं कुर्मो य एष तपतीति यदाह ज्योतिर्जरायुरिति ॥८॥ इमां त्वेव शुक्रस्य पुरोरुचं कुर्यात् । तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदमित्यत्ता क्षेतमन्वत्ता हि ज्येष्ठस्तस्मादाह ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदम् प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे । उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरितां पाहीति सादयत्यत्ता क्षेतमन्वत्ता हि वीरस्तस्मादाहैष ते योनिर्वीरितां पाहीति दक्षिणार्धे सादयत्येताꣳ क्षेष दिशमनु संचरति ॥९॥ अथ मन्थिनं गृह्णाति । अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति । उपयामगृहीतोऽसि मर्काय त्वेति ॥१०॥ तꣳ सक्तुभिः श्रीणाति । तद्यत्सक्तुभिः श्रीणाति वरुणो ह वै सोमस्य राज्ञोऽभीवाद्धि प्रतिपिपेष तदश्वयत्ततोऽश्वः समभवत्तद्यत्कुयथात्समभवत्तस्माद्श्वो नाम तस्याशु प्रास्कन्दत्ततो यवः समभवत्तस्मादाहुर्वरुणो यव इति तद्यदेवास्यात्र चक्षुषोऽमीयत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मात्सक्तुभिः श्रीणाति ॥११॥ स श्रीणाति । मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो हवन्ता । आ यः शर्याभिस्तुविनृम्णोऽअस्याश्रीणीतादिशं गभस्तावेष ते

योनिः प्रजाः पाह्येति सादयत्याह्यो ह्येतमन्वाह्या ह्येमाः प्रजा विशस्तस्मादाह्येष ते योनिः प्रजाः पाह्येति ॥ १२ ॥ द्वौ प्रोक्षितौ यूपशकलौ भवतः । द्वावप्रोक्षितौ प्रोक्षितं चैवाधर्युरादत्तेऽप्रोक्षितं चैवमेव प्रतिप्रस्थाता प्रोक्षितं चैवादत्तेऽप्रोक्षितं च शुक्रमेवाधर्युरादत्ते मन्थिनं प्रतिप्रस्थाता ॥ १३ ॥ सोऽधर्युः । अप्रोक्षितेन यूपशकलेनापमार्ष्ट्यपमृष्टः शण्ड इत्येवमेव प्रतिप्रस्थातापमृष्टो मर्क इति तदाददानावेवासुररक्षसेऽपहतो देवास्त्वा शुक्रपाः प्रणयन्त्वित्येवाधर्युर्निष्क्रामति देवास्त्वा मन्थिपाः प्रणयन्त्विति प्रतिप्रस्थाता तदेतौ देवताभ्य एव प्रणयतः ॥ १४ ॥ तौ ज्ञघनेनाहवनीयमरत्नी संधत्तः । ताऽउत्तरवेदौ सादयतो दक्षिणायामिव श्रोणावधर्युः सादयत्युत्तरायां प्रतिप्रस्थाताननुसृज्यत्ताविवानाधृष्टासीति तद्रक्षोभिरेवैतदुत्तरवेदिमनाधृष्टां कुरुतो विपर्येष्यन्तौ वाऽएतावग्निं भवतोऽत्येष्यन्तौ तस्माऽएवैतन्निह्नुवाते तथो हैनौ विपरियन्तावग्निर्न हिनस्ति ॥ १५ ॥ सोऽधर्युः पर्येति । सुवीरो वीरान्प्रजनयन्परीह्येत्यत्ता ह्येतमन्वत्ता हि वीरस्तस्मादाह सुवीरो वीरान्प्रजनयन्परीह्येत्यभि रायस्पोषेण यजमानमिति तद्यजमानायाशिषमाशास्ते यदाहाभि रायस्पोषेण यजमानमिति ॥ १६ ॥ अथ प्रतिप्रस्थाता पर्येति । सुप्रजाः प्रजाः प्रजनयन्परीह्येत्याह्यो ह्येतमन्वाह्या ह्येमाः प्रजा विशस्तस्मादाह सुप्रजाः प्रजाः प्रजनयन्परीह्येत्यभि रायस्पोषेण यजमानमिति तद्यजमानायाशिषमाशास्ते यदाहाभि रायस्पोषेण यजमानमिति ॥ १७ ॥ तावपिधाय निष्क्रामतः । तिर एवैनावेतत्कुरुतस्तस्मादिमौ सूर्याचन्द्रमसौ प्राञ्चौ यन्तौ न कञ्चन पश्यति तौ पुरस्तात्परीत्यापोर्णुतः पुरस्तात्तिष्ठन्तौ ज्ञुङ्कुत आविरेवैनावेतत्कुरुतस्तस्मादिमौ सूर्याचन्द्रमसौ प्रत्यञ्चौ यन्तौ सर्व एव पश्यति तस्मात्पराङेतः सिच्यमानं न कञ्चन पश्यति नदु पश्चात्प्रजायमानꣳ सर्व एव पश्यति ॥ १८ ॥ तौ ज्ञघनेन यूपमरत्नी संधत्तः । यद्यग्निर्नोद्बाधेत यद्युऽअग्निरुद्बाधेताप्यग्नेणैव यूपमरत्नी संदध्याताꣳ संज्ञ-

ग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषेत्येवाधर्युः संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषेति प्रतिप्रस्थाता चक्षुषोरेवैतेऽआरमणे कुरुतश्चक्षुषीऽएवैतत्संधत्तस्तस्मादिमेऽअभितोऽस्थिनी चक्षुषी सᳬहिते ॥११॥ सोऽधर्युः । अप्रोक्षितं यूपशकलं निरस्यति निरस्तः शण्ड इत्येवमेव प्रतिप्रस्थाता निरस्तो मर्क इति तत्पुराकृतिभ्योऽसुररक्षसेऽअपकृतः ॥२०॥ अथाधर्युः । प्रोक्षितं यूपशकलमाहवनीये प्रास्यति शुक्रस्याधिष्ठानमसीत्येवमेव प्रतिप्रस्थाता मन्थिनोऽधिष्ठानमसीति चक्षुषोरेवैते समिधौ चक्षुषीऽएवैतत्समिन्द्धे तस्मादिमे समिद्धे चक्षुषी ॥२१॥ तत्र ज्रपति । अक्षिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्यामेत्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते ॥२२॥ अथाश्राव्याह्व । प्रातः-प्रातः सवस्य शुक्रवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति वषट्कृतेऽधर्युर्जुहोति तदनु प्रतिप्रस्थाता तदनु चमसाधर्यवः ॥२३॥ तौ वै पुरस्तात्तिष्ठन्तौ जुह्वतः । चक्षुषी वाऽएतौ तत्पुरस्तादेवैतच्चक्षुषी धत्तस्तस्मादिमे पुरस्ताच्चक्षुषी ॥२४॥ अभितो यूपं तिष्ठन्तौ जुह्वतः । यथा वै नासिकैवं यूपस्तस्मादिमेऽअभितो नासिकां चक्षुषी ॥२५॥ तौ वै वषट्कृतौ सन्तौ मक्षेण क्ष्येते । एतेनो हैतौ तद्वद्श्नुवाते यदेनौ सर्वᳬ सवनमनुक्ष्यते यद्वैवैतौ सर्वᳬ सवनमनुक्ष्यतऽएतौ वै प्रजापतेः प्रत्यक्षतमां चक्षुषी क्ष्येतौ सत्यं वै चक्षुः सत्यᳬ हि प्रजापतिस्तस्मादेनौ सर्वᳬ सवनमनुक्ष्यते ॥२६॥ स जुहोति । सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रोऽअग्निः । स प्रथमो बृहस्पतिश्चिकित्वांस्तस्माऽइन्द्राय सुतमाजुहोत स्वाहेति ॥२७॥ स यज्जुहोति । सा प्रथमा स प्रथम इति शश्वद्ध वै रेतसः सिक्तस्य चक्षुषीऽएव प्रथमे सम्भवतस्तस्माज्जुहोति सा प्रथमा स प्रथम इति ॥२८॥ अथ सम्प्रेष्यति । प्रेतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां प्र यजमानस्य प्रयन्तु सदस्यानाᳬ होत्राणां चमसाधर्यव उपावर्तधᳬ शुक्रस्याभ्युन्नयधमिति सम्प्रेष एवैष

पर्येत्य प्रतिप्रस्थाताधर्योः पात्रे सꣳस्रवमवनयत्यꣳएवैतदाꣳ बलिꣳ हारयति तमध्वर्युर्होतृचमसेऽवनयति भक्षाय वषट्कर्तुर्हि भक्षः प्राणो वै वषट्कारः सोऽस्मादेतद्वषट्कुर्वतः पराङिवाभूत्प्राणो वै भक्षस्तत्प्राणं पुनरात्मन्धत्ते ॥२१॥ अथ यदेते प्रतीची पात्रे न हरन्ति । हरन्त्यन्यान्यहांश्चनुषी व्येते सꣳस्रवमेव होतृचमसेऽवनयति ॥३०॥ अथ होत्राणां चमसानभ्युन्नयन्ति । हुतोहिष्टा वाऽएते सꣳस्रवा भवन्ति नालमाकृत्यै तानेवैतत्पुनराप्याययन्ति तथालमाकृत्यै भवन्ति तस्माद्धोत्राणां चमसानभ्युन्नयन्ति ॥३१॥ अथ होत्राः संयाजयन्ति । होत्रा ह वै युक्ता देवेभ्यो यज्ञं वहन्ति ता एवैतत्संतर्पयन्ति तृप्ताः प्रीता देवेभ्यो यज्ञं वहानिति तस्माद्धोत्राः संयाजयन्ति ॥३२॥ स प्रथमायां वा होत्रायाम् । इष्टायामुत्तमायां वानुमन्त्रयते तृम्पन्तु होत्रा मधो याः स्विष्टा याः सुप्रीताः सुकृता यत्स्वाहेति होत्राणामेवैषा तृप्तिरथेत्य प्रत्यङ्ङुपविशत्यथाऽग्नीदित्यग्नीध्रत्र यजतामुत्तमः संयजति तस्मादाहायाऽग्नीदिति ॥३३॥ ब्राह्मणम् ॥ ६[२. १.]॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १३६ ॥ ॥

आत्मा ह वाऽअस्याग्रयणः । सोऽस्यैष सर्वमेव सर्वꣳ व्ययमात्मा तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या व्येनं गृह्णाति सर्वं वाऽइयꣳ सर्वमेष ग्रहस्तस्मादनया गृह्णाति ॥१॥ पूर्णं गृह्णाति । सर्वं वै पूर्णꣳ सर्वमेष ग्रहस्तस्मात्पूर्णं गृह्णाति ॥२॥ विश्वेभ्यो देवेभ्यो गृह्णाति । सर्वं वै विश्वे देवाः सर्वमेष ग्रहस्तस्माद्विश्वेभ्यो देवेभ्यो गृह्णाति ॥३॥ सर्वेषु सवनेषु गृह्णाति । सर्वं वै सवनानि सर्वमेष ग्रहस्तस्मात्सर्वेषु सवनेषु गृह्णाति ॥४॥ स यदि गृह्णोपदस्येत् । तमत एव तन्वीरन्ततः प्रभावयेयुरात्मा वाऽआग्रयणः आत्मनो वाऽइमानि सर्वाण्यङ्गानि प्रभवन्त्येतस्मादन्ततो हारियोजनं ग्रहं गृह्णाति तदात्मन्येवास्यां प्रतिष्ठायामन्ततो यज्ञः प्रतितिष्ठति ॥५॥ अथ यस्मादाग्रयणो नाम । यां वाऽअमूं ग्रा-

वाणमाददानो वाचं यच्छत्यत्र वै साग्रेऽवदत्तद्यत्सात्राग्रेऽवदत्तस्मादाग्रयणो नाम ॥ ६ ॥ ऋक्षोभ्यो वै तां भीषा वाचमयच्छन् । षड्ढाऽग्रतः प्राचो ग्रहान्गृह्णात्यर्धेष सप्तमः षड्ढाऽऋतवः संवत्सरस्य सर्वं वै संवत्सरः ॥ ७ ॥ तां देवाः । सर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽग्रे वाचमवदंस्तथोऽएवैष एताꣳ सर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽग्रे वाचं वदति ॥ ८ ॥ अथातो गृह्णात्येव । ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषधम् । उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयण इति वाचमेवैतद्यातयाम्नीं करोति तस्मादनया समानꣳ सद्विपर्यासं वदत्यज्ञामितायै ज्ञामि ह कुर्यात्यदाग्रयणोऽस्याग्रयणोऽसीति गृह्णीयात्तस्मादाहाग्रयणोऽसि स्वाग्रयण इति ॥ ९ ॥ पाहि यज्ञं पाहि यज्ञपतिमिति । वाचमेवैतदुत्सृष्टामाह गोपाय यज्ञमिति पाहि यज्ञपतिमिति वाचमेवैतदुत्सृष्टामाह गोपाय यजमानमिति यजमानो हि यज्ञपतिर्विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाहीति वाचमेवैतदुत्सृष्टामाह यज्ञो वै विष्णुर्यज्ञस्त्वां वीर्येण गोपायत्विति विष्णुं त्वं पाहीति वाचमेवैतदुत्सृष्टामाह यज्ञं त्वं गोपायेत्यभि सवनानि पाहीति तदेतं ग्रहमाह सर्वाणि ह्येष सवनानि प्रति ॥ १० ॥ अथ दशापवित्रमुपगृह्य हिङ्करोति । सा हैषा वागनुद्यमाना ततान तस्यां देवा वाचि तान्तायाꣳ हिङ्कारेणैव प्राणमदधुः प्राणो वै हिङ्कारः प्राणो हि वै हिङ्कारस्तस्मादपिगृह्य नासिके न हिङ्कर्तुꣳ शक्नोति सैतेन प्राणेन समञ्जिहीत यदा वै तान्तः प्राणं लभतेऽथ स संञ्जिहीते तथोऽएवैष एतद्वाचि तान्तायाꣳ हिङ्कारेणैव प्राणं दधाति सैतेन प्राणेन संञ्जिहीते त्रिष्कृत्वो हिङ्करोति त्रिवृद्धि यज्ञः ॥ ११ ॥ अथाह सोमः पवतऽइति । स यामेवामूं भीषासुररक्षसेभ्यो न निरब्रुवंस्तामेवैतत्सर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्र निराह तामाविष्करोति तस्मादाह सोमः पवतऽइति ॥ १२ ॥ अस्मै ब्रह्मणेऽस्मै क्षत्रायेति । तद्ब्रह्मणे च क्षत्राय चाहास्मै सुन्वते

यजमानाय पवतऽइति तद्यजमानायाह ॥ १३ ॥ तदाहुः । एतावद्वोक्त्रा सादयेदेतावद्वाऽइदꣳ सर्वं यावद्ब्रह्म क्षत्रं विडिन्द्राग्नी वाऽइदꣳ सर्वं तस्मादेतावद्वोक्त्रा सादयेदिति ॥ १४ ॥ तदु ब्रूयादेव भूयः । इषऽऊर्जे पवतऽइति वृष्ट्यै तदाह यदाहेषऽइत्यूर्जऽइति यो वृष्टादूर्यसो जायते तस्मै तदाहाद्भ्य ओषधीभ्यः पवत ऽइति तदद्भ्यश्चौषधिभ्यश्चाह द्यावापृथिवीभ्यां पवतऽइति तदाभ्यां द्यावापृथिवीभ्यामाह ययोरिदꣳ सर्वमधि सुभूताय पवतऽइति साधवे पवतऽइत्येवैतदाह ॥ १५ ॥ तदु हैकऽआहुः । ब्रह्मवर्चसाय पवतऽइति तदु तथा न ब्रूयाद्यद्वाऽआहास्मै ब्रह्मणऽइति तदेव ब्रह्मवर्चसायाह विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति तं वै मध्ये सादयत्यात्मा ह्यस्यैष मध्यऽइव ह्ययमात्मा दक्षिणोक्थ्यस्थाली भवत्युत्तरादित्यस्थाली ॥ १६ ॥ ब्राह्मणम् ॥ १ [२. २.] ॥ ॥

अथꣳ ह वाऽअस्यैषोऽनिरुक्त आत्मा यदुक्थ्यः । सोऽस्यैष आत्मैवात्मा ह्ययमनिरुक्तः प्राणः सोऽस्यैष आयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या ह्येनं गृह्णात्यन्नꣳ ह्येयममृताऽन्नꣳ ह्यमृतमायुस्तस्मादनया गृह्णाति ॥ १ ॥ तं वै पूर्णं गृह्णाति । सर्वं वै तद्यत्पूर्णꣳ सर्वं तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥ २ ॥ ॥ शतम् २४०० ॥ ॥ तस्यासावेव ध्रुव आयुः । आत्मैवास्यैतेन सꣳस्कृतः पर्वाणि संततानि तद्वाऽअगृहीत एवैतस्माद्ग्रहावाकायोत्तमो ग्रहो भवति ॥ ३ ॥ अथ राज्ञानमुपावहरति । तृतीयं वसतीवरीणामवनयति तत्पर्व समेति प्रथममहोत्तरस्य सवनस्य करोत्युत्तमं पूर्वस्य स यदुत्तरस्य सवनस्य तत्पूर्वं करोति यत्पूर्वस्य तदुत्तमं तद्यतिषजति तस्मादिमानि पर्वाणि व्यतिषक्तानीदमित्थमतिहानमिदमित्थम् ॥ ४ ॥ एवमेव माध्यन्दिने सवने । अगृहीत एवैतस्माद्ग्रहावाकायोत्तमो ग्रहो भवत्यथ तृतीयं वसतीवरीणामवनयति तत्पर्व समेति प्रथममहोत्तरस्य

सवनस्य करोत्युत्तमं पूर्वस्य स यदुत्तरस्य सवनस्य तत्पूर्वं करोति यत्पूर्वस्य तदुत्तमं तद्यतिषज्जति तस्मादिमानि पर्वाणि व्यतिषक्तानीदमित्थमतिक्रान्तमिदमित्थं तद्यदस्यैतेनात्मा संस्कृतस्तेनास्यैष आयुः ॥ ५ ॥ सैषा कामदुघैवेन्द्रस्योद्गारः । त्रिभ्य एवैनं प्रातःसवनऽउक्थेभ्यो विगृह्णाति त्रिभ्यो माध्यन्दिने सवने तत्षट् कृत्वः षड्वाऽऋतव ऋतवो वाऽइमान्त्सर्वान्कामान्यचक्त्येतेनो खैषा कामदुघैवेन्द्रस्योद्गारः ॥ ६ ॥ तं वाऽअपुरोरुक्कं गृह्णाति । उक्थं हि पुरोरुगृग्घि पुरोरुगृग्घ्युक्थं साम ग्रहोऽथ यदन्यदुज्जपति तद्यजुस्ता खैता अभ्यर्धं एवाग्रऽऋग्भ्य आसुरभ्यर्धो यजुर्भ्योऽभ्यर्धः सामभ्यः ॥ ७ ॥ ते देवा अब्रुवन् । कृतेमा यजुःषु दधाम तथेयं बहुलतरैव विद्या भविष्यतीति ता यजुःष्वदधुस्तत एषा बहुलतरैव विद्याभवत् ॥ ८ ॥ तं यदपुरोरुक्कं गृह्णाति । उक्थं हि पुरोरुगृग्घि पुरोरुगृग्घ्युक्थं स यदेवैनमुक्थेभ्यो विगृह्णाति तेनो खास्यैष पुरोरुन्नाम्भवति तस्मादपुरोरुक्कं गृह्णाति ॥ ९ ॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वतऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाखेन्द्राय खेति बृहद्वते वयस्वतऽइति वीर्यवतऽइत्येवैतदाह यदाह बृहद्वते वयस्वतऽइत्युक्थाव्यं गृह्णामीत्युक्थेभ्यो खेनं गृह्णाति यत्तऽइन्द्र बृहद्वय इति यत्तऽइन्द्र वीर्यमित्येवैतदाह तस्मै त्वा विष्णवे खेति यज्ञस्य खेनमायुषे गृह्णाति तस्मादाह तस्मै त्वा विष्णवे खेत्येष ते योनिरुक्थेभ्यस्त्वेति सादयत्युक्थेभ्यो खेनं गृह्णाति ॥ १० ॥ तं विगृह्णाति । देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीति प्रशासनं स कुर्याद्य एवं कुर्याद्यथादेवतं खेव विगृह्णीयात् ॥ ११ ॥ मित्रावरुणाभ्यां त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव मैत्रावरुणाय मैत्रावरुणीषु हि तस्मै स्तुवते मैत्रावरुणीरनुशंसति मैत्रावरुण्या यजति ॥ १२ ॥ इन्द्राय त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव ब्राह्मणाछंसिन ऽऐन्द्रीषु हि तस्मै स्तुवतऽऐन्द्रीरनुशंसत्येन्द्र्या यजति ॥ १३ ॥ इन्द्राग्निभ्यां त्वा ।

देवाव्यं यज्ञस्यायुषे गृह्णामीत्येवाह्यावाकायेन्द्राग्नीषु हि तस्मै स्तुवतऽऐन्द्राग्नीरनुशꣳसत्यैन्द्राग्न्या यजतीन्द्राय वेत्येव माध्यन्दिने सवनऽऐन्द्रꣳ हि माध्यन्दिनꣳ सवनम् ॥ १४ ॥ तद्वै ह चरकाधर्यवो विगृह्णन्ति । उपयामगृहीतोऽसि देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यं मित्रावरुणाभ्यां जुष्टं गृह्णाम्येष ते योनिर्मित्रावरुणाभ्यां वेति सादयति पुनर्ह्विरसीति स्थालीमभिमृशति ॥ १५ ॥ उपयामगृहीतोऽसि । देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय वेति सादयति पुनर्ह्विरसीति स्थालीमभिमृशति ॥ १६ ॥ उपयामगृहीतोऽसि । देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राग्निभ्यां जुष्टं गृह्णाम्येष ते योनिरिन्द्राग्निभ्यां वेति सादयति नात्र पुनर्ह्विरसीति स्थालीमभिमृशतीन्द्राय वेन्द्राय वेत्येव माध्यन्दिने सवनऽऐन्द्रꣳ हि माध्यन्दिनꣳ सवनं द्विर्ह पुनर्ह्विरसीति स्थालीमभिमृशति तूष्णीं तृतीयं निदधाति ॥ १७ ॥ तं वै नोपयामेन गृह्णीयात् । न योनौ सादयेदग्ने व्वेष उपयामेन गृहीतो भवत्यग्ने योनौ सन्नोऽज्ञामितायै ज्ञामि ह कुर्याद्यदेनमत्राप्युपयामेन गृह्णीयाद्यद्योनौ सादयेदथ यत्पुनर्ह्विरसीति स्थालीमभिमृशति पुनर्व्यस्यै ग्रहं ग्रहोष्यन्भवति न तदाद्रियेत तूष्णीमेव निदध्यात् ॥ १८ ॥ ब्राह्मणम् ॥ २ [२. ३.] ॥ ॥

अथꣳ ह वाऽअस्येष प्राणः । योऽयं पुरस्तात्स वै वैश्वानर एवाथ योऽयं पश्चात्स ध्रुवस्तौ ह स्मैतौ द्वाविवाग्ने ग्रहौ गृह्णन्ति ध्रुववैश्वानरावितिं तयोरयमग्नेर्वैश्वान्यतर एव गृह्यते ध्रुव एव स यदि तं चरकेभ्यो वा यतो वानुब्रुवीत यज्ञमानस्य तं चमसेऽवनयेदेतमेव होतृचमसे ॥ १ ॥ यद्वाऽअस्यावाचीनं नाभेः । तदस्येष आत्मनः सोऽस्येष आयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या व्वेनं गृह्णात्यन्नरा व्वीयममृताऽन्नꣳ व्वममृतमायुस्तस्मादनया गृह्णाति ॥ २ ॥ तं वै पूर्णं गृह्णाति । सर्वं वै तद्यत्पूर्णꣳ सर्वं तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥ ३ ॥

वैश्वानराय गृह्णाति । संवत्सरो वै वैश्वानरः संवत्सर आयुस्तस्माद्वैश्वानराय गृह्णाति ॥४॥ स प्रातःसवने गृहीतः । एतस्मात्कालादुपशेते तदेनꣳ सर्वाणि सवनान्यतिनयति ॥५॥ तं न स्तूयमानेऽवनयेत् । न ह संवत्सरं यजमानोऽतिजीविष्यत्स्तूयमानेऽवनयेत् ॥६॥ तꣳ शस्यमानेऽवनयति । तदेनं द्वादशꣳ स्तोत्रमतिनयति तथा परम्परमायुः समश्नुते तथो ह यजमानो ज्योग्जीवति तस्माद्ब्राह्मणोऽग्निष्टोमसत्स्यादितस्य होमान्न सर्पेन्न प्रस्रावयेत तथा सर्वमायुः समश्नुत ऽआयुर्वाऽअस्यैष तथा सर्वमायुरेति ॥७॥ यद्वाऽअस्यावाचीनं नाभेः । तदस्यैष आत्मनः स यत्पुरैतस्य होमात्सर्पेद्वा प्र वा स्रावयेत ध्रुवꣳ हावमेहेन्नेद्ध्रुवमवमेहानीति तस्माद्वाऽअग्निष्टोमसद्भवति तद्वै तद्यजमान एव यजमानस्य ह्येष तदात्मनः ॥८॥ स वाऽअग्निष्टोमसद्भवति । यशो वै सोमस्तस्माद्यश्च सोमे लभते यश्च नोभावेवागच्छतो यश एवैतद्भ्रष्टुमागच्छन्ति तद्वाऽएतद्यशो ब्राह्मणाः सम्प्रसृप्यात्मन्धत्ते यद्भक्षयन्ति स ह यश एव भवति य एवं विद्वान्भक्षयति ॥९॥ ते वाऽएते । सर्पन्त एवाग्निष्टोमसद्येतद्यशः संनिधाय सर्पन्ति ते पराञ्चो यशसो भवन्ति तदेष परिगृह्यैव पुनरात्मन्यशो धत्ते तेषाꣳ हैष एव यशस्वितमो भूत्वा प्रेति य एवं विद्वानग्निष्टोमसद्भवति ॥१०॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरेऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भविष्यत्यस्माकमयं भविष्यतीति ॥११॥ ततो देवाः । अर्चन्तः श्राम्यन्तश्चेरुस्तेऽएतदग्निष्टोमसद्यं ददृशुस्तेऽएतेनाग्निष्टोमसद्येन सर्वं यज्ञꣳ समवृञ्जतात्तरायन्नसुरान्यज्ञात्ततोऽएवैष एतेनाग्निष्टोमसद्येन सर्वं यज्ञꣳ संवृङ्क्तेऽत्तरेति सपत्नान्यज्ञात्तस्माद्वाऽअग्निष्टोमसद्भवति ॥१२॥ तं गृहीत्वोत्तरे हविर्धाने सादयति प्राणा वै ग्रहा नेत्प्राणान्मोहुयानीत्युपकीर्णे वाऽइतरान्ग्रहान्सादयत्यथैतं व्युह्य न तृणं चनान्तर्धाय ॥१३॥ यद्वाऽअस्योर्ध्वे नाभेः । तदस्यैतदात्मन उपरीव वै तद्यदूर्ध्वे नाभेरुपरिवितद्यदुप-

कीर्णं तस्मादुपकीर्णे सादयत्यथैतं व्युक्ष्य न तृणं चनान्तर्धाय ॥ १४ ॥ यद्वाऽअस्या-वाचीनं नाभेः । तदस्यैष आत्मनोऽध-इव वै तद्यद्वाचीनं नाभेरध-इवैतद्य व्युक्ष्य न तृणं चनान्तर्धाय तस्मादेतं व्युक्ष्य न तृणं चनान्तर्धाय सादयति ॥ १५ ॥ एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतस्मिन्वाग्ने-तर्ह्यनु प्रजायन्ते स यानुपकीर्णे सादयति तस्माद्यास्ताननु प्रजाः प्रजायन्ते ता अ-न्येनात्मनोऽस्यां प्रतितिष्ठन्ति या वै शफैः प्रतितिष्ठन्ति ता अन्येनात्मनोऽस्यां प्रतितिष्ठन्त्यथ यदेतं व्युक्ष्य न तृणं चनान्तर्धाय सादयति तस्माद्या एतमनु प्रजाः प्रजायन्ते ता आत्मनैवास्यां प्रतितिष्ठन्ति मनुष्याश्च श्वापदाश्च ॥ १६ ॥ तद्वाऽएतत् । अस्या एवान्यदुत्तरं करोति यदुपकिरति स यानुपकीर्णे सादयति तस्माद्यास्ता-ननु प्रजाः प्रजायन्ते ता अन्येनैवात्मनोऽस्यां प्रतितिष्ठन्ति शफैः ॥ १७ ॥ तद्वाऽए-तत् । आहवनीये जुहोति पुरोडाशं धानाः करम्भं दध्यामिक्षामिति तद्यथा मुख ऽआसिञ्चेदेवं तदथैष एकरूप उपशेतऽआप इवैव तस्माद्यदन्नेन मुखेन नानारू-पमशनमश्नात्यथैतेन प्राणैनैकरूपमेव प्रस्रावयतेऽप इवैवाथ यस्माद्ध्रुवो नाम ॥ १८ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्भिभयां चक्रुस्तान्द-क्षिणातोऽसुररक्षसान्यासेञ्जुस्तेषामेतान्दक्षिणान्यक्षानुज्जघ्नुरथैतद्दक्षिणꣳ हविर्धान-मुज्जघ्नुरथैतमेव न शेकुरुद्धन्तुं तदुत्तरमेव हविर्धानं दक्षिणꣳ हविर्धानमदꣳहत्त-द्यदेतं न शेकुरुद्धन्तुं तस्माद्ध्रुवो नाम ॥ १९ ॥ तं वै गोपायन्ति । शिरो वाऽएष एतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विꣳश-तिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्याऽएष शिरः श्रीर्वै शिरः श्रीर्हि वै शिरस्त-स्माद्योऽर्धस्य श्रेष्ठो भवत्यसावमुष्यार्धस्य शिर इत्याहुः श्रेष्ठो ह व्यथेत यदेष व्यथेत यज्ञमानो वै श्रेष्ठो नेद्यज्ञमानो व्यथाताऽइति तस्माद्वै गोपायन्ति ॥ २० ॥ वत्सो वाऽएष । एतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्रा-

णि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्या एष वत्सस्तं यद्गोपायन्ति गोपायन्ति वाऽइमान्वत्सान्दोहाय यदिदं पयो दुहेऽएवमियं गायत्री यज्ञमानाय सर्वान्कामान्दोहाताऽइति तस्माद्वै गोपायन्ति ॥ २१ ॥ अथ यद्धर्युश्च प्रतिप्रस्थाता च । निश्च क्रामतः प्र च पद्येते यथा बडवत्सोपाचरेदेवमेतं ग्रहमुपाचरतस्तमवनयति गायत्रीमेवैतत्प्रस्तावयति प्रत्तेयं गायत्री यज्ञमानाय सर्वान्कामान्दोहाताऽइति तस्माद्धाऽअवनयति ॥ २२ ॥ सोऽवनयति । ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामीति गृह्णामीति वाथा न इन्द्र इद्विशोऽसपत्नाः समनसस्करदिति यथा न इन्द्र इमाः प्रजा विशः श्रियै यशसेऽन्नाद्यायासपत्नाः समनसः करवदित्येवैतदाह ॥ २३ ॥ अथातो गृह्णात्येव । मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः । उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम एष ते योनिर्वैश्वानराय त्वेति सादयति व्युक्ष्य न तृणं चनात्तर्धाय वैश्वानराय क्षेनं गृह्णाति ॥ २४ ॥ ब्राह्मणम् ॥ ३ [२. ४.] ॥॥

ग्रहान्गृहीत्वा । उपनिष्क्रम्य विप्रुषाꣳ होमं जुहोति तद्यद्विप्रुषाꣳ होमं जुहोति या एवास्यात्र विप्रुष स्कन्दन्ति ता एवैतदाहवनीये स्वगाकरोत्याहवनीयो वै सर्वाहुतीनां प्रतिष्ठा तस्माद्विप्रुषाꣳ होमं जुहोति ॥ १ ॥ स जुहोति । यस्ते द्रप्स स्कन्दति यस्तेऽअꣳशुरिति यो वै स्तोक स्कन्दति स द्रप्सस्तत्तमाह यस्ते ऽअꣳशुरिति तदꣳशुमाह ग्रावच्युतो धिषणायोरुपस्थादिति ग्रावणा हि च्युतोऽधिषवणाभ्याꣳ स्कन्दत्यधर्यो र्वा परि वा यः पवित्रादित्यधर्यो र्वा हि पाणिभ्याꣳ स्कन्दति पवित्राद्वा तं ते जुहोमि मनसा वषट्कृतꣳ स्वाहेति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥ २ ॥ अथ स्तीर्णायै वेदेः । द्वे तृणेऽअधर्युरादत्ते तावधर्यू प्रथमौ प्रतिपद्येते प्राणोदानौ यज्ञस्याथ प्रस्तोता वागेव यज्ञस्याथोद्गातात्मैव प्रजा-

पतिर्यज्ञस्याथ प्रतिकर्ता भिषग्वा व्यानो वा ॥ ३ ॥ तान्वाऽएतान् । पञ्चऽर्त्विजो यजमानोऽन्वारभतऽएतावान्वै सर्वो यज्ञो यावत्त एते पञ्चऽर्त्विजो भवन्ति पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतद्यजमानोऽन्वारभते ॥ ४ ॥ अथान्यतरत्तृणम् । चावालमभिप्रास्यति देवानामुत्क्रमणमसीति यत्र वै देवा यज्ञेन स्वर्गं लोकꣳ समाश्नुवत तऽएतस्माच्चावालाद्ऊर्ध्वाः स्वर्गं लोकमुपोदक्रामंस्तद्यजमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥ ५ ॥ अथान्यतरत्तृणम् । पुरस्ताद्ब्रह्मातृणामुपास्यति तूष्णीमेव स्तोमो वाऽएष प्रजापतिर्यद्ब्रह्मातारः स इदꣳ सर्वं युतऽइदꣳ सर्वꣳ सम्भवति तस्माऽएवैतत्तृणमपिदधाति तथो ह्याधर्यु न युते नैनꣳ सम्भवत्यथ यदा ज्ञपयन्ति ज्ञपयन्ति ह्यत्रोद्गातारः ॥ ६ ॥ अथ स्तोत्रमुपाकरोति । सोमः पवतऽइति स वै परागेव स्तोत्रमुपाकरोति पराञ्च स्तुवते देवान्वाऽएतानि स्तोत्राण्यभ्युपावृत्तानि यत्पवमानाः पराञ्चो ह्येते देवाः स्वर्गं लोकꣳ समाश्नुवत तस्मात्परागेव स्तोत्रमुपाकरोति पराञ्च स्तुवते ॥ ७ ॥ उपावर्तध्वमिति वाऽअन्यानि स्तोत्राणि । अभ्यावर्ते धुर्यं स्तुवतऽइमा वै प्रजा एतानि स्तोत्राण्यभ्युपावृत्तास्तस्मादिमाः प्रजाः पुनरभ्यावर्ते प्रजायन्ते ॥ ८ ॥ अथ यदत्र बर्हिष्पवमानेन स्तुवते । अत्र ह वाऽअसावग्रेऽआदित्य आस तमृतवः परिगृह्यैवात ऊर्ध्वाः स्वर्गं लोकमुपोदक्रामत्स एष ऋतुषु प्रतिष्ठितस्तपति तथो एवैतदृत्विजो यजमानं परिगृह्यैवात ऊर्ध्वाः स्वर्गं लोकमुपोत्क्रामन्ति तस्मादत्र बर्हिष्पवमानेन स्तुवते ॥ ९ ॥ नौर्ह वाऽएषा स्वर्ग्या । यद्बर्हिष्पवमानं तस्या ऋत्विज एव स्फ्याश्चारित्राश्च स्वर्गस्य लोकस्य सम्पारणास्तस्या एक एव मज्ज्ञयिता य एव निन्द्यः स यथा पूर्णामभ्यारुह्य मज्ज्ञयेदेवꣳ हैनाꣳ स मज्ज्ञयति तद्वै सर्व एव यज्ञो नौः स्वर्ग्या तस्माद्ध सर्वस्मादेव यज्ञान्निन्द्यं परिबिवाधिषति ॥ १० ॥ अथ स्तुतऽएतां वाचं वदति । अग्नीदग्नीन्विहर बर्हिः स्तृणीहि पुरोडाशाँ२॥ऽअलंकुरु पशुनेहीति विहरत्यग्नीदग्नीत्समिन्ध

ऽएवैनानेतत्तृणाति बर्हिः स्तीर्णे बर्हिषि समिद्धे देवेभ्यो जुहुवानीति पुरोडाशाँ२॥ऽअलंकुर्विति पुरोडाशैर्हि प्रचरिष्यन्भवति पशुनेक्षीति पशुꣳ क्युपाकरिष्यन्भवति ॥ ११॥ अथ पुनः प्रपद्य । आश्विनं ग्रहं गृह्णात्याश्विनं ग्रहं गृह्णीत्वोपनिष्क्रम्य यूपं परिव्ययति परिवीय यूपं पशुमुपाकरोति रसमेवास्मिन्नेतद्दधाति ॥ १२॥ स प्रातःसवनऽआलब्धः । आ तृतीयसवनाच्छ्रप्यमाण उपशेते सर्वस्मिन्नेवैतद्यज्ञे रसं दधाति सर्वं यज्ञꣳ रसेन प्रसजति ॥ १३॥ तस्मादाग्नेयमग्निष्टोमऽआलभेत । तद्धि सलोम यदाग्नेयमग्निष्टोमऽआलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीयमालभेतैन्द्राग्नानि ह्युक्थानि यदि षोडशी स्यादैन्द्रं तृतीयमालभेतेन्द्रो हि षोडशी यद्यतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्योषा रात्रिस्तद्यथायथं यज्ञक्रतून्व्यावर्तयति ॥ १४॥ अथ सवनीयैः पुरोडाशैः प्रचरति । देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तद्दूषोशाना नामौषधिर्जायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामितदाकृत्याभिषुण्वन्तीति ॥ १५॥ स यत्पशुमालभते । रसमेवास्मिन्नेतद्दधात्यथ यत्सवनीयैः पुरोडाशैः प्रचरति मेधमेवास्मिन्नेतद्दधाति तथो हास्यैष सोम एव भवति ॥ १६॥ सर्वऽऐन्द्रा भवन्ति । इन्द्रो वै यज्ञस्य देवता तस्मात्सर्वऽऐन्द्रा भवन्ति ॥ १७॥ अथ यत्पुरोडाशः धानाः करम्भो दध्यामिक्षेति भवति या यज्ञस्य देवतास्ताः सुप्रीता असन्निति ॥ १८॥ इदं वाऽअपूपमशिवा कामयते । धानाः खादेयं करम्भमश्नीयां दध्यश्नीयामामिक्षामश्नीयामिति ते सर्वे कामा या यज्ञस्य देवतास्ताः सुप्रीता असन्नित्यथ यदेषा प्रातःसवनऽएव मैत्रावरुणी पयस्यावक्लृप्ता भवति नेतरयोः सवनयोः ॥ १९॥ गायत्री वै प्रातःसवनं वहति । त्रिष्टुम्माध्यन्दिनꣳ सवनं जगती तृतीयसवनं तद्वाऽअनेकाकिन्येव त्रिष्टुम्माध्यन्दिनꣳ सवनं वहति गायत्र्या च बृहत्या चानेकाकिनी जगती तृतीयसवनं गायत्र्योष्णिहक-

कुब्भ्यामनुष्टुभा ॥ २० ॥ गायत्र्येवैकाकिनी प्रातःसवनं वहति । सैताभ्यां पङ्क्तिभ्याꣳ स्तोत्रपङ्क्त्या च कृविष्पङ्क्त्या च चत्वार्याज्यानि बर्हिष्यवमानं पञ्चमं पञ्चपदा पङ्क्तिः सैतया स्तोत्रपङ्क्त्यानेकाकिनी गायत्री प्रातःसवनं वहति ॥ २१ ॥ इन्द्रस्य पुरोडाशः । कूर्यार्धानाः पूष्णः करम्भः सरस्वत्यै दधि मित्रावरुणयोः पयस्या पञ्चपदा पङ्क्तिः सैतया कृविष्पङ्क्त्यानेकाकिनी गायत्री प्रातःसवनं वहत्येतस्या एव पङ्क्तेः सम्पदः कामाय प्रातःसवनꣳ एवैषा मैत्रावरुणी पयस्यावक्लृप्ता भवति नेतरयोः सवनयोः ॥ २२ ॥ ब्राह्मणम् ॥ ४ [२.५.] ॥ द्वितीयोऽध्यायः [२६] ॥ ॥

भक्षयित्वा समुपक्लृताः स्म इत्युक्तोत्तिष्ठति । पुरोडाशबृगलमादाय तत्र्यत्रेतदुपसन्नोऽह्वाकोऽन्वाह तदस्मै पुरोडाशबृगलं पाणावादधदाहाह्वाक वदस्व यत्ते वाग्यमित्यहीयत वाऽअह्वाकः ॥ १ ॥ तमिन्द्राग्नीऽअनुसमतनुताम् । प्रजानां प्रजात्यै तस्मादिन्द्राग्नोऽह्वाकः स एतेन च कृविषा यदस्माऽएतत्पुरोडाशबृगलं पाणावादधात्येतेन चार्षेयेण यदेतदन्वाह तेनानुसमश्नुते ॥ २ ॥ स वै सन्नेऽह्वाके । ऋतुग्रहैश्चरति तत्यत्सन्नेऽह्वाकऽऋतुग्रहैश्चरति मिथुनं वा अह्वाक ऐन्द्राग्नो ह्यह्वाको द्वौ ह्येन्द्राग्नी द्वन्द्वꣳ हि मिथुनं प्रजननꣳ स एतस्मान्मिथुनात्प्रजननादृतूल्संवत्सरं प्रजनयति ॥ ३ ॥ यद्वै सन्नेऽह्वाके । ऋतुग्रहैश्चरात सर्वं वाऽऋतवः संवत्सरः सर्वमेवैतत्प्रजनयति तस्मात्सन्नेऽह्वाकऽऋतुग्रहैश्चरति ॥ ४ ॥ तान्वै द्वादश गृह्णीयात् । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश गृह्णीयादथोऽअपि त्रयोदश गृह्णीयादस्ति त्रयोदशो मास इति द्वादश वेव गृह्णीयादेषैव सम्पत् ॥ ५ ॥ द्रोणकलशाद्गृह्णाति । प्रजापतिर्वै द्रोणकलशः स एतस्मात्प्रजापतेर्ऋतूल्संवत्सरं प्रजनयति ॥ ६ ॥ उभयतोमुखाभ्यां पात्राभ्यां गृह्णाति । कुतस्तयोरुक्तं येऽउभयतोमुखे तस्मादयमनक्तः संवत्सरः परिप्लवते तं गृहीत्वा न सादयति तस्मादयमसन्नः संवत्सरः ॥ ७ ॥ नानुवाक्यामन्वाह । हूयति वा

ऽअनुवाक्ययागतो ह्येवायमृतुर्यदि दिवा यदि नक्तं नानुवषट्करोति नेदृतूनपवृणुयाऽइति सकृदेव प्रथमौ ग्रहौ गृह्णीतः सकृदुत्तमाविद्मेवैतत्सर्वꣳ संवत्सरेण परिगृह्णीतस्तद्दिदꣳ सर्वꣳ संवत्सरेण परिगृहीतम् ॥ ८॥ निरेवान्यतरः क्रामति । प्रान्यतरः पद्यते तस्मादिमऽन्वञ्चो मासा यन्त्यथ यदुभौ वा सकृ निष्क्रामेतामुभौ वा सकृ प्रपद्येयातां पृथगु ह्येवेमे मासा ईयुस्तस्मान्निरेवान्यतरः क्रामति प्रान्यतरः पद्यते ॥ ९॥ तौ वाऽऋतुनेति षट् प्रचरतः । तद्देवा अकुरसृजन्तऽर्तुभिरिति चतुस्तद्रात्रिमसृजन्त स यद्वैतावदेवाभविष्यद्रात्रिर्ह्येवाभविष्यन्न व्यवत्स्यत् ॥ १०॥ तौ वाऽऋतुनेत्युपरिष्टाद्विश्वरतः । तद्देवाः परस्तादकुरदꣳस्तस्मादिदमह्नः कुरुथ रात्रिरुथ श्वोऽकर्भविता ॥ ११॥ ऋतुनेति वै देवाः । मनुष्यानसृजन्तऽर्तुभिरिति पशूꣳस्त यत्तन्मध्ये येन पशूनसृजन्त तस्मादिमे पशव उभयतः परिगृहीता वशमुपेता मनुष्याणाम् ॥ १२॥ तौ वाऽऋतुनेति षट् प्रचर्य । इतरथा पात्रे विपर्यस्येतेऽऋतुभिरिति चतुश्चरित्वेतरथा पात्रे विपर्यस्येतेऽन्यतरत एव तद्देवा अकुरसृजन्तान्यतरतो रात्रिमन्यतरत एव तद्देवा मनुष्यानसृजन्तान्यतरतः पशून् ॥ १३॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसि मधवे त्वेत्येवाधर्युर्गृह्णात्युपयामगृहीतोऽसि माधवाय त्वेति प्रतिप्रस्थातैतावेव वासन्तिकौ स यद्वसन्तऽओषधयो जायन्ते वनस्पतयः पच्यन्ते तेनो ह्येतौ मधुश्च माधवश्च ॥ १४॥ उपयामगृहीतोऽसि । शुक्राय त्वेत्येवाधर्युर्गृह्णात्युपयामगृहीतोऽसि शुचये त्वेति प्रतिप्रस्थातैतावेव ग्रैष्मौ स यदेतयोर्बलिष्ठं तपति तेनो ह्येतौ शुक्रश्च शुचिश्च ॥ १५॥ उपयामगृहीतोऽसि नभसे त्वेत्येवाधर्युर्गृह्णात्युपयानगृहीतोऽसि नभस्याय त्वेति प्रतिप्रस्थातैतावेव वार्षिकावमुतो वै दिवो वर्षति तेनो ह्येतौ नभश्च नभस्यश्च ॥ १६॥ उपयामगृहीतोऽसि । इषे त्वेत्येवाधर्युर्गृह्णात्युपयामगृहीतोऽस्यूर्जे त्वेति प्रतिप्रस्थातैतावेव शारदौ स यद्दरयूर्यस ओषधयः पच्यन्ते तेनो ह्येताविषश्चोर्जश्च ॥ १७॥

उपयामगृहीतोऽसि सक्से त्वेत्येवाधर्युर्गृह्णात्युपयामगृहीतोऽसि सक्स्याय त्वेति प्रतिप्रस्थातैतावेव कैमत्तिकौ स यद्वैमत्त इमाः प्रजाः सक्सेव स्वं वशमुपनयते तेनो कैतौ सक्स्य सक्स्यश्च ॥ १८ ॥ उपयामगृहीतोऽसि तपसे त्वेत्येवाधर्युर्गृह्णात्युपयामगृहीतोऽसि तपस्याय त्वेति प्रतिप्रस्थातैतावेव शैशिरौ स यदेतयोर्बलिष्ठं श्यायति तेनो कैतौ तपश्च तपस्यश्च ॥ ११ ॥ उपयामगृहीतोऽसि । अꣳहसस्पतये त्वेति त्रयोदशं ग्रहं गृह्णाति यदि त्रयोदशं गृह्णीयादथ प्रतिप्रस्थाताधर्यवे पात्रे सꣳस्रवमवनयत्यधर्युर्वा प्रतिप्रस्थातुः पात्रे सꣳस्रवमवनयत्याहरति भद्रम् ॥ २० ॥ अथ प्रतिप्रस्थाताभद्रितेन पात्रेण । ऐन्द्राग्नं ग्रहं गृह्णाति तद्यद्भद्रितेन पात्रेणैन्द्राग्नं ग्रहं गृह्णाति न वाऽऋतुग्रहाणामनुवषट्कुर्वन्त्येतेभ्यो वाऽऐन्द्राग्नं ग्रहं ग्रहीष्यन्भवति तदस्यैन्द्राग्नेनैवानुवषट्कृता भवन्ति ॥ २१ ॥ यद्वैवेन्द्राग्नं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राज्ञीज्ञनय्य ऋतुग्रहानग्रहीत्स इदꣳ सर्वं प्रज्ञनय्येदमेवैतत्सर्वं प्राणोदानयोः प्रतिष्ठापयति तदिदꣳ सर्वं प्राणोदानयोः प्रतिष्ठितमिन्द्राग्नी हि प्राणोदानाविमे हि द्यावापृथिवी प्राणोदानावनयोर्हीदꣳ सर्वं प्रतिष्ठितम् ॥ २२ ॥ यद्वैवेन्द्राग्नं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राज्ञीज्ञनय्य ऋतुग्रहानग्रहीत्स इदꣳ सर्वं प्रज्ञनय्यास्मिन्नेवैतत्सर्वस्मिन्प्राणादानौ दधाति ताविमावस्मिन्त्सर्वस्मिन्प्राणोदानौ हितौ ॥ २३ ॥ अथाता गृह्णात्येव । इन्द्राग्नीऽआगतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता । उपयामगृहीतोऽसीन्द्राग्नि यां वेष ते योनिरिन्द्राग्निभ्यां त्वेति सादयतीन्द्राग्निभ्याꣳ स्थेनं गृह्णाति ॥ २४ ॥ अथ वैश्वदेवं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राज्ञीज्ञनय्य ऋतुग्रहानग्रहीत्स यद्वैतावदेवाभविष्यद्यावत्या ह्येवाग्रे प्रजाः सृष्टास्तावत्यो ह्येवाभविष्यन्न प्राज्ञनिष्यत्त ॥ २५ ॥ अथ यद्वैश्वदेवं ग्रहं गृह्णाति । इदमेवैतत्सर्वमिमाः प्रजा यथायथं व्यवसृज्जति तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रज्ञायन्ते शुक्रपात्रेण गृह्णात्येष वै शुक्रो य एष तपति तस्य

ये रश्मयस्ते विश्वे देवास्तस्माद्ध्रुक्रपात्रेण गृह्णाति ॥ २६ ॥ अथातो गृह्णात्येव । ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वाꣳसो दाशुषः सुतम् । उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति ॥ २७ ॥ ब्राह्मणम् ॥ ५ [३. १.] ॥ ॥

गृणाति ह वाऽऋतद्धोता यद्धꣳसति । तस्माऽऋतद्गृणते प्रत्येवाध्वर्युरागृणाति तस्मात्प्रतिगरो नाम ॥ १ ॥ तं वै प्राञ्चमासीनमाह्वयते । सर्वे वाऽअन्यऽऽडद्भातुः प्राञ्च आर्त्विज्यं कुर्वन्ति तथो ह्यस्यैतत्प्रागेवार्त्विज्यं कृतं भवति ॥ २ ॥ प्रजापतिर्वाऽऽडद्भाता । योषाऽग्नीधा स ऋतत्प्रजापतिरुद्भाता योषायामृचि रेतः सिञ्चति यत्स्तुते तद्धोता शस्त्रेण प्रज्ञनयति तद्यति यथायं पुरुषः शितस्तद्यदेनद्यति तस्माद्धस्त्रं नाम ॥ ३ ॥ तदुपपत्यध्य प्रतिगृणाति । इदमेवैतद्रेतः सिक्तमुपनिमदत्यथ यत्पराङ् तिष्ठन्प्रतिगृणीयात्परागु हैवैतद्रेतः सिक्तं प्रणश्येत्तन्न प्रज्ञायेत सम्यञ्चाऽऽ चैवैतद्भवैतद्रेतः सिक्तं प्रज्ञनयतः ॥ ४ ॥ यातयामानि वै देवैश्छन्दाꣳसि । छन्दोभिर्हि देवाः स्वर्गं लोकꣳ समाश्नुवत मदो वै प्रतिगरो यो वाऽऋचि मदो यः सामन्रसो वै स तच्छन्दःस्वेवैतद्रसं दधात्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते ॥ ५ ॥ तस्माद्यद्यर्धर्चशः शꣳसेत् । अर्धर्चेऽर्धर्चे प्रतिगृणीयाद्यदि पङ्क्तः शꣳसेत्पदे-पदे प्रतिगृणीयाद्यत्र वै शꣳसन्नवानिति तदसुररक्षसानि यज्ञमन्ववचरन्ति तत्प्रतिगरेण संदधाति नाष्ट्राणाꣳ रक्षसामनन्ववचाराय यज्ञमानस्यो चैवैतद्भातृव्यलोकं हिनत्ति ॥ ६ ॥ चतुरक्षराणि ह वाऽग्रे छन्दाꣳस्यासुः । ततो जगती सोममहापतत्सा त्रीण्यक्षराणि हित्वाजगाम ततस्त्रिष्टुप्सोममहापतत्सैकमक्षरꣳ हित्वाजगाम ततो गायत्री सोममहापतत्सैतानि चाक्षराणि क्रुरत्यागह्रत्सोमं च ततोऽष्टाक्षरा गायत्र्यभवत्तस्मादाक्रुरष्टाक्षरा गायत्रीति ॥ ७ ॥ तया प्रातःसवनमतन्वत । तस्माद्गायत्रं प्रातःसवनं तयैव माध्यन्दिनꣳ सवनम-

तन्वत ताꣳ ह्र त्रिष्टुबुवाचोप ब्राह्मायानि त्रिभिरक्षरैरुप मा ह्वयस्व मा मा यज्ञाद्गर्गा इति तथेति तामुपाह्वयत तत एकादशाक्षरा त्रिष्टुबभवत्तस्मादाहुस्त्रैष्टुभं माध्यन्दिनꣳ सवनमिति ॥ ८ ॥ तयैव तृतीयसवनमतन्वत । ताꣳ ह्र जगत्युवाचोप ब्राह्मायान्येकेनाक्षरेणोप मा ह्वयस्व मा मा यज्ञाद्गर्गा इति तथेति तामुपाह्वयत ततो द्वादशाक्षरा जगत्यभवत्तस्मादाहुर्जागतं तृतीयसवनमिति ॥ ९ ॥ तदाहुः । गायत्राणि वै सर्वाणि सवनानि गायत्री ह्येवैतदुपसृज्यमानेदिति तस्मात्सꣳसिद्धं प्रातःसवने प्रतिगृणीयात्सꣳसिद्धा हि गायत्र्यागच्छत्सकृन्मद्ध्यन्दिने सवनꣳ एकꣳ हि साक्षरꣳ हि त्वागच्छत्तेनैवैनामेतत्समर्धयति कृत्स्नां करोति ॥ १० ॥ यत्र त्रिष्टुभः शस्यन्ते । त्रिमद्धतृतीयसवने त्रीणि हि साक्षराणि हि त्वागच्छत्तैरेवैनामेतत्समर्धयति कृत्स्नां करोति ॥ ११ ॥ ॥ शतम् २५०० ॥ ॥ यत्र द्यावापृथिव्यꣳ शस्यते । इमे ह्र वै द्यावापृथिवीꣳ इमाः प्रजा उपजीवन्ति तदनयोरेवैतद्द्यावापृथिव्यो रसं दधाति ते रसवत्याꣳ उपजीवनीयेꣳ इमाः प्रजा उपजीवन्ति स वा ꣳ ओ३मित्येव प्रतिगृणीयात्तद्धि सत्यं तद्देवा विदुः ॥ १२ ॥ तद्धैके । ओथामोदेव वागिति प्रतिगृणन्ति वाक्प्रतिगर एतद्वाचमुपाप्नुम इति वदन्तस्तदु तथा न कुर्याद्यथा वै कथा च प्रतिगृणात्युपाप्नैवास्य वाग्भवति वाचा हि प्रतिगृणाति तस्मादो३मित्येव प्रतिगृणीयात्तद्धि सत्यं तद्देवा विदुः ॥ १३ ॥ ब्राह्मणम् ॥ ६ [३. २.] ॥ ॥

इह्रा३ꣳ इह्रा३ꣳ इत्यभिषुणोति । इन्द्रमेवैतदाह्यावयति बृहद्बृहदितीन्द्रमेवैतदाह्यावयति ॥ १ ॥ स शुक्रामन्थिनौ प्रथमौ गृह्णाति । शुक्रवद्धयेतत्सवनमथाग्रयणꣳ सर्वेषु ह्येष सवनेषु गृह्यतेऽथ मरुत्वतीयमथोक्थ्यमुक्थानि ह्यत्रापि भवन्ति ॥ २ ॥ तद्धैके । उक्थ्यं गृहीत्वाथ मरुत्वतीयं गृह्णन्ति तदु तथा न कुर्यान्मरुत्वतीयमेव गृहीत्वाथोक्थ्यं गृह्णीयात् ॥ ३ ॥ तान्वाꣳ एतान् । पञ्च ग्रहान्गृह्णात्येष

वै वज्रो यन्माध्यन्दिनः पवमानस्तस्मात्पञ्चदशः पञ्चसामा भवति पञ्चदशो हि वज्रः स एतैः पञ्चभिर्ग्रहैः पञ्च वाऽइमा अङ्गुलयोऽङ्गुलिभिर्वै प्रहरति ॥ ४ ॥ इन्द्रो वृत्राय वज्रं प्रजहार । स वृत्रं पाप्मानꣳ हत्वा विजितेऽभयेऽनाष्ट्रे दक्षिणा निनाय तस्माद्प्येतर्हि यदैवैतेन माध्यन्दिनेन पवमानेन स्तुवतेऽथ विजितेऽभयेऽनाष्ट्रे दक्षिणा नीयन्ते तथोऽएवैष एतैः पञ्चभिर्ग्रहैः पाप्मने द्विषते भ्रातृव्याय वज्रं प्रहरति स वृत्रं पाप्मानꣳ हत्वा विजितेऽभयेऽनाष्ट्रे दक्षिणा नयति तस्माद्वाऽएतान्पञ्च ग्रहान्गृह्णाति ॥ ५ ॥ तद्यन्मरुत्वतीयान्गृह्णाति । एतद्वाऽइन्द्रस्य निष्केवल्यꣳ सवनं यन्माध्यन्दिनꣳ सवनं तेन वृत्रमजिघाꣳसत्तेन व्यजिगीषत मरुतो वाऽइत्यश्वत्थेऽपक्रम्य तस्थुः क्षत्रं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान्भवति तस्मादाश्वत्थेऽऋतुपात्रे स्यातां कार्ष्मर्यमये एव भवतः ॥ ६ ॥ तानिन्द्र उपमन्त्रयां चक्रे । उप मावर्तध्वं युष्माभिर्बलेन वृत्रꣳ हनानीति ते होचुः किं नस्ततः स्यादिति तेभ्य एतौ मरुत्वतीयौ ग्रहावगृह्णात् ॥ ७ ॥ ते होचुः । अपनिधायैनमोज उपावर्तामहाऽइति तऽएनमपनिधायैवौज उपाववृतुस्तद्वाऽइन्द्रो ऽस्पृणुतापनिधाय वै मौज उपावृतन्निति ॥ ८ ॥ स होवाच । सकृदेव मौजसोपावर्तध्वमिति तेभ्यो वै नस्तृतीयं ग्रहं गृहाणेति तेभ्य एतं तृतीयं ग्रहमगृह्णाडुपयामगृहीतोऽसि मरुतां वौजसऽइति तऽएनꣳ सकृदेवौजसोपावर्तन्त तैर्व्यजयत तैर्वृत्रमहन्क्षत्रं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान्भवति तत्क्षत्रऽएवैतद्बलं दधाति तस्मान्मरुत्वतीयान्गृह्णाति ॥ ९ ॥ स वाऽइन्द्रायैव मरुत्वते गृह्णीयात् । नापि मरुद्भ्यः स यद्वापि मरुद्भ्यो गृह्णीयात्प्रत्युष्यामिनीꣳ हृ क्षत्राय विशं कुर्यादथैतदिन्द्रमेवानु मरुत आभजति तत्क्षत्रायैवैतद्विशं कृतानुकरामनुवर्त्मानं करोति तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नापि मरुद्भ्यः ॥ १० ॥ अपक्रमाडु हैवैषामेतद्बिभयां चकार । यदिमे मन्नापक्रामेयुर्यन्नान्यद्भियेरन्निति तानेवैतदनपक्र-

मिणोऽकुरुत तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नापि मरुद्भ्यः ॥ ११ ॥ ऋतुपात्राभ्यां गृह्णाति । ऋतवो वै संवत्सरो यज्ञस्तेऽदः प्रातःसवने प्रत्यक्षमवकल्प्यन्ते यदृतुग्रहान्गृह्णात्यथैतत्परोऽक्षं माध्यन्दिने सवनेऽवकल्प्यन्ते यदृतुपात्राभ्यां मरुत्वतीयान्गृह्णाति विशो वै मरुतोऽन्नं वै विश ऋतवो वाऽइदꣳ सर्वमन्नाद्यं पचन्ति तस्मादृतुपात्राभ्यां मरुत्वतीयान्गृह्णाति ॥ १२ ॥ अथातो गृह्णात्येव । इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते ऽअपिबः सुतस्य । तव प्रणीती तव शूर शर्मन्ना-विवासन्ति कवयः सुयज्ञाः । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनि-रिन्द्राय त्वा मरुत्वते ॥ १३ ॥ मरुत्वन्तं वृषभम् । वावृधानमकवारिं दिव्यꣳ शास-मिन्द्रम् । विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम । उपयामगृही-तोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते । उपयामगृहीतोऽसि मरुतां त्वौजसऽइति तृतीयं ग्रहं गृह्णाति ॥ १४ ॥ अथ माहेन्द्रं ग्रहं गृह्णाति । पा-प्मना वाऽएतदिन्द्रः सꣳसृष्टोऽभूद्यद्विशा मरुद्भिः स यथा विजयस्य कामाय विशा समानि पात्रेऽश्नीयादेवं तद्यदस्माऽएतं मरुद्भिः समानं ग्रहमगृह्णन् ॥ १५ ॥ तं दे-वाः । सर्वस्मिन्विजितेऽभयेऽनाष्ट्रे यथेषीकां मुञ्चाद्विवृहेदेवꣳ सर्वस्मात्पाप्मनो व्यवृहन्यन्माहेन्द्रं ग्रहमगृह्णंस्तथोऽएवैष एतद्यथेषीका विमुञ्चा स्यादिवꣳ सर्व-स्मात्पाप्मनो निर्मुच्यते यन्माहेन्द्रं ग्रहं गृह्णाति ॥ १६ ॥ यद्वै वै माहेन्द्रं ग्रहं गृ-ह्णाति । इन्द्रो वाऽएष पुरा वृत्रस्य बधादथ वृत्रꣳ हत्वा यथा महाराजो विजि-ग्यान एवं महेन्द्रोऽभवत्तस्मान्माहेन्द्रं ग्रहं गृह्णाति महान्तमु चैवैनमेतत्खलु करोति वृत्रस्य बधाय तस्माद्वै वै माहेन्द्रं ग्रहं गृह्णाति श पात्रेण गृह्णात्येष वै शुक्रो य एष तपत्येष उऽएव महांस्तस्माच्छुक्रपात्रेण गृह्णाति ॥ १७ ॥ अथातो गृ-ह्णात्येव । महाँ२ऽइन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः । अ-स्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् । उपयामगृहीतोऽसि महेन्द्राय

ष्व ते योनिर्महेन्द्राय त्वेति सादयति महेन्द्राय क्षेनं गृह्णाति ॥१८॥ अथोपाकृत्यैतां वाचं वदति । अभिषोतारोऽभिषुणुतौलूखलानुद्वादयताग्नीदाशिरं विनय सौम्यस्य वित्तादिति ते वै तृतीयसवनायैवाभिषोतारोऽभिषुण्वन्ति तृतीयसवनायौलूखलानुद्वादयन्ति तृतीयसवनायाग्नीदाशिरं विनयति तृतीयसवनाय सौम्यं चरुꣳ श्रपयत्येते वै शुक्रवती रसवती सवने यत्प्रातःसवनं च माध्यन्दिनं च सवनमथैतन्निर्धीतशुक्रं यत्तृतीयसवनं तदेवैतस्मान्माध्यन्दिनात्सवनान्निर्मिमीते तथो ह्यस्यैतच्छुक्रवद्रसवत्तृतीयसवनं भवति तस्मादेतामत्र वाचं वदति ॥१९॥ ब्राह्मणम् ॥ ७ [३. ३.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १३९ ॥ ॥

घ्नन्ति वाऽएतद्यज्ञम् । यदेनं तन्वते यन्त्येव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥१॥ स एष यज्ञो हतो न ददत्ते । तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हृतस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दक्षयत्यथ समृद्ध एव यज्ञो भवति तस्माद्दक्षिणा ददाति ॥२॥ तद्वै षट्त्रिंशादशेत्येव हविर्यज्ञे ददति । न ह्वेवाशतदक्षिणः सौम्योऽध्वरः स्यादेष वै प्रत्यक्षं यज्ञो यत्प्रजापतिः पुरुषो वै प्रजापतेर्नेदिष्ठꣳ सोऽयꣳ शतायुः शततेजाः शतवीर्यस्तꣳ शतेनैव दक्षयति नाशतेन तस्मान्नाशतदक्षिणः सौम्योऽध्वरः स्यान्नो ह्वेवाशतदक्षिणेन यजमानस्यर्त्विक्स्यान्नेदस्यात्तिभूरसानि यमिमे हविनिष्यन्त्येव न ददक्षयिष्यन्तीति ॥३॥ त्रया वै देवा देवाः । त्रयेव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधाविभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाꣳ शुश्रुवुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणाञ्छुश्रुवुषोऽनूचानांस्तऽएनमुभये देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥४॥ ता वाऽएताः । ऋत्विजामेव द-

क्षिणा अन्यं वाऽएतऽएतस्यात्मानꣳ संस्कुर्वन्त्येतं यज्ञमृङ्मयं यजुर्मयꣳ साममय-माकृतिमयꣳ सोऽस्यामुष्मिंल्लोकऽआत्मा भवति तꣳ ये माऽवीज्ञनन्तेति तस्मादक्षिभ्य एव दक्षिणा दद्यान्नानृक्षिभ्यः ॥५॥ अथ प्रतिपरेत्य गार्हपत्यम् । दाक्षिणानि जुहोति स दशाकृोमीये वाससि हिरण्यं प्रबध्यावधाय जुहोति देवलोके मेऽयदिति वै यजते यो यजते सोऽस्येष यज्ञो देवलोकमेवाभिप्रैति तदनूची दक्षिणा यां ददाति सैति दक्षिणामन्वारभ्य यजमानः ॥६॥ चतस्रो वै दक्षिणाः । हिरण्यं गौर्वासोऽश्वो न वै तदवकल्पते यदश्वस्य पादमवदध्याद्यद्वा गोः पादमवदध्यात्तस्माद्दशाकृोमीये वाससि हिरण्यं प्रबध्यावधाय जुहोति ॥७॥ सौरीभ्यामृग्भ्यां जुहोति । तमसा वाऽअसौ लोकोऽलर्कितः स एतेन ज्योतिषा तमोऽपकृत्य स्वर्गं लोकमुपसंक्रामति तस्मात्सौरीभ्यामृग्भ्यां जुहोति ॥८॥ स जुहोति । उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यꣳ स्वाकृेत्यतया गायत्र्या गायत्री वाऽइयं पृथिवी सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥९॥ अथ द्वितीयां जुहोति । चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाकृेत्येतया त्रिष्टुभा लोकमेवैतयोपैति ॥१०॥ अथाग्नीध्रे । द्वे वैकां वा जुहोति तद्यद्द्वावाग्नीध्रे द्वे वैकां वा जुहोत्यग्निर्वै पशूनामीष्टे तऽएनमभितः परिणिविशन्ते तमेतयाऽऽकृत्या प्रीणाति सोऽस्मै प्रीतोऽनुमन्यते तेनानुमतां ददाति ॥११॥ स जुहोति । अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम स्वाकृेत्यथ यद्यश्वं युक्तं वायुक्तं वा दास्यन्त्स्याद्यथ द्वितीयां जुहुयाद्यद्यु न नाद्रियेत ॥१२॥ स जुहोति । अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजान्जयतु वाजसातावयꣳ शत्रून्जयतु जर्हृषाणः स्वाकृेति वाजसा क्त्यश्वः ॥१३॥ अथ हिरण्यमादाय शालामभ्येति । दक्षि-

णेन वेदिं दक्षिणा उपतिष्ठन्ते सोऽग्रेण शालां तिष्ठन्नभिमन्त्रयते रूपेण वो रूपमभ्यागामिति न ह वाऽग्रे पशवो दानाय चक्रमिरे तेऽपनिधाय स्वानि रूपाणि शरीरैः प्रत्युपातिष्ठन्त तानेतद्देवाः स्वैरेव रूपैर्यज्ञस्यार्धादुपायंस्ते स्वानि रूपाणि ज्ञानाना अभ्यवायंस्ते रातमनसोऽलं दानायाभवंस्तथोऽएवैनानिष एतत्स्वैरेव रूपैर्यज्ञस्यार्धादुपैति ते स्वानि रूपाणि ज्ञानाना अभ्यवायन्ति ते रातमनसोऽलं दानाय भवन्ति ॥ १४॥ तुथो वो विश्ववेदा विभजतीति । ब्रह्म वै तुथस्तदेना ब्रह्मणा विभजति ब्रह्म वै दक्षिणीयं चादक्षिणीयं च वेद तथो ह्यस्यैता दक्षिणीययैव दत्ता भवन्ति नादक्षिणीयाय ॥ १५॥ ऋतस्य पथा प्रेतेति । यो वै देवानां पथैति स ऋतस्य पथैति चन्द्रदक्षिणा इति तदेतेन ज्योतिषा यन्ति ॥ १६॥ अथ सदोऽभ्येति । वि स्वः पश्य व्यन्तरिक्षमिति वि वया दक्षिणाया लोकं ख्येषमित्येवैतदाह ॥ १७॥ अथ सदः प्रेक्षते । यतस्व सदस्यैरिति मा वा सदस्या अतिरिक्षतेत्येवैतदाह ॥ १८॥ अथ हिरण्यमादायाग्नीध्रमभ्येति । ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यमिति यो वै ज्ञातो ज्ञातकुलीनः स पितृमान्पैतृमत्यो या वै ज्ञातायापि कतिपयीर्दक्षिणा ददाति ताभिर्मऽकुर्ज्ञायत्यृषिमार्षेयमिति यो वै ज्ञातोऽनूचानः स ऋषिरार्षेयः सुधातुदक्षिणमिति स हि सुधातुदक्षिणः ॥ १९॥ अथैवमुपसद्य । अग्नीधे हिरण्यं ददात्यस्मद्राता देवत्रा गछतेति यां वै रातमना अविचिकित्सन्दक्षिणां ददाति तया मऽकुर्ज्ञायति देवत्रा गछतेति देवलोके मेऽध्यसदिति वै यजते यो यजते तद्देवलोकऽएवैनमेतदपिबिनं करोति प्रदातारमाविशतेति मामाविशतित्येवैतदाह तथो ह्यस्मादेताः पराच्यो न प्रणश्यन्ति तद्यद्अग्नीधे प्रथमाय दक्षिणां ददात्यतो हि विश्वे देवा अमृतत्वमपाजायंस्तस्माद्अग्नीधे प्रथमाय दक्षिणां ददाति ॥ २०॥ अथैवमेवोपसद्य । आत्रेयाय हिरण्यं ददाति यत्र वाऽअदः प्रातरनुवाकमन्वाकुस्तद्ध स्मैतत्पुरा शꣳसन्त्यत्रिर्वाऽऋषीणाꣳ होतासा-

थैतत्सदोऽसुरतमसमभिपुप्लुवे तऽऋषयोऽब्रिमब्रुवन्नेहि प्रत्यङ्डिदं तमोऽपनुदीति स एतत्तमोऽपाहन्नयं वै ज्योतिर्य इदं तमोऽपाबधीदिति तस्माऽएतज्ज्योतिर्हिरण्यं दक्षिणामनयन्ज्योतिर्हि हिरण्यं तद्वै स तत्तेजसा वीर्येणाऽर्षिस्तमोऽपनुदाना-थेष एतेनैवैतज्ज्योतिषा तमोऽपहन्ति तस्मादात्रेयाय हिरण्यं दधाति ॥ २१ ॥ अथ ब्रह्मणे । ब्रह्मा हि यज्ञं दक्षिणतोऽभिगोपायत्यथोद्गात्रेऽथ होत्रेऽथाध्वर्यु-भ्याꣳ हविर्धानऽआसीनाभ्यामथ पुनरेत्य प्रस्तोत्रेऽथ मैत्रावरुणायाथ ब्राह्मणाच्छꣳसिनेऽथ पोत्रेऽथ नेष्ट्रेऽथाग्नीधेऽथोन्नेत्रेऽथ ग्रावस्तुतेऽथ सुब्रह्मण्यायै प्रतिहर्त्रेऽउत्तमाय ददाति प्रतिहर्ता वाऽएष सोऽस्माऽएतद्दत्तः प्रतिहरति तथो हास्मादेताः पराच्यो न प्रणश्यन्ति ॥ २२ ॥ अथाग्नीन्द्राय मरुत्वतेऽनुब्रूहीति । यत्र वै प्रजापतिरग्नये ददौ तद्धेन्द्र ईक्षां चक्रे सर्वं वाऽअयमिदं दास्यति नास्मभ्यं किं चन परिशेत्स्यतीति स एतं वज्रमुदयच्छदिन्द्राय मरुत्वतेऽनुब्रूहीत्यदानाय ततो नाददात्स एषोऽप्येतर्हि तथैव वज्र उद्यम्यतऽइन्द्राय मरुत्वतेऽनुब्रूहीत्यदानाय ततो न ददाति ॥ २३ ॥ चतस्रो वै दक्षिणाः । हिरण्यमायुरेवैतेनात्मनस्त्रायत ऽआयुर्हि हिरण्यं तदग्नयऽआग्नीध्रं कुर्वतेऽददात्तस्मादप्येतर्ह्यग्नीधे हिरण्यं दीयते ॥ २४ ॥ अथ गौः । प्राणमेवैतयात्मनस्त्रायते प्राणो हि गौरन्नꣳ हि गौरन्नꣳ हि प्राणास्ताꣳ रुद्राय होत्रेऽददात् ॥ २५ ॥ अथ वासः । वचमेवैतेनात्मनस्त्रायते वग्घि वासस्तद्बृहस्पतयऽउद्गायतेऽददात् ॥ २६ ॥ अथाश्वः । वज्रो वाऽअश्वो वज्रमेवैतत्पुरोगां कुरुते यमलोके मेऽप्यसदिति वै यजते यो यजते तद्यमलोकऽएवैनमेतदपिन्वितं करोति तं यमाय ब्रह्मणेऽददात् ॥ २७ ॥ स हिरण्यं प्रत्येति । अग्नये त्वा मक्ष्यं वरुणो ददात्वित्यग्नये ह्येतद्वरुणोऽददात्सोऽमृतत्वमशीयायुर्दात्रऽएधि मयो मह्यं प्रतिग्रहीत्रऽइति ॥ २८ ॥ अथ गां प्रत्येति । रुद्राय त्वा मक्ष्यं वरुणो ददात्विति रुद्राय ह्येतां वरुणोऽददात्सोऽमृतत्वमशीय प्राणो दात्रऽएधि वयो

मक्षं प्रतिग्रहीत्रऽइति ॥ २१ ॥ अथ वासः प्रत्येति । बृहस्पतये त्वा मक्षं वरुणो ददाविति बृहस्पतये क्षेतद्वरुणोऽददात्सोऽमृतत्वमशीय त्वदात्रऽएधि मयो मक्षं प्रतिग्रहीत्रऽइति ॥ ३० ॥ अथाश्वं प्रत्येति । यमाय त्वा मक्षं वरुणो ददाविति यमाय क्षेतं वरुणोऽददात्सोऽमृतत्वमशीय क्षयो दात्रऽएधि वयो मक्षं प्रतिग्रहीत्रऽइति ॥ ३१ ॥ अथ यदन्यद्ददाति । कामेनैव तद्ददातीदं मेऽप्यमुत्रासदिति तत्प्रत्येति कोऽदात्कस्माऽअदात्कामोऽदात्कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्तऽइति तद्देवतायाऽअतिदिशति ॥ ३२ ॥ तदाहुः । न देवताया ऽअतिदिशेदिदं वै यां देवताꣳ समिन्द्धे सा दीप्यमाना श्वः-श्वः श्रेयसी भवतीदं वै यस्मिन्नग्नावभ्यादधति स दीप्यमान एव श्वः-श्वः श्रेयान्भवति श्वः-श्वो ह वै श्रेयान्भवति य एवं विद्वान्प्रतिगृह्णाति तद्यथा समिद्धे जुहुयादेवमेतां जुहोति यामधीयते ददाति तस्मादधीयन्नातिदिशेत् ॥ ३३ ॥ ब्राह्मणम् ॥ १ [३. ४.] ॥ ॥

त्रया वै देवाः । वसवो रुद्रा आदित्यास्तेषां विभक्तानि सवनानि वसूनामेव प्रातःसवनꣳ रुद्राणां माध्यन्दिनꣳ सवनमादित्यानां तृतीयसवनं तद्वाऽअमिश्रमेव वसूनां प्रातःसवनममिश्रꣳ रुद्राणां माध्यन्दिनꣳ सवनं मिश्रमादित्यानां तृतीयसवनम् ॥ १ ॥ ते ह्यादित्या ऊचुः । यथेदममिश्रं वसूनां प्रातःसवनममिश्रꣳ रुद्राणां माध्यन्दिनꣳ सवनमेवं न इमं पुरा मिश्राद्ग्रहं जुहुयेति तथेति देवा ब्रुवंस्ते सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनादेतमजुह्वुः स एषोऽप्येतर्हि तथैव ग्रहो ह्रूयते सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनात् ॥ २ ॥ ते ह्यादित्या ऊचुः । नेव वाऽइतरस्मिन्त्सवने स्मो नेवेतरस्मिन्यद्वै नो रक्षाꣳसि न क्षिꣳस्युरिति ॥ ३ ॥ ते ह द्विदेवत्यानूचुः । रक्षोभ्यो वै बिभीमो हन्त युष्मान्प्रविशामेति ॥ ४ ॥ ते ह द्विदेवत्या ऊचुः । किमस्माकं ततः स्यादित्यस्माभिरनुवषट्कृता भविष्यथेत्यु ह्यादित्या ऊचुस्तथेति ते द्विदेवत्यान्प्राविशन् ॥ ५ ॥

स यत्र प्रातःसवने । द्विदेवत्यैः प्रचरति तत्प्रतिप्रस्थातादित्यपात्रेण द्रोणकलशात्प्रतिनिगृह्णीतऽउपयामगृहीतोऽसीत्येतावतार्धर्युरेवाश्रावयत्यर्धर्योरनु क्रोमं जुहोति प्रतिप्रस्थातादित्येभ्यस्त्वेति सꣳस्रवमवनयत्येतावतैवमेव सर्वेषु ॥ ६॥ तद्यत्प्रतिप्रस्थाता प्रतिनिगृह्णीते । द्विदेवत्यान्वै प्राविशन्नस्माभिरनुवषट्कृता भविष्यतेत्यु क्रादित्या ऊचुर्या वाऽअमूं द्वितीयामाकुतिं जुहोति स्विष्टकृते वै तां जुहोति स्विष्टकृतो वाऽएतेऽनुवषट्क्रियन्ते तथो क्रास्यैतेऽनुवषट्कृता इष्टꣳस्विष्टकृतो भवन्त्युत्तरार्धे जुहोत्येषा क्वेतस्य देवस्य दिक्तस्मादुत्तरार्धे जुहोति ॥ ७॥ यद्वेव प्रतिप्रस्थाता प्रतिनिगृह्णीते । द्विदेवत्यान्वै प्राविशत्स यानेव प्राविशंस्तेभ्य एवैतन्निर्मिमीतेऽथापिदधाति रक्षोभ्यो क्यबिभयुर्विष्णऽउरुगायैष ते सोमस्तꣳ रक्षस्व मा वा दभन्निति यज्ञो वै विष्णुस्तद्यज्ञायैवैतत्परिददाति गुप्त्याऽअथाह सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनादेहि यजमानेति ॥ ८॥ ते सम्प्रपद्यन्ते । अध्वर्युश्च यजमानश्चाग्नीध्रश्च प्रतिप्रस्थाता चोन्नेताथ योऽन्यः परिचरो भवत्युभे द्वारेऽअपिदधति रक्षोभ्यो क्यबिभयुरथाध्वर्युरादित्यस्थालीं चादित्यपात्रं चादत्ते स उपर्युपरि पूतभृतं विगृह्णाति नेद्यवश्चोतदिति ॥ ९॥ अथ गृह्णाति । कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यतऽआदित्येभ्यस्त्वेति ॥ १०॥ तं वै नोपयामेन गृह्णीयात् । अग्ने क्वेवैष उपयामेन गृहीतो भवत्यज्ञामितायै ज्ञामि ह कुर्याद्यदेनमत्राप्युपयामेन गृह्णीयात् ॥ ११॥ अथापगृह्य पुनरानयति । कदा चन प्रयुहस्युभे निपासि जन्मनी । तुरीयादित्य सवनं तऽइन्द्रियमातस्थावमृतं दिव्यादित्येभ्यस्त्वेति ॥ १२॥ अथ दधि गृह्णाति । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु पशवस्तत्पशुष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं मध्यत-इव गृह्णीयादित्याहुर्मध्यत-इव क्वीदं पशूनां पय इति पश्चादिव त्वेव गृह्णीयात्पश्चादिव क्वीदं पशूनां पयः ॥ १३॥ यद्वेव

दधि गृह्णाति । कृतोहिष्टा वाऽएते सऊस्रवा भवन्ति नालमाकृत्यै तानेवैतत्पुनरप्याययति तथालमाकृत्यै भवन्ति तस्माद्दधि गृह्णाति ॥ १४ ॥ स गृह्णाति । यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वेति ॥ १५ ॥ तमुपाꣳशुसवनेन मेक्षयति । विवस्वान्वाऽएष आदित्यो निदानेन यदुपाꣳशुसवन आदित्यग्रहो वाऽएष भवति तदेनꣳ स्वऽएव भागे प्रीणाति ॥ १६ ॥ तं न दशाभिर्न पवित्रेणोपस्पृशति एते वै शुक्रवती रसवती सवने यत्प्रातःसवनं च माध्यन्दिनं च सवनमथैतन्निर्धीतिशुक्रं यत्तृतीयसवनꣳ स यन्न दशाभिर्न पवित्रेणोपस्पृशति तेनो ह्यस्यैतच्छुक्रवद्रसवत्तृतीयसवनं भवति तस्मान्न दशाभिर्न पवित्रेणोपस्पृशति ॥ १७ ॥ स मेक्षयति । विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्वेत्यथोन्नेत्रऽउपाꣳशुसवनं प्रयच्छत्यथाह्रोन्नेतारमासृज ग्रावणा इति तानाधवनीये वासृजति चमसे वा ॥ १८ ॥ राजानमुन्नीय । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु ग्रावाणस्तदेनान्त्स्वऽएव भागे प्रीणात्यपोर्णुवन्ति द्वारः ॥ १९ ॥ अथापिधायोपनिष्क्रामति । रुद्रेभ्यो ह्यबिभयुरथाह्रादित्येभ्योऽनुब्रूहीत्यत्र सम्पश्येद्यदि कामयेताश्राव्य वेव सम्पश्येदादित्येभ्यः प्रेष्य प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो मरुत्वतस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्य इति वषट्कृते जुहोति नानुवषट्करोति नेत्पशूनग्नौ प्रवृणजानीति प्रयच्छति प्रतिप्रस्थात्रे सऊस्रवौ ॥ २० ॥ अथ पुनः प्रपद्य । आग्रयणमादत्त ऽउदीचीनदꣳशं पवित्रं वितन्वन्ति प्रस्कन्दयत्यध्वर्युराग्रयणस्य सम्प्रगृह्णाति प्रतिप्रस्थाता सऊस्रवावानयत्युन्नेता चमसेन वोदञ्चनेन वा ॥ २१ ॥ तं चतसृणां धाराणामाग्रयणं गृह्णाति । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु गावस्तस्मादिदं गवां चतुर्धाविहितं पयस्तस्माच्चतसृणां धाराणामाग्रयणं गृह्णाति ॥ २२ ॥ तद्यत्प्रतिप्रस्थाता सऊस्रवौ सम्प्रगृह्णाति । आदित्यग्रहो वाऽएष भवति न वा

ऽआदित्यग्रहस्यानुवषट्करोत्येतस्माद्वै सावित्रं ग्रहं ग्रहीष्यन्भवति तदस्य सावित्रेणैवानुवषट्कृतो भवति ॥२३॥ यद्वेव प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति । पुरा वाऽएभ्य एतस्मिन्नाद्रुहमक्रौषुः पुरा तृतीयसवनात्तृतीयसवनाय वाऽएष ग्रहो गृह्यते तदादित्यास्तृतीयसवनमपियन्ति तथा न बर्हिर्धा यज्ञाद्रवन्ति तस्मात्प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति ॥२४॥ ब्राह्मणम् ॥ २ [३. ५.] ॥ तृतीयोऽध्यायः [२७.] ॥ ॥

मनो ह वाऽअस्य सविता । तस्मात्सावित्रं गृह्णाति प्राणो ह वाऽअस्य सविता तमेवास्मिन्नेतत्पुरस्तात्प्राणं दधाति यदुपाꣳशुं गृह्णाति तमेवास्मिन्नेतत्पश्चात्प्राणं दधाति यत्सावित्रं गृह्णाति ताविमाऽउभयतः प्राणौ हितौ यश्चायमुपरिष्टाद्यश्चाधस्तात् ॥१॥ ऋतवो वै संवत्सरो यज्ञः । तेऽदः प्रातःसवने प्रत्यक्षमवकल्प्यन्ते यदृतुग्रहान्गृह्णात्यथैतत्परोऽक्षं माध्यन्दिने सवनेऽवकल्प्यन्ते यदृतुपात्राभ्यां मरुत्वतीयान्गृह्णाति न वाऽअत्रर्तुभ्य इति कं चन ग्रहं गृह्णन्ति नर्तुपात्राभ्यां कश्चन ग्रहो गृह्यते ॥२॥ एष वै सविता य एष तपति । एष ऽएव सर्वऽऋतवस्तदृतवः संवत्सरस्तृतीयसवने प्रत्यक्षमवकल्प्यन्ते तस्मात्सावित्रं गृह्णाति ॥३॥ तं वाऽउपाꣳशुपात्रेण गृह्णाति । मनो ह वाऽअस्य सविता प्राण उपाꣳशुस्तस्मादुपाꣳशुपात्रेण गृह्णात्यन्तर्यामपात्रेण वा समानꣳ ह्येतद्यदुपाꣳशवन्तर्यामौ प्राणोदानौ हि ॥४॥ आग्रयणाद्गृह्णाति । मनो ह वाऽअस्य सवितात्माग्रयण आत्मन्येवैतन्मनो दधाति प्राणो ह वाऽअस्य सवितात्माग्रयण आत्मन्येनेतत्प्राणं दधाति ॥५॥ अथातो गृह्णात्येव । वामस्य सवितर्वामसु श्वो दिवे-दिवे वाममस्मभ्यꣳ सावीः । वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम । उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा असि चनो मयि धेहि । ज्रिन्व यज्ञं ज्रिन्व यज्ञपतिं भगायेति ॥६॥ तं गृहीत्वा न सादयति । मनो ह वा

ऽस्य सविता तस्मादिदमसन्नं मनः प्राणो ह वाऽस्य सविता तस्मादयमसन्नः प्राणः संचरत्यथाह देवाय सवित्रेऽनुब्रूहीत्याश्राव्याह देवाय सवित्रे प्रेष्येति वषट्कृते जुहोति नानुवषट्करोति मनो ह वाऽस्य सविता नेन्मनोऽग्नौ प्रवृणाज्ञानीति प्राणो ह वाऽस्य सविता नेत्प्राणमग्नौ प्रवृणाज्ञानीति ॥७॥ अथाभक्षितेन पात्रेण । वैश्वदेवं ग्रहं गृह्णाति तद्यदभक्षितेन पात्रेण वैश्वदेवं ग्रहं गृह्णाति न वै सावित्रस्यानुवषट्करोत्येतस्माद्वै वैश्वदेवं ग्रहं ग्रहीष्यन्भवति तदस्य वैश्वदेवेनैवानुवषट्कृतो भवति ॥८॥ यद्वै वैश्वदेवं ग्रहं गृह्णाति । मनो ह वाऽस्य सविता सर्वमिदं विश्वे देवा इदमेवैतत्सर्वं मनसः कृतानुकरमनुवर्त्म करोति तद्दिष्ट सर्वं मनसः कृतानुकरमनुवर्त्म ॥९॥ यद्वै वैश्वदेवं ग्रहं गृह्णाति । प्राणो ह वाऽस्य सविता सर्वमिदं विश्वे देवा अस्मिन्नेवैतत्सर्वस्मिन्प्राणोदानौ दधाति तावेवास्मिन्त्सर्वस्मिन्प्राणोदानौ हि तौ ॥१०॥ यद्वै वैश्वदेवं ग्रहं गृह्णाति । वैश्वदेवं वै तृतीयसवनं तदुच्यतऽएव सामतो यस्माद्वैश्वदेवं तृतीयसवनमुच्यतऽऋक्तोऽथैतदेव यजुष्टः पुरश्चरणतो यदेतं महावैश्वदेवं गृह्णाति ॥११॥ तं वै पूतभृतो गृह्णाति । वैश्वदेवो वै पूतभृदतो हि देवेभ्य उन्नयत्यतो मनुष्येभ्योऽतः पितृभ्यस्तस्माद्वैश्वदेवः पूतभृत् ॥१२॥ तं वाऽअपुरोरुकं गृह्णाति । विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति सर्वं वै विश्वे देवा यदृचो यद्यजूंषि यत्सामानि स यदेवैनं विश्वेभ्यो देवेभ्यो गृह्णाति तेनो हास्येष पुरोरुञ्चन्भवति तस्मादपुरोरुकं गृह्णाति ॥१३॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसि सुशर्मासि सुप्रतिष्ठान इति प्राणो वै सुशर्मा सुप्रतिष्ठानो बृहद्रथन्तराभ्यां नम इति प्रजापतिर्वै बृहद्रथन्तराः प्रजापतये नम इत्येवैतदाह विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णात्यथेत्य प्राङुपविशति ॥१४॥ स यत्रैताः होता शंसति । एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये

विꣳशती च । तिसृभिश्च वहसे त्रिꣳशता च नियुद्भिर्वायविह ता विमुञ्चेति तदेतस्यां वायव्यायामृचि पात्राणि विमुच्यन्ते वायुप्रणेत्रा वै पशवः प्राणो वै वायुः प्राणेन हि पशवश्चरन्ति ॥१५॥ स ह देवेभ्यः पशुभिरुपचक्राम । तं देवाः प्रातःसवनेऽन्वमल्लयन्त स नोपाववर्त तं माध्यन्दिने सवनेऽन्वमल्लयन्त स ह नैवोपाववर्त तं तृतीयसवनेऽन्वमल्लयन्त ॥१६॥ स होपावर्त्स्यन्नुवाच । यद्ध उपावर्तेय किं मे ततः स्यादिति वयैवैतानि पात्राणि युञ्ज्येरंस्त्वया विमुच्येरन्निति तदेनेनैतत्पात्राणि युञ्जन्ति यदैन्द्रवायवाग्रान्प्रातःसवने गृह्णात्यथैनेनैतत्पात्राणि विमुच्यन्ते यदाह नियुद्भिर्वायविह ता विमुञ्चेति पशवो वै नियुतस्तत्पशुभिरेवैतत्पात्राणि विमुच्यन्ते ॥१७॥ स यत्प्रातःसवनऽउपावर्त्स्यत् । गायत्रं वै प्रातःसवनं ब्रह्म गायत्री ब्राह्मणेषु ह पशवोऽभविष्यन्नथ यन्माध्यन्दिने सवनऽउपावर्त्स्यदैन्द्रं वै माध्यन्दिनꣳ सवनं क्षत्रमिन्द्रः क्षत्रियेषु ह पशवोऽभविष्यन्नथ यत्तृतीयसवनऽउपावर्तत वैश्वदेवं वै तृतीयसवनꣳ सर्वमिदं विश्वे देवास्तस्मादिमे सर्वत्रैव पशवः ॥१८॥ ब्राह्मणम् ॥ ३ [४. १.] ॥ ॥

सौम्येन चरुणा प्रचरति । सोमो वै देवानाꣳ हविरथैतत्सोमायैव हविष्क्रियते तथातः सोमोऽनर्क्तितो भवति चरुर्भवति चरुर्वै देवानामन्नमोदनो हि चरुरोदनो हि प्रत्यक्षमन्नं तस्माच्चरुर्भवति ॥१॥ तेन न प्रातःसवने प्रचरति । न माध्यन्दिने सवनऽएते वै देवानां निष्केवल्ये सवने यत्प्रातःसवनं च माध्यन्दिनं च सवनं पितृदेवत्यो वै सोमः ॥२॥ स यत्प्रातःसवने वा प्रचरेत् । माध्यन्दिने वा सवने समदꣳ ह कुर्याद्देवेभ्यश्च पितृभ्यश्च तेन तृतीयसवने प्रचरति वैश्वदेवं वै तृतीयसवनं तथा होसमदं करोति नानुवाक्यामन्वाह सकृद्धि क्येव पराञ्चः पितरस्तस्मान्नानुवाक्यामन्वाह ॥३॥ अथ चतुर्गृहीतमाज्यं गृहीत्वा । आघ्राव्याह घृतस्य यजेति वषट्कृते जुहोति तथा अतः प्राच्य आकुतयो

ङ्कृता भवन्ति ताभ्य एवैतद्दर्दधाति तथा क्षासमदं करोति ॥४॥ ॥शतम् २६००॥॥ स आज्यस्योपस्तीर्य । द्विश्चरोरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्याश्रावयाह सौम्यस्य यजेति वषट्कृते जुहोति ॥५॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । आश्रावयाह घृतस्य यजेति वषट्कृते जुहोति तथा अत ऊर्ध्वा आकृतीर्होष्यन्भवति ताभ्य एवैतद्दर्दधाति तथा क्षासमदं करोति स यदि कामयेतोभयतः परियजेय्यु कामयेतान्यतरतः परियजेत् ॥६॥ अथ प्रचरणीति स्रुग्भवति । तस्यां चतुर्गृहीतमाज्यं गृहीत्वार्ध्वर्युः शालाकैर्धिष्ण्यान्व्याघारयति तद्यच्छालाकैर्धिष्ण्यान्व्याघारयति यद्देवेनानदो देवा अब्रुवंस्तृतीयसवने वो घृत्याकृतिः प्राप्स्यति न सौम्यापक्रतो हि युष्मत्सोमपीथस्तेन सोमाकृतिं नार्हथेति सैनानेषा तृतीयसवन एव घृत्याकृतिः प्राप्नोति न सौम्या यच्छालाकैर्धिष्ण्यान्व्याघारयति तानेतैरेव यज्ञुर्भिर्यथोपकीर्णं यथापूर्वं व्याघारयति मार्जालीय एवोत्तमम् ॥७॥ तद्वैके । आग्नीध्रीये पुनराघारयन्त्युदग्य इदं कर्मानुसंतिष्ठाता इति तद्धु तथा न कुर्यान्मार्जालीय एवोत्तमꣳ ॥८॥ स यत्राध्वर्युः । शालाकैर्धिष्ण्यान्व्याघारयति तत्प्रतिप्रस्थाता पात्नीवतं ग्रहं गृह्णाति यज्ञाद्वै प्रजाः प्रजायन्ते यज्ञात्प्रजायमाना मिथुनात्प्रजायन्ते मिथुनात्प्रजायमाना अक्तितो यज्ञस्य प्रजायन्ते तदेना एतदक्तितो यज्ञस्य मिथुनात्प्रजननात्प्रजनयति तस्मान्मिथुनात्प्रजननादक्तितो यज्ञस्येमाः प्रजाः प्रजायन्ते तस्मात्पात्नीवतं गृह्णाति ॥९॥ तं वाऽउपाꣳशुपात्रेण गृह्णाति । यदि सावित्रमुपाꣳशुपात्रेण गृह्णीयादक्तर्यामपात्रेणैतं यदि सावित्रमक्तर्यामपात्रेण गृह्णीयादुपाꣳशुपात्रेणैतꣳ समानꣳ क्षेतय्यदुपाꣳश्वक्तर्यामौ प्राणो हि यो वै प्राणः स उदानो वृषा वै प्राणो योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१०॥ तं वाऽअपुरोरुकं गृह्णाति । वीर्यं वै पुरोरुङ्वीर्यं स्त्रीषु वीर्यं दधानीति तस्मादपुरोरुकं गृह्णाति ॥११॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम तऽइति ब्रह्म

वै बृहस्पतिर्ब्रह्मप्रसूतस्य देव सोम तꣳइत्येवैतदाहेन्दोरिन्द्रियावत इति वीर्यवत इत्येवैतदाह यदाहेन्दोरिन्द्रियावत इति पत्नीवतो ग्रहां२॥ꣳऋध्यासमिति न सम्प्रति पत्नीभ्यो गृह्णाति नेत्स्त्रीषु वीर्यं दधानीति तस्मान्न सम्प्रति पत्नीभ्यो गृह्णाति ॥ १२॥ अथ यः प्रचरणाᳪ सꣳस्रवः परिशिष्टो भवति । तेनैनᳪ श्रीणाति समर्धयति वाꣳअन्यान्यदाऽऽहुतीर्जुहोत्यन्यैतं व्यर्धयति वज्रो वाꣳआज्यमेतेन वै देवा वज्रेणाज्येनाग्नेव पत्नीर्निरार्द्नुवंस्ता हता निरष्टा नात्मनश्चनैशत न दायस्य चनैशत तथोꣳएवैष एतेन वज्रेणाज्येन हन्येव पत्नीर्निरर्द्नोति ता हता निरष्टा नात्मनश्चनेशते न दायस्य चनेशते ॥ १३॥ स श्रीणाति । अर्कं परस्तादर्कमवस्ताद्यदन्तरिक्षं तदु मे पिताभूत् । अर्कꣳ सूर्यमुभयतो ददर्शार्कं देवानां परमं गुहा यदिति स यदर्कमर्कमिति श्रीणाति पुꣳस्त्वेवैतद्वीर्यं दधाति ॥ १४॥ अथाग्नीत्पात्नीवतस्य यजेति । वृषा वाꣳअग्नीध्योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते स जुहोत्यग्नाꣳइ पत्नीवन्निति वृषा वाꣳअग्निर्योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥ १५॥ सन्नूर्देवेन त्वष्ट्रेति । त्वष्टा वै सिक्तꣳ रेतो विकरोति तदेष एवैतत्सिक्तꣳ रेतो विकरोति सोमं पिब स्वाहेत्युत्तरार्धे जुहोति या इतरा आहुतयस्ते देवा अथैताः पत्न्य एवमिव हि मिथुनं क्लप्तमुत्तरतो हि स्त्री पुमाᳪसमुपशेतꣳआहरत्यध्वर्युरग्नीधे भक्षꣳ स आहाध्वर्यꣳउप मा ह्वयस्वेति तं न प्रत्युपह्वयेत को हि हुतस्य निरष्टस्य प्रत्युपह्वस्तं वै प्रत्येवोपह्वयेत जुहोत्यस्याग्नौ वषट्कुर्वन्ति तस्मात्प्रत्येवोपह्वयेत ॥ १६॥ अथ सम्प्रेष्यति । अग्नीन्नेष्टरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा संख्यापयोन्नेतर्होतुश्चमसमनून्नय सोमं मातिरोरिच इति यद्यग्निष्टोमः स्यात् ॥ १७॥ यद्युक्थ्यः स्यात् । सोमं प्रभावयेति ब्रूयात्स बिभ्रद्वैतत्पात्रमग्नीन्नेष्टरुपस्थमासीदित्यग्निर्वाꣳएष निदानेन यदाग्नीध्रो योषा नेष्टा वृषा वाꣳअग्नीध्योषा नेष्टा मिथुनमेवैतत्प्रजननं क्रियतꣳउदानयति नेष्टा पत्नीं तामुद्गात्रा

संख्यापयति प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहीति प्रजापतिर्वाऽउद्गाता योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥ १८ ॥ ब्राह्मणम् ॥ ४ [४. २.] ॥ ॥

पशवो वै देवानां छन्दाꣳसि । तद्यथेदं पशवो युक्ता मनुष्येभ्यो वहन्त्येवं छन्दाꣳसि युक्तानि देवेभ्यो यज्ञं वहन्ति तद्यत्र छन्दाꣳसि देवान्त्समतर्पयन्यथ छन्दाꣳसि देवाः समतर्पयंस्तदुतस्तत्प्रागभूद्यच्छन्दाꣳसि युक्तानि देवेभ्यो यज्ञमवाहुर्यदेनान्त्समतीतृपन् ॥ १ ॥ अथ हारियोजनं गृह्णाति । छन्दाꣳसि वै हारियोजनश्छन्दाꣳस्येवैतत्संतर्पयति तस्माद्धारियोजनं गृह्णाति ॥ २ ॥ तं वाऽअतिरिक्तं गृह्णाति । यदा हि शम्योराकृयैनं गृह्णातीदं वै देवा अथ छन्दाꣳस्यतिरिक्तान्यथ मनुष्या अथ पशवोऽतिरिक्तास्तस्मादतिरिक्तं गृह्णाति ॥ ३ ॥ द्रोणकलशे गृह्णाति । वृत्रो वै सोम आसीत्तं यत्र देवा अघ्नंस्तस्य मूर्धोद्वर्त स द्रोणकलशोऽभवत्तस्मिन्यावान्वा यावान्वा रसः समस्रवदतिरिक्तो वै स आसीदतिरिक्त एष ग्रहस्तदतिरिक्तऽएवैतदतिरिक्तं दधाति तस्माद्द्रोणकलशे गृह्णाति ॥ ४ ॥ तं वाऽअपुरारुक्कं गृह्णाति । छन्दोभ्यो ह्येनं गृह्णाति स यदेवैनं छन्दोभ्यो गृह्णाति तेनो हास्यैष पुरोरुरान्भवति तस्मादपुरोरुक्कं गृह्णाति ॥ ५ ॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां वेत्यृक्सामे वै हरीऽऋक्सामाभ्याꣳ ह्येनं गृह्णाति ॥ ६ ॥ अथ धाना आवपति । हर्यो धाना स्थ सहसोमा इन्द्रायेति तद्यदेवात्र मितं च छन्दोऽमितं च तदेवैतत्सर्वं भक्षयति ॥ ७ ॥ तस्योन्नेताऽऽवपति । अतिरिक्तो वाऽउन्नेता न ह्येषोऽन्यस्याऽऽवपत्यतिरिक्त एष ग्रहस्तदतिरिक्तऽएवैतदतिरिक्तं दधाति तस्मादुन्नेताऽऽवपति ॥ ८ ॥ मूर्धन्नभिनिधायाऽऽवपति । मूर्धा ह्यस्यैषोऽथाह धानासोमेभ्योऽनुब्रूहीत्याऽऽव्याह धानासोमान्प्रस्थितान्प्रेष्यति वषट्कृते जुहोत्यनुवषट्कृतेऽथ धाना विलिप्सन्ते भक्षाय ॥ ९ ॥ तद्वैके । हर्त्रे द्रोणकलशं प्रतिपराहरन्ति वषट्कर्तुर्भक्ष इति वदन्तस्तदु तथा न

कुर्याद्यथाचमस वाऽअन्ये भक्षा अथैषोऽतिरिक्तस्तस्मादेतस्मिन्त्सर्वेषामिव भक्षस्तस्माद्धाना विलिप्सन्ते भक्षाय ॥१०॥ ता न दद्भिः खादेयुः । पशवो वाऽएते नेत्यशून्यम्रदे करवामह्याऽइति प्राणैरेव भक्षयन्ति यस्तेऽअश्वसनिर्भक्षो यो गोसनिरिति पशवो ह्येते तस्मादाह यस्तेऽअश्वसनिर्भक्षो यो गोसनिरिति तस्य तऽइष्टयजुष स्तुतस्तोमस्येतीष्टानि हि यजूꣳषि भवन्ति स्तुता स्तोमाः शस्तोक्थस्येति शस्तानि ह्युक्थानि भवन्त्युपक्षुतस्योपक्षुतो भक्षयामीत्युपक्षुतस्य ह्येतदुपक्षुतो भक्षयति ॥११॥ ता नाग्नौ प्रकिरेयुः । नेदु हिष्टमग्नौ जुहवामेत्युत्तरवेदावेव निवपन्ति तथा न बर्हिर्धा यज्ञाद्भवन्ति ॥१२॥ अथ पूर्णपात्रात्समवमृशन्ति । यानेकेऽप्सुषोमा इत्याचक्षते यथा वै युक्तो वहेदेवमेते यऽआर्विज्यं कुर्वन्त्युत वै युक्तः क्षणुते वा वि वा लिशते शान्तिरापो भेषजं तद्यदेवात्र क्षण्वते वा वि वा लिशन्ते शान्तिरापस्तद्भिः शान्त्या शमयन्ते तद्भिः संदधते तस्मात्पूर्णपात्रात्समवमृशन्ति ॥१३॥ ते समवमृशन्ति । सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टमिति यद्विवृढं तत्संदधते ॥१४॥ अथ मुखान्युपस्पृशन्ते । द्वयं तद्यस्मान्मुखान्युपस्पृशन्तेऽमृतं वाऽआपोऽमृतेनैवैतत्सꣳस्पृशन्तऽएतद्धु चैवैतत्कर्मात्मन्कुर्वते तस्मान्मुखान्युपस्पृशन्ते ॥१५॥ ब्राह्मणम् ॥५ [४. ३.] ॥ ॥

तानि वाऽएतानि । नव समिष्टयजूꣳषि जुहोति तद्यन्नव समिष्टयजूꣳषि जुहोति नव वाऽअमूर्बर्हिष्यवमाने स्तोत्रिया भवन्ति सैषोभयतो न्यूना विराड् प्रजननयैतस्माद्धाऽउभयतो न्यूनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एतस्मादुभयत एव न्यूनात्प्रजननात्प्रजाः सृजते इतश्चोर्ध्वा इतश्चावाचीः ॥१॥ हिङ्कार स्तोत्रियाणां दशमः । स्वाहाकार एतेषां तथो ह्यस्यैषा न्यूना विराड्दशंदशिनी भवति ॥२॥ अथ यस्मात्समिष्टयजूꣳषि नाम । या

वाऽएतेन यज्ञेन देवता क्लृयति याभ्य एष यज्ञस्तायते सर्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु सर्वासु समिष्टास्वथैतानि जुहोति तस्मात्समिष्टयजूꣳषि नाम ॥३॥ अथ यस्मात्समिष्टयजूꣳषि जुहोति । रिरिचानऽइव वाऽएतदीज्ञानस्यात्मा भवति यज्ञस्य भवति तस्य हि ददाति तमेवातस्त्रिभिः पुनराप्याययति ॥४॥ अथ यान्युत्तराणि त्रीणि जुहोति । या वाऽएतेन यज्ञेन देवता क्लृयति याभ्य एष यज्ञस्तायतऽउप हैव ता आसते यावन्न समिष्टयजूꣳषि जुह्वतीमानि नु नो जुह्वतिति ता एवैतद्यथायथं व्यवसृजति यत्र-यत्रासां चरणं तदनु ॥५॥ अथ यान्युत्तमानि त्रीणि जुहोति । यज्ञं वाऽएतदज्ञीज्ञनत यदेनमतन तं ज्ञनयित्वा यत्रास्य प्रतिष्ठा तत्प्रतिष्ठापयति तस्मात्समिष्टयजूꣳषि जुहोति ॥६॥ स जुहोति । समिन्द्रणो मनसा नेषि गोभिरिति मनसेति तन्मनसा रिरिचानमाप्याययति गोभिरिति तद्गोभी रिरिचानमाप्याययति सꣳ सूरिभिर्मघवत्सꣳ स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्तीति ब्रह्मणेति तद्ब्रह्मणा रिरिचानमाप्याययति सं देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा ॥७॥ सं वर्चसा । पयसा सं तनूभिरिति वर्चसेति तद्वर्चसा रिरिचानमाप्याययति पयसेति रसो वै पयस्तत्पयसा रिरिचानमाप्याययत्यगन्महि मनसा सꣳ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टमिति विवृतं तत्संदधाति ॥८॥ धाता रातिः । सवितेदं जुषन्तां प्रजापतिर्निधिपा देवोऽअग्निः । त्वष्टा विष्णुः प्रजया सꣳरराणा यजमानाय द्रविणं दधात स्वाहेति तद्वेव रिरिचानं पुनराप्याययति यदाह यजमानाय द्रविणं दधात स्वाहेति ॥९॥ सुगा वो देवाः । सदना अकर्म यऽआजग्मेदꣳ सवनं जुषाणा इति सुगानि वो देवाः सदनान्यकर्म यऽआगन्तेदꣳ सवनं जुषाणा इत्येवैतदाह भरमाणा वहमाना हवीꣳषीति तद्देवता व्यवसृजति भरमाणा अह ते यन्तु येऽवाहना वहमाना उ ते यन्तु ये वाहनवन्त इत्येवैतदाह तस्मादाह भरमाणा वहमाना हवीꣳष्यस्मे

धत्त वसवो वसूनि स्वाहा ॥ १० ॥ यां२॥ऽआवहः । उशतो देव देवांस्तान्प्रेरय स्वेऽअग्ने सधस्थऽइत्यग्निं वाऽआहामून्देवानावहामून्देवानावहेति तमेवैतदाह यान्देवानावाहीस्तान्गमय यत्र-यत्रैषां चरणं तदन्विति ज्ञन्निवाᳬसः पपिवाᳬसश्च विश्वऽइति ज्ञन्निवाᳬसो हि पशुं पुरोडाशं भवन्ति पपिवाᳬस इति पपिवाᳬसो हि सोमᳬ राजानं भवन्ति तस्मादाह ज्ञन्निवाᳬसः पपिवाᳬसश्च विश्वेऽसुं घर्मᳬ स्वरातिष्ठतानु स्वाहेति तद्वेव देवता व्यवसृजति ॥ ११ ॥ वयᳬ हि वा । प्रयति यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह् । ऋधगया ऋधगुताशमिष्ठाः प्रज्ञानन्यज्ञमुपयाहि विद्वान्त्स्वाहेत्यग्निमेवैतया विमुञ्चत्यग्निं व्यवसृजति ॥ १२ ॥ देवा गातुविद इति । गातुविदो हि देवा गातुं वित्वेति यज्ञं वित्वेत्येवैतदाह गातमितेति तदेतेन यथायथं व्यवसृजति मनसस्पतऽइमं देव यज्ञᳬ स्वाहा वाते धा इत्ययं वै यज्ञो योऽयं पवते तदिमं यज्ञᳬ सम्भृत्यैतस्मिन्यज्ञे प्रतिष्ठापयति यज्ञेन यज्ञᳬ संदधाति तस्मादाह स्वाहा वाते धा इति ॥ १३ ॥ यज्ञ यज्ञं गह । यज्ञपतिं गह स्वां योनिं गह स्वाहेति तत्प्रतिष्ठितमेवैतद्यज्ञᳬ सन्तᳬ स्वायां योनौ प्रतिष्ठापयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहेति तत्प्रतिष्ठितमेवैतद्यज्ञᳬ सन्तᳬ सहसूक्तवाकᳬ सर्ववीरं यजमानेऽन्ततः प्रतिष्ठापयति ॥ १४ ॥ ब्राह्मणम् ॥ ६ [४. ४.] ॥ ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या १२२ ॥ ॥

स वाऽअवभृथमभ्यवैति । तद्यदवभृथमभ्यवैति यो वाऽअस्य रसोऽभूदाकृतिभ्यो वाऽअस्य तमज्ञीज्ञनद्यैतद्धरीरं तस्मिन्न रसोऽस्ति तन्न परास्यं तदपोऽभ्यवहरन्ति रसो वाऽआपस्तदस्मिन्नेतᳬ रसं दधाति तदेनमेतेन रसेन संगमयन्ति तदेनमतो ज्ञनयति स एनं ज्ञात एव सन्ज्ञनयति तद्यदपोऽभ्यवहरन्ति तस्मादवभृथः ॥ १ ॥ अथ समिष्टयजूᳬषि जुहोति । समिष्टयजूᳬषि होवान्तो यज्ञस्य स क्रुत्वैव समिष्टयजूᳬषि यदेतमभितो भवति तेन चावालमुपसमायन्ति स कृज्ञविषा-

णां च मेखलां च चात्वाले प्रास्यति ॥२॥ मात्रिर्भूमा पृदाकुरिति । असौ वा आदित्यस्य स्वगाकारो यदेनदुपोऽभ्यवकृरत्यथैष एवैतस्य स्वगाकारो रज्जुरिव हि सर्पाः कूपा इव हि सर्पाणामायतनान्यस्ति वै मनुष्याणां च सर्पाणां च विभ्रातृव्यमिव नेत्तदृतः सम्भवदिति तस्मादाह मात्रिर्भूमा पृदाकुरिति ॥३॥ अथ वाचयति । ऊरू हि राज्ञा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउ इति यथायमुरुरुभयोऽनाष्ट्रः सूर्याय पन्था एवं मेऽयमुरुरुभयोऽनाष्ट्रः पन्था अस्त्वित्येवैतदाह ॥४॥ अपदे पादा प्रतिधातवेऽकरिति । यदि ह वाऽअप्यपाद्भवत्यलमेव प्रतिक्रमणाय भवत्युतापवक्ता हृदयाविधश्चिदिति तदेनꣳ सर्वस्माद्दुष्कृादेनसः पाप्मनः प्रमुञ्चति ॥५॥ अथाह साम गायेति । साम ब्रूहीति वा गायेति त्वेव ब्रूयाद्गायन्ति हि साम तद्यत्साम गायति नेदिदं बर्हिर्धा यज्ञाद्धरीरं नाष्ट्रा रक्षाꣳसि हिनसन्निति साम हि नाष्ट्राणाꣳ रक्षसामपहन्ता ॥६॥ आग्नेय्यां गायति । अग्निर्हि रक्षसामपहन्तातिछन्दसि गायत्येषा वै सर्वाणि छन्दाꣳसि यदतिछन्दास्तस्मादतिछन्दसि गायति ॥७॥ स गायति । अग्निष्टपति प्रतिदहत्यहावोऽहावऽइति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥८॥ तऽउदञ्चो निष्क्रामन्ति । जघनेन चात्वालमग्नेणाग्नीध्रꣳ स यस्यां ततो दिश्यापो भवन्ति तद्यन्ति ॥९॥ स यः स्यन्दमानानाꣳ स्थावरो ह्रदः स्यात् । तमपोऽभ्यवेयादेता वाऽआपां वरुणगृहीता याः स्यन्दमानानां न स्यन्दन्ते वरुणयो वाऽअवभृथो निर्वरुणतायै यद्यु ता न विन्देदपि या एव काश्चापोऽभ्यवेयात् ॥१०॥ तमपोऽवक्रमयन्वाचयति । नमो वरुणायाभिष्ठितो वरुणस्य पाश इति तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुणात्प्रमुञ्चति ॥११॥ अथ चतुर्गृहीतमाज्यं गृहीत्वा । समिधं प्रास्याभिजुहोत्यग्नेरनीकमप आविवेशापां नपात्प्रतिरक्षन्नसुर्यम् । दमे-दमे समिधं यद्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत्स्वाहेति ॥१२॥ अग्नेर्हे वै देवाः । यावद्वा यावद्वाप्सु प्रवेशयां चक्रुर्नेदतो

नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि रक्षसामपहन्ता तमेतया च समिधैतया चाङ्कृत्या समिन्द्धे समिद्धे द्वेभ्यो जुहोतीति ॥ १३ ॥ अथापरं चतुर्गृहीतमाज्यं गृह्णीत्वा । आश्राव्याह समिधो यजेति सोऽपबर्हिषश्चतुरः प्रयाजान्यजति प्रजा वै बर्हिर्वरुणो वाऽअवभृथो नेत्प्रजा वरुणो गृह्णादिति तस्मादपबर्हिषश्चतुरः प्रयाजान्यजति ॥ १४ ॥ अथ वारुणं एककपालः पुरोडाशो भवति । यो वाऽअस्य रसोऽभूदाकुतिभ्यो वाऽअस्य तमजीजनदथैतद्धरीरं तस्मिन्न रसोऽस्ति रसो वै पुरोडाशस्तदस्मिन्नेतꣳ रसं दधाति तदेनमेतेन रसेन संगमयति तदेनमतो जनयति स एनं जातं एव सन्जनयति तस्माद्वारुणं एककपालः पुरोडाशो भवति ॥ १५ ॥ स आज्यस्योपस्तीर्य । पुरोडाशस्यावद्यन्नाह वरुणायानुब्रूहीत्यत्र ह्येकऽऋजीषस्य द्विरवद्यन्ति तद्धु तथा न कुर्याद्धरीरं वाऽएतद्भवति नालमाकुत्यै द्विरवद्यति सकृदभिघारयति प्रत्यनक्त्यवदानेऽआश्राव्याह वरुणं यजेति वषट्कृते जुहोति ॥ १६ ॥ अथाज्यस्योपस्तीर्य । पुरोडाशमवदधदाहाग्नीवरुणाभ्यामनुब्रूहीति तत्स्विष्टकृते स यन्नाग्नयऽइत्याह नेदग्निं वरुणो गृह्णादिति स यद्यमुत्रऽऋजीषस्य द्विरवद्येदथात्र सकृद्यद्यु न नाद्रियेताथोपरिष्टाद्विराज्यस्याभिघारयत्याश्राव्याहाग्नीवरुणौ यजेति वषट्कृते जुहोति ॥ १७ ॥ ता वाऽएताः । षडाकुतयो भवन्ति षड्वाऽऋतवः संवत्सरस्य संवत्सरो वरुणस्तस्मात्षडाकुतयो भवन्ति ॥ १८ ॥ एतदादित्यानामयनम् । आदित्यानीमानि यजूꣳषीत्याहुः स यावदस्य वशः स्यादेवमेव चिकीर्षेद्यद्युऽएनमितरथा यजमानः कर्तवै ब्रूयादितरथो तर्हि कुर्यादेतानेव चतुरः प्रयाजानपबर्हिषो यजेद्द्वावाज्यभागौ वरुणमग्नीवरुणौ द्वावनुयाजावपबर्हिषौ तद्दश दशाक्षरा वै विराड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयति ॥ ११ ॥ एतदङ्गिरसामयनम् । अतोऽन्यतरत्कृत्वा यस्मिन्कुम्भऽऋजीषं भवति तं प्लावयति समुद्रे ते हृदयमप्स्वन्तरित्यापो वै समुद्रो रसो वाऽआपस्तदस्मिन्नेतꣳ रसं दधाति

तदेनमेतेन रसेन संगमयति तदेनमतो जनयति स एनं जात एव सन्जनयति सं त्वा विशन्त्वोषधीरुताप इति तदस्मिन्नुभयꣳ रसं दधाति यश्चौषधिषु यश्चाप्सु यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत्स्वाहेति तच्चदेव यज्ञस्य साधु तदेवास्मिन्नेतद्दधाति ॥ २० ॥ अथानुसृज्योपतिष्ठते । देवीराप एष वो गर्भ इत्यापꣳ ह्येष गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृतेति तदेनमद्भ्यः परिददाति गुप्त्यै देव सोमेष ते लोक इत्यापो ह्येतस्य लोकस्तस्मिञ्ज्ञं च वच्च परि च वच्चेति तस्मिन्नः शं चैधि सर्वाभ्यश्च न आर्तिभ्यो गोपायेत्येवैतदाह ॥ २१ ॥ अथोपमार्ष्टि । अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतमित्यव ह्येतद्देवैर्देवकृतमेनोऽयासीत्सोमेन राज्ञाव मर्त्यैर्मर्त्यकृतमित्यव ह्येतन्मर्त्यैर्मर्त्यकृतमेनोऽयासीत्पशुना पुरोडाशेन पुरुराव्णो देव रिषस्पाहीति सर्वाभ्यो मार्तिभ्यो गोपायेत्येवैतदाह ॥ २२ ॥ अथाभ्यवेत्य स्नातः । अन्योऽन्यस्य पृष्ठे प्रधावतस्तावन्ये वाससी परिधायोदितः स यथाहिस्त्वचो निर्मुच्येतेवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते तस्मिन्न तावच्चनैनो भवति यावत्कुमारेऽदिति स येनैव निष्क्रामति तेन पुनरायति पुनरेत्याहवनीये समिधमभ्यादधाति देवानाꣳ समिदसीति यजमानमेवैतया समिन्द्धे देवानाꣳ हि समिद्धिमनु यजमानः समिध्यते ॥ २३ ॥ ब्राह्मणम् ॥ १ [४. ५.] ॥ ॥ चतुर्थोऽध्यायः ॥ २८ ॥ ॥

आदित्येन चरुणोदयनीयेन प्रचरति । तच्चदादित्यश्चरुर्भवति यद्वैनामदो देवा अब्रुवंस्तवैव प्रायणीयस्तवोदयनीय इति तमेवास्याऽएतदुभयत्र भागं करोति ॥ १ ॥ स यदमुत्र राजानं क्रेष्यन्नुपप्रैष्यन्यजते । तस्मात्तत्प्रायणीयं नामाथ यदत्रावभृथादुदेत्य यजते तस्मादेतदुदयनीयं नाम तद्वाऽएतत्समानमेव ह्यविरदित्याऽएव प्रायणीयमदित्याऽउदयनीयमियꣳ ह्येवादितिः ॥ २ ॥ स वै पथ्यामिवाग्ने स्वस्तिं यजति । तद्देवा अप्रज्ञायमाने वाचैव प्रत्यपद्यन्त वाचा हि मुग्धं प्रज्ञायते

ऽथात्र प्रज्ञाते यथापूर्वं करोति ॥३॥ सोऽग्निमेव प्रथमं यजति । अथ सोममथ सवितारमथ पथ्याꣳ स्वस्तिमथादितिं वाग्वै पथ्या स्वस्तिरियमदितिरस्यामेव तद्दे-वा वाचं प्रत्यष्ठापयन्त्सेयं वागस्यां प्रतिष्ठिता वदति ॥४॥ अथ मैत्रावरुणीं व-शामनूबन्ध्यामालभते । स एषोऽन्य एव यज्ञस्तायते पशुबन्ध एव समिष्टयजूꣳषि क्वेवान्तो यज्ञस्य ॥५॥ तद्यन्मैत्रावरुणी वशा भवति । यद्वाऽईज्ञानस्य स्विष्टं भ-वति मित्रोऽस्य तद्गृह्णाति यदस्य दुरिष्टं भवति वरुणोऽस्य तद्गृह्णाति ॥६॥ त-दाहुः । क्वेज्ञानोऽभूदिति तद्यदेवास्यात्र मित्रः स्विष्टं गृह्णाति तदेवास्माऽएतया प्रीतः प्रत्यवसृजति यदु चास्य वरुणो दुरिष्टं गृह्णाति तद्येवास्माऽएतया प्रीतः स्विष्टं करोति तदु चास्मै प्रत्यवसृजति सोऽस्येष स्व एव यज्ञो भवति स्वꣳ सु-कृतम् ॥७॥ तद्यन्मैत्रावरुणी वशा भवति । यत्र वै देवा रेतः सिक्तं प्राजनयं-स्तदाग्निमारुतमित्युक्थं तस्मिंस्तद्व्याख्यायते यथा तद्देवा रेतः प्राजनयंस्ततोऽङ्गा-राः समभवन्नङ्गारेभ्योऽङ्गिरसस्तदन्वन्ये पशवः ॥८॥ अथ यदासाः पाꣳसवः पर्य-शिष्यन्त । ततो गर्दभः समभवत्तस्माद्यत्र पाꣳसुलं भवति गर्दभस्थानमिव बते-त्याङ्कुरथ यदा न कश्चन रसः पर्यशिष्यत तत एषा मैत्रावरुणी वशा समभवत्त-स्मादेषा न प्रज्ञायते रसाद्धि रेतः सम्भवति रेतसः पशवस्तद्यदन्ततः समभवत्त-स्मादन्तं यज्ञस्यानुवर्तते तस्माद्वाऽएषात्र मैत्रावरुणी वशावक्लृप्ततमा भवति यदि वशां न विन्देदप्युन्नवश एव स्यात् ॥९॥ अथेतरं विश्वे देवा अमरीमृत्स्यन्त । ततो वैश्वदेवी समभवदथ बार्हस्पत्या सोऽन्तोऽन्तो हि बृहस्पतिः ॥१०॥ स यः सकृत्सं वा भूयो वा दद्यात् । स एनाः सर्वा आलभेत सर्वं वै तस्यात्तं भवति सर्वं जितं यः सकृत्सं वा भूयो वा ददाति सर्वमेता एवमेव यथापूर्वं मैत्रावरु-णीमेवाग्रेऽथ वैश्वदेवीमथ बार्हस्पत्यम् ॥११॥ अथो ये दीर्घसत्त्रमासीरन् । सं-वत्सरं वा भूयो वा तꣳ एनाः सर्वा आलभेरन्त्सर्वं वै तेषामात्तं भवति सर्वं जितं

ये दीर्घसत्त्रमासते संवत्सरं वा भूयो वा सर्वमेता एवमेव यथापूर्वम् ॥ १२ ॥ अथोदवसानीयेष्ट्या यजते । स आग्नेयं पञ्चकपालं पुरोडाशं निर्वपति तस्य पञ्चपदाः पङ्क्तयो याज्यानुवाक्या भवन्ति यातयामैव वाऽएतद्दीक्षानस्य यज्ञो भवति सोऽस्मात्पराडिव भवत्यग्निर्वै सर्वे यज्ञा अग्नौ हि सर्वान्यज्ञांस्तन्वते ये च पाक यज्ञा ये चेतरे तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥ १३ ॥ तद्यत्पञ्चकपालः पुरोडाशो भवति । पञ्चपदाः पङ्क्तयो याज्यानुवाक्याः पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥ १४ ॥ तस्य हिरण्यं दक्षिणा । आग्नेयो वाऽएष यज्ञो भवत्यग्नेरेतो हिरण्यं तस्माद्धिरण्यं दक्षिणानड्वान्वा स हि वक्रेनाग्नेयोऽग्निदग्धमिव ह्यस्य वक्रं भवति ॥ १५ ॥ अथो चतुर्गृहीतमेवाज्यं गृहीत्वा । वैष्णव्यर्चा जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर स्वाहेति यज्ञो वै विष्णुस्तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति तत्रो यद्यक्रुयात्तद्ध्यान्नादक्षिणꣳ ह्यविः स्यादिति ह्याकुरथ यदेवैषोदवसानीयेष्टिः संतिष्ठतेऽथ सायमाकुतिं जुहोति कालऽएव प्रातराकुतिम् ॥ १६ ॥ ब्राह्मणम् ॥ २ [५. १.] ॥ ॥

वशामालभते । तामालभ्य संज्ञपयन्ति संज्ञप्याह वपामुत्खिदेत्युत्खिद्य वपामनुमर्शं गर्भमिष्टवै ब्रूयात्स यदि न विन्दन्ति किमाद्रियेरन्यद्यु विन्दन्ति तत्र प्रायश्चित्तिः क्रियते ॥ १ ॥ न वै तदवकल्पते । यदेकां मन्यमाना एकयैवैतया चरेयुर्यद्वै मन्यमाना द्वाभ्यामिव चरेयु स्थालीं चैवोल्लीषं चोपकल्पयितवै ब्रूयात् ॥ २ ॥ अथ वपया चरन्ति । यथैव तस्यै चरणं वपया चरित्वाधर्युश्च यजमानश्च पुनरेतः स आर्ध्नोधर्युर्निर्वृहेतं गर्भमिति तꣳ हु नोदरतो निर्वृहेदार्तायै वै मृतायै ऽदरतो निर्वृहन्ति यदा वै गर्भः समृद्धो भवति प्रजननेन वै स तर्हि प्रत्यङ्गैति

तमपि विरुज्य श्रोणी प्रत्यञ्चं निर्वृक्तिवै ब्रूयात् ॥३॥ तं निरुच्यमाणमभिमन्त्रयते । एजतु दशमास्यो गर्भो जरायुणा सहेति स यदाहैजतीति प्राणमेवास्मिन्नेतद्दधाति दशमास्य इति यदा वै गर्भः समृद्धो भवत्यथ दशमास्यस्तमेतद्यद्दशमास्यꣳ सन्तं ब्रह्मणैव यजुषा दशमास्यं करोति ॥४॥ जरायुणा सहेति । तद्यथा दशमास्यो जरायुणा सहेयादेवमेतदाह यथायं वायुरेजति यथा समुद्र एजतीति प्राणमेवास्मिन्नेतद्दधात्येवायं दशमास्योऽस्मञ्जरायुणा सहेति तद्यथा दशमास्यो जरायुणा सह स्रꣳसेतैवमेतदाह ॥५॥ तदाहुः । कथमेतं गर्भं कुर्यादित्यङ्गादङ्गाद्धैवास्यावद्येयुर्यथैवेतरेषामवदानानामवदानं तद्वै तथा न कुर्याद्वृत्र क्लेषोऽविकृताङ्गो भवत्यधस्तादेव ग्रीवा अपिकृत्यैतस्याꣳ स्थाल्यामेतं मेधꣳ श्रोतयेयुः सर्वेभ्यो वाऽअस्यैषोऽङ्गेभ्यो मेध श्रोतति तदस्य सर्वेषामेवाङ्गानामवत्तं भवत्यवद्यन्ति वशाया अवदानानि यथैव तेषामवदानम् ॥६॥ तानि पशुश्रपणे श्रपयन्ति । तद्वैतं मेधꣳ श्रपयन्त्युल्लीषेणावेष्य गर्भं पार्श्वतः पशुश्रपणस्योपनिदधाति यदा शृतो भवत्यथ समुद्यावदानान्येवाभिजुहोति नैतं मेधमुद्वासयन्ति पशुं तद्वैतं मेधमुद्वासयन्ति ॥७॥ तं जघनेन चात्वालमन्तरेण यूपं चाग्निं च हरन्ति । दक्षिणतो निधाय प्रतिप्रस्थातावद्यत्यथ स्रुचोरुपस्तृणीतेऽथ मनोतायै हविषोऽनुवाच आहावद्यन्ति वशाया अवदानानां यथैव तेषामवदानम् ॥८॥ अथ प्रचरणीति स्रुग्भवति । तस्यां प्रतिप्रस्थाता मेधायोपस्तृणीति द्विरवद्यति सकृदभिधारयति प्रत्यनक्त्यवदानेऽअथानुवाच आहाश्राव्याह प्रेष्येति वषट्कृतेऽधर्युर्जुहोत्यधर्योरनुहोमं जुहोति प्रतिप्रस्थाता ॥९॥ यस्यै ते यज्ञियो गर्भ इति । अयज्ञिया वै गर्भास्तमेतद्ब्रह्मणैव यजुषा यज्ञियं करोति यस्यै योनिरिरण्ययीत्यदो वाऽएतस्यै योनिं विच्छिन्दन्ति यददो निष्कर्षन्त्यमृतमायुर्हिरण्यं तामेवास्या एतदमृतां योनिं करोत्यङ्गान्यङ्कृता यस्य तं मात्रा समङ्गीगमꣳ स्वाहेति यदि पुमान्त्स्याद्यद्यु स्त्री स्याद्वङ्गा

न्यक्रुता यस्यै तां मात्रा समङ्गीगमꣳ स्वाकेति यद्यु ऽअविज्ञातो गर्भो भवति पुꣳस्कृत्यैव जुहुयात्पुमाꣳसो हि गर्भा अङ्गान्यक्रुता यस्य तं मात्रा समङ्गीगमꣳ स्वाकेत्यदो वाऽएतं मात्रा विघ्नꣳ कुर्वन्ति यद्दो निष्कर्षन्ति तमेतद्ब्रह्मणैव यजुषा समर्ध्य मथतो यज्ञस्य पुनर्मात्रा सङ्गमयति ॥१०॥ अथाध्वर्युर्वनस्पतिना चरति। वनस्पतिनाध्वर्युश्चरित्वा यान्युपभृत्यवदानानि भवन्ति तानि समानयमान आहाग्नये स्विष्टकृतेऽनुब्रूहीत्यत्याक्रामति प्रतिप्रस्थाता स एतꣳ सर्वमिव मेधं गृह्णीतेऽथोपरिष्टाद्धिराण्यस्याभिघारयत्याश्राव्याह प्रेष्येति वषट्कृतेऽध्वर्युर्जुहोत्यध्वर्योरनु होमं जुहोति प्रतिप्रस्थाता ॥११॥ पुरुदस्मो विषुरूप इन्दुरिति। बहुदान इति कैतव्यदाह पुरुदस्म इति विषुरूप इति विषुरूपा-इव हि गर्भा इन्दुरत्तर्महिमानमानञ्ज धीर इत्यत्तर्क्येष मातर्यक्तो भवत्येकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्ताꣳ स्वाकेति प्रथयत्येवैनामेतत्सुभूयो ह जयत्यष्टापद्येष्ट्वा यद्वा चानष्टापद्या ॥१२॥ तदाहुः। कथं गर्भं कुर्यादिति वृत्तऽएवैनमुद्धुरत्तरिक्षायतना वै गर्भा अत्तरिक्षमिवैतद्यद्वृत्तस्तदेनꣳ स्वऽएवायतने प्रतिष्ठापयति तद्वु वाऽआहुर्य एनं तत्रानुव्याहरेद्वृत्तऽएनं मृतमुद्वास्यतीति तथा हैव स्यात् ॥१३॥ अप एवैनमभ्यवहरेयुः। आपो वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमप्स्वेव प्रतिष्ठापयति तद्वु वाऽआहुर्य एनं तत्रानुव्याहरेदप्स्वेव मरिष्यतीति तथा हैव स्यात् ॥१४॥ आखूत्करऽएवैनमुपकिरेयुः। इयं वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमस्यामेव प्रतिष्ठापयति तद्वु वाऽआहुर्य एनं तत्रानुव्याहरेत्क्षिप्रेऽस्मै मृताय श्मशानं करिष्यन्तीति तथा हैव स्यात् ॥१५॥ पशुश्रपणऽएवैनं मरुद्भ्यो जुहुयात्। अक्रुतादो वै देवानां मरुतो विडक्रुतमिवैतद्यदशृतो गर्भ आहवनीयाद्वाऽएष आहृतो भवति पशुश्रपणास्तथाह न बर्हिर्धा यज्ञाद्भवति न प्रत्यक्षमिवाहवनीये देवानां वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयति ॥१६॥ स जुहोत्येव समिष्टयजूꣳषि।

प्रथमावशान्तेषङ्गारेषेतꣳ सोष्णीषं गर्भमादत्ते तं प्राङ् तिष्ठन्जुहोति मारुत्यर्चा मरुतो यस्य हि क्षये पाथा दिवो विमहसः स सुगोपातमो जन इति न स्वाहाकरोत्यकृतादो वै देवानां मरुतो विऽकृतमिवैतद्यद्स्वाहाकृतं देवानां वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयति ॥१७॥ अथाङ्गारैरभिसमूहति । मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिरिति ॥१८॥ ब्राह्मणम् ॥ ३ [५. २.] ॥ ॥ शतम् २७०० ॥ ॥

इन्द्रो ह वै षोऽशी । तं नु सकृदिन्द्रं भूतान्यत्यरिच्यन्त प्रजा व भूतानि ताꣳ हैनेन सदृग्भवमिवासुः ॥१॥ इन्द्रो ह वाऽईक्षां चक्रे । कथं न्वहमिदꣳ सर्वमतितिष्ठेयमर्वागेव मदिदꣳ सर्वꣳ स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत स इदꣳ सर्वमेवात्यतिष्ठदर्वागेवास्मादिदꣳ सर्वमभवत्सर्वꣳ ह वाऽइदमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यस्यैवं विदुष एतं ग्रहं गृह्णन्ति ॥२॥ तस्मादेतदृषिणाभ्यानूक्तम् । न ते महित्वमनुभूदध द्यौर्यदन्यया स्फिग्या ह्नामवस्था इति न ह वाऽस्यासौ द्यौरन्यतरां चन स्फिगीमनुबभूव तथेदꣳ सर्वमेवात्यतिष्ठदर्वागेवास्मादिदꣳ सर्वमभवत्सर्वꣳ ह वाऽइदमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यस्यैवं विदुष एतं ग्रहं गृह्णन्ति ॥३॥ तं वै हरिवत्यर्चा गृह्णाति । हरिवतीषु स्तुवते हरिवतीरनुशꣳसति वीर्यं वै हरः इन्द्रोऽसुराणाꣳ सपत्नानाꣳ समवृङ्क्त तथोऽएवैष एतद्वीर्यꣳ हरः सपत्नानाꣳ संवृङ्क्ते तस्माद्धरिवत्यर्चा गृह्णाति हरिवतीषु स्तुवते हरिवतीरनुशꣳसति ॥४॥ तं वाऽअनुष्टुभा गृह्णाति । गायत्रं वै प्रातःसवनं त्रैष्टुभं माध्यन्दिनꣳ सवने जागतं तृतीयसवनमथातिरिक्तानुष्टुबत्येवैनमेतद्रेचयति तस्मादनुष्टुभा गृह्णाति ॥५॥ तं वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयो वाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिः स्रक्तिभिराप्नोत्यत्येवैनं चतुर्थ्या स्रक्त्या रेचयति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥६॥ तं वै प्रातःसवने गृह्णी-

यात् । आग्रयणं गृहीत्वा सु प्रातःसवने गृह्णीत् एतस्मात्कालादुपशेते तदेनꣳ सर्वाणि सवनान्यतिरेचयति ॥७॥ माध्यन्दिने वैनꣳ सवने गृह्णीयात् । आग्रयणं गृहीत्वा सोऽषा मीमाꣳसैव प्रातःसवनऽएवैनं गृह्णीयादाग्रयणं गृहीत्वा सु प्रातःसवने गृह्णीत् एतस्मात्कालादुपशेते ॥८॥ अथातो गृह्णात्येव । आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्गुना । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिनऽइति ॥९॥ अनया वा । युङ्क्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिनऽइति ॥१०॥ अथेत्य स्तोत्रमुपाकरोति । सोमोऽत्यरेच्युपावर्तधमित्यत्येवैनमेतद्रेचयति तं वै पुरास्तमयादुपाकरोत्यस्तमितेऽनुशꣳसति तदेनेनाहोरात्रे सदधाति तस्मात्पुरास्तमयादुपाकरोत्यस्तमितेऽनुशꣳसति ॥११॥ ब्राह्मणम् ॥४ [५. ३.] ॥ ॥

सर्वे ह वै देवाः । अग्रे सदृशा आसुः सर्वे पुण्यास्तेषाꣳ सर्वेषाꣳ सदृशानाꣳ सर्वेषां पुण्यानां त्रयोऽकामयन्तातिष्ठावानः स्यामेत्यग्निरिन्द्रः सूर्यः ॥१॥ तेऽर्चन्तः श्राम्यन्तश्चेरुः । तऽएतानतिग्राह्यान्ददृशुस्तानत्यगृह्णत तद्यदेनानत्यगृह्णत तस्मादतिग्राह्या नाम तेऽतिष्ठावानोऽभवन्यथैतऽएतदतिष्ठेवातिष्ठेव ह वै भवति यस्यैवं विदुष एतान्ग्रहान्गृह्णन्ति ॥२॥ नो ह वाऽइदमग्नेऽग्नौ वर्च आस । यदिदमस्मिन्वर्चः सोऽकामयतेदं मयि वर्चः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतद्वर्च आस ॥३॥ नो ह वाऽइदमग्रऽइन्द्रऽओज आस । यदिदमस्मिन्नोजः सोऽकामयतेदं मय्योजः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतदोज आस ॥४॥ नो ह वाऽइदमग्रे सूर्ये भ्राज आस । यदिदमस्मिन्भ्राजः सोऽकामयतेदं मयि भ्राजः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतद्भ्राज

आसैतानि ह वै तेजाꣳस्येतानि वीर्याण्यात्मन्धत्ते यस्यैवं विदुष एतान्यग्रान्गृह्णन्ति ॥५॥ तान्वै प्रातःसवने गृह्णीयात् । आग्रयणं गृहीत्वात्मा वाऽआग्रयणो बहु वाऽइदमात्मन एकैकमतिरिक्तं श्लोमकृदयं त्वयत्वत् ॥६॥ माध्यन्दिने वैनात्सवने गृह्णीयात् । उक्थ्यं गृहीत्वोपाकरिष्यन्वा पूतभृतोऽयꣳ ह वाऽअस्येषोऽनिरुक्त आत्मा यदुक्थ्यः सोऽएषा मीमाꣳसैव प्रातःसवनऽएवैनान्गृह्णीयादाग्रयणं गृहीत्वा ॥७॥ ते माहेन्द्रस्यैवानु होमꣳ हूयन्ते । एष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽयस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रमिन्द्रो वै यज्ञमानो यज्ञमानस्य वाऽएते कामाय गृह्यन्ते तस्मान्माहेन्द्रस्यैवानु होमꣳ हूयन्ते ॥८॥ अथातो गृह्णात्येव । अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् । उपयामगृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥९॥ उत्तिष्ठन्नो सा । सहः पीवी शिप्रेऽअवेपयः । सोममिन्द्र चमूसुतम् । उपयामगृहीतोऽसीन्द्राय त्वौजसऽएष ते योनिरिन्द्राय त्वौजसे ॥१०॥ अदृश्रमस्य केतवः । वि रश्मयो जनांऽ२॥ऽअनु । भ्राजन्तो अग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायेष ते योनिः सूर्याय त्वा भ्राजायेति ॥११॥ तेषां भक्षः । अग्ने वर्चस्विन्वर्चस्वांस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासमिन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासꣳ सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासमित्येतानि ह वै भ्राजाꣳस्येतानि वीर्याण्यात्मन्धत्ते यस्यैवं विदुष एतान्यग्रान्गृह्णन्ति ॥१२॥ तान्वै पृष्ठे षडहे गृह्णीयात् । पूर्वे ऋहऽआग्नेयमेव प्रथमेऽहन्नैन्द्रं द्वितीये सौर्यं तृतीयऽएवमेवान्वहम् ॥१३॥ तानु हैकऽउत्तरे ऋहे गृह्णन्ति । तदु तथा न कुर्यात्पूर्वऽएवैनांस्ऋहे गृह्णीयाद्यदुत्तरे ऋहे ग्रहीष्यन्त्स्यात्पूर्वऽएवैनांस्ऋहे गृहीत्वाथोत्तरे ऋहे गृह्णीयादेवमेव यथापूर्वं विश्वजिति सर्वपृष्ठऽएकाहऽएव गृह्यन्ते ॥१४॥ ब्राह्मणम् ॥ ५ [५. ४.] ॥॥

एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवा-प्येतर्ह्यनु प्रजायन्ते ॥ १ ॥ उपाꣳशुपात्रमेवान्वजाः प्रजायन्ते । तद्वै तत्पुनर्यज्ञे प्र-युज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥ २ ॥ अन्तर्यामपात्रमेवान्ववयः प्रजायन्ते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥ ३ ॥ अथ यदेतयोरुभयोः । सकृ सतोरुपाꣳशुं पूर्वं जुहोति तस्माद्ध सकृ सतोऽजाविकस्योभयस्यैवाजाः पूर्वा यत्यनूच्योऽवयः ॥ ४ ॥ अथ यदुपाꣳशुꣳ हुत्वा । ऊर्ध्वमुन्मार्ष्टि तस्मादिमा अजा अरा इतरा आक्रममाणा-इव यन्ति ॥ ५ ॥ अथ यदन्तर्यामꣳ हुत्वा । अवाञ्चमवमार्ष्टि तस्मादिमा अवयोऽवाचीनशीर्ष्यः खनन्त्य-इव यल्येता वै प्रजापतेः प्रत्यक्ततमां यदजावयस्तस्मादेतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्ति ॥ ६ ॥ शुक्रपात्रमेवानु मनुष्याः प्रजायन्ते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्तऽएष वै शुक्रो य एष तपत्येष ऽउऽएवेन्द्रः पुरुषो वै पशूनामिन्द्रस्तस्मात्पशूनामीष्टे ॥ ७ ॥ ऋतुपात्रमेवान्वेकशफं प्रजायते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्त ऽइतीव वाऽऋतुपात्रमितीवैकशफस्य शिर आग्रयणपात्रमुक्थ्यपात्रमादित्यपात्र-मेतान्येवानु गावः प्रजायन्ते तानि वै तानि पुनर्यज्ञे प्रयुज्यन्ते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥ ८ ॥ अथ यदजाः । कनिष्ठानि पात्राण्यनु प्रजायन्ते तस्मा-देतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्त्यः कनिष्ठाः कनिष्ठानि हि पात्राण्यनु प्रजायन्ते ॥ ९ ॥ अथ यदावः । भूयिष्ठानि पात्राण्यनु प्रजायन्ते तस्मादेताः सकृत्सवत्सरस्य विजायमाना एकैकं जनयन्त्यो भूयिष्ठा भूयिष्ठानि हि पात्राण्यनु प्रजायन्ते ॥ १० ॥ अथ द्रोणकलशे । अन्ततो हारियोजनं ग्रहं गृह्णाति प्रजापतिर्वै द्रोणकलशः स इमाः प्रजा उपावर्तते ता अवति ता अभिजिघ्रत्येत-द्वाऽएना भवति यदेनाः प्रजनयति ॥ ११ ॥ पञ्च हु वेव तानि पात्राणि । यानी-

माः प्रजा अनु प्रजायन्ते समानमुपाꣳशुन्तर्यामयोः शुक्रपात्रमृतुपात्रमाग्रयणपात्रमुक्थ्यपात्रं पञ्च वाऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञो यद्यु षडेवऽर्तवः संवत्सरस्येत्यादित्यपात्रमेवैतेषाꣳ षष्ठम् ॥ १२ ॥ एकꣳ हꣳ वेव तत्पात्रम् । यदिमाः प्रजा अनु प्रजायन्तऽउपाꣳशुपात्रमेव प्राणो व्युपाꣳशुः प्राणो हि प्रजापतिः प्रजापतिꣳ क्वेविदꣳ सर्वमनु ॥ १३ ॥ ब्राह्मणम् ॥ ६ [५. ५.] ॥

एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते स आश्विनं ग्रहं गृहीत्वावकाशानवकाशयति ॥ १ ॥ स उपाꣳशुमेव प्रथममवकाशयति । प्राणाय मे वर्चोदा वर्चसे पवस्वेत्यथोपाꣳशुसवनं व्यानाय मे वर्चोदा वर्चसे पवस्वेत्यथान्तर्याममुदानाय मे वर्चोदा वर्चसे पवस्वेत्यथैन्द्रवायवं वाचे मे वर्चोदा वर्चसे पवस्वेत्यथ मैत्रावरुणं क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्वेत्यथाश्विनꣳ श्रोत्राय मे वर्चोदा वर्चसे पवस्वेत्यथ शुक्रामन्थिनौ चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथामिति ॥ २ ॥ अथाग्रयणम् । आत्मने मे वर्चोदा वर्चसे पवस्वेत्यथोक्थ्यमोजसे मे वर्चोदा वर्चसे पवस्वेत्यथ ध्रुवमायुषे मे वर्चोदा वर्चसे पवस्वेत्यथाम्भृणौ विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथामिति वैश्वदेवौ वाऽअम्भृणावतो हि देवेभ्य उन्नयत्यतो मनुष्येभ्योऽतः पितृभ्यस्तस्माद्वैश्वदेवावम्भृणौ ॥ ३ ॥ अथ द्रोणकलशम् । कोऽसि कतमोऽसीति प्रजापतिर्वै कः कस्यासि को नामासीति प्रजापतिर्वै को नाम यस्य ते नामान्महीति मनुते क्वस्य नाम यं त्वा सोमेनातीतृपामेति तर्पयति क्वेनꣳ सोमेन स आश्विनं ग्रहं गृहीत्वान्वङ्गमाशिषमाशास्ते सुप्रजाः प्रजाभिः स्यामिति तत्प्रजामाशास्ते सुवीरो वीरैरिति तद्वीरानाशास्ते सुपोषः पोषैरिति तत्पुष्टिमाशास्ते ॥ ४ ॥ तान्वै न सर्वमिवावकाशयेत् । यो न्वेव ज्ञातस्तमवकाशयेद्यो वास्य प्रियः स्याद्यो वानूचानोऽनूक्तेनैनान्प्राप्नुयात्स आश्विनं ग्रहं गृहीत्वा कृत्स्नं यज्ञं

जनयति तं कृत्स्नं यज्ञं जनयित्वा तमात्मन्धत्ते तमात्मन्कुरुते ॥५॥ ब्राह्मणम् ॥ ७ [५. ६.] ॥

ता वाऽएताः । चतुस्त्रिꣳशद्याकृतयो भवन्ति प्रायश्चित्तयो नामैष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते ॥१॥ अष्टौ वसवः । एकादश रुद्रा द्वादशादित्या इमेऽएव द्यावापृथिवी त्रयस्त्रिꣳश्यौ त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशस्तदेनं प्रजापतिं करोत्येतद्वाऽअस्त्येतद्अमृतं यद्अमृतं तद्अस्त्येतद्उ तद्यन्मर्त्यꣳ स एष प्रजापतिः सर्वं वै प्रजापतिस्तदेनं प्रजापतिं करोति तस्मादेताश्चतुस्त्रिꣳशद्याकृतयो भवन्ति प्रायश्चित्तयो नाम ॥२॥ ता ह्येके । यज्ञतन्व इत्याचक्षते यज्ञस्य ह्येवैतानि पर्वाणि स एष यज्ञस्तायमान एता एव देवता भवन्नेति ॥३॥ सा यदि घर्मदुघा क्लुलेत् । अन्यामुपसंक्रामेयुः स यस्यामेवैनं वेलायां पुरा पिन्वयन्ति तद्ह्येवैनामुदीचीꣳ स्थापयेद्ग्रेण वा शालां प्राचीम् ॥४॥ तद्येऽएनेऽअभितः । पुष्कराण्डꣳ शिखण्डास्येऽउच्यते तयोर्यद्दक्षिणं तस्मिन्नेताश्चतुस्त्रिꣳशतमाज्याकृतीर्जुहोत्येतावान्वै सर्वो यज्ञो यावत्य एताश्चतुस्त्रिꣳशद्याकृतयो भवन्ति तदस्यां कृत्स्नमेव सर्वं यज्ञं दधात्येषा ह्यतो घर्मं पिन्वतऽएषो तत्र प्रायश्चित्तिः क्रियते ॥५॥ अथ यद्यज्ञस्य क्लुलेत् । तत्समन्वीक्ष्य जुहुयाद्दीक्षोपसत्स्वाहवनीये प्रसुतऽआग्नीध्रे वि वाऽएतद्यज्ञस्य पर्व स्रꣳसते यद्क्लुलति सा यैव तर्हि तत्र देवता भवति तयैवैतद्विषज्यति तया संदधाति ॥६॥ अथ यदि स्कन्देत् । तदद्भिरुपनिनयेदद्भिर्वाऽइदꣳ सर्वमाप्तꣳ सर्वस्यैवाप्त्यै वैष्णववारुणयऽर्चा यद्वाऽइदं किं चार्छति वरुण एवेदꣳ सर्वमार्पयति यया रोज्ञसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येतेऽअप्रतीता सहोभिर्विष्णूऽअगन्वरुणा पूर्वकृताविति यज्ञो वै विष्णुस्तस्यैतदार्छति वरुणो वाऽआर्पयिता तद्यस्याश्चैवैतद्देवताया आर्छति यो च देवतार्पयति ताभ्यामेवैतद्उभाभ्यां

भिषज्यत्युभाभ्याꣳ संदधाति ॥७॥ अथोऽअभ्येव मृशेत् । देवान्द्विषमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूदित्येवैतदाह ॥८॥ तद्ध स्मैतदारुणिराह । किꣳ स यजेत यो यज्ञस्य व्यृद्धा पापीयान्मन्येत यज्ञस्य वाऽअक्तꣳ व्यृद्धा श्रेयान्भवामीत्येतद्ध स्म स तदभ्याह यदेता आशिष उपगृह्णति ॥९॥ ब्राह्मणम् ॥८ [५. ७.] ॥ ॥

तस्यैतत्त्रिरात्रे सकृत्सꣳ ददाति । तदेषा साकृत्सी क्रियते स प्रथमेऽहꣳस्त्रीणि च शतानि नयति त्रयस्त्रिꣳशतं चैवमेव द्वितीयेऽहꣳस्त्रीणि चैव शतानि नयति त्रयस्त्रिꣳशतं चैवमेव तृतीयेऽहꣳस्त्रीणि चैव शतानि नयति त्रयस्त्रिꣳशतं चाथैषा साकृत्यतिरिच्यते ॥१॥ सा वै त्रिरूपा स्यादित्याहुः । एतद्धास्यै रूपतममिवेति रोहिणी कृ त्वेवोपधत्ता स्यादेतद्वैवास्यै रूपतममिव ॥२॥ सा स्यादप्रवीता । वाग्वाऽएषा निदानेन यत्साकृत्यायातयाम्नी वाऽइयं वागयातयाम्न्यप्रवीता तस्मादप्रवीता स्यात् ॥३॥ तां प्रथमेऽहन्नयेत् । वाग्वाऽएषा निदानेन यत्साकृत्सी तस्या एतत्सकृत्सं वाचः प्रज्ञातं पूर्वा हैषैति पश्चादेनां प्रज्ञातमन्वेत्युत्तमे वैनामहन्नयेत्पूर्वमहास्यै प्रज्ञातमेति पश्चादेषान्वेति सोऽएषा मीमाꣳसैवोत्तमऽएवैनामहन्नयेत्पूर्वमहास्यै प्रज्ञातमेति पश्चादेषान्वेति ॥४॥ तामुत्तरेण हविर्धाने । द्रोणिनाग्नीध्रं द्रोणकलशमवघ्रापयति यज्ञो वै द्रोणकलशो यज्ञमेवैनामेतद्दर्शयति ॥५॥ आघ्रिघ्र कलशम् । मह्या त्वा विशन्विन्दव इति रिरिचान इव वाऽएष भवति यः सकृत्सं ददाति तमेवैतद्रिरिचानं पुनराप्याययति यदाहाघ्रिघ्र कलशं मह्या त्वा विशन्विन्दव इति ॥६॥ पुनर्ऊर्जा निवर्तस्वेति । तद्धैव रिरिचानं पुनराप्याययति यदाह पुनर्ऊर्जा निवर्तस्वेति ॥७॥ सा नः सकृत्सं धुक्ष्वेति । तत्सकृत्सेन रिरिचानं पुनराप्याययति यदाह सा नः सकृत्सं धुक्ष्वेति ॥८॥ ऊरु-

धारा पयस्वती पुनर्माविशताद्रयिरिति । तद्वेव रिरिचानं पुनराप्याययति यदाह पुनर्माविशताद्रयिरिति ॥ १ ॥ अथ दक्षिणे कर्णेऽआजपति । इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिति सरस्वति महि विश्रुति । एता तेऽअघ्ने नामानि देवेभ्यो मा सुकृतं ब्रूतादिति वोचेरिति वैतानि ह वाऽअस्मै देवत्रा नामानि सा यानि ते देवत्रा नामानि तैर्मा देवेभ्यः सुकृतं ब्रूतादित्येवैतदाह ॥ १० ॥ तामवार्जन्ति । सा यद्यपुरुषाभिवीता प्राचीयात्तत्र विद्यादरात्सीदयं यजमानः कल्याणं लोकमजैषीदिति यद्युदीचीयाद्भ्रेयानस्मिंल्लोके यजमानो भविष्यतीति विद्याद्यदि प्रतीचीयाद्भ्यतिल्विल-इव धान्यतिल्विलो भविष्यतीति विद्याद्यदि दक्षिणेयात्क्षिप्रेऽस्माल्लोकाद्यजमानः प्रेष्यतीति विद्यादेतानि विज्ञानानि ॥ ११ ॥ तस्या एतास्तिस्तिस्तिस्त्रिꣳशत्यधि भवन्ति । तास्वेतामुपसमाकुर्वन्ति वि वाऽएतां विराजं वृहन्ति यां व्याकुर्वन्ति विच्छिन्नोऽएषा विराड्या विवृहा दशाक्षरा वै विराडुत्कृत्स्नां विराजꣳ संदधाति ताꣳ होत्रे दद्याद्धोतारं हि साक्षस्तस्मात्ताꣳ होत्रे दद्यात् ॥ १२ ॥ द्वौ वोन्नेतारौ कुर्वीत । तयोर्यतरो नाश्रावयेत्तस्माऽएनां दद्याद्यद्वो वाऽएष उन्नेता य ऋत्विक्सन्नाश्रावयति व्यृद्धोऽएषा विराड्या विवृहा तद्यद्वꣳएवैतद्यद्वं दधाति ॥ १३ ॥ तदाहुः । न सहस्रेऽधि किं चन दद्यात्सहस्रेण ह्येव सर्वान्कामानाप्नोतीति तदु होवाचासुरिः काममेव दद्यात्सहस्रेणाह सर्वान्कामानाप्नोति कामिनोऽस्येतरद्दत्तं भवतीति ॥ १४ ॥ अथ यदि रथं वा युक्तं दास्यन्स्यात् । यद्वा वशायै वा वपायाꣳ हुतायां दद्याद्धुदवसानीयायां वेष्टौ ॥ १५ ॥ स वै दक्षिणा नयन् । अन्यूना दशतो नयेद्यस्माऽएकां दास्यन्स्याद्दशभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै द्वे दास्यन्स्यात्पञ्चभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै तिस्रो दास्यन्स्यात्त्रिभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै पञ्च दास्यन्स्याद्द्वाभ्यां ताभ्यां दशतमुपावर्तयेदेवमा शतात्तथो ह्यस्यैषान्यूना विराडमुष्मिंल्लोके कामदुघा भवति ॥ १६ ॥

ब्राह्मणम् ॥ १ [५. ८.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १२५ ॥ ॥

तस्यैतद्द्वादशाहेन वयोऽहन्दसा यजते । तद्वहान्व्यूहति व्यूहत उद्गाता च होता च छन्दाꣳसि स एष प्रज्ञात एव पूर्वस्यहो भवति समूढछन्दास्तदैन्द्रवायवाग्रान्गृह्णाति ॥ १ ॥ अथ चतुर्थेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान्गृह्णाति प्राजापत्यं वाऽएतच्चतुर्थमहर्भवत्यात्मा वाऽआग्रयण आत्मा वै प्रजापतिस्तस्मादाग्रयणाग्रान्गृह्णाति ॥ २ ॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोक्ष्यानीति मोक्ष्येद्ध प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ हिंकृत्य सादयत्यथैतत्प्रज्ञातमेव पञ्चममहर्भवति तदैन्द्रवायवाग्रान्गृह्णाति ॥ ३ ॥ अथ षष्ठेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तशुक्राग्रान्गृह्णात्यैन्द्रं वाऽएतत्षष्ठमहर्भवत्येष वै शुक्रो य एष तपत्येष उऽएवेन्द्रस्तस्माच्छुक्राग्रान्गृह्णाति ॥ ४ ॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोक्ष्यानीति मोक्ष्येद्ध प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ सादयति ॥ ५ ॥ अथ सप्तमेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तशुक्राग्रान्गृह्णाति बार्हतं वाऽएतत्सप्तममहर्भवत्येष वै शुक्रो य एष तपत्येष उऽएव बृहंस्तस्माच्छुक्राग्रान्गृह्णाति ॥ ६ ॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोक्ष्यानीति मोक्ष्येद्ध प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ सादयत्यथैतत्प्रज्ञातमेवाष्टममहर्भवति तदैन्द्रवायवाग्रान्गृह्णाति ॥ ७ ॥ अथ नवमेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान्गृह्णाति जागतं वाऽएतन्नवममहर्भवत्यात्मा वाऽआग्रयणः सर्वं वाऽइदमात्मा जगत्तस्मादाग्रयणाग्रान्गृह्णाति ॥ ८ ॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोक्ष्यानीति मोक्ष्येद्ध प्राणान्यत्सादयेत्तं

धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ हिंकृत्य सादयति ॥ १ ॥ तदाहुः । न व्यूहेद्ग्रहान्प्राणा वै ग्रहा नेत्प्राणान्मोक्ष्यानीति मोक्ष्येद्ध प्राणान्यद्व्यूहेत्तस्मान्न व्यूहेत् ॥ १० ॥ तद्तु व्यूहेदेव । अङ्गानि वै ग्रहाः कामं वाऽइमान्यङ्गानि व्यत्यासꣳ शेते तस्माद्तु व्यूहेदेव ॥ ११ ॥ तद्तु नैव व्यूहेत् । प्राणा वै ग्रहा नेत्प्राणान्मोक्ष्यानीति मोक्ष्येद्ध प्राणान्यद्व्यूहेत्तस्मान्न व्यूहेत् ॥ १२ ॥ किं नु तत्राध्वर्योः । यद्धोता च होता च ह्वन्दाꣳसि व्यूहत एतद्धाऽअध्वर्युर्व्यूहति ग्रहान्यदैन्द्रवायवाग्रान्प्रातःसवने गृह्णाति शुक्राग्रान्माध्यन्दिने सवनऽआग्रयणाग्रांस्तृतीयसवने ॥ १३ ॥ ब्राह्मणम् ॥ १ [५. १.] ॥

यदि सोममपक्रीयुः । विधावतेक्रीतेति ब्रूयात्स यदि विन्दन्ति किमाद्रियेरन्यद्यु न विन्दन्ति तत्र प्रायश्चित्तिः क्रियते ॥ १ ॥ द्वयानि वै फाल्गुनानि । लोहितपुष्पाणि चारुणपुष्पाणि च स यान्यरुणपुष्पाणि फाल्गुनानि तान्यभिषुणुयादेष वै सोमस्य न्यङ्को यदरुणपुष्पाणि फाल्गुनानि तस्मादरुणपुष्पाण्यभिषुणुयात् ॥ २ ॥ यद्यरुणपुष्पाणि न विन्देयुः । श्येनक्रीतमभिषुणुयाद्यत्र वै गायत्री सोममहापतत्तस्याऽआहरत्यै सोमस्याꣳशुरपतत्तद्श्येनक्रीतमभवत्तस्माद्श्येनक्रीतमभिषुणुयात् ॥ ३ ॥ यदि श्येनक्रीतं न विन्देयुः । आदारानभिषुणुयाद्यत्र वै यज्ञस्य शिरोऽछिद्यत तस्य यो रसो व्यप्रुष्यत्तत आदाराः समभवंस्तस्मादादारानभिषुणुयात् ॥ ४ ॥ यद्यादारान्न विन्देयुः । अरुणदूर्वा अभिषुणुयादेष वै सोमस्य न्यङ्को यदरुणदूर्वास्तस्मादरुणदूर्वा अभिषुणुयात् ॥ ५ ॥ यद्यरुणदूर्वा न विन्देयुः । अपि यानेव कांश्च कुरितान्कुशानभिषुणुयात्तत्राप्येकामिव गां दद्यादथावभृथादेवोदेत्य पुनर्दीक्षेत पुनर्यज्ञो क्रीव तत्र प्रायश्चित्तिरिति नु सोमापक्रीतानाम् ॥ ६ ॥ अथ कलशदिराम् । यदि कलशो दीर्यतानुलिप्सधमिति ब्रूयात्स यद्यनुलभेरन्प्रसृतमात्रं वाञ्जलिमात्रं वा तदन्यैरेकधनैरभ्युन्नीय यथाप्रभावं प्रचरेयुर्यद्यु नानुलभेरन्नाग्रयणस्यैव प्रस्कन्द्या-

न्यैरेकधनैरभ्युन्नीय यथाप्रभावं प्रचरेयुः स यद्यनीतासु दक्षिणासु कलशो दीर्येत तत्राप्येकामेव गां दद्यादथावभृथादेवोदेत्य पुनर्दीक्षेत पुनर्यज्ञो ह्येव तत्र प्रायश्चित्तिरिति नु कलशदिराम् ॥७॥ अथ सोमातिरिक्तानाम् । यद्यग्निष्टोममतिरिच्येत पूतभृत एवोक्थ्यं गृह्णीयाद्यद्युक्थ्यमतिरिच्येत षोडशिनमुपेयुर्यदि षोडशिनमतिरिच्येत रात्रिमुपेयुर्यदि रात्रिमतिरिच्येताहरुपेयुर्नेत्वेवातीरेकोऽस्ति ॥८॥ ब्राह्मणम् ॥२ [५. १०.] ॥ पञ्चमोऽध्यायः [२१.] ॥॥

प्रजापतिर्वाऽएष यदꣳशुः । सोऽस्येष आत्मैवात्मा ह्ययं प्रजापतिस्तदस्यैतमात्मानं कुर्वन्ति. यत्रैतं गृह्णन्ति तस्मिन्नेतान्प्राणान्दधाति यथा-यथैते प्राणा ग्रहा व्याख्यायन्ते स ह सर्वतनूरेव यजमानोऽमुष्मिंलोके सम्भवति ॥१॥ तदारम्भणवत् । यत्रैतं गृह्णन्त्यथैतदनारम्भणमिव यत्रैतं न गृह्णन्ति तस्माद्वाऽअꣳशुं गृह्णाति ॥२॥ तं वाऽऔडुम्बरेण पात्रेण गृह्णाति । प्रजापतिर्वा एष प्राजापत्य उडुम्बरस्तस्मादौडुम्बरेण पात्रेण गृह्णाति ॥३॥ तं वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयो वाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिराप्नोति प्रजापतिर्वाऽअतीमांल्लोकांश्चतुर्थस्तत्प्रजापतिमेव चतुर्थ्याप्नोति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥४॥ स वै तूष्णीमेव ग्रावाणमादत्ते । तूष्णीमꣳशून्निवपति तूष्णीमप उपसृजति तूष्णीमुच्चत्य सकृदभिषुणोति तूष्णीमिनमनवानन्जुहोति तदेनं प्रजापतिं करोति ॥५॥ अथास्याꣳ हिरण्यं बद्धं भवति । तदुपनिघ्नति स यदेवात्र क्षणुते वा वि वा लिशतेऽमृतमायुर्हिरण्यं तदमृतमायुरात्मन्धत्ते ॥६॥ तदु होवाच राम औपतस्विनिः । काममेव प्राणयात्काममुदन्याद्यद्वै तूष्णीं जुहोति तदेवैनं प्रजापतिं करोतीति ॥७॥ अथास्याꣳ हिरण्यं बद्धं भवति । तदुपनिघ्नति स यदेवात्र क्षणुते वा वि वा लिशतेऽमृतमायुर्हिरण्यं तदमृतमायुरात्मन्धत्ते ॥८॥ तदु होवाच बुडिल आश्वतराश्विः । उच्चत्यैव गृह्णीयान्नाभिषुणुयादभिषुण्वन्ति वाऽअन्याभ्यो

देवताभ्यस्तदन्यथा ततः करोति यथो चान्याभ्यो देवताभ्योऽथ यदुच्चैहति तदेवास्याभिषुतं भवतीति ॥ ९ ॥ तदु होवाच याज्ञवल्क्यः । अभ्येव षुणुयान्न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानꣳ सुतास इत्यृषिणाभ्यनूक्तं न वाऽअन्यस्यै कस्यै चन देवतायै सकृदभिषुणोति तदन्यथा ततः करोति यथो चान्याभ्यो देवताभ्यस्तस्मादभ्येव षुणुयादिति ॥ १० ॥ तस्य द्वादश प्रथमगर्भाः । षष्ठौक्ष्यो दक्षिणा द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिरꣳशुस्तदेनं प्रजापतिं करोति ॥ ११ ॥ ॥ शतम् २८०० ॥ ॥ तासां द्वादश गर्भाः । ताश्चतुर्विꣳशतिश्चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरः प्रजापतिः प्रजापतिरꣳशुस्तदेनं प्रजापतिं करोति ॥ १२ ॥ तदु ह कौकूस्तः । चतुर्विꣳशतिमेवैताः प्रथमगर्भाः षष्ठौक्ष्यो दक्षिणा ददावृषभं पञ्चविꣳशꣳ हिरण्यमेतदु ह स ददौ ॥ १३ ॥ स वाऽएष न सर्वस्येव ग्रहीतव्यः । आत्मा क्यस्यैष यो न्वेव ज्ञातस्तस्य ग्रहीतव्यो यो वास्य प्रियः स्याद्यो वानूचानोऽनूक्तेनैनं प्राप्नुयात् ॥ १४ ॥ सहस्रे ग्रहीतव्यः । सर्वं वै सहस्रꣳ सर्वमेष सर्ववेदसे ग्रहीतव्यः सर्वं वै सर्ववेदसꣳ सर्वमेष विश्वजिति सर्वपृष्ठे ग्रहीतव्यः सर्वं वै विश्वजित्सर्वपृष्ठः सर्वमेष वाजपेये राजसूये ग्रहीतव्यः सर्वꣳ हि तत्सत्रे ग्रहीतव्यः सर्वं वै सत्रꣳ सर्वमेष एतानि ग्रहणानि ॥ १५ ॥ ब्राह्मणम् ॥ ३ [६. १.] ॥ ॥

एतं वाऽएते गह्नन्ति । षड्भिर्मासैर्य एष तपति ये संवत्सरमासते तदुच्यतऽएव सामतो यथैतस्य रूपं क्रियतऽउच्यतऽऋक्तोऽथैतदेव यज्ञष्टः पुरश्चरणतो यदेतं गृह्णत्येतेनोऽएवैनं गह्नन्ति ॥ १ ॥ अथातो गृह्णात्येव । उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजायेति ॥ २ ॥ ब्राह्मणम् ॥ ४ [६. २.] ॥ ॥

अथातः पञ्चयनस्यैव । पञ्चैकादशिन्यैवेयात्स आग्नेयं प्रथमं पशुमालभतेऽथ

वारुणमथ पुनराग्नेयमेवमेवैतया पञ्चैकादशिन्येयात् ॥ १ ॥ अथोऽअप्येन्द्राग्नमेवारुरुक्षः पशुमालभेत । अग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वती-न्द्रो वै यज्ञस्य देवता तत्सर्वाश्चैवैतद्देवता नापराधोति यो च यज्ञस्य देवता तां नापराधोति ॥ २ ॥ अथात स्तोमायनस्यैव । आग्नेयमग्निष्टोमऽआलभेत तद्धि स-लोम यदाग्नेयमग्निष्टोमऽआलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीयमालभेतैन्द्राग्नानि ह्युक्थानि यदि षोडशी स्यादैन्द्रं तृतीयमालभेतेन्द्रो हि षोडशी यद्यतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्योषा रात्रिस्तद्यथा-यथं यज्ञक्रतून्व्यावर्तयत्येतानि त्रीण्ययनानि तेषां यतमत्कामयेत तेनेयाद्वाऽउपा-लम्भौ पशू सौर्यं द्वितीयं पशुमालभते वैषुवतेऽहन्प्राजापत्यं महाव्रते ॥ ३ ॥ ब्रा-ह्मणम् ॥ ५ [६. ३.] ॥ ॥

अथातो महाव्रतीयस्यैव । प्रजापतेर्ह वै प्रजाः ससृज्ञानस्य पर्वाणि विसस्रꣳसुः स विस्रस्तैः पर्वभिर्न शशाक सꣳहातुं ततो देवा अर्चन्तः श्राम्यन्तश्चेरुस्तऽएतं महाव्रतीयं ददृशुस्तमस्माऽअगृह्णंस्तेनास्य पर्वाणि समदधुः ॥ १ ॥ स सꣳहितैः पर्वभिः । इदमन्नाद्यमभ्युत्तस्थौ यदिदं प्रजापतेरन्नाद्यं यद्वै मनुष्याणामशनं तद्देवा-नां व्रतं महद्वाऽइदं व्रतमभूद्येनायꣳ समहास्तेति तस्मान्महाव्रतीयो नाम ॥ २ ॥ एवं वाऽएते भवन्ति । ये संवत्सरमासते यथैव तत्प्रजापतिः प्रजाः ससृज्ञान आ-सीत्स यथैव तत्प्रजापतिः संवत्सरेऽन्नाद्यमभ्युदतिष्ठदेवमेवैतऽएतत्संवत्सरेऽन्नाद्य-मभ्युत्तिष्ठन्ति येषामेवं विदुषामेतं ग्रहं गृह्णन्ति ॥ ३ ॥ तं वाऽइन्द्रायैव विमृधे गृ-ह्णीयात् । सर्वा वै तेषां मृधो हता भवन्ति सर्वं जितं ये संवत्सरमासते तस्मा-द्विमृधे वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । योऽअस्मां२॥ऽअभिदासत्य-धरं गमया तमः । उपयामगृहीतोऽसीन्द्राय त्वा विमृधऽएष ते योनिरिन्द्राय त्वा विमृधऽइति ॥ ४ ॥ अथो विश्वकर्मणो । विश्वं वै तेषां कर्म कृतं सर्वं जितं भवति

ये संवत्सरमासते तस्माद्विश्वकर्मणे वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे ऽअद्या हुवेम । स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणऽइति ॥५॥ यद्युऽएन्द्रीं वैश्वकर्मणीं विद्यात् । तथैव गृह्णीयाद्विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणऽइति ॥६॥ ब्राह्मणम् ॥६ [६. ४.] ॥॥

एष वै ग्रहः । य एष तपति येनेमाः सर्वाः प्रजा गृहीतास्तस्मादाहुर्ग्रहान्गृह्णीम इति चरन्ति ग्रहगृहीताः सन्त इति ॥१॥ वागेव ग्रहः । वाचा हीदꣳ सर्वं गृहीतं किमु तद्यद्वाग्ग्रहः ॥२॥ नामैव ग्रहः । नाम्ना हीदꣳ सर्वं गृहीतं किमु तद्यन्नाम ग्रहो बह्वनां वै नामानि विद्मोथ नस्तेन ते न गृहीता भवन्ति ॥३॥ अन्नमेव ग्रहः । अन्नेन हीदꣳ सर्वं गृहीतं तस्माद्यावन्तो नोऽशनमश्नन्ति ते नः सर्वे गृहीता भवन्त्येषैव स्थितिः ॥४॥ स य एष सोमग्रहः । अन्नं वाऽएष स यस्यै देवतायाऽएतं ग्रहं गृह्णाति सास्मै देवतैतेन ग्रहेण गृहीता तं कामꣳ समर्धयति यत्काम्या गृह्णाति स उ श्वस्तं वादित्यमुपतिष्ठतेऽस्तं यन्तं वा ग्रहोऽस्यमुमनयार्त्या गृहाणासावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समर्धीति वा न हैवास्मै स कामः समृध्यते यस्माऽएवमुपतिष्ठते ॥५॥ ब्राह्मणम् ॥७ [६. ५.] ॥॥

देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्ते होचुः को नो दक्षिणत आसिष्यतेऽथाभयेऽनाष्ट्ऽउत्तरतो यज्ञमुपचरिष्याम इति ॥१॥ ते होचुः । य एव नो वीर्यवत्तमः स दक्षिणत आस्तामथाभयेऽनाष्ट्ऽउत्तरतो यज्ञमुपचरिष्याम इति ॥२॥ ते होचुः । इन्द्रो वै नो वीर्यवत्तम इन्द्रो दक्षिणत

आस्तामथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम इति ॥३॥ ते क्रेन्द्रमूचुः । त्वं वै नो वीर्यवत्तमोऽसि त्वं दक्षिणत आस्वाथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम इति ॥४॥ स क्रोवाच । किं मे ततः स्यादिति ब्राह्मणाछꣳस्या ते ब्रह्मसाम तऽइति तस्माद्ब्राह्मणाछꣳसिनं प्रवृणीतऽइन्द्रो ब्रह्मा ब्राह्मणादितीन्द्रस्य क्रोषा स इन्द्रो दक्षिणत आस्ताथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपाचरंस्तस्माद्य एव वीर्यवत्तमः स्यात्स दक्षिणत आसीताथाभयेऽनाष्ट्र उत्तरतो यज्ञमुपचरेयुर्यो वै ब्राह्मणानामनूचानतमः स एषां वीर्यवत्तमोऽथ यदिदं य एव कश्च ब्रह्मा भवति कुदित्तूष्णीमास्तऽइति तस्माद्य एव वीर्यवत्तमः स्यात्स दक्षिणत आसीताथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरेयुस्तस्माद्ब्राह्मणा दक्षिणत आसतेऽथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरन्ति ॥५॥ स यत्राह । ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा जपत्येतं ते देव सवितर्यज्ञं प्राङ्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिं तेन मामव । स्तुत सवितुः प्रसवऽइति सोऽसावेव बन्धुरेतेन त्वेव भूयिष्ठा-इवोपचरन्ति ॥६॥ अनेन त्वेवोपचरेत् । देव सवितरेतद्बृहस्पते प्रेति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता बृहस्पते प्रेति बृहस्पतिर्वै देवानां ब्रह्मा तद्य एव देवानां ब्रह्मा तस्माऽएवैतत्प्राह तस्मादाह बृहस्पते प्रेति ॥७॥ अथ मैत्रावरुणो जपति । प्रसूतं देवेन सवित्रा जुष्टं मित्रावरुणाभ्यामिति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता जुष्टं मित्रावरुणाभ्यामिति मित्रावरुणौ वै मैत्रावरुणस्य देवते तद्येऽएव मैत्रावरुणस्य देवते ताभ्यामेवैतत्प्राह तस्मादाह जुष्टं मित्रावरुणाभ्यामिति ॥८॥ ब्राह्मणम् ॥ ८ [६. ६.] ॥॥

त्रयी वै विद्या । ऋचो यजूꣳषि सामानीयमेवऽर्चोऽस्याꣳ ह्यर्चति योऽर्चति स वागेवऽर्चो वाचा ह्यर्चति योऽर्चति सोऽन्तरिक्षमेव यजूꣳषि द्यौः सामानि सैषा त्रयी विद्या सौम्येऽध्वरे प्रयुज्यते ॥१॥ इममेव लोकमृचा जयति । अन्तरिक्षं

यज्ञुषा दिवमेव साम्ना तस्माद्यस्यैका विद्यानूक्ता स्यादन्वेवापीतरयोर्निर्मितं विवक्षेतेममेव लोकमृचा जयत्यन्तरिक्षं यज्ञुषा दिवमेव साम्ना ॥ २ ॥ तद्वाऽएतत् । सक्थं वाचः प्रज्ञातं द्वेऽइन्द्रस्तृतीये तृतीयं विष्णुर्ऋचश्च सामानि चेन्द्रो यज्ञूꣳषि विष्णुस्तस्मात्सदस्यृक्सामाभ्यां कुर्वन्त्यैन्द्रꣳ हि सदः ॥ ३ ॥ अथैतं विष्णुं यज्ञम् । एतैर्यज्ञुभिः पुरइवैव बिभ्रति तस्मात्पुरश्चरणं नाम ॥ ५ ॥ वागेवऽर्चश्च सामानि च । मन एव यज्ञूꣳषि सा यत्रेयं वागासीत्सर्वमेव तत्राक्रियत सर्वं प्राज्ञायताथ यत्र मन आसीन्निव तत्र किं चनाक्रियत न प्राज्ञायत नो हि मनसा ध्यायतः कश्चनाजानाति ॥ ५ ॥ ते देवा वाचमब्रुवन् । प्राची प्रेहीदं प्रज्ञपयेति सा होवाच किं मे ततः स्यादिति यत्किं चावषट्कृतꣳ स्वाहाकारेण यज्ञे ह्रियते तत्तऽइति तस्माद्यत्किं चावषट्कृतꣳ स्वाहाकारेण यज्ञे ह्रियते तद्वाचः सा प्राची प्रैत्सैतत्प्राज्ञपयदितीदं कुरुतेतीदं कुरुतेति ॥ ६ ॥ तस्माद्ध कुर्वन्त्येवऽर्चा हविर्धाने । प्रातरनुवाकमन्वाह सामिधेनीरन्वाह ग्रावाणोऽभिष्टौत्येवꣳ हि सयुज्ञावभवताम् ॥ ७ ॥ तस्माद्ध कुर्वन्त्येव सदसि । यज्ञुषौदुम्बरीमुह्यन्ति सदः संमिन्वन्ति धिष्ण्यानुपकिरन्त्येवꣳ हि सयुज्ञावभवताम् ॥ ८ ॥ तद्वाऽएतत्सदः परिश्रयन्ति । एतस्मै मिथुनाय तिरइवेदं मिथुनं चर्याताऽइति व्यृद्धं वाऽएतन्मिथुनं यदन्यः पश्यति तस्माद्यद्यपि जायापती मिथुनं चरन्तौ पश्यन्ति व्येव द्रवत आग एव कुर्वाते तस्माद्द्वारेण सदः प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति यथा ह मिथुनं चर्यमाणं पश्येदेवं तत्कामं द्वारेण देवकृतꣳ हि द्वारम् ॥ ९ ॥ एवमेवैतद्धविर्धानं परिश्रयन्ति । एतस्मै मिथुनाय तिरइवेदं मिथुनं चर्याताऽइति व्यृद्धं वाऽएतन्मिथुनं यदन्यः पश्यति तस्माद्यद्यपि जायापती मिथुनं चरन्तौ पश्यन्ति व्येव द्रवत आग एव कुर्वाते तस्माद्द्वारेण हविर्धानं प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति यथा ह मिथुनं चर्यमाणं पश्येदेवं तत्कामं द्वारेण देवकृतꣳ हि द्वारम् ॥ १० ॥ तद्वाऽएतद्वृ-

षा साम । योषामृचꣳ सदस्यध्येति तस्मान्मिथुनादिन्द्रो ज्ञातस्तेजसो वै तत्तेजो ज्ञातं यदृचश्च साम्नश्चेन्द्र इन्द्र इति क्वेतमाचक्षते य एष तपति ॥ ११ ॥ अथैतद्वृषा सोमः । योषा अपो हविर्धानेऽध्येति तस्मान्मिथुनाच्चन्द्रमा ज्ञातोऽन्नाद्यं तदन्नं ज्ञातं यदृचश्च सोमाच्च चन्द्रमाश्चन्द्रमा क्वेतस्यान्नं य एष तपति तद्यजमानं चैवैतज्ज्ञनयत्यन्नाद्यं चास्मै ज्ञनयत्यृचश्च साम्नश्च यजमानं ज्ञनयत्यृचश्च सोमाच्चास्माऽअन्नाद्यम् ॥ १२ ॥ यजुषा ह वै देवाः । अग्रे यज्ञं तेनिरेऽथर्चाथ साम्ना तद्दिदृक्षेत्यर्हि यजुषैवाग्रे यज्ञं तन्वतेऽथर्चाथ साम्ना यज्ञो ह वै नामैतद्यद्यजुरिति ॥ १३ ॥ यत्र वै देवाः । इमा विद्याः कामान्दुदुहे तद्ध यजुर्विद्यैव भूयिष्ठान्कामान्दुदुहे सा निर्धीततमेवास सा नेतरे विद्ये प्रत्यास नान्तरिक्षलोक इतरौ लोकौ प्रत्यास ॥ १४ ॥ ते देवा अकामयन्त । कथं न्वियं विद्येतरे विद्ये प्रतिस्यात्कथमन्तरिक्षलोक इतरौ लोकौ प्रतिस्यादिति ॥ १५ ॥ ते होचुः । उपाꣳश्वेव यजुर्भिश्चराम तत एषा विद्येतरे विद्ये प्रतिभविष्यति ततोऽन्तरिक्षलोक इतरौ लोकौ प्रतिभविष्यतीति ॥ १६ ॥ तैरुपाꣳश्वचरन् । आप्याययन्नेवैनानि तत्तत एषा विद्येतरे विद्ये प्रत्यासीत्ततोऽन्तरिक्षलोक इतरौ लोकौ प्रत्यासीत्तस्माद्यजूꣳषि निरुक्तानि सन्त्यनिरुक्तानि तस्मादयमन्तरिक्षलोको निरुक्तः सन्ननिरुक्तः ॥ १७ ॥ स य उपाꣳशु यजुर्भिश्चरति । आप्याययत्येवैनानि स तान्येनमापीनान्याप्याययत्यथ य उच्चैश्चरति बृहयत्येवैनानि स तान्येनꣳ बृहाणि बृहयन्ति ॥ १८ ॥ वागेवर्चश्च सामानि च । मन एव यजूꣳषि स यदृचा च साम्ना च चरन्ति वाक्ते भवन्त्यथ ये यजुषा चरन्ति मनस्ते भवन्ति तस्मान्नानभिप्रेषितमध्वर्युणा किं चन क्रियते यदैवाध्वर्युराहानुब्रूहि यजेत्यथैव ते कुर्वन्ति यदृचा कुर्वन्ति यदैवाध्वर्युराह सोमः पवतऽउपावर्तधमित्यथैव ते कुर्वन्ति ये साम्ना कुर्वन्ति नो ह्यनभिगतं मनसा वाग्वदति ॥ १९ ॥ तद्वाऽएतन्मनोऽध्वर्युः । पुरऽइवैव चरति तस्मात्पु-

रश्चरणं नाम पुर-इव ह वै श्रिया यशसा भवति य एवमेतद्वेद ॥ २० ॥ तद्वाऽएतदेव पुरश्चरणम् । य एष तपति स एतस्यैवावृता चरेद्वह्वं गृह्वेवैतस्यैवावृतमन्वावर्तेत प्रतिगीर्यैतस्यैवावृतमन्वावर्तेत ग्रहꣳ ह्वेवैतस्यैवावृतमन्वावर्तेत स ह्वैष भर्ता स यो ह्वैवं विद्वानेतस्यावृता शक्नोति चरितुꣳ शक्नोति ह्वैव भार्यान्भर्तुम् ॥ २१ ॥ ब्राह्मणम् ॥ १ [६. ७.] ॥

या वै दीक्षा सा निषत् । तत्सत्त्रं तस्मादेनानासतऽइत्याऽऽहुरथ यत्ततो यज्ञं तन्वते तथन्ति तन्नयति यो नेता भवति स तस्मादेनान्यन्तीत्याऽऽहुः ॥ १ ॥ या ह दीक्षा सा निषत् । तत्सत्त्रं तदयनं तत्सत्त्रायणमथ यत्ततो यज्ञस्योदृचं गत्वोत्तिष्ठन्ति तदुत्थानं तस्मादेनानुदस्थुरित्याऽऽहुरिति नु पुरस्ताद्वदनम् ॥ २ ॥ अथ दीक्षिष्यमाणाः समवस्यन्ति । ते यद्यग्निं चेष्यमाणा भवन्त्यरणिष्वेवाग्नीत्समारोक्ष्योपसमायन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्तऽएतेन प्राजापत्येन पशुना ॥ ३ ॥ तस्य शिरो निदधति । तेषां यदि तदृद्दीक्षा न समैत्यरणिष्वेवाग्नीत्समारोक्ष्य यथायथं विपरेत्य जुह्वति ॥ ४ ॥ अथ यदृद्धरेषां दीक्षा समैति । अरणिष्वेवाग्नीत्समारोक्ष्योपसमायन्ति यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मन्यते मध्यं प्रति शालाया अथेतरेषामर्धा दक्षिणत उपविशन्त्यर्धा उत्तरतो मथित्वोपसमाधायैकैकमेवोल्मुकमादायोपसमायन्ति गृहपतेर्गार्हपत्यं गृहपतेरेव गार्हपत्याद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समान आहवनीयो भवति नाना गार्हपत्या दीक्षोपसत्सु ॥ ५ ॥ अथ यदृद्धरेषां क्रयो भवति । तदृद्धर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यान्वैसर्जिनानां काले प्राच्यः पत्न्य उपसमायन्ति प्रजाकृत्येतानपरानग्नीन्कुरुत एव वैसर्जिने ॥ ६ ॥ राजानं प्रणयति । उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथेतऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्ति तैरेव तेषामुल्मुकैः प्रघ्नन्तीति ह स्माह याज्ञवल्क्यो ये तथा

कुर्वन्तीत्येतन्त्वेकमयनम् ॥७॥ अथेदं द्वितीयम् । अरणिष्ठेवाग्नीत्समारोक्ष्योपसमायन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्तऽएतेन प्राजापत्येन पशुना ॥८॥ तस्य शिरो निदधति । तेषां यदि तदृर्दीक्षा न समेत्यरणिष्ठेवाग्नीत्समारोक्ष्य यथायथं विपरेत्य जुह्वति ॥९॥ अथ यदृक्षरेषां दीक्षा समेति । अरणिष्ठेवाग्नीत्समारोक्ष्योपसमायन्ति यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मन्थतेऽथेतरे पर्युपविश्य मन्थन्ते ते ज्ञातं-ज्ञातमेवानुप्रहरन्ति गृहपतेर्गार्हपत्ये गृहपतेरेव गार्हपत्याद्धृत्याहवनीयं दीक्षन्ते तेषा७ समान आहवनीयो भवति समानो गार्हपत्यो दीक्षोपसत्सु ॥१०॥ अथ यदृक्षरेषां क्रयो भवति । तदृर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यान्वैसर्जिनानां काले प्राच्यः पल्य उपसमायन्ति प्रजाकृत्येतमपरमग्नि७ कृतऽएव वैसर्जिने ॥११॥ राजानं प्रणयति । उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथैतऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्ति समदमु हैव ते कुर्वन्ति समद्भिनान्विन्दत्यर्तुका ह भवत्यपि ह तमर्ध७ समद्भिन्दति यस्मिन्नर्धे यजन्ते ये तथा कुर्वन्त्येतद्द्वितीयमयनम् ॥१२॥ अथेदं तृतीयम् । गृहपतेरेवारण्योः संवदन्ते य इतोऽग्निर्जनिष्यते स नः सह यदनेन यज्ञेन जेष्यामोऽनेन पशुबन्धेन तन्नः सह सह नः साधुकृत्या य एव पापं करवत्तस्यैव तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वयं वैव समारोहयन्ते तऽआयन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्तऽएतेन प्राजापत्येन पशुना ॥१३॥ तस्य शिरो निदधति । तेषां यदि तदृर्दीक्षा न समेत्यरणिष्ठेवाग्नीत्समारोक्ष्य यथायथं विपरेत्य जुह्वति ॥१४॥ अथ यदृक्षरेषां दीक्षा समेति । गृहपतेरेवारण्योः संवदन्ते य इतोऽग्निर्जनिष्यते स नः सह यदनेन यज्ञेन जेष्यामोऽनेन सत्त्रेण तन्नः सह सह नः साधुकृत्या य एव पापं करवत्तस्यैव

तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वयं वैव समारोहयन्ते तऽआयन्ति यत्र दीक्षिष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समानं आहवनीयो भवति समानो गार्हपत्यो दीक्षोपसत्सु ॥१५॥ अथ यदृक्षरेषां क्रयो भवति । तदृक्षर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यान्वैसर्जनानां काले प्राच्यः पत्न्य उपसमायन्ति प्रजाकृत्येतमपरमग्निꣳ कृतऽएव वैसर्जने ॥१६॥ राजानं प्रणयति । उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथैतऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्ति तत्तत्कृतं नाकृतं यन्नानाधिष्ण्या भवन्ति वरीयानाकाशोऽसत्परिचरणायेत्यथ यन्नानापुरोडाशा भूयो कविरुक्षिष्टमसत्समाप्त्याऽइति ॥१७॥ अथ येन सत्त्रेण देवाः । क्षिप्रऽएव पाप्मानमपाघ्नतेमां जितिमजयन्यैषामियं जितिस्तदुत उद्यतऽएकगृहपतिका वै देवा एकपुरोडाशा एकधिष्ण्याः क्षिप्रऽएव पाप्मानमपाघ्नत क्षिप्रे प्राजायन्त तथोऽएवैतऽएकगृहपतिका एकपुरोडाशा एकधिष्ण्याः क्षिप्रऽएव पाप्मानमपघ्नते क्षिप्रे प्रजायन्ते ॥१८॥ अथादः पूर्वस्मिन्नुदीचीनवꣳशा शाला भवति । तन्मानुषꣳ समानं आहवनीयो भवति नाना गार्हपत्यास्तद्विकृष्टं गृहपतेरेव गार्हपत्ये जाघन्या पत्नीः संयाजयत्याज्येनेतरे प्रतियजन्तऽआसते तद्विकृष्टम् ॥१९॥ अथात्र प्राचीनवꣳशा शाला भवति । तद्देवत्रा समानं प्राहवनीयो भवति समानो गार्हपत्यः समानं आग्नीध्रीयस्तदेतत्सत्त्रꣳ समृद्धं यथैकाहः समृद्ध एवं तस्य न क्लृप्तास्ति तस्यैषैव समान्यावृद्यदन्यद्विष्ण्येभ्यः ॥२०॥ ब्राह्मणम् ॥१० [६. ८.] ॥ ॥

देवा ह वै सत्त्रमासत । श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेभ्य एतदन्नाद्यमभिजितमपाचिक्रमिषत्पशवो वाऽअन्नं पशवो ह्येवेभ्यस्तदपाचिक्रमिषन्यद्वै न इमे आत्ता न क्षिꣳस्युः कथमिव स्वित्नः सद्यत्तऽइति ॥१॥ तऽएते गार्हपत्ये द्वेऽआहुतीऽअजुह्वुः । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदेनान्गृहेष्वेव

न्ययङ्स्तथेभ्य एतदन्नाद्यमभिजितं नापाक्रामत् ॥२॥ तथोऽएवेमे सत्त्रमासते । ये सत्त्रमासते श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेभ्य एतदन्नाद्यमभिजितमपचिक्रमिषति पशवो वाऽअन्नं पशवो देवेभ्यस्तदपचिक्रमिषन्ति यद्वै न इमे आत्ता न क्षिꣳस्युः कथमिव स्विन्नः सद्यत्तऽइति ॥३॥ तऽएते गार्हपत्ये द्वेऽआकुती जुह्वति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदेनान्गृहेष्वेव नियच्छन्ति तथेभ्य एतदन्नाद्यमभिजितं नापक्रामति ॥४॥ तथोऽएवैतस्मात् । एतदन्नाद्यमुपाकृतमपचिक्रमिषति यद्वै मायं न क्षिꣳस्यात्कथमिव स्विन्मा सद्यतऽइति ॥४॥ तस्य परस्तादेवाग्नेऽल्पश-इव प्राश्नाति । तदेनदुपनिमदति तद्वेद न वै तथाभूयथामꣳसि न वै माक्षिꣳसीदिति तदेनमुपावश्रयते स ह प्रिय एवान्नस्यान्नादो भवति य एवं विद्वानेतस्य व्रतꣳ शक्नोति चरितुम् ॥५॥ तद्वाऽएतत् । दशमेऽहन्त्सत्त्रोत्थानं क्रियते तेषामेकैक एव वाचंयम आस्ते वाचमाप्यायंयंस्तयापीनयायातयाम्न्योत्तरमहस्तन्वतेऽथेतरे विसृज्यन्ते समिद्धारा वा स्वाध्यायं वा तत्राप्यश्नन्ति ॥६॥ तेऽपराह्णऽउपसमेत्य । अप उपस्पृश्य पत्नीशालꣳ सम्प्रपद्यन्ते तेषु समन्वारब्धेष्वेतेऽआकुती जुहोतीह रतिरिह रमधमिह धृतिरिह स्वधृतिः स्वाहेति पशूनेवैतदाह पशूनेवैतदात्मन्नियच्छन्ते ॥७॥ अथ द्वितीयां जुहोति । उपसृज्जन्धरुणां मात्रऽइत्यग्निमेवैतत्पृथिव्याऽउपसृज्जन्नाह धरुणो मातरं धयन्नित्यग्निमेवैतत्पृथिवीं धयन्तमाह रायस्पोषमस्मासु दीधरत्स्वाहेति पशवो वै रायस्पोषः पशूनेवैतदात्मन्नियच्छन्ते ॥८॥ ते प्राञ्च उपनिष्क्रामन्ति । ते पश्चात्प्राञ्चो हविर्धाने सम्प्रपद्यन्ते पुरस्ताद्वै प्रत्यञ्चस्तꣳस्यमाना अथैवꣳ सत्रोत्थाने ॥१०॥ तऽउत्तरस्य हविर्धानस्य । जघन्यायां कूबर्यांꣳ सामाभिगायन्ति सत्त्रस्यऽऋद्धिरिति राद्धिमेवैतदभ्युत्तिष्ठन्त्युत्तरवेदेर्वोत्तरायाꣳ श्रोणावितरं तु कृततरम् ॥११॥ यदुत्तरस्य हविर्धानस्य । जघन्यायां कूबर्यामगन्म ज्योतिरमृता अभूमेति ज्योतिर्वाऽएते भवन्त्य-

मृता भवन्ति ये सत्त्रमासते दिवं पृथिव्या अध्यारुहामेति दिवं वाऽएते पृथिव्या अध्यारोहन्ति ये सत्त्रमासतेऽविदाम देवानिति विन्दन्ति हि देवान्त्स्वर्ज्योतिरिति त्रिर्निधनमुपावयन्ति स्वर्ज्योते ज्योतिर्ज्योते भवन्ति तद्यदेवैतस्य साम्नो रूपं तदेवैते भवन्ति ये सत्त्रमासते ॥ १२ ॥ ते दक्षिणास्य हविर्धानस्य । अधोऽधोऽक्ष सर्पन्ति स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यन्तेऽतिछन्दसा सर्पन्त्येषा वै सर्वाणि छन्दाꣳसि यदतिछन्दास्तथैनान्याप्मा नान्वत्येति तस्मादतिछन्दसा सर्पन्ति ॥ १३ ॥ न्ते सर्पन्ति । युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तं-तमिद्धतं वज्रेण तं-तमिद्धतम् । दूरे चत्ताय छत्सदृङ्ने यदिनद्धात् । अस्माकꣳ शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वत इति ॥ १४ ॥ ते प्राञ्च उपनिष्क्रामन्ति । ते पुरस्तात्प्रत्यञ्चः सदः सम्प्रपद्यन्ते पश्चाद्धि प्राञ्चस्तꣳस्यमाना अथैवꣳ सत्रोत्थाने ॥ १५ ॥ ते यथाधिष्ण्यमेवोपविशन्ति । देवेभ्यो ह वै वाचो रसोऽभिजितोऽपचिक्रमिषां चकार स इमामेव पराङत्यसिसृप्सदियं वै वाक्तस्या एष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाप्नुवन्स एनानाप्तोऽभ्यावर्तत तस्मादस्यामूर्धा ओषधयो जायन्तऽऊर्धा वनस्पतयस्तथोऽएवैतेभ्य एतद्वाचो रसोऽभिजितोऽपचिक्रमिषति स इमामेव पराङतिसिसृप्सतीयं वै वाक्तस्या एष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाप्नुवन्ति स एनानाप्तोऽभ्यावर्तते तस्मादस्यामूर्धा ओषधयो जायन्तऽऊर्धा वनस्पतयः ॥ १६ ॥ सर्पराज्ञ्या ऋचा स्तुवते । इयं वै पृथिवी सर्पराज्ञी तदनयैवैतत्सर्वमाप्नुवन्ति स्वयम्प्रस्तुतमनुपगीतं यथा नान्य उपशृणुयादिति ह रेचयेद्यदन्यः प्रस्तुयादतिरेचयेद्यदन्य उपगायेदतिरेचयेद्यदन्य उपशृणुयात्तस्मात्स्वयम्प्रस्तुतमनुपगीतम् ॥ १७ ॥ चतुर्होतॄन्होता व्याचष्टे । एतदेवैतत्स्तुतमनुशꣳसति यदि होता न विद्याद्धोतुर्व्याचक्षीत होतुस्त्वेव व्याख्यानम् ॥ १८ ॥ अथाधर्योः प्रतिगरः । अरात्सुरिमे यज्ञमाना भद्रमेभ्योऽभूदिति कल्याणमेवैतन्मानुष्यै

वाचो वदति ॥ १६ ॥ अथ वाकोवाक्ये ब्रह्मोद्यं वदन्ति । सर्वं वै तेषामाप्तं भवति सर्वं जितं ये सत्त्रमासतेऽचारिषुर्यज्ञुर्भिस्तत्तान्यापंस्तद्वारुत्सताशꣳसिषुर्ऋचस्तत्ता आपंस्तद्वारुत्सतास्तोषत सामभिस्तत्तान्यापंस्तद्वारुत्सताथैषामितद्वानाप्तमनवरुद्धं भवति यद्वाकोवाक्यं ब्राह्मणं तद्वैवैतेनाप्नुवन्ति तद्वरुन्धते ॥ २० ॥ औदुम्बरीमुपसꣳसृप्य वाचं यच्छन्ति । विदुरृत्विज ऋते यज्ञं निर्धयन्ति ये वाचा यज्ञं तन्वते वाग्वि यज्ञस्तामेषां पुरैकैक एव वाचंयम आस्ते वाचमाप्याययंस्तयापीनयायातयाम्न्योत्तरमृक्स्तन्वतेऽथात्र सर्वैव वागाप्ता भवत्यपवृक्ता ताꣳ सर्वऽएव वाचंयमा वाचमाप्याययन्ति तयापीनयायातयाम्न्यातिरात्रं तन्वते ॥ २१ ॥ औदुम्बरीमन्वारभ्यासते । अन्नं वाऽऊर्गुदुम्बर ऊर्जैवैतद्वाचमाप्याययन्ति ॥ २२ ॥ तेऽस्तमिते प्राञ्च उपनिष्क्रामन्ति । ते ज्ञघनेनाहवनीयमासतेऽग्रेण हविर्धाने तान्वाचंयमानेव वाचंयमः प्रतिप्रस्थाता वसतीवरीभिरभिपरिहरति ते यत्कामा आसीरंस्तेन वाचं विसृजेरन्कामैर्ह स्म वै पुरऽर्षयः सत्त्रमासतेऽसौ नः कामः स नः समृध्यतामिति यद्युऽअनेककामाः स्युर्लोककामा वा प्रजाकामा वा पशुकामा वा ॥ २३ ॥ अनेनैव वाचं विसृजेरन् । भूर्भुवः स्वरिति तत्सत्येनैवैतद्वाचꣳ समर्धयन्ति तया समृद्धयाशिष आशासते सुप्रजाः प्रजाभिः स्यामेति तत्प्रजामाशासते सुवीरा वीरैरिति तद्वीरानाशासते सुपोषाः पोषैरिति तत्पुष्टिमाशासते ॥ २४ ॥ अथ गृहपतिः सुब्रह्मण्यामाह्वयति । यं वा गृहपतिर्ब्रूयात्पृथगु हैवैके सुब्रह्मण्यामाह्वयन्ति गृहपतिस्त्वेव सुब्रह्मण्यामाह्वयेद्यं वा गृहपतिर्ब्रूयात्तस्मिन्त्समुपह्वमिष्ट्वा समिधोऽभ्यादधति ॥ २५ ॥ ब्राह्मणम् ॥ ११ [६. १.] ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या १२६ ॥ ॥ षष्ठोऽध्यायः [३०.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ६४८ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे ग्रहनाम चतुर्थं काण्डं समाप्तम् ॥ ४ ॥

VARIOUS READINGS.

Adhyâya १.१.२८ तन्न दशाभिर्न AB. - २.१४ °तद्दधाति AB. प्राज्ञा न प्र° A. - १६ Are we to read प्राणत्यश्वोदनत्य°? - १७ तन्न साद° AB. - २६ प्रत्युज्यन्ते A. - ३.१७ see *Rik* १. १६४.४५. - ४.१ we exspect ऽभिगत्वेव. —

Adhyâya २.१.२६ °मनुह्रयते यद्वैवै° AB. Read: यद्वैवैनौ. - २७ संस्कृ° AB, and thus is to be read, not सꣳस्कृ° as I have given in the preceding books. - २.२६ °त्यस्थाली AB. - ३.७ °भ्यर्द्ध AB. - ४.१ °त्सद्ध्रुवस्तौ A. - २४ °मग्निं । AB. देवाः । AB. —

Adhyâya ३.१.२४ °षिता । AB. - २७ सुतं । AB. - २.१२ see Kâtyây. १. १३. २१. - ४.१ तत्तँ AB. सँज्ञ° AB. - ३३ समिन्द्धे AB. - ५.५ and ७ भविष्यथेत्यु ह्रादित्या AB. - ७ Read: ह्रादित्या. - २० मह्स्वसरस्य is either मह्ः स्वसरस्य with elision of the visarga or it contains the obsolete मह् = मह्ा The mss. at Kâty. १०. ४. १३ read मह्स्वसद्स्य. —

Adhyâya ४.१ A has at the close ॥३॥ पिण्ड ॥. - ४.१४ °स्तं जुषस्व is the reading also in the Saṃhitâ ८. २२, where the तज्जुषस्व of the Edition is a misprint. - ५.३ संभवदिति AB. संभवेदिति is my conjecture, but I prefer now the reading of the mss. - १६ °षस्य द्विरवद्यन्ति AB. —

Adhyâya ५.१.१ आसाः भस्माः marginal gloss. in A. - १२ (and wherever the word occurs) सत्र AB.: the reading सत्त्र is given on account of

the etymology. - The beginning of ५. २ is preceded in A by the following words: गर्भप्रसूतिसमये पठन इदं ब्राह्मणं । द्वौ कणिडका वर्जित । आखूत्कर ॥ १ ॥ पशुश्रपण ॥ २ ॥. - २. १० पुस्कृत्यैव AB. - १७ तद्यदस्वाक्राकृतं AB. - ३. ३ see *Rik.* ३. ३२. ११. - ४. ६ वद्यवत् AB. - ५. ५ डीङ् विक्रायसां गतौ अतिशययेन (?) उच्चैर्गच्छन्ति marginal gloss. in A. - ७. २ °त्येतद्वाऽअस्त्ये° AB. - ८. १० ऽदिति AB. The Saṃhitâ ८. ४३ reads ऽदिते. - ११ तिल चलने तिल-इव शाखाभिः पुष्पफलैर्विवृद्धः तिल्विलः कुस्तिपकः marginal gloss. in A. - १३ तद्बृद्ध एवै° AB. - १. ११ कामन्वाऽइमा° AB. —

Adhyâya ६. ६. ४ A. has at the close ॥ ४ ॥ एकांडीनि नाम । कुर्वा ॥. - ७. ११ सदस्यद्योति AB. - १२ र्धानिऽद्योति AB. - २१ A has at the close ॥ १ ॥ एब्राह्मणानि नाम । घटसर्प. - ८. २ पुरस्ताद्वदनम् A prima m. - ५ सामान आकव° A. - २० A has at the close ॥ १० ॥ एब्राह्मणाने नाम बालसर्प. - १. १४ त्संत्सङ्कनं B. - २३ समृद्धता° AB. —

ओम् । देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा अतिमानेनैव कस्मिन्नु वयं जुह्वयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्तेऽतिमानेनैव पराबभूवुस्तस्मान्नातिमन्येत पराभवस्य ह्येतन्मुखं यदतिमानः ॥१॥ अथ देवाः । अन्योऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यः प्रजापतिरात्मानं प्रददौ यज्ञो ह्येषामास यज्ञो हि देवानामन्नम् ॥२॥ ते ह्योचुः । कस्य न इदं भविष्यतीति ते मम ममेत्येव न सम्पादयां चक्रुस्ते ह्यासम्पाद्योचुरात्मन्येवास्मिन्नजामहै स यो न उज्जेष्यति तस्य न इदं भविष्यतीति तथेति तस्मिन्नात्मन्याजह्रुः ॥३॥ स बृहस्पतिः । सवितारमेव प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुव व्रत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रासुवत्तत्सवितृप्रसूत उदजयत्स इदꣳ सर्वमभवत्स इदꣳ सर्वमुदजयत्प्रजापतिꣳ ह्युदजयत्सर्वमु ह्येवेदं प्रजापतिस्तेनेष्टैतामेवोर्धा दिशमुदक्रामत्तस्माद्यश्च वेद यश्च नैषोर्धा बृहस्पतेर्दिगित्येवाब्रुवः ॥४॥ तद्धे ह स्म पुरा वाजपेयेन यजन्ते । एताꣳ ह स्मैवोर्धा दिशमुत्क्रामन्ति तत औपाविनेव ज्ञानश्रुतेयेन प्रत्यवरूढं ततोऽर्वाचीनं प्रत्यवरोहन्ति ॥५॥ तेनेन्द्रोऽयजत । स इदꣳ सर्वमभवत्स इदꣳ सर्वमुदजयत्प्रजापतिꣳ ह्युदजयत्सर्वमु ह्येवेदं प्रजापतिस्तेनेष्टैतामेवोर्धा दिशमुदक्रामत् ॥६॥ ॥शतम्२१००॥ ॥ तद्धे ह स्म पुरा वाजपेयेन यजन्ते । एताꣳ ह स्मैवोर्धा दिशमुत्क्रामन्ति तत औपाविनेव ज्ञानश्रुतेयेन प्रत्यवरूढं ततोऽर्वाचीनं प्रत्यवरोहन्ति ॥७॥ स यो वाजपेयेन यजते । स इदꣳ सर्वं भवति स इदꣳ सर्वमुज्जयति प्रजापतिꣳ ह्युज्जयति सर्वमु ह्येवेदं प्रजापतिः

॥ ८॥ तदाहुः । न वाजपेयेन यजेत सर्वं वाऽएष इदमुज्जयति यो वाजपेयेन यजते प्रजापतिꣳ ह्युज्जयति सर्वमु ह्येवेदं प्रजापतिः स इह न किं चन परिशिनष्टि तस्येश्वरः प्रजा पापीयसी भवितोरिति ॥ १॥ तदु वै यजेतैव । यऽएवमेतं यज्ञं क्लृप्तं विद्युर्ऋत्विजो यजुष्टः सामतो ये प्रज्ञायस्तऽएनं याजयेयुरेषा ह्व वेवैतस्य यज्ञस्य समृद्धिर्यदेनं विद्वाꣳसो याजयन्ति तस्माद्व यजेतैव ॥ १०॥ स वाऽएष ब्राह्मणस्यैव यज्ञः । यदेनेन बृहस्पतिरयजत ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणोऽथो राजन्यस्य यदेनेनेन्द्रोऽयजत क्षत्रꣳ ह्येन्द्रः क्षत्रꣳ राजन्यः ॥ ११॥ राज्ञ एव राजसूयꣳ । राजा वै राजसूयेनेष्ट्वा भवति न वै ब्राह्मणो राज्यायालमवरं वै राजसूयं परं वाजपेयꣳ ॥ १२॥ राजा वै राजसूयेनेष्ट्वा भवति । सम्राड्वाजपेयेनावरꣳ हि राज्यं परꣳ साम्राज्यं कामयेत वै राजा सम्राड् भवितुमवरꣳ हि राज्यं परꣳ साम्राज्यं न सम्राट्कामयेत राजा भवितुमवरꣳ हि राज्यं परꣳ साम्राज्यꣳ ॥ १३॥ स यो वाजपेयेनेष्ट्वा सम्राड् भवति । स इदꣳ सर्वꣳ संवृङ्क्ते स कर्मणः-कर्मणः पुरस्तादिताꣳ सावित्रीमाहुतिं जुहोति देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति ॥ १४॥ तस्यैवादो बृहस्पतिः । सवितारं प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुव बत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रासुवत्तत्सवितृप्रसूत उदजयदेवमेवैष एतत्सवितारमेव प्रसवायोपधावति सविता वै देवानां प्रसवितेदं मे प्रसुव बत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रसौति तत्सवितृप्रसूत उज्जयति ॥ १५॥ तस्मादाह । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाजं नः स्वदतु स्वाहेति प्रजापतिर्वै वाचस्पतिरन्नं वाजः प्रजापतिर्न इदमन्नꣳ स्वदवित्येवैतदाह स एतमेवाहुतिं जुहोत्या श्वःसुत्याया एतद्व्यस्यैतत्कर्मारब्धं भवति प्रसन्न एतं यज्ञं भवति ॥ १६॥ ब्राह्मणम् ॥ १॥

अꣳशुं गृह्णाति । सर्वत्वायैव तस्माद्वाऽअꣳशुं गृह्णात्यथैतान्प्रज्ञातानेवाग्निष्टोमिकान्यक्ष्यन्गृह्णात्याग्रयणात् ॥ १ ॥ अथ पृष्ठ्यान्गृह्णाति । तद्यदेवैतैर्देवा उदजयंस्तदेवैष एतैरुज्जयति ॥ २ ॥ अथ षोडशिनं गृह्णाति । तद्यदेवैतेनेन्द्र उदजयत्तदेवैष एतेनोज्जयति ॥ ३ ॥ अथैतान्पञ्च वाजपेययक्ष्यन्गृह्णाति । ध्रुवसदं वा नृषदं मनःसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्येषां वै लोकानामयमेव ध्रुव इयं पृथिवीमामेवैतेन लोकमुज्जयति ॥ ४ ॥ अप्सुषदं वा घृतसदं व्योमसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्येषां वै लोकानामयमेव व्योमेदमन्तरिक्षमन्तरिक्षलोकमेवैतेनोज्जयति ॥ ५ ॥ पृथिविसदं वान्तरिक्षसदं दिविसदं देवसदं नाकसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्येष वै देवसन्नाकसदेष एव देवलोको देवलोकमेवैतेनोज्जयति ॥ ६ ॥ अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितमपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्येष वाऽअपाꣳ रसो योऽयं पवते स एष सूर्ये समाहितः सूर्यात्पवतऽएतमेवैतेन रसमुज्जयति ॥ ७ ॥ ग्रहा ऊर्जाहुतयः । व्यन्तो विप्राय मतिं तेषां विशिप्रियाणां वोऽहमिषमूर्जꣳ समग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टमेष ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्यूर्वै रसो रसमेवैतेनोज्जयति ॥ ८ ॥ तान्वाऽएतान् । पञ्च वाजपेययक्ष्यन्गृह्णाति प्रजापतिं वाऽएष उज्जयति यो वाजपेयेन यजते संवत्सरो वै प्रजापतिः पञ्च वाऽऋतवः संवत्सरस्य तत्प्रजापतिमुज्जयति तस्मात्पञ्च वाजपेययक्ष्यन्गृह्णाति ॥ ९ ॥ अथ सप्तदश सोमयक्ष्यन्गृह्णाति । सप्तदश सुरायक्ष्यन्प्रजापतेर्वाऽएतेऽन्धसी यत्सोमश्च सुरा च ततः सत्यं श्रीर्ज्योतिः सोमोऽनृतं पाप्मा तमः सुरैतेऽएवैतदुभेऽन्धसीऽउज्जयति सर्वं वाऽएष

इदमुज्जयति यो वाजपेयेन यजते प्रजापतिꣳ क्युज्जयति सर्वमु क्वेवेदं प्रजापतिः ॥ १० ॥ स यत्सप्तदश । सोमग्रहान्गृह्णाति सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावतैवास्यैतत्सत्यꣳ श्रियं ज्योतिरुज्जयति ॥ ११ ॥ अथ यत्सप्तदश । सुराग्रहान्गृह्णाति सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावतैवास्यैतदनृतं पाप्मानं तम उज्जयति ॥ १२ ॥ तज्जभये चतुस्त्रिꣳशद्ग्रहाः सम्पद्यन्ते । त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशस्तत्प्रजापतिमुज्जयति ॥ १३ ॥ अथ यत्र राजानं क्रीणाति । तद्दक्षिणातः प्रतिवेशतः केशवात्पुरुषात्सीसेन परिस्रुतं क्रीणाति न वाऽएष स्त्री न पुमान्यत्केशवः पुरुषो यदु पुमांस्तेन न स्त्री यदु केशवस्तेन न पुमान्नैतद्यो न हिरण्यं यत्सीसं नैष सोमो न सुरा यत्परिस्रुत्तस्मात्केशवात्पुरुषात्सीसेन परिस्रुतं क्रीणाति ॥ १४ ॥ अथ पूर्वेद्युः । द्वौ खरौ कुर्वन्ति पुरोऽह्नमेवान्यं पश्चाद्दिनमन्यं नेत्सोमग्रहांश्च सुराग्रहांश्च सहु सादयामेति तस्मात्पूर्वेद्युर्द्वौ खरौ कुर्वन्ति पुरोऽह्नमेवान्यं पश्चाद्दिनमन्यम् ॥ १५ ॥ अथ यत्र पूर्वया द्वारा । वसतीवरीः प्रपादयन्ति तदपरया द्वारा नेष्टा परिस्रुतं प्रपादयति दक्षिणातः पात्राण्यभ्यवहरन्ति पुरोऽह्नमेव प्रत्यङ्डासीनोऽध्वर्युः सोमग्रहान्गृह्णाति पश्चाद्दिनं प्राङासीनो नेष्टा सुराग्रहात्सोमग्रहमेवाध्वर्युर्गृह्णाति सुराग्रहं नेष्टा सोमग्रहमेवाध्वर्युर्गृह्णाति सुराग्रहं नेष्टैवमेवैनान्व्यत्यासं गृह्णीतः ॥ १६ ॥ न प्रत्यञ्चमह्नमध्वर्युः । सोमग्रहमतिहरति न प्राञ्चमह्नं नेष्टा सुराग्रहं नेऽज्यीतिश्च तमश्च सꣳसृज्यावेति ॥ १७ ॥ उपर्युपर्येवाह्नमध्वर्युः । सोमग्रहं धारयत्यधोऽधोऽह्नं नेष्टा सुराग्रहꣳ सम्पृचौ स्थः सं मा भद्रेण पृङ्क्तमिति नेत्यापमिति ब्रवावेति तौ पुनर्विहरतो विपृचौ स्थो वि मा पाप्मना पृङ्क्तमिति तद्यथेषीकां मुञ्जाद्विवृहेद्देवमेनꣳ सर्वस्मात्पाप्मनो विवृहतस्तस्मिन्न तावच्चनैनो भवति यावत्तृणस्याग्रं तौ सादयतः ॥ १८ ॥ अथाध्वर्युः । हिरण्यपात्रेण मधुग्रहं

गृह्णाति तं मध्ये सोमग्रहाणाꣳ सादयत्यथोक्थ्यं गृह्णात्यथ ध्रुवमथैतान्त्सोमग्रहानुत्तमे स्तोत्रꣳऋत्विजां चमसेषु व्यवनीय जुह्वति तान्भक्षयत्यथ माध्यन्दिने सवने मधुग्रहस्य च सुराग्रहाणां चोच्यते तस्यातः ॥ ११ ॥ ब्राह्मणम् ॥ २ ॥

आग्नेयमग्निष्टोमꣳ आलभते । अग्निर्वाऽअग्निष्टोमोऽग्निष्टोममेवैतेनोज्जयत्यैन्द्राग्नमुक्थेभ्य आलभतऽऐन्द्राग्नानि वाऽउक्थान्युक्थान्येवैतेनोज्जयत्यैन्द्रꣳ षोडशिन ꣳआलभतऽइन्द्रो वै षोडशी षोडशिनमेवैतेनोज्जयति ॥ १ ॥ सारस्वतꣳ सप्तदशाय स्तोत्रायालभते । तदेतदनतिरात्रे सति रात्रे रूपं क्रियते प्रजापतिं वाऽएष उज्जयति यो वाजपेयेन यजते संवत्सरो वै प्रजापतिस्तदेतेन सारस्वतेन रात्रिमुज्जयति तस्मादेतदनतिरात्रे सति रात्रे रूपं क्रियते ॥ २ ॥ अथ मरुद्भ्य उज्जेषेभ्यः । वशां पृश्निमालभतऽइयं वै वशा पृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं वशा पृश्निरन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं विशो वै मरुतोऽन्नं वै विश उज्जेषेभ्य इत्युज्जित्याऽएव दुर्वेदेऽउज्जेषवत्यौ याज्यानुवाक्ये यद्युज्जेषवत्यौ न विन्देदपि येऽएव के च मारुत्यौ स्यातां दुर्वेदोऽएव वशा पृश्निर्यदि वशां पृश्निं न विन्देदपि यैव का च वशा स्यात् ॥ ३ ॥ तस्या आवृत् । यत्र होता माहेन्द्रं ग्रहमनुशꣳसति तदस्यै वपया प्रचरेयुरेष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रमिन्द्रो वै यजमानस्तन्मध्यत एवैतद्यजमाने वीर्यं दधाति तस्माद्स्याऽअत्र वपया प्रचरेयुः ॥ ४ ॥ द्वेधावदानानि श्रपयन्ति । ततोऽर्धानां जुह्वामुपस्तीर्य द्विर्द्विरवद्यति सकृदभिघारयति प्रत्यनक्त्यवदानान्यथोपभृत्त सकृत्सकृदवद्यति द्विरभिघारयति न प्रत्यनक्त्यवदानानि तद्यदर्धानां द्विर्द्विरवद्यति तथैषा कृत्स्ना भवत्यथ यदेतैः प्रचरति तेन दैवीं विशमुज्जयत्यथार्धानि मानुष्यै विशऽउपहरति तेनो मानुषीं विशमुज्जयति ॥ ५ ॥ तदु तथा न कुर्यात् । स्खल-

ति वाऽएष यो यज्ञपथादेत्येति वाऽएष यज्ञपथाय एवं करोति तस्माद्यत्रैवेतरेषां पशूनां वपाभिः प्रचरन्ति तदेवैतस्यै वपया प्रचरेयुरेकधावदानानि अयथन्ति न मानुष्यै विशऽउपकरन्ति ॥ ६ ॥ अथ सप्तदश प्राजापत्यान्पशूनालभते । ते वै सर्वे तूपरा भवन्ति सर्वे श्यामाः सर्वे मुष्कराः प्रजापतिं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नं वै प्रजापतिः पशुर्वाऽअन्नं तत्प्रजापतिमुज्जयति सोमो वै प्रजापतिः पशुर्वै प्रत्यक्षꣳ सोमस्तत्प्रत्यक्षं प्रजापतिमुज्जयति सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥ ७ ॥ ते वै सर्वे तूपरा भवन्ति । पुरुषो वै प्रजापतेर्नेदिष्ठꣳ सोऽयं तूपरोऽविषाणास्तूपरो वाऽअविषाणाः प्राजापत्या एते तस्मात्सर्वे तूपरा भवन्ति ॥ ८ ॥ सर्वे श्यामाः । द्वे वै श्यामस्य रूपे शुक्लं चैव लोम कृष्णं च द्वन्द्वं वै मिथुनं प्रजननं प्रजननं प्रजापतिः प्राजापत्या एते तस्मात्सर्वे श्यामा भवन्ति ॥ ९ ॥ सर्वे मुष्कराः । प्रजननं वै मुष्करः प्रजननं प्रजापतिः प्राजापत्या एते तस्मात्सर्वे मुष्करा भवन्ति दुर्वेदा एवꣳसमृद्धाः पशवो यस्यैवꣳसमृद्धान्न विन्देदपि कतिपया एवैवꣳसमृद्धाः स्युः सर्वमु ह्येवेदं प्रजापतिः ॥ १० ॥ तद्वैके । वाचऽउत्तममालभन्ते यदि वै प्रजापतेः परमस्ति वागेव तदेतद्वाचमुज्जयाम इति वदन्तस्तदु तथा न कुर्यात्सर्वं वाऽइदं प्रजापतिर्यदिमे लोका यदिदं किं च सा यदेवेषु लोकेषु वाग्वदति तद्वाचमुज्जयति तस्मादु तन्नाद्रियेत ॥ ११ ॥ तेषामावृत् । यत्र मैत्रावरुणो वामदेव्यमनुशꣳसति तदेषां वपाभिः प्रचरेयुः प्रजननं वै वामदेव्यं प्रजननं प्रजापतिः प्राजापत्या एते तस्मादेषां वपाभिरत्र प्रचरेयुः ॥ १२ ॥ अथेष्टा अनुयाजा भवन्ति । अव्यूढे स्रुचावथैषाꣳ हविर्भिः प्रचरन्ति सोऽन्तोऽन्तो वै प्रजापतिस्तदन्तत एवैतत्प्रजापतिमुज्जयत्यथ यत्पुरा प्रचरेथ्यथा यमधानमिष्यन्त्स्यात्तं गत्वा स क्व ततः स्यादेवं तत्तस्मादेषामत्र हविर्भिः प्रचरन्ति ॥ १३ ॥ तदु तथा न कुर्यात् । स्खलति वाऽएष यो यज्ञपथादेत्येति वा

ऽएष यज्ञपथाथ्य एवं करोति तस्माथ्त्रैवेतरेषां पशूनां वपाभिः प्रचरन्ति तदेवैतेषां वपाभिः प्रचरेयुर्यत्रैवेतरेषां पशूनाꣳ हविर्भिः प्रचरन्ति तदेवैतेषाꣳ हविषा प्रचरेयुरेकानुवाक्या एका याज्यैकदेवत्या हि प्रजापतयऽइत्युपाꣳशूक्का ह्यागानाꣳ हविषोऽनुब्रूहीति प्रजापतयऽइत्युपाꣳशूक्का ह्यागानाꣳ हविः प्रस्थितं प्रेष्येति वषट्कृते जुहोति ॥१४॥ ब्राह्मणम् ॥३॥

तं वै माध्यन्दिने सवनेऽभिषिञ्चति । माध्यन्दिने सवनऽआज्ञिं धावन्त्येष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तन्मध्यत एवैतत्प्रजापतिमुज्जयति ॥१॥ अगृह्णीते माहेन्द्रे । एष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रमिन्द्रो वै यजमानस्तदेनꣳ स्वऽएवायतनेऽभिषिञ्चति तस्मादगृह्णीते माहेन्द्रे ॥२॥ अथ रथमुपावहरति । इन्द्रस्य वज्रोऽसीति वज्रो वै रथ इन्द्रो वै यजमानस्तस्मादाहेन्द्रस्य वज्रोऽसीति वाजसा इति वाजसा हि रथस्त्वयायं वाजꣳ सेदित्यन्नं वै वाजस्त्वयायमन्नमुज्जयवित्येवैतदाह ॥३॥ तं धूर्गृह्णीतमर्त्तवेऽभ्यववर्तयति । वाजस्य नु प्रसवे मातरं महीमित्यन्नं वै वाजोऽन्नस्य नु प्रसवे मातरं महीमित्येवैतदाहादितिं नाम वचसा करामहऽइतीयं वै पृथिव्यदितिस्तस्मादाहादितिं नाम वचसा करामहऽइति यस्यामिदं विश्वं भुवनमाविवेशेत्यस्याꣳ ह्येदꣳ सर्वं भुवनमाविष्टं तस्यां नो देवः सविता धर्म साविषदिति तस्यां नो देवः सविता यजमानꣳ सवतामित्येवैतदाह ॥४॥ अथाश्वानद्भिरभ्युन्नति । स्नपनायाभ्यवनीयमानात्स्नपितान्वोदानीतानह्यो ह वाऽअग्रेऽश्वः सम्बभूव सोऽह्यः सम्भवन्नसर्वः समभवदसर्वो हि वै समभवत्तस्मान्न सर्वैः पद्भिः प्रतितिष्ठत्येकैकमेव पादमुद्य तिष्ठति तद्यदेवास्यात्राप्स्वक्षीयत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्माद्-श्वानद्भिरभ्युन्नति स्नपनायाभ्यवनीयमानात्स्नपितान्वोदानीतान् ॥५॥ सोऽभ्युन्न-

ति । अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिषदश्वा भवत वाजिन इत्यनेनापि देवीरापो यो व ऊर्मिः प्रनूर्तिः ककुन्मान्वाजसास्तेनायं वाजꣳ सेदित्यन्नं वै वाजस्तेनायमन्नमुज्जयवित्येवैतदाह ॥ ६ ॥ अथ रथं युनक्ति । स दक्षिणायुग्यमेवाग्रे युनक्ति सव्यायुग्यं वाऽग्रे मानुषेऽथैवं देवत्रा ॥ ७ ॥ स युनक्ति । वातो वा मनो वेति न वै वातात्किं चनाशीयोऽस्ति न मनसः किं चनाशीयोऽस्ति तस्मादाह वातो वा मनो वेति गन्धर्वाः सप्तविꣳशतिस्तेऽग्रेऽश्वमयुञ्जन्निति गन्धर्वा ह वाऽग्रेऽश्वं युयुजुस्तथेऽग्रेऽश्वमयुङ्क्ते वा युञ्जन्त्वित्येवैतदाह तेऽस्मिन्जवमादधुरिति तथेऽस्मिन्जवमादधुस्ते वयि जवमादधत्वित्येवैतदाह ॥ ८ ॥ अथ सव्यायुग्यं युनक्ति । वातरꣳहा भव वाजिन्युज्यमान इति वातजवो भव वाजिन्युज्यमान इत्येवैतदाहेन्द्रस्येव दक्षिणः श्रियैधीति यथेन्द्रस्य दक्षिणः श्रियैवं यजमानस्य श्रियैधीत्येवैतदाह युञ्जन्तु वा मरुतो विश्ववेदस इति युञ्जन्तु वा देवा इत्येवैतदाह ते त्वष्टा पत्सु जवं दधावितिं नात्र तिरोहितमिवास्त्यथ दक्षिणाप्रष्टिं युनक्ति सव्याप्रष्टिं वाऽग्रे मानुषेऽथैवं देवत्रा ॥ ९ ॥ स युनक्ति । जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तोऽचरच्च वातꣳइति जवो यस्ते वाजिन्नप्यन्यत्रापनिहितस्तेन न इमं यज्ञं प्रजापतिमुज्जयेत्येवैतदाह तेन नो वाजिन्बलवान्बलेन वाजजिच्च भव समने च पारयिष्णुरित्यन्नं वै वाजोऽन्नजिच्च न एधस्मिंश्च नो यज्ञे देवसमनऽइमं यज्ञं प्रजापतिमुज्जयेत्येवैतदाह ॥ १० ॥ ते वाऽएतऽएव त्रयो युक्ता भवन्ति । त्रिवृद्धि देवानां तद्धि देवत्राधिप्रष्टियुग एव चतुर्थोऽन्वेति मानुषो हि स तं यत्र दास्यन्भवति तच्चतुर्थमुपयुज्य ददाति तस्मादपीतरस्मिन्यज्ञ ऽएतऽएव त्रयो युक्ता भवन्ति त्रिवृद्धि देवानां तद्धि देवत्राधिप्रष्टियुग एव चतुर्थोऽन्वेति मानुषो हि स तं यत्र दास्यन्भवति तच्चतुर्थमुपयुज्य ददाति ॥ १२ ॥ अथ बार्हस्पत्यं चरुं नैवारꣳ सप्तदशशरावं निर्वपति । अन्नं वाऽएष उज्जयति

यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तदेवास्माऽएतत्करोति ॥१२॥ अथ यद्बार्हस्पत्यो भवति । बृहस्पतिर्वेतमग्रऽउदजयत्तस्माद्बार्हस्पत्यो भवति ॥१३॥ अथ यन्नैवारो भवति । ब्रह्म वै बृहस्पतिरेते वै ब्रह्मणा पच्यन्ते यन्नीवारास्तस्मान्नैवारो भवति सप्तदशशरावो भवति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१४॥ तमश्वानवघ्रापयति । वाजिन इति वाजिनो ह्यश्वास्तस्माद्राह वाजिन इति वाजजित इत्यन्नं वै वाजोऽन्नजित इत्येवैतद्राह वाजꣳ सरिष्यन्त इत्याजिꣳ हि सरिष्यन्तो भवन्ति बृहस्पतेर्भागमवजिघ्रतेति बृहस्पतेर्वेष भागो भवति तस्माद्राह बृहस्पतेर्भागमवजिघ्रतेति तद्यदश्वानवघ्रापयतीममुज्जयानीति तस्माद्वाऽअश्वानवघ्रापयति ॥१५॥ ब्राह्मणम् ॥४॥ ॥

तद्यदाजिं धावन्ति । इममेवैतेन लोकमुज्जयत्यथ यद्ब्रह्मा रथचक्रे साम गायति नाभिदघ्नऽउद्धितेऽन्तरिक्षलोकमेवैतेनोज्जयत्यथ यद्यूपꣳ रोहति देवलोकमेवैतेनोज्जयति तस्माद्वाऽएतत्त्रयं क्रियते ॥१॥ स ब्रह्मा रथचक्रमधिरोहति । नाभिदघ्नऽउद्धितं देवस्याहꣳ सवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकꣳ रुहेयमिति यदि ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणाः ॥२॥ अथ यदि राजन्यो यजते । देवस्याहꣳ सवितुः सवे सत्यसवस इन्द्रस्योत्तमं नाकꣳ रुहेयमिति क्षत्रꣳ हीन्द्रः क्षत्रꣳ राजन्यः ॥३॥ त्रिः सामाभिगायति । त्रिरभिगीयावरोहति देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेरुत्तमं नाकमरुहमिति यदि ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणाः ॥४॥ अथ यदि राजन्यो यजते । देवस्याहꣳ सवितुः सवे सत्यप्रसवस इन्द्रस्योत्तमं नाकमरुहमिति क्षत्रꣳ हीन्द्रः क्षत्रꣳ राजन्यः ॥५॥ अथ सप्तदश दुन्दुभीननुवेद्यन्तꣳ संमिन्वन्ति । प्रतीच आग्नीध्रात्प्रजापतिं वाऽएष उज्जयति यो वाजपेयेन यजते वाग्वै प्रजापतिरेषा वै परमा वाग्या सप्तदशानां दुन्दुभीनां परमामेवैतद्वाचं परमं प्रजापतिमुज्जयति

सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥६॥ अथैतेषां डुन्डुभीनाम् । एकं यजुषाकृन्ति तत्सर्वे यजुषाकृता भवन्ति ॥७॥ स आकृन्ति । बृहस्पते वाजं जय बृहस्पतये वाचं वदत बृहस्पतिं वाजं जापयतेति यदि ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणः ॥८॥ अथ यदि राजन्यो यजते । इन्द्र वाजं जयेन्द्राय वाचं वदतेन्द्रं वाजं जापयतेति क्षत्रꣳ ह्येन्द्रः क्षत्रꣳ राजन्यः ॥९॥ अथैतेषाजिसृत्सु रथेषु । पुनरासृतेषैतेषां डुन्डुभीनामेकं यजुषोपावहरति तत्सर्वे यजुषोपावहृता भवन्ति ॥१०॥ स उपावहरति । एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपताजीजपत बृहस्पतिं वाजं वनस्पतयो विमुच्यधमिति यदि ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणः ॥११॥ अथ यदि राजन्यो यजते । एषा वः सा सत्या संवागभूद्येन्द्रं वाजमजीजपताजीजपतेन्द्रं वाजं वनस्पतयो विमुच्यधमिति क्षत्रꣳ ह्येन्द्रः क्षत्रꣳ राजन्यः ॥१२॥ अथ वेद्यन्तात् । राजन्य उदङ् सप्तदश प्रव्याधान्प्रविध्यति यावान्वाऽएकः प्रव्याधस्तावांस्तिर्यङ् प्रजापतिरथ यावत्सप्तदश प्रव्याधास्तावानन्वङ् प्रजापतिः ॥१३॥ तद्यद्राजन्यः प्रविध्यति । एष वै प्रजापतेः प्रत्यक्षतमां यद्राजन्यस्तस्मादेकः सन्बह्वनामीष्टे यद्वेव चतुरक्षरः प्रजापतिश्चतुरक्षरो राजन्यस्तस्माद्राजन्यः प्रविध्यति सप्तदश प्रव्याधान्प्रविध्यति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१४॥ अथ यं यजुषा युनक्ति । तं यजमान आतिष्ठति देवस्याकृꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषमिति ॥१५॥ तद्यथैवादो बृहस्पतिः । सवितारं प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुव वत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रासुवत्तत्सवितृप्रसूत उदजयदेवमेवैष एतत्सवितारमेव प्रसवायोपधावति सविता वै देवानां प्रसवितेदं मे प्रसुव वत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रसौति तत्सवितृप्रसूत उज्जयति ॥१६॥ अथ

यज्ञधर्याः । अन्तेवासी वा ब्रह्मचारी वैतद्यजुरधीयात्सोऽन्वास्थाय वाचयति वाजिन इति वाजिनो ह्यश्वास्तस्मादाह वाजिन इति वाजजित इत्यन्नं वै वाजोऽन्नजित इत्येवैतदाहाधन स्कभ्नुवन्त इत्यधनो हि स्कभ्नुवन्तो धावन्ति योजना मिमाना इति योजनशो हि मिमाना अधानं धावन्ति काष्ठां गच्छतेति यथैनानन्तरा नाष्ट्रा रक्षाꣳसि न क्षिꣳस्युरेवमेतदाह धावन्त्याज्रिमाघ्नन्ति दुन्दुभीनभि साम गायति ॥ १७ ॥ अथैताभ्यां जगतीभ्याम् । जुहोति वानु वा मन्त्रयते यदि जुहोति यद्यनुमन्त्रयते समान एव बन्धुः ॥ १८ ॥ स जुहोति । एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धोऽअपिकक्षऽआसनि । क्रतुं दधिक्रा अनु सꣳसनिष्यदत्पथामङ्कार्ष्टस्यन्वापनीफणात्स्वाहा ॥ १९ ॥ उत स्म । अस्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः । श्येनस्येव ध्रजतोऽअङ्कसं परि दधिक्राव्णाः सहोर्जा तरित्रतः स्वाहेति ॥ २० ॥ अथोत्तरेण त्रिचेन । जुहोति वानु वा मन्त्रयते द्वयं तद्यस्माज्जुहोति वानु वा मन्त्रयते यदि जुहोति यद्यनुमन्त्रयते समान एव बन्धुरेतानेवैतद्श्वान्धावत उपवाजयत्येतेषु वीर्यं दधाति तिस्रो वाऽइमाः पृथिव्य इयमेका द्वेऽअस्याः परे ता एवैतदुज्जयति ॥ २१ ॥ सोऽनुमन्त्रयते । शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः । जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥ २२ ॥ ते नोऽअर्वन्तः । हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः । सहस्रसा मेधसाता सनिष्यवो महो ये धनꣳ समिथेषु जभ्रिरे ॥ २३ ॥ वाजे-वाजेऽवत । वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैरिति ॥ २४ ॥ अथ बार्हस्पत्येन चरुणा प्रत्युपतिष्ठते । तमुपस्पृशत्यन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तेनैवैतदेतां गतिं गत्वा सꣳस्पृशते तदात्मन्कुरुते ॥ २५ ॥ स उपस्पृशति । आ मा वाजस्य प्रसवो जगम्यादित्यन्नं वै वाज

आ मान्नस्य प्रसवो ऽगम्यादित्येवैतदाहेमे द्यावापृथिवी विश्वरूपेऽइति द्यावापृथिवी हि प्रजापतिरा मा गन्तां पितरामातरा चेति मातेव च हि पितेव च प्रजापतिरा मा सोमोऽअमृतत्वेन गम्यादिति सोमो हि प्रजापतिः ॥ २६ ॥ तमश्वानवघ्रापयति । वाजिन इति वाजिनो ह्यश्वास्तस्मादाह वाजिन इति वाजजित इत्यन्नं वै वाजोऽन्नजित इत्येवैतदाह वाजꣳ ससृवाꣳसं इति सरिष्यन्त इति वा ऽअग्रऽआह सरिष्यन्त-इव हि तर्हि भवत्यथात्र ससृवाꣳस इति ससृवाꣳस-इव ह्यत्र भवन्ति तस्मादाह ससृवाꣳस इति बृहस्पतेर्भागमवजिघ्रतेति बृहस्पतेर्ह्येष भागो भवति तस्मादाह बृहस्पतेर्भागमवजिघ्रतेति निमृजाना इति तद्यजमाने वीर्यं दधाति तद्यदश्वानवघ्रापयतीममुज्जयानीति वाऽअग्रेऽवघ्रापयत्यथात्रेममुदजैषमिति तस्माद्वाऽअश्वानवघ्रापयति ॥ २७ ॥ अथैतेषामाजिश्रिताꣳ रथानाम् । एकस्मिन्वैश्यो वा राजन्यो वोपास्थितो भवति स वेदेरुत्तरायाꣳ श्रोणाऽउपविशत्यथाधर्युश्च यजमानश्च पूर्वया द्वारा मधुग्रहमादाय निष्क्रामतस्तं वैश्यस्य वा राजन्यस्य वा पाणावाधत्तोऽथ नेष्टापरया द्वारा सुराग्रहानादाय निष्क्रामति स जघनेन शालां पर्येत्यैकं वैश्यस्य वा राजन्यस्य वा पाणावाददधाकानेन तऽइमं निष्क्रीणामीति सत्यं वै श्रीर्ज्योतिः सोमोऽनृतं पाप्मा तमः सुरा सत्यमेवैतद्रियं ज्योतिर्यजमाने दधात्यनृतेन पाप्मना तमसा वैश्यं विध्यति तैः स यं भोगं कामयते तं कुरुतेऽथैतꣳ सहिरण्यपात्रमेव मधुग्रहं ब्रह्मणे ददाति तं ब्रह्मणे दददमृतमायुरात्मन्धत्तेऽमृतꣳ ह्यायुर्हिरण्यं तेन स यं भोगं कामयते तं कुरुते ॥ २८ ॥ ब्राह्मणम ॥ ५ ॥ ॥ प्रथमोऽध्यायः [३१.] ॥ ॥

अथ स्रुवं चाज्यविलापनीं चादाय । आहवनीयमभ्येति स एता द्वादशातीर्जुहोति वा वाचयति वा यदि जुहोति यदि वाचयति समान एव बन्धुः ॥ १ ॥ स जुहोति । आपये स्वाहा स्वापये स्वाहापिजायं स्वाहा क्रतवे स्वाहा वसवे

स्वाहाकृत्यै स्वाहाकृते मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन ꣳआत्यायनाय स्वाहात्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहेत्येता द्वादशाऽऽहुतीर्जुहोति द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तꣳयैवास्यातिर्या सम्पत्तामेवैतद्गुड्डयति तामात्मन्कुरुते ॥२॥ अथ षट् क्रुतीः । जुहोति वा वाचयति वा यदि जुहोति यदि वाचयति समान एव बन्धुः ॥३॥ स वाचयति । आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतामित्येताः षट् क्रुतीर्वाचयति षड्वाऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तꣳयैवास्य क्रुतिर्या सम्पत्तामेवैतद्गुड्डयति तामात्मन्कुरुते ॥४॥ अष्टाश्रिर्यूपो भवति । अष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दो देवलोकमेवैतेनोड्डयति सप्तदशभिर्वासोभिर्यूपो वेष्टितो वा विग्रथितो वा भवति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुड्डयति ॥५॥ गौधूमं चषालं भवति । पुरुषो वै प्रजापतेर्नेदिष्ठꣳ सोऽयमवगेते वै पुरुषस्यौषधीनां नेदिष्ठतमां यद्गोधूमास्तेषां न वगस्ति मनुष्यलोकमेवैतेनोड्डयति ॥६॥ गर्तन्वान्यूपोऽतीक्ष्णाग्रो भवति । पितृदेवत्यो वै गर्तः पितृलोकमेवैतेनोड्डयति सप्तदशारत्निर्भवति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुड्डयति ॥७॥ अथ नेष्टा पत्नीमुदानिष्यन् । कौशं वासः परिधापयति कौशं वा चण्डातकमन्तरं दीक्षितवसनाड्डघनार्धो वाऽएष यज्ञस्य यत्पत्नी तामितत्प्राचीं यज्ञं प्रसादयिष्यन्भवत्यस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेर्मेध्या वै दर्भास्तꣳयदेवास्या अमेध्यं तदेवास्या एतद्दर्भैर्मेध्यं कृत्वाधिनां प्राचीं यज्ञं प्रसादयति तस्मान्नेष्टा पत्नीमुदानेष्यन्कौशं वासः परिधापयति कौशं वा चण्डातकमन्तरं दीक्षितवसनात् ॥८॥ अथ निश्रयणीं निश्रयति । स दक्षिणत उदङ् रोहेदुत्तरतो वा दक्षिणा दक्षिणातस्त्वेवोदङ् रोहेत्तथा क्षुद्रमभवति ॥९॥ स रोहन्नायामामनक्ति । नायꣳ हि

स्वो रोहावेति रोहावेत्याह ज्ञाया तद्यज्ज्ञायामामन्त्रयतेऽर्धो ह वाऽएष आत्मनो यज्ज्ञाया तस्माद्यावज्ज्ञायां न विन्दते नैव तावत्प्रजायतेऽसर्वो हि तावद्भवत्यथ यदैव ज्ञायां विन्दतेऽथ प्रजायते तर्हि हि सर्वो भवति सर्व एतां गतिं गच्छानीति तस्माज्ज्ञायामामन्त्रयते ॥१०॥ स रोहति । प्रजापतेः प्रजा अभूमेति प्रजापतेर्ह्येष प्रजा भवति यो वाजपेयेन यजते ॥११॥ अथ गोधूमानुपस्पृशति । स्वर्देवा अगन्मेति स्वर्ह्येष गच्छति यो वाजपेयेन यजते ॥१२॥ तद्यद्गोधूमानुपस्पृशति । अन्नं वै गोधूमा अन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तेनैवैतदेतां गतिं गत्वा सꣳस्पृशते तदात्मन्कुरुते तस्माद्गोधूमानुपस्पृशति ॥१३॥ अथ शीर्ष्णा यूपमत्युज्जिहीते । अमृता अभूमेति देवलोकमेवैतेनोज्जयति ॥१४॥ ॥ शतम्३००० ॥॥ अथ दिशोऽनुवीक्षमाणो जपति । अस्मे वोऽअस्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चाꣳसि सन्तु व इति सर्वं वाऽएष इदमुज्जयति यो वाजपेयेन यजते प्रजापतिꣳ ह्युज्जयति सर्वमु ह्येवेदं प्रजापतिः सोऽस्य सर्वस्य यश इन्द्रियं वीर्यꣳ संवृज्य तदात्मन्धत्ते तदात्मन्कुरुते तस्माद्दिशोऽनुवीक्षमाणो जपति ॥१५॥ अथैनमूषपुटैरनूदस्यन्ति । पशवो वाऽऊषा अन्नं वै पशवोऽन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तेनैवैतदेतां गतिं गत्वा सꣳस्पृशते तदात्मन्कुरुते तस्मादेनमूषपुटैरनूदस्यन्ति ॥१६॥ आश्वत्थेषु पलाशेषूपनद्धा भवन्ति । स यदेवादोऽश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत तस्मादाश्वत्थेषु पलाशेषूपनद्धा भवन्ति विशोऽनूदस्यन्ति विशो वै मरुतोऽन्नं विशस्तस्माद्विशोऽनूदस्यन्ति सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१७॥ अथेमामुपावेक्षमाणो जपति । नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्याऽइति बृहस्पतेर्ह वाऽअभिषिषिचानात्पृथिवी बिभयां चकार मरुद्वाऽअयमभूद्योऽभ्यषेचि

यद्वै मायं नावदृणीयादिति बृहस्पतिर्ह पृथिव्यै बिभयां चकार यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयमकुरुत न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१८॥ बृहस्पतिसवो वाऽएष यद्वाजपेयम् । पृथिव्यु हैतस्माद्बिभेति महद्वाऽअयमभूद्योऽभ्यषेचि यद्वै मायं नावदृणीयादित्येष उ ह्यस्यै बिभेति यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयं कुरुते न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१९॥ अथ हिरण्यमभ्यवरोहति । अमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति ॥२०॥ अथाजर्षभस्याजिनमुपस्तृणाति । तदुपरिष्टाद्बुकं निदधाति तमभ्यवरोहतीमां वैव ॥२१॥ अथास्माऽआसन्दीमाहरन्ति । उपरिसव्यं वाऽएष जयति यो जयत्यन्तरिक्षसव्यं तदेनमुपर्यासीनमधस्तादिमाः प्रजा उपासते तस्मादस्माऽआसन्दीमाहरन्ति ॥२२॥ औदुम्बरी भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जो ऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरी भवति तामग्नेण क्रविर्धाने जघनेनाहवनीयं निदधाति ॥२३॥ अथाजर्षभस्याजिनमास्तृणाति । प्रजापतिर्वाऽएष यदजर्षभ एता वै प्रजापतेः प्रत्यङ्गतमां यदजास्तस्मादेतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्ति तत्प्रजापतिमेवैतत्करोति तस्मादजर्षभस्याजिनमास्तृणाति ॥२४॥ स आस्तृणाति । इयं ते राडिति राज्यमेवास्मिन्नेतद्दधात्यथैनमासादयति यन्तासि यमन इति यन्तारमेवैनमेतद्यमनमासां प्रजानां करोति ध्रुवोऽसि धरुण इति ध्रुवमेवैनमेतद्धरुणमस्मिंल्लोके करोति कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वेति साधवे त्वेत्येवैतदाह ॥२५॥ ब्राह्मणम् ॥ ६ [२. १.] ॥ ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या११७॥ ॥

बार्हस्पत्येन चरुणा प्रचरति । तस्यानिष्ट एव स्विष्टकृद्वत्यथास्माऽअन्नꣳ सम्भरत्यन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तदेवास्माऽएतत्सम्भरति ॥१॥ औदुम्बरे पात्रे । अन्नं

वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरे पात्रे सोऽप एव प्रथमाः सम्भरत्यथ पयोऽथ यथोपस्मारमन्नानि ॥२॥ तद्धैके । सप्तदशान्नानि सम्भरन्ति सप्तदशः प्रजापतिरिति वदन्तस्तदु तथा न कुर्यात्प्रजापतेर्न्वेव सर्वमन्नमनवरुद्धं क उ तस्मै मनुष्यो यः सर्वमन्नमवरुन्धीत तस्मादु सर्वमेवान्नं यथोपस्मारꣳ सम्भरन्नेकमन्नं न सम्भरेत् ॥३॥ स यन्न सम्भरति । तस्योद्ब्रुवीत तस्य नाश्नीयाद्यावज्जीवं तथा नान्तमेति तथा ह्योग्जीवति स एतस्य सर्वस्यान्नाद्यस्य सम्भृतस्य स्रुवेणोपघातं वाजप्रसवीयानि जुहोति तद्यास्य एवैतद्देवताभ्यो जुहोति ता अस्मै प्रसुवन्ति ताभिः प्रसूत उज्जयति तस्माद्वाजप्रसवीयानि जुहोति ॥४॥ स जुहोति । वाजस्येमं प्रसवः सुषुवेऽग्रे सोमꣳ राजानमोषधीष्वप्सु । ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥५॥ वाजस्येमाम् । प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् । अदित्सन्तं दापयति प्रजानन्त्स नो रयिꣳ सर्ववीरं नियच्छतु स्वाहा ॥६॥ वाजस्य नु । प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः । सनेमि राजा परियाति विद्वान्प्रजां पुष्टिं वर्धयमानोऽअस्मे स्वाहा ॥७॥ सोमꣳ राजानम् अवसेऽग्निमन्वारभामहे । आदित्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा ॥८॥ अर्यमणं बृहस्पतिम् । इन्द्रं दानाय चोदय । वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनꣳ स्वाहा ॥९॥ अग्नेऽअङ्गिरः । वदेह नः प्रति नः सुमना भव । प्र नो यच्छ सहस्रजिद्वꣳ हि धनदा असि स्वाहा ॥१०॥ प्र नः । यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः । प्र वाग्देवी ददातु नः स्वाहेति ॥११॥ अथैनं परिशिष्टेनाभिषिञ्चति । अन्नाद्येनैवैनमेतदभिषिञ्चत्यन्नाद्यमेवास्मिन्नेतद्दधाति तस्मादेनं परिशिष्टेनाभिषिञ्चति ॥१२॥ सोऽभिषिञ्चति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिति देवहस्तैरेवैनमेतदभिषिञ्चति सरस्वत्यै वाचो यन्तुर्यन्त्रियै दधामीति वाग्वै सरस्वती तदेनं वाच एव

यत्तुर्यस्त्रिये दधाति ॥ १३ ॥ तदु केकऽआहुः । विश्वेषां वा देवानां यत्तुर्यस्त्रिये दधामीति सर्वं वै विश्वे देवास्तदेनꣳ सर्वस्यैव यत्तुर्यस्त्रिये दधाति तदु तथा न ब्रूयात्सरस्वत्यै वा वाचो यत्तुर्यस्त्रिये दधामीत्येव ब्रूयाद्वाग्वै सरस्वती तदेनं वाच एव यत्तुर्यस्त्रिये दधाति बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसाविति नाम गृह्णाति तद्बृहस्पतेरेवैनमेतत्सायुज्यꣳ सलोकतां गमयति ॥ १४ ॥ अथाह । सम्राडयमसौ सम्राडयमसाविति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्यो यो ऽभ्यषेचीत्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥ १५ ॥ अथोज्जिगीः । जुहोति वा वाचयति वा यदि जुहोति यदि वाचयति समान एव बन्धुः ॥ १६ ॥ स वाचयति । अग्निरेकान्नरेण प्राणमुदजयत्तमुज्जेषं प्रजापतिः सप्तदशान्नरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषमिति तद्यदेवैताभिरेता देवता उदजयंस्तदेवैष एताभिरुज्जयति सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥ १७ ॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । तद्यदुत्तरेणाहुतीऽएतत्कर्म क्रियतऽएष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तन्मध्यत एवैतत्प्रजापतिमुज्जयति तस्मादुत्तरेणाहुती ऽएतत्कर्म क्रियतऽआश्राव्याहाग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोति ॥ १८ ॥ अथेडामादधाति । उपहूतायामिडायामप उपस्पृश्य माहेन्द्रं ग्रहं गृह्णाति माहेन्द्रं ग्रहं गृहीत्वा स्तोत्रमुपाकरोति तꣳ स्तोत्राय प्रमीवति स उपावरोहति सोऽन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्य ॥ १९ ॥ तद्वै केके । एतत्कृत्वाथैतत्कुर्वन्ति तदु तथा न कुर्यादात्मा वै स्तोत्रं प्रजा शस्त्रमेतस्माद्ध स यजमानं प्रणाशयति स स्रिक्व एति स स्खलति तस्मादेतदेव कृत्वाथैतत्कुर्यात् ॥ २० ॥ अथेडामादधाति । उपहूतायामिडायामप उपस्पृश्य माहेन्द्रं ग्रहं गृह्णाति माहेन्द्रं ग्रहं गृहीत्वा स्तोत्रमुपाकरोति तꣳ स्तोत्राय प्रमीवति स उपावरोहति सोऽन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्य

॥ २१ ॥ ब्राह्मणम् ॥ १ [२. २.] ॥॥

पूर्णाहुतिं जुहोति । सर्वं वै पूर्णꣳ सर्वं परिगृह्य सूयाऽइति तस्यां वरं ददाति सर्वं वै वरः सर्वं परिगृह्य सूयाऽइति स यदि कामयेत जुहुयादेतां यꣳ कामयेतापि नाद्रियेत ॥ १ ॥ अथ श्वो भूते । अनुमत्यै हविरष्टाकपालं पुरोडाशं निर्वपति स ये जघनेन शम्यां पिष्यमाणानामवशीयन्ते पिष्टानि वा तण्डुला वा तान्स्रुवे सार्धꣳ संवपत्यन्वाहार्यपचनाडुल्मुकमाददते तेन दक्षिणा यन्ति स यत्र स्वकृतं वेरिणं विन्दति श्वभ्रप्रदरं वा ॥ २ ॥ तदग्निꣳ समाधाय जुहोति । एष ते निर्ऋते भागस्तं जुषस्व स्वाहेतीयं वै निर्ऋतिः सा यं पाप्मना गृह्णाति तं निर्ऋत्या गृह्णाति तद्यदेवास्या अत्र नैर्ऋतꣳ रूपं तदेवैतद्भवयति तथो हैनꣳ सूयमानं निर्ऋतिर्न गृह्णात्यथ यत्स्वकृते वेरिणे जुहोति श्वभ्रप्रदरे वैतद्वै क्यस्यै निर्ऋतिगृहीतम् ॥ ३ ॥ अथाप्रतीक्षं पुनरायन्ति । अथानुमत्याऽअष्टाकपालेन पुरोडाशेन प्रचरतीयं वाऽअनुमतिः स यस्तत्कर्म शक्नोति कर्तुं यच्चिकीर्षतीयꣳ हास्मै तदनुमन्यते तदिमामेवैतत्प्रीणात्यनयानुमत्यानुमतः सूयाऽइति ॥ ४ ॥ अथ यदष्टाकपालो भवति । अष्टाक्षरा वै गायत्री गायत्री वाऽइयं पृथिव्यथ यत्समानस्य हविष उभयत्र जुहोत्येषा क्वैवैतदुभयं तस्य वासो दक्षिणा यद्वै सवासा अरण्यं नोदाशꣳसते निधाय वै तद्वासोऽतिमुच्यते तथो हैनꣳ सूयमानमासङ्गो न विन्दति ॥ ५ ॥ अथ श्वो भूते । आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपति तेन यथेष्टैवं यजते तद्यदेवादः प्रज्ञातमाग्नावैष्णवं दोहनीयꣳ हविस्तदेवैतदग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वत्यग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः परार्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य सूयाऽइति तस्मादाग्नावैष्णव एकादशकपालः पुरोडाशो भवति तस्य हिरण्यं दक्षिणाग्नेयो वाऽएष यज्ञो भवत्यग्नेरेतो हिरण्यं यो वै विष्णुः स यज्ञोऽग्निरु वै यज्ञ एव तदु तदाग्नेयमेव

तस्माद्धिरण्यं दक्षिणा ॥ ६ ॥ अथ श्वो भूते । अग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपति तेन यथेष्टयैवं यजतऽएतेन वाऽइन्द्रो वृत्रमहन्नेतेनोऽएव व्यजयत यास्येयं विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयते विजितेऽभयेऽनाष्टे सूयाऽइति तस्मादग्नीषोमीय एकादशकपालः पुरोडाशो भवति तस्योत्सृष्टो गौर्दक्षिणोत्सर्ज्जं वाऽअमुं चन्द्रमसं घ्नन्ति पौर्णमासेनाहुर्घ्नन्त्यामावास्येनोत्सृजन्ति तस्मादुत्सृष्टो गौर्दक्षिणा ॥ ७ ॥ अथ श्वो भूते । ऐन्द्राग्नं द्वादशकपालं पुरोडाशं निर्वपति तेन यथेष्टयैवं यजते यत्र वाऽइन्द्रो वृत्रमहंस्तदस्य भीतस्येन्द्रियं वीर्यमपचक्राम स एतेन हविषेन्द्रियं वीर्यं पुनरात्मन्नधत्त तथोऽएवैष एतेन हविषेन्द्रियं वीर्यमात्मन्धत्ते तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र उभे वीर्ये परिगृह्य सूयाऽइति तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति तस्यर्षभोऽनड्वान्दक्षिणा स हि वहेनाग्नेय आण्डाभ्यामैन्द्रस्तस्मादृषभोऽनड्वान्दक्षिणा ॥ ८ ॥ अथाग्रयणेष्ट्या यजते । सर्वान्वाऽएष यज्ञक्रतूनवरुन्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वाऽएषेष्टिर्यदाग्रयणेष्टिरनया मेऽपीष्टमसदनयापि सूयाऽइति तस्मादाग्रयणेष्ट्या यजतऽओषधीर्वाऽएष सूयमानोऽभि सूयते तदोषधीरेवैतदनमीवा अकिल्विषाः कुरुतेऽनमीवा अकिल्विषा ओषधीरभि सूयाऽइति तस्य गौर्दक्षिणा ॥ ९ ॥ अथ चातुर्मास्यैर्यजते । सर्वान्वाऽएष यज्ञक्रतूनवरुन्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वाऽएष यज्ञक्रतुर्यच्चातुर्मास्यान्येभिर्मेऽपीष्टमसदेभिरपि सूयाऽइति तस्माच्चातुर्मास्यैर्यजते ॥ १० ॥ ब्राह्मणम् ॥ २ [२. ३.] ॥ ॥

वैश्वदेवेन यजते । वैश्वदेवेन वै प्रजापतिर्भूमानं प्रजाः ससृजे भूमानं प्रजाः सृष्ट्वा सूयाऽइति तथोऽएवैष एतद्वैश्वदेवेनैव भूमानं प्रजाः सृजते भूमानं प्रजाः सृष्ट्वा सूयाऽइति ॥ १ ॥ अथ वरुणप्रघासैर्यजते । वरुणप्रघासैर्वै प्रजापतिः प्रजा व-

रुणपाशात्प्रामुञ्चत्ता अस्यानमीवा अकिल्विषाः प्रजा प्राजायन्तानमीवा अकिल्विषाः प्रजा अभि सूयाऽइति तथो एवैष एतद्वरुणप्रघासैरेव प्रजा वरुणपाशात्प्रमुञ्चति ता अस्यानमीवा अकिल्विषाः प्रजाः प्रजायन्तेऽनमीवा अकिल्विषाः प्रजा अभि सूयाऽइति ॥२॥ अथ साकमेधैर्यजते । साकमेधैर्वै देवा वृत्रमघ्नंस्तैर्वेव व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतैः पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयते विजितेऽभयेऽनाष्ट्रे सूयाऽइति ॥३॥ अथ शुनासीर्येण यजते। उभौ रसौ परिगृह्य सूयाऽइत्यथ पञ्चवातीयꣳ स पञ्चधाहवनीयं व्युह्य स्रुवेणोपघातं जुहोति ॥४॥ स पूर्वार्धे जुहोति । अग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहेत्यथ दक्षिणार्धे जुहोति यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहेत्यथ पश्चार्धे जुहोति विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहेत्यथोत्तरार्धे जुहोति मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहेत्यथ मध्ये जुहोति सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो ध्रुवस्वद्भ्यः स्वाहेति ॥५॥ अथ सार्धꣳ समुह्य जुहोति । ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्रा उपरिसदो ध्रुवस्वत्तस्तेभ्यः स्वाहेति तथ्देवं जुहोति ॥६॥ यत्र वै देवाः । साकमेधैर्व्यजयन्त येयमेषां विजितिस्तां तद्घोचुरुत्पिबन्ते वाऽइमानि दिक्षु नाष्ट्रा रक्षाꣳसि हन्तेभ्यो वज्रं प्रहरामिति वज्रो वाऽआज्यं तऽएतेन वज्रेणाज्येन दिक्षु नाष्ट्रा रक्षाꣳस्यवाघ्नंस्ते व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतेन वज्रेणाज्येन दिक्षु नाष्ट्रा रक्षाꣳस्यवहन्ति तथोऽएव विजयते विजितेऽभयेऽनाष्ट्रे सूयाऽइति ॥७॥ अथ यदेता अपराः पञ्चाहुतीर्जुहोति । क्षणवन्ति वाऽएतदग्नेर्विवृहन्ति यत्पञ्चधाहवनीयं व्यूहन्ति तदेवास्यैतेन संदधाति तस्मादेता अपराः पञ्चाहुतीर्जुहोति

॥ ८ ॥ तस्य प्रष्टिवाहनोऽश्वरथो दक्षिणा । त्रयोऽश्वा द्वौ सव्यष्टसारथी ते पञ्च प्राणा यो वै प्राणः स वातस्तद्यदेतस्य कर्मण एषा दक्षिणा तस्मात्पञ्चवातीयं नाम ॥ ९ ॥ स ह्रैतेनापि भिषज्येत् । अयं वै प्राणो योऽयं पवते यो वै प्राणः स आयुः सोऽयमेक-इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टो दशधा विहितो दश वाऽएता आहुतीर्जुहोति तदस्मिन्दश प्राणान्कृत्स्नमेव सर्वमायुर्दधाति स यदिहापि गतासुरिव भवत्या ह्रैवैनेन हरति ॥ १० ॥ अथेन्द्रतुरीयम् । आग्नेयोऽष्टाकपालः पुरोडाशो भवति वारुणो यवमयश्चरुः रौद्रो गावेधुकश्चरुरनडुह्यै वहलायाऽऐन्द्रं दधि तेनेन्द्रतुरीयेण यजतऽइन्द्राग्नीऽउ ह्रैवैतत्समूदतिऽउत्पिबन्ते वाऽइमानि दिवु नाष्ट्रा रक्षाऽसि हन्तेभ्यो वज्रं प्रहरावेति ॥ ११ ॥ स होवाच । त्रयो मम भागाः सन्त्वेकस्तवेति तथेति तावेतेन हविषा दिवु नाष्ट्रा रक्षाऽस्यवाहतां तौ व्यजयेतां यैनयोरियं विजितिस्तां तथोऽएवैष एतेन हविषा दिवु नाष्ट्रा रक्षाऽस्यवहन्ति तथोऽएव विजयते विजितेऽभये नाष्ट्रे सूयाऽइति ॥ १२ ॥ स य एष आग्नेयोऽष्टाकपालः पुरोडाशो भवति । सोऽग्नेरेको भागोऽथ यद्वारुणो यवमयश्चरुर्भवति यो वै वरुणः सोऽग्निः सोऽग्नेर्द्वितीयो भागोऽथ यद्रौद्रो गावेधुकश्चरुर्भवति यो वै रुद्रः सोऽग्निः सोऽग्नेस्तृतीयो भागोऽथ यद्गावेधुको भवति वास्तव्यो वाऽएष देवो वास्तव्या गवेधुकास्तस्माद्गावेधुको भवत्यथ यदनडुह्यै वहलायाऽऐन्द्रं दधि भवति स इन्द्रस्य चतुर्थो भागो यद्वै चतुर्थं तत्तुरीयं तस्मादिन्द्रतुरीयं नाम तस्यैषैवानडुही वहला दक्षिणा सा हि वहेनाग्नेय्यग्निदग्धमिव ह्यस्यै वहं भवत्यथ यत्स्त्री सती वहत्यधर्मेण तदस्यै वारुणꣳ रूपमथ यद्रौस्तेन रौद्र्यथ यदस्याऽऐन्द्रं दधि तेनैन्द्र्येषा हि वाऽएतत्सर्वं व्यश्नुते तस्मादेषैवानडुही वहला दक्षिणा ॥ १३ ॥ अथापामार्गहोमं जुहोति । अपामार्गैर्वै देवा दिवु नाष्ट्रा रक्षाऽस्यपामृजत ते व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष

एतद्पामार्गैरेव दिनु नाष्ट्रा रक्षाꣳस्यपमृष्टे तथोऽएव विज्ञयते विज्ञितेऽभयेऽनाष्टे सूयाऽइति ॥ १४॥ स पालाशे वा स्रुवे वैकङ्कते वा । अपामार्गतण्डुलानादत्तेऽन्वाहार्यपचनाडुल्मुकमाद्दते तेन प्राञ्चो वोदञ्चो वा यन्ति तदग्निꣳ समाधाय जुहोति ॥ १५॥ स उल्मुकमादत्ते । अग्ने सहस्व पृतना इति युधो वै पृतना युधः सहस्वेत्येवैतदाहाभिमातीरपास्येति सपत्नो वाऽअभिमातिः सपत्नमपजहीत्येवैतदाह दुष्टरस्तरन्नरातीरिति दुस्तरो ह्येष रक्षोभिर्नाष्ट्राभिस्तरन्नरातीरिति सर्वꣳ ह्येष पाप्मानं तरति तस्मादाह तरन्नरातीरिति वर्चो धा यज्ञवाहसीति साधु यजमानं दधदित्येवैतदाह ॥ १६॥ तदग्निꣳ समाधाय जुहोति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामुपाꣳशोर्वीर्येण जुहोमीति यज्ञमुखं वाऽउपाꣳशुर्यज्ञमुखेनैवैतन्नाष्ट्रा रक्षाꣳसि हन्ति हतꣳ रक्षः स्वाहेति तन्नाष्ट्रा रक्षाꣳसि हन्ति ॥ १७॥ स यदि पालाशः स्रुवो भवति । ब्रह्म वै पलाशो ब्रह्मणैवैतन्नाष्ट्रा रक्षाꣳसि हन्ति यद्यु वैकङ्कतो वज्रो व विकङ्कतो वज्रेणैवैतन्नाष्ट्रा रक्षाꣳसि हन्ति रक्षसां वा बधायेति तन्नाष्ट्रा रक्षाꣳसि हन्ति ॥ १८॥ स यदि प्राङिव जुहोति । प्राञ्चꣳ स्रुवमस्यति यद्युदङिव जुहोत्युदञ्चꣳ स्रुवमस्यत्यबधिष्म रक्ष इति तन्नाष्ट्रा रक्षाꣳसि हन्ति ॥ १९॥ अथाप्रतीक्षं पुनरायन्ति । स हैतेनापि प्रतिसरं कुर्वीत स यस्यां ततो दिशि भवति तत्प्रतीत्य जुहोति प्रतीचीनफलो वाऽअपामार्गः स यो ह्यस्मै तत्र किंचित्करोति तमेव तत्प्रत्यग्धूर्वति तस्य नामादिशेदबधिष्मामुमसौ हत इति तन्नाष्टा रक्षाꣳसि हन्ति ॥ २०॥ ब्राह्मणम् ॥ ३ [२. ४.] ॥॥

आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपति । ऐन्द्रावैष्णवं चरुं वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन त्रिषंयुक्तेन यजते पुरुषानेतद्वै उपायंस्तथो ऽएवैष एतत्पुरुषानवोपैति ॥ १॥ स यदाग्नावैष्णवः । एकादशकपालः पुरोडाशो

भवत्यग्निर्वै दाता वैष्णवाः पुरुषास्तद्स्माऽअग्निर्दाता पुरुषान्द्ददाति ॥२॥ अथ यदैन्द्रावैष्णवः । चरुर्भवतीन्द्रो वै यज्ञमानो वैष्णवाः पुरुषास्तद्स्माऽअग्निर्दाता पुरुषान्द्ददाति तैरेवैतत्सऽस्पृशते तानात्मन्कुरुते ॥३॥ अथ यद्वैष्णवः । त्रिकपालो वा पुरोडाशो भवति चरुर्वा यानेवास्माऽअग्निर्दाता पुरुषान्द्ददाति तेष्वेवैतद्दत्तः प्रतितिष्ठति यद्वै पुरुषवान्कर्म चिकीर्षति शक्नोति वै तत्कर्तुं तत्पुरुषानेवैतदुपैति पुरुषवान्त्सूयाऽइति तस्य वामनो गौर्दक्षिणा स हि वैष्णवो यद्वामनः ॥४॥ अथापरेण त्रिषंयुक्तेन यजते । स आग्नापौष्णमेकादशकपालं पुरोडाशं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुं तेन त्रिषंयुक्तेन यजते पशूनेव तद्देवा उपायंस्तथोऽएवैष एतत्पशूनेवोपैति ॥५॥ स यदाग्नापौष्णः । एकादशकपालः पुरोडाशो भवत्यग्निर्वै दाता पौष्णाः पशवस्तद्स्माऽअग्निरेव दाता पशून्द्ददाति ॥६॥ अथ यदैन्द्रापौष्णः । चरुर्भवतीन्द्रो वै यज्ञमानः पौष्णाः पशवः स यानेवास्माऽअग्निर्दाता पशून्द्ददाति तैरेवैतत्सऽस्पृशते तानात्मन्कुरुते ॥७॥ अथ यत्पौष्णः । चरुर्भवति यानेवास्माऽअग्निर्दाता पशून्द्ददाति तेष्वेवैतद्दत्तः प्रतितिष्ठति यद्वै पशुमान्कर्म चिकीर्षति शक्नोति वै तत्कर्तुं तत्पशूनेवैतदुपैति पशुमान्त्सूयाऽइति तस्य श्यामो गौर्दक्षिणा स हि पौष्णो यच्छ्यामो द्वे वै श्यामस्य रूपे शुक्लं चैव लोम कृष्णं च द्वन्द्वं वै मिथुनं प्रजननं प्रजननं वै पूषा पशवो हि पूषा पशवो हि प्रजननं मिथुनमेवैतत्प्रजननं क्रियते तस्माच्छ्यामो गौर्दक्षिणा ॥८॥ अथापरेण त्रिषंयुक्तेन यजते । सोऽग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपत्यैन्द्रासौम्यं चरुꣳ सौम्यं चरुं तेन त्रिषंयुक्तेन यजते वर्च एव तद्देवा उपायंस्तथोऽएवैष एतद्वर्च एवोपैति ॥९॥ स यदग्नीषोमीयः । एकादशकपालः पुरोडाशो भवत्यग्निर्वै दाता वर्चः सोमस्तद्स्माऽअग्निरेव दाता वर्चो ददाति ॥१०॥ अथ यदैन्द्रासौम्यः । चरुर्भवतीन्द्रो वै यज्ञमानो वर्चः सोमः स यद्देवास्माऽअग्निर्दाता वर्चो ददाति तेनैवैत-

त्साꣳस्पृशते तदात्मन्कुरुते ॥ ११ ॥ अथ यत्सौम्यः । चरुर्भवति यदेवास्माꣳअग्निर्दाता वर्चो ददाति तस्मिन्नेवैतदुत्ततः प्रतितिष्ठति यद्वै वर्चस्वी कर्म चिकीर्षति शक्नोति वै तत्कर्तुं तद्वर्च एवैतदुपैति वर्चस्वी सूयाꣳइति नो ह्यवर्चसो व्यात्या चनार्थीꣳअस्ति तस्य बभ्रुर्गौर्दक्षिणा स हि सौम्यो यद्बभ्रुः ॥ १२ ॥ अथ श्वो भूते । वैश्वानरं द्वादशकपालं पुरोडाशं निर्वपति वारुणं यवमयं चरुं ताभ्यामनूचीनाꣳ वेष्टिभ्यां यजते समानबर्हिर्भ्यां वा ॥ १३ ॥ स यद्वैश्वानरो भवति । संवत्सरो वै वैश्वानरः संवत्सरः प्रजापतिः प्रजापतिरिव तद्भूमानं प्रजाः ससृजे भूमानं प्रजाः सृष्ट्वा सूयाꣳइति तथोꣳएवैष एतद्भूमानं प्रजाः सृजते भूमानं प्रजाः सृष्ट्वा सूयाꣳइति ॥ १४ ॥ अथ यद्द्वादशकपालो भवति । द्वादश वै मासाः संवत्सरस्य संवत्सरो वैश्वानरस्तस्माद्द्वादशकपालो भवति ॥ १५ ॥ अथ यद्वारुणो यवमयश्चरुर्भवति । तत्सर्वस्माद्वैतद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रजाः प्रमुञ्चति ता अस्यानमीवा अकिल्विषाः प्रजाः प्रजायन्तेꣳअनमीवा अकिल्विषाः प्रजा अभि सूयाꣳइति ॥ १६ ॥ ऋषभो वैश्वानरस्य दक्षिणा । संवत्सरो वै वैश्वानरः संवत्सरः प्रजापतिर्ऋषभो वै पशूनां प्रजापतिस्तस्मादृषभो वैश्वानरस्य दक्षिणा कृष्णं वासो वारुणस्य तद्धि वारुणं यत्कृष्णं यदि कृष्णं न विन्देदपि यदेव किं च वासः स्याद्ग्रन्थिभिर्हि वासो वारुणं वरुण्यो हि ग्रन्थिः ॥ १७ ॥ ब्राह्मणम् ॥ ४ [२. ५.] ॥ द्वितीयोऽध्यायः [३२.] ॥ ॥

अरण्योरग्नी समारोप्य । सेनान्यो गृह्यान्परेत्याग्नेयेऽनीकवतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निर्वै देवतानामनीकꣳ सेनाया वै सेनानीरनीकं तस्मादग्नेयेऽनीकवतऽएतद्वाऽअस्यैकꣳ रूपं यत्सेनानीस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य हिरण्यं दक्षिणाग्नेयो वाऽएष यज्ञो भवत्यग्नेरेतो हिरण्यं तस्माद्धिरण्यं दक्षिणा ॥ १ ॥ अथ श्वो भूते । पुरोहितस्य गृह्यान्परेत्य बार्हस्पत्यं

चरुं निर्वपति बृहस्पतिर्वै देवानां पुरोहित एष वाऽएतस्य पुरोहितो भवति तस्माद्बार्हस्पत्यो भवत्येतद्वाऽअस्यैकꣳ रूपं यत्पुरोहितस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य शितिपृष्ठो गौर्दक्षिणैषा वाऽऊर्धा बृहस्पतेर्दिक्तदेष उपरिष्टादर्यमणः पन्थास्तस्माच्छितिपृष्ठो बार्हस्पत्यस्य दक्षिणा ॥२॥ अथ श्वो भूते । सूयमानस्य गृह्ऽऐन्द्रमेकादशकपालं पुरोडाशं निर्वपति क्षत्रं वाऽइन्द्रः क्षत्रꣳ सूयमानस्तस्मादैन्द्रो भवति तस्यर्षभो दक्षिणा स क्वैन्द्रो यदृषभः ॥३॥ अथ श्वो भूते । महिष्ये गृह्यान्परेत्य । आदित्यं चरुं निर्वपतोयं वै पृथिव्यदितिः सेयं देवानां पत्न्येषा वाऽएतस्य पत्नी भवति तस्मादादित्यो भवत्येतद्वाऽअस्यैकꣳ रूपं यन्महिषी तस्याऽएवैतेन सूयते ताꣳ स्वामनपक्रमिणीं कुरुते तस्यै धेनुर्दक्षिणा धेनुरिव वाऽइयं मनुष्येभ्यः सर्वान्कामान्दुहे माता धेनुर्मातेव वाऽइयं मनुष्यान्बिभर्ति तस्माद्धेनुर्दक्षिणा ॥४॥ अथ श्वो भूते । सूतस्य गृह्यान्परेत्य वारुणं यवमयं चरुं निर्वपति सवो वै सूतः सवो वै देवानां वरुणास्तस्माद्वारुणो भवत्येतद्वाऽअस्यैकꣳ रूपं यत्सूतस्तस्माऽएवैतेन सूयते तꣳ स्वमनकक्रमिणं कुरुते तस्याश्वो दक्षिणा स हि वारुणो यदश्वः ॥५॥ अथ श्वो भूते । ग्रामण्यो गृह्यान्परेत्य मारुतꣳ सप्तकपालं पुरोडाशं निर्वपति विशो वै मरुतो वैश्यो वै ग्रामणीस्तस्मान्मारुतो भवत्येतद्वाऽअस्यैकꣳ रूपं यद्ग्रामणीस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य पृषन्गौर्दक्षिणा भूमा वाऽएतद्रूपाणां यत्पृषतो गोर्विशो वै मरुतो भूमो वै विट्तस्मात्पृषन्गौर्दक्षिणा ॥६॥ अथ श्वो भूते । क्षत्तुर्गृह्यान्परेत्य सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं निर्वपति सविता वै देवानां प्रसविता प्रसविता वै क्षत्ता तस्मात्सावित्रो भवत्येतद्वाऽअस्यैकꣳ रूपं यत्क्षत्ता तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य श्येतोऽनड्वान्दक्षिणैष वै सविता य एष तपत्येति वाऽएष एत्यनड्वान्युक्तस्तथ्यश्वेतो भवति

श्येत-इव क्षेष उच्चैश्चास्तं च यन्भवति तस्माच्छ्वेतोऽनड्वान्दक्षिणा ॥७॥ अथ श्वो भूते । संग्रहीतुर्गृहान्परेत्याश्विनं द्विकपालं पुरोडाशं निर्वपति सयोनी वाऽश्विनौ सयोनी सव्यष्टसारथी समानꣳ हि रथमधितिष्ठतस्तस्मादाश्विनो भवत्येतद्वाऽअस्यैकꣳ रूपं यत्संग्रहीता तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य यमौ गावौ दक्षिणा तौ हि सयोनी यद्यमौ यदि यमौ न विन्देदप्यनूचीनगर्भाविव गावौ दक्षिणा स्यातां ताऽउ क्वापि समानयोनी ॥८॥ अथ श्वो भूते । भागदुघस्य गृहान्परेत्य पौष्णं चरुं निर्वपति पूषा वै देवानां भागदुघ एष वाऽएतस्य भागदुघो भवति तस्मात्पौष्णो भवत्येतद्वाऽअस्यैकꣳ रूपं यद्भागदुघस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य श्यामो गौर्दक्षिणा तस्यासाविव बन्धुर्योऽसौ त्रिषंयुक्तेषु ॥९॥ अथ श्वो भूते । अन्नावापस्य च गृहेभ्यो गोविकर्तस्य च गवेधुकाः सम्भृत्य सूयमानस्य गृहे रौद्रं गावेधुकं चरुं निर्वपति ते वाऽएते द्वे सती रूपेऽएकं करोति सम्पदः कामाय तद्यदेतेन यजते यां वाऽइमाꣳ सभायां घ्नन्ति रुद्रो हैतामभिमन्यतेऽग्निर्वै रुद्रोऽधिदेवनं वाऽअग्निस्तस्यैतेऽङ्गारा यदन्नास्तमेवैतेन प्रीणाति तस्य ह वाऽएषानुमता गृहेषु हन्यते यो वा राजसूयेन यजते यो वैतदेवं वेदैतद्वाऽअस्यैकꣳ रूपं यदन्नावापश्च गोविकर्तश्च ताभ्यामेवैतेन सूयते तौ स्वावनपक्रमिणौ कुरुते तस्य द्विरूपो गौर्दक्षिणा शितिबाहुर्वा शितिवालो वासिर्नखरो वालदाम्नाऽन्नावपनं प्रबद्धमेतद्ध हि तयोर्भवति ॥१०॥ अथ श्वो भूते । पालागलस्य गृहान्परेत्य चतुर्गृहीतमाज्यं गृहीत्वाधन आज्यं जुहोति जुषाणोऽधाज्यस्य वेतु स्वाहेति प्रहेयो वै पालागलोऽधानं वै प्रहित एति तस्मादधन आज्यं जुहोत्येतद्वाऽअस्यैकꣳ रूपं यत्पालागलस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य दक्षिणा प्युन्नावेष्टितं धनुश्चर्ममया वाणवत्तो लोहित उष्णीष एतद्ध हि तस्य भवति ॥११॥ तानि वा

ऽएतानि । एकादश रत्नानि सम्पादयत्येकादशाक्षरा वै त्रिष्टुब्वीर्यं त्रिष्टुब्वीर्यमे-वैतद्रत्नान्यभिसम्पादयति तस्यद्रत्निना ꣳ ऋविर्भियज्ञतऽएतेषां वै राज्ञा भवति ते-भ्य एवैतेन सूयते तान्स्वाननपक्रमिणः कुरुते ॥ १२ ॥ अथ श्वो भूते । परिवृत्त्यै गृह्यान्परेत्य नैर्ऋतं चरुं निर्वपति या वा अपुत्रा पत्नी सा परिवृत्ती स कृष्णानां व्रीहीणां नखैर्निर्भिद्य तण्डुलान्नैर्ऋतं चरु ꣳ श्रपयति स जुहोत्येष ते निर्ऋते भा-गस्तं जुषस्व स्वाहेति या वाऽअपुत्रा पत्नी सा निर्ऋतिगृहीता तस्यदेवास्याऽअत्र नैर्ऋत ꣳ रूपं तदेवैतद्रूपयति तथो खेन ꣳ सूयमानं निर्ऋतिर्न गृह्णाति तस्य दक्षि-णा कृष्णा गौः परिमूर्णी पर्यारिणी सा क्यपि निर्ऋतिगृहीता तामाह मा मेऽग्ने-शायां वात्सीदिति तत्पाप्मानमपादत्ते ॥ १३ ॥ ब्राह्मणम् ॥ ५ [३. १.] ॥ ॥

उपरिष्टाद्रत्नाना ꣳ सौमारौद्रेण यजते । स श्वेतायै श्वेतवत्सायै पयसि शृतो भवति तस्यदुपरिष्टाद्रत्नाना ꣳ सौमारौद्रेण यजते ॥ १ ॥ स्वर्भानुर्ह वाऽआसुरः । सूर्यं तमसा विव्याध स तमसा विद्धो न व्यरोचत तस्य सोमारुद्रावेवैतत्तमो ऽपाहता ꣳ स एषोऽपहतपाप्मा तपति तथोऽएवैष एतत्तमः प्रविशत्येतं वा त-मः प्रविशति यदयज्ञियान्यज्ञेन प्रसज्जत्ययज्ञियान्वाऽएतद्यज्ञेन प्रसज्जति शूद्रांस्त्व-र्यांस्तत्तस्य सोमारुद्रावेवैतत्तमोऽपहतः सोऽपहतपाप्मैव दीक्षते तस्यैतायै श्वे-तवत्सायै पयसि शृतो भवति कृष्णं वै तमस्तत्तमोऽपहन्ति तस्यैषैव श्वेता श्वेत-वत्सा दक्षिणा ॥ २ ॥ स खेतेनापि यजेत । योऽलं यशसे सन्न यशो भवति यो वाऽअनूचानः सोऽलं यशसे सन्न यशो भवति यो न यशो भवति स तमसा वै स तत्प्रावृतो भवति तस्य सोमारुद्रावेवैतत्तमोऽपहतः सोऽपहतपाप्मा ज्योति-रेव श्रिया यशसा भवति ॥ ३ ॥ अथ मैत्राबार्हस्पत्यं चरुं निर्वपति । स्खलति वाऽएष यो यज्ञपथादेत्येति वाऽएष यज्ञपथाद्यदयज्ञियान्यज्ञेन प्रसज्जत्ययज्ञियान्वा ऽएतद्यज्ञेन प्रसज्जति शूद्रांस्त्वर्यांस्त्वन्मित्राबृहस्पती वै यज्ञपथो ब्रह्म हि मित्रो

ब्रह्म हि यज्ञो ब्रह्म हि बृहस्पतिर्ब्रह्मा हि यज्ञस्तत्पुनर्यज्ञपथमपिपद्यते सोऽपि-पद्यैव यज्ञपथं दीक्षते तस्मान्मैत्राबार्हस्पत्यं चरुं निर्वपति ॥४॥ तस्यावृत् । या स्वयम्प्रशीर्णाश्वत्थी शाखा प्राची वोदीची वा भवति तस्यै मैत्रं पात्रं करोति वरुणया वाऽएषा या परशुवृक्णाथैषा मैत्री या स्वयम्प्रशीर्णा तस्मात्स्वयम्प्रशी-र्णायै शाखायै मैत्रं पात्रं करोति ॥५॥ अथातच्य दधि । विनाटऽआसिच्य रथं युक्त्वाबध्य देदीयितवाऽआह तच्यत्स्वयमुदितं नवनीतं तदाज्यं भवति वरुणयं वा ऽएतच्यन्मथितमथैतन्मैत्रं यत्स्वयमुदितं तस्मात्स्वयमुदितमाज्यं भवति ॥६॥ द्वे-धा तण्डुलान्कुर्वन्ति । स येऽणीयाꣳसः परिभिन्नास्ते बार्हस्पत्या अथ ये स्थवी-याꣳसोऽपरिभिन्नास्ते मैत्रा न वै मित्रः कं चन हिनस्ति न मित्रं कश्चन हिन-स्ति नैनं कुशो न कण्टको विभिनत्ति नास्य व्रणश्चनास्ति सर्वस्य क्षेव मित्रो मित्रम् ॥७॥ अथ बार्हस्पत्यं चरुमधिश्रयति । तं मैत्रेण पात्रेणापिदधाति तदा-ज्यमानयति तत्तण्डुलानावपति स एष ऊष्मणैव श्रप्यते वरुणयो वाऽएष यो ऽग्निना शृतोऽथैष मैत्रो य ऊष्मणा शृतस्तस्मादूष्मणा शृतो भवति तयोरुभयो-रवद्यन्नाह मित्राबृहस्पतिभ्यामनुब्रूहीत्याश्राव्याह मित्राबृहस्पती यजेति वषट्कृ-ते जुहोति ॥८॥ ब्राह्मणम् ॥६ [३. २.] ॥॥ शतम्३२०० ॥॥

स वै दीक्षते । स उपवसथेऽग्नीषोमीयं पशुमालभते तस्य वपया प्रचर्याग्नी-षोमीयमेकादशकपालं पुरोडाशं निर्वपति तदनु देवस्वाꣳ ह्वीꣳषि निरुप्यन्ते ॥१॥ सवित्रे सत्यप्रसवाय । द्वादशकपालं वाष्टाकपालं वा पुरोडाशं निर्वपति प्राशुकानां व्रीहीणाꣳ सविता वै देवानां प्रसविता सवितृप्रसूतः सूयाऽइत्यथ यत्प्राशुकानां व्रीहीणां क्षिप्रे मा प्रसुवानिति ॥२॥ अथाग्नये गृहपतये । अष्टा-कपालं पुरोडाशं निर्वपत्याशूनाꣳ श्रीर्वै गार्हपतं यावतो-यावत ईष्टे तदेनमग्निरे-व गृहपतिर्गार्हपतमभि परिणयत्यथ यदाशूनां क्षिप्रे मा परिणायानिति ॥३॥

अथ सोमाय वनस्पतये । श्यामाकं चरुं निर्वपति तदेनꣳ सोम एव वनस्पतिरोषधिभ्यः सुवत्यथ यच्छ्यामाको भवत्येते वै सोमस्यौषधीनां प्रत्यक्षतमां यच्छ्यामाकास्तस्माच्छ्यामाको भवति ॥४॥ अथ॰ बृहस्पतये वाचे । नैवारं चरुं निर्वपति तदेनं बृहस्पतिरेव वाचे सुवत्यथ यन्नैवारो भवति ब्रह्म वै बृहस्पतिरेते वै ब्रह्मणा पच्यन्ते यन्नीवारास्तस्मान्नैवारो भवति ॥५॥ अथेन्द्राय ज्येष्ठाय । हायनानां चरुं निर्वपति तदेनमिन्द्र एव ज्येष्ठो ज्यैष्ठ्यमभि परिणयत्यथ यद्धायनानां भवत्यतिष्ठा वाऽएता ओषधयो यद्धायना अतिष्ठो वाऽइन्द्रस्तस्माद्धायनानां भवति ॥६॥ अथ रुद्राय पशुपतये । रौद्रं गावेधुकं चरुं निर्वपति तदेनꣳ रुद्र एव पशुपतिः पशुभ्यः सुवत्यथ यद्गावेधुको भवति वास्तव्यो वाऽएष देवो वास्तव्या गवेधुकास्तस्माद्गावेधुको भवति ॥७॥ अथ मित्राय सत्याय । नाम्बानां चरुं निर्वपति तदेनं मित्र एव सत्यो ब्रह्मणे सुवत्यथ यन्नाम्बानां भवति वरुणया वाऽएता ओषधयो याः कृष्टे जायन्तेऽथैते मैत्रा यन्नाम्बास्तस्मान्नाम्बानां भवति ॥८॥ अथ वरुणाय धर्मपतये । वारुणं यवमयं चरुं निर्वपति तदेनं वरुण एव धर्मपतिर्धर्मस्य पतिं करोति परमता वै सा यो धर्मस्य पतिरसद्यो हि परमतां गच्छति तꣳ हि धर्मऽउपयन्ति तस्माद्वरुणाय धर्मपतये ॥९॥ अथाग्नीषोमीयेन पुरोडाशेन प्रचरति । तस्यानिष्ट एव स्विष्टकृद्वत्यथैतैर्हविर्भिः प्रचरति यदैतैर्हविर्भिः प्रचरति ॥१०॥ अथैनं दक्षिणे बाहावभिपद्य जपति । सविता त्वा सवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाम् । बृहस्पतिर्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥११॥ इमं देवाः । असपत्नꣳ सुवधमितीमं देवा अभ्रातृव्यꣳ सुवधमित्येवैतदाह मरुते क्षत्राय मरुते ज्यैष्ठ्यायेति नात्र तिरोहितमिवास्ति मरुते ज्ञानराज्यायेति मरुते ज्ञानानाꣳ राज्यायेत्येवैतदाहेन्द्रस्येन्द्रियायेति वीर्यायेत्येवैतदाह यदाहेन्द्रस्येन्द्रियायेतीममुष्मै पुत्रम-

मुष्यै पुत्रमिति तद्यद्देवास्य जन्म तत एवैतदाहास्यै विशऽइति यस्यै विशो राज्ञा भवत्येष वोऽमी राज्ञा सोमोऽस्माकं ब्राह्मणानाꣳ राजेति तदस्माऽइदꣳ सर्वमाद्यं करोति ब्राह्मणमेवापोद्धरति तस्माद्ब्राह्मणोऽनाद्यः सोमराजा हि भवति ॥१२॥ एता ह वै देवाः सवस्येशते । तस्माद्देवस्वो नाम तदेनमेता एव देवताः सुवते ताभिः सूतः सूयः सूयते ॥१३॥ ता वै द्विनाम्न्यो भवन्ति । द्वन्द्वं वै वीर्यं वीर्यवत्यः सुवात्ताऽइति तस्माद्द्विनाम्न्यो भवन्ति ॥१४॥ अथाह्याग्नये स्विष्टकृतेऽनुब्रूहीति । तद्यदुत्तरेणाहवनीयऽएतत्कर्म क्रियतऽएष वै प्रजापतिर्यऽएष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति तस्मादुत्तरेणाहवनीयऽएतत्कर्म क्रियतऽआश्राव्याह्याग्नये स्विष्टकृते प्रेष्येति वषट्कृते जुहोति ॥१५॥ ब्राह्मणम् ॥ ७ [३. ३.] ॥ ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१०४ ॥॥

स वाऽआपः सम्भरति । तद्यदापः सम्भरति वीर्यं वाऽआपो वीर्यमेवैतद्यजमानꣳ सम्भरति ॥१॥ औदुम्बरे पात्रे । अन्नं वाऽऊर्गुदुम्बर ऊर्जैवाऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरे पात्रे ॥२॥ स सारस्वतीरेव प्रथमा गृह्णाति । अपो देवा मधुमतीरगृभ्णन्नित्यपो देवा रसवतीरगृह्णन्नित्येवैतदाहोर्जस्वती राजस्वश्चितानाꣳ इति रसवतीरित्येवैतदाह यदाहोर्जस्वतीरिति राजस्वश्चितानाꣳ इति याः प्रज्ञाता राजस्व इत्येवैतदाह याभिर्मित्रावरुणावभ्यषिञ्चन्नित्येताभिर्हि मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नित्यरातीरित्येताभिर्ह्येन्द्रं नाष्ट्रा रक्षाꣳस्यत्यनयंस्ताभिरभिषिञ्चति वाग्वै सरस्वती वाचैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥३॥ अथाध्वर्युः । चतुर्गृहीतमाज्यं गृहीत्वापोऽभ्यवैति तद्याऽऊर्मी व्यर्दतः पशौ वा पुरुषे वाभ्यवैति तौ गृह्णाति ॥४॥ स यः प्राङुद्दर्दति । तं गृह्णाति वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहीति

॥५॥ अथ यः प्रत्यङ्डुदर्दति । तं गृह्णाति वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहीति ताभिरभिषिञ्चति वीर्यं वाऽएत-दपामुदर्दर्ति पशौ वा पुरुषे वाभ्यवेते वीर्येणैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥६॥ अथ स्यन्दमाना गृह्णाति । अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति वीर्येण वा ऽएताः स्यन्दन्ते तस्मादेनाः स्यन्दमाना न किंचन प्रतिधारयते वीर्येणैवैनमेतद-भिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥७॥ अथ याः स्यन्दमानानां प्रतीपꣳ स्यन्दन्ते । ता गृह्णात्योज॑स्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौज॑स्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति वीर्येण वाऽएताः स्यन्दमानानां प्रतीपꣳ स्यन्दन्ते वीर्येणैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भर-ति ॥८॥ अथापवतीर्गृह्णाति । आपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चत्येतस्यै वाऽएषापह्निय्यैषैव पुनर्भवत्यपि ह वाऽअस्यान्यराष्ट्रीयो राष्ट्रे भवत्यप्यन्यराष्ट्रीयमवरुरते तथास्मिन्भूमानं दधाति भूम्नैवैनमेतदभिषिञ्चत्ये-ता वाऽएका आपस्ता एवैतत्सम्भरति ॥९॥ अथ नदीपतिं गृह्णाति । अपां प-तिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देहीति ता-भिरभिषिञ्चत्यपां वाऽएष पतिर्यन्नदीपतिर्विशामेवैनमेतत्पतिं करोत्येता वाऽए-का आपस्ता एवैतत्सम्भरति ॥१०॥ अथ निवेष्यं गृह्णाति । अपां गर्भोऽसि रा-ष्ट्रदा राष्ट्रं मे देहि स्वाहापां गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहीति ताभिरभिषि-ञ्चति गर्भं वाऽएतदाप उपनिवेष्टन्ते विशामेवैनमेतद्गर्भं करोत्येता वाऽएका आ-पस्ता एवैतत्सम्भरति ॥१२॥ अथ यः स्यन्दमानानाꣳ स्थावरो ह्रदो भवति । प्रत्यातापे ता गृह्णाति सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति वर्चसैवैनमेतदभिषिञ्चति सूर्यत्वचसमे-

वैनमेतत्करोति वरुण्या वाऽएता आपो भवन्ति याः स्यन्दमानानां न स्यन्दन्ते वरुणासवो वाऽएष यद्राजसूयं तस्मादेताभिरिभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१२॥ अथ या आतपति वर्षन्ति । ता गृह्णाति सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति वर्चसैवैनमेतदभिषिञ्चति सूर्यवर्चसमेवैनमेतत्करोति मेध्या वाऽएता आपो भवन्ति या आतपति वर्षन्त्यप्राप्ता होमां भवन्त्यथैना गृह्णाति मेध्यमेवैनमेतत्करोत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१३॥ अथ वैशन्तीर्गृह्णाति । मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति विशमेवास्माऽएतत्स्थावरामनपक्रमिणीं करोत्येता वा एका आपस्ता एवैतत्सम्भरति ॥१४॥ अथ कूप्या गृह्णाति । व्रज्यन्ति स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रज्यन्ति स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति तया इमां परेणापस्ता एवैतत्सम्भरत्यपामु चैव सर्वत्वाय तस्मादताभिरभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१५॥ अथ प्रुषा गृह्णाति । वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चत्यन्नाद्येनैवैनमेतदभिषिञ्चत्यन्नाद्यमेवास्मिन्नेतद्दधातीदं वाऽअसावादित्य उद्यन्नेव यथायमग्निर्निर्दहेदेवमोषधीरन्नाद्यं निर्दहति तदेता आपोऽभ्यवयत्यः शमयन्ति न ह वाऽइहान्नाद्यं परिशिष्यते यदेता आपो नाभ्यवेयुरन्नाद्येनैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१६॥ अथ मधु गृह्णाति । शविष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चत्यपां चैवैनमेतदोषधीनां च रसेनाभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१७॥ अथ गोर्विजायमानाया उल्ब्या गृह्णाति । शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति पशुभिरेवैनमेतदभि

षिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१८॥ अथ पयो गृह्णाति । जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति पशुभिरेवैनमेतद्भिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१९॥ अथ घृतं गृह्णाति । विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति पशूनामेवैनमेतद्रसेनाभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥२०॥ अथ मरीचीः । अञ्जलिना संगृह्यापिसृजत्यापः स्वराज्ञ स्थ राष्ट्रदाः राष्ट्रममुष्मै दत्तेत्येता वाऽआपः स्वराज्ञो यन्मरीचयस्ता यत्स्यन्दन्तऽइवान्योऽन्यस्या एवैतद्भियाऽअतिष्ठमाना उत्तराधरा-इव भवत्यो यन्ति स्वाराज्यमेवास्मिन्नेतद्दधात्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥२१॥ ता वाऽएताः । सप्तदशापः सम्भरति सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञस्तस्मात्सप्तदशापः सम्भरति ॥२२॥ षोडश ता आपो या अभिजुहोति । षोडशाकृतीर्जुहोति ता द्वात्रिꣳशद्भवन्ति द्वात्रिꣳशदक्षरा अनुष्टुप् सारस्वतीषु च मरीचिषु च ताश्चतुस्त्रिꣳशत्त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशस्तदेनं प्रजापतिं करोति ॥२३॥ अथ यङ्कुवा-ङ्कुवा गृह्णाति । वज्रो वाऽआज्यं वज्रेणैवैतदाज्येन स्पृत्वा-स्पृत्वा स्वीकृत्य गृह्णाति ॥२४॥ अथ यत्सारस्वतीषु न जुहोति । वाग्वै सरस्वती वज्र आज्यं नेद्वज्रेणाज्येन वाचꣳ हिꣳसानीति तस्मात्सारस्वतीषु न जुहोति ॥२५॥ अथ यन्मरीचिषु न जुहोति । नेदनङ्वैतामाकृतिं जुहुवानीति तस्मान्मरीचिषु न जुहोति ॥२६॥ ताः सार्धमौदुम्बरे पात्रे समवनयति । मधुमतीर्मधुमतीभिः पृच्यन्तामिति रसवती रसवतीभिः पृच्यन्तामित्येवैतदाह महि क्षत्रं क्षत्रियाय वन्वाना इति तत्परोऽक्षं क्षत्रं यजमानायाशिषमाशास्ते यदाह महि क्षत्रं क्षत्रियाय वन्वाना इति ॥२७॥ ता अग्नेण मैत्रावरुणास्य धिष्ण्यꣳ सादयति । अनाधृष्टाः सीदत सहौजस इत्यनाधृष्टाः सीदत रक्षोभिरित्येवैतदाह सहौजस इति सवीर्या इ-

त्येवैतदाह मह्यि क्षत्रं क्षत्रियाय दधतीरिति तत्प्रत्यक्षं क्षत्रं यजमानायाशिषमाशास्ते यदाह मह्यि क्षत्रं क्षत्रियाय दधतीरिति ॥२८॥ ब्राह्मणम् ॥१ [३.४.] ॥॥

तं वै माध्यदिने सवनेऽभिषिञ्चति । एष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति ॥१॥ अगृह्णीते माहेन्द्रे । एष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यं शस्त्रमिन्द्रो वै यजमानस्तदेनꣳ स्वऽएवायतनेऽभिषिञ्चति तस्मादगृह्णीते माहेन्द्रे ॥२॥ आग्नेय मैत्रावरुणास्य धिष्ण्यꣳ । शार्दूलचर्मोपस्तृणाति सोमस्य विषिरसीति यत्र वै सोम इन्द्रमत्यपवत स यत्ततः शार्दूलः समभवत्तेन सोमस्य विषिस्तस्मादाह सोमस्य विषिरसीति तवेव मे विषिर्भूयादिति शार्दूलविषिमेवास्मिन्नेतद्दधाति तस्मादाह तवेव मे विषिर्भूयादिति ॥३॥ अथ पार्थानि जुहोति । पृथी ह वै वैन्यो मनुष्याणां प्रथमोऽभिषिषिचे सोऽकामयत सर्वमन्नाद्यमवरुन्धीयेति तस्माऽएतान्यजुह्वुः स इदꣳ सर्वमन्नाद्यमवरुरुधेऽपि ह स्मास्माऽआरण्यान्यशूनभिक्ष्वयन्त्यसावेहि राज्ञा वा पद्यतऽइति तथेदꣳ सर्वमन्नाद्यमवरुरुधे सर्वꣳ ह वाऽअन्नाद्यमवरुन्धे यस्यैवं विदुष एतानि हूयन्ते ॥४॥ तानि वै द्वादश भवन्ति । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश भवन्ति ॥५॥ षट् पुरस्तादभिषेकस्य जुहोति । षडुपरिष्टात्तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति ॥६॥ स यानि पुरस्तादभिषेकस्य जुहोति । बृहस्पतिस्तेषामुत्तमो भवत्यथ यान्युपरिष्टादभिषेकस्य जुहोतीन्द्रस्तेषां प्रथमो भवति ब्रह्म वै बृहस्पतिरिन्द्रियं वीर्यमिन्द्र एताभ्यामेवैनमेतद्वीर्याभ्यामुभयतः परिबृꣳहति ॥७॥ स जुहोति । यानि पुरस्तादभिषेकस्य जुहोत्यग्नये स्वाहेति तेजो वाऽअग्निस्तेजसैवैनमेतदभिषिञ्चति सोमाय स्वाहेति क्षत्रं वै सोमः क्षत्रेणैवैनमेतदभिषिञ्चति सवित्रे स्वाहेति सविता वै

देवानां प्रसविता सवितृप्रसूत एवैनमेतदभिषिञ्चति सरस्वत्यै स्वाहेति वाग्वै सरस्वती वाचैवैनमेतदभिषिञ्चति पूष्ण स्वाहेति पशवो वै पूषा पशुभिरेवैनमेतदभिषिञ्चति बृहस्पतये स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनमेतदभिषिञ्चत्येतानि पुरस्तादभिषेकस्य जुहोति तान्येतान्यग्निनामानीत्याचक्षते ॥ ८ ॥ अथ जुहोति । यान्युपरिष्टादभिषेकस्य जुहोतीन्द्राय स्वाहेति वीर्यं वाऽइन्द्रो वीर्येणैवैनमेतदभिषिञ्चति घोषाय स्वाहेति वीर्यं वै घोषो वीर्येणैवैनमेतदभिषिञ्चति श्लोकाय स्वाहेति वीर्यं वै श्लोको वीर्येणैवैनमेतदभिषिञ्चत्यꣳशाय स्वाहेति वीर्यं वाऽअꣳशो वीर्येणैवैनमेतदभिषिञ्चति भगाय स्वाहेति वीर्यं वै भगो वीर्येणैवैनमेतदभिषिञ्चत्यर्य्यम्णे स्वाहेति तदेनमस्य सर्वस्यार्य्यमणं करोत्येतान्युपरिष्टादभिषेकस्य जुहोति तान्येतान्यादित्यनामानीत्याचक्षते ॥ ९ ॥ अग्रेण मैत्रावरुणस्य धिष्ण्यम् । अभिषेचनीयानि पात्राणि भवन्ति यत्रैता आपोऽभिषेचनीया भवन्ति ॥ १० ॥ पालाशं भवति । तेन ब्राह्मणोऽभिषिञ्चेत ब्रह्म वै पलाशो ब्रह्मणैवैनमेतदभिषिञ्चति ॥ ११ ॥ औदुम्बरं भवति । तेन स्वोऽभिषिञ्चत्यन्नं वाऽऊर्गुदुम्बर ऊर्ग्वै स्वं यावद्वै पुरुषस्य स्वं भवति नैव तावदशनायति तेनोर्क्स्वं तस्मादौदुम्बरेण स्वोऽभिषिञ्चति ॥ १२ ॥ नैयग्रोधपादं भवति । तेन मित्र्यो राजन्योऽभिषिञ्चति पद्भिर्वै न्यग्रोधः प्रतिष्ठितो मित्रेण वै राजन्यः प्रतिष्ठितस्तस्मान्नैयग्रोधपादेन मित्र्यो राजन्योऽभिषिञ्चति ॥ १३ ॥ आश्वत्थं भवति । तेन वैश्योऽभिषिञ्चति स यदेवादोऽश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत तस्मादाश्वत्थेन वैश्योऽभिषिञ्चत्येतान्यभिषेचनीयानि पात्राणि भवन्ति ॥ १४ ॥ अथ पवित्रे करोति । पवित्रे स्थो वैष्णव्याविति सोऽसावेव बन्धुस्तयोर्हिरण्यं प्रवयति ताभ्यामेता अभिषेचनीया अप उत्पुनाति तद्यद्धिरण्यं प्रवयत्यमृतमायुर्हिरण्यं तदा स्वमृतमायुर्दधाति तस्माद्धिरण्यं प्रवयति ॥ १५ ॥ स उत्पुनाति । सवितुर्वः प्रसव

ऽऽत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति सोऽसावेव बन्धुरनिभृष्टमसि वाचो बन्धुस्तपोजा इत्यनाधृष्टा स्थ रक्षोभिरित्येवैतदाह यदाहानिभृष्टमसीति वाचो बन्धुरिति यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदति तस्मादाह वाचो बन्धुरिति ॥१६॥ तपोजा इति । अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वाऽएता जायन्ते तस्मादाह तपोजा इति ॥१७॥ सोमस्य दात्रमसीति । यदा वाऽएनमेताभिरभिषुण्वन्त्यथाकृतिर्भवति तस्मादाह सोमस्य दात्रमसीति स्वाहा राजस्व इति तदेनाः स्वाहाकारेणैवोत्पुनाति ॥१८॥ ता एतेषु पात्रेषु व्यानयति । सधमादो द्युम्निनीरापऽएता इत्यनतिमानिन्य इत्येवैतदाह यदाह सधमाद इति द्युम्निनीरापऽएता इति वीर्यवत्य इत्येवैतदाहानाधृष्टा अपस्यो वसाना इत्यनाधृष्टा स्थ रक्षोभिरित्येवैतदाह यदाहानाधृष्टा अपस्यो वसाना इति पस्त्यासु चक्रे वरुणः सधस्थमिति विशो वै पस्त्या विज्ञु चक्रे वरुणः प्रतिष्ठामित्येवैतदाहापाꣳ शिशुर्मातृतमास्वन्तरित्यपां वाऽएष शिशुर्भवति यो राजसूयेन यजते तस्मादाहापाꣳ शिशुर्मातृतमास्वन्तरिति ॥१९॥ अथैनं वासाꣳसि परिधापयति । तत्तार्प्यमिति वासो भवति तस्मिन्त्सर्वाणि यज्ञरूपाणि निष्यूतानि भवन्ति तदेनं परिधापयति क्षत्रस्योल्बमसीति तद्यदेव क्षत्रस्योल्बं तत एवैनमेतज्जनयति ॥२०॥ अथैनं पाण्डुं परिधापयति । क्षत्रस्य जराय्वसीति तद्यदेव क्षत्रस्य जरायु तत एवैनमेतज्जनयति ॥२१॥ अथाधीवासं प्रतिमुञ्चति । क्षत्रस्य योनिरसीति तद्यैव क्षत्रस्य योनिस्तस्या एवैनमेतज्जनयति ॥२२॥ अथोष्णीषꣳ सꣳहृत्य । पुरस्तादवगूहति क्षत्रस्य नाभिरसीति तद्यैव क्षत्रस्य नाभिस्तामेवास्मिन्नेतद्दधाति ॥२३॥ तद्वैके । समन्तं परिवेष्टयन्ति नाभिर्वाऽअस्यैषा समन्तं वाऽइयं नाभिः पर्येतीति वदन्तस्तदु तथा न कुर्यात्पुरस्तादेवावगूहेत्पुरस्ताद्धीयं नाभिस्तद्यदेनं वासाꣳसि परिधापयति जनयत्येवैनमेतज्ज्ञातमभिषिञ्चानीति तस्मादेनं वासाꣳसि परिधापयति ॥२४॥ तद्वै-

के । निदधत्येतानि वासाꣳस्यथैनं पुनर्दीक्षितवसनं परिधापयन्ति तदु तथा न कुर्यादङ्गानि वाऽस्य जनूर्वासाꣳस्यङ्गैर्हैनꣳ सन्नह्या तन्वा व्यर्धयन्ति वरुणं दीक्षितवसनꣳ स एतेषामेवैकं वाससां परिदधीत तदेनमङ्गैर्जन्वा तन्वा समर्धयति वरुणं दीक्षितवसनं तदेनं वरुणाद्दीक्षितवसनात्प्रमुञ्चति ॥ २५ ॥ स यत्रावभृथमभ्यवैति । तदेतदभ्यवरुन्धन्ति तत्सलोम क्रियते स एतेषामेवैकं वाससां परिधायोदिति तानि वशायै वा वपायाꣳ हुतायां दध्याद्वसानीयायां वेष्टौ ॥ २६ ॥ अथ धनुरधितनोति । इन्द्रस्य वार्त्रघ्नमसीति वार्त्रघ्नं वै धनुरिन्द्रो वै यजमानो द्वयेन वाऽएष इन्द्रो भवति यच्च क्षत्रियो यदु च यजमानस्तस्मादाहेन्द्रस्य वार्त्रघ्नमसीति ॥ २७ ॥ अथ बाहू विमार्ष्टि । मित्रस्यासि वरुणस्यासीति बाहोर्वै धनुर्बाहुभ्यां वै राजन्यो मैत्रावरुणास्तस्मादाह मित्रस्यासि वरुणस्यासीति तदस्मै प्रयच्छति व्यायं वृत्रं बधेदिति व्यायं द्विषन्तं भ्रातृव्यं बधेदित्येवैतदाह ॥ २८ ॥ अथास्मै तिस्र इषूः प्रयच्छति । स यया प्रथमया समर्पणेन पराभिनत्ति सैका सेयं पृथिवी सैषा दृढा नामाथ यया विद्धः शयित्वा जीवति वा म्रियते वा सा द्वितीया तदिदमन्तरिक्षꣳ सैषा रुजा नामाथ यया विद्धः शयित्वा जीवति वा म्रियते वा सा द्वितीया तदिदमन्तरिक्षꣳ सैषा रुजा नामाथ ययैव राध्नोति सा तृतीया सासौ द्यौः सैषा क्षुमा नामैता हि वै तिस्र इषवस्तस्मादस्मै तिस्र इषूः प्रयच्छति ॥ २९ ॥ ताः प्रयच्छति । पातेनं प्राञ्चं पातेनं प्रत्यञ्चं पातेनं तिर्यञ्चं दिग्भ्यः पातेति तदस्मै सर्वा एव दिशोऽशरव्याः करोति तद्यदस्मै धनुः प्रयच्छति वीर्यं वाऽएतद्राजन्यस्य यद्धनुर्वीर्यवत्तमभिषिञ्चानीति तस्माद्वाऽअस्माऽआयुधं प्रयच्छति ॥ ३० ॥ अथैनमाविदो वाचयति । आविर्मर्या इत्यनिरुक्तं प्रजापतिर्वाऽअनिरुक्तस्तदेनं प्रजापतयऽआविदयति सोऽस्मै सवमनुमन्यते तेनानुमतः सूयते ॥ ३१ ॥ आवित्तोऽअग्निर्गृहपतिरिति । ब्रह्म वाऽअग्निस्तदेनं ब्रह्मणऽआवेदयति तदस्मै सवमनुमन्यते तेनानुमतः सूयते ॥ ३२ ॥ आवित्तोऽइन्द्रो वृद्धश्रवा इति । क्षत्रं वाऽइन्द्रस्तदेनं क्षत्रा-

यावेद्यति तद्स्मै सवमनुमन्यते तेनानुमतः सूयते ॥३३॥ आवित्तौ मित्रावरुणौ धृतव्रताविति । प्राणोदानौ वै मित्रावरुणौ तदेनं प्राणोदानाभ्यामावेद्यति तावस्मै सवमनुमन्येते ताभ्यामनुमतः सूयते ॥३४॥ आवित्तः पूषा विश्ववेदा इति । पशवो वै पूषा तदेनं पशुभ्य आवेद्यति तेऽस्मै सवमनुमन्यन्ते तैरनुमतः सूयते ॥३५॥ आवित्ते द्यावापृथिवी विश्वशम्भुवाविति । तदेनमाभ्यां द्यावापृथिवीभ्यामावेद्यति तेऽअस्मै सवमनुमन्येते ताभ्यामनुमतः सूयते ॥३६॥ आवित्तादितिरुरुशर्मेति । इयं वै पृथिव्यदितिस्तदेनमस्यै पृथिव्याऽआवेद्यति सास्मै सवमनुमन्यते तयानुमतः सूयते तस्याभ्य एवैनमेतद्देवताभ्य आवेद्यति ता अस्मै सवमनुमन्यन्ते ताभिरनुमतः सूयते ॥३७॥ ब्राह्मणम् ॥ २ [३. ५.] ॥॥ तृतीयोऽध्यायः [३३.] ॥॥

केशवस्य पुरुषस्य । लोहायसमास्यऽआविध्यत्यवेष्टा दन्दशूका इति सर्वान्वाऽएष मृत्यूनतिमुच्यते सर्वान्बधान्यो राजसूयेन यजते तस्य ह्येव मृत्युर्भवति तस्यो मृत्युर्यो बधस्तमेवैतदतिनयति यद्दन्दशूकान् ॥१॥ अथ यत्केशवस्य पुरुषस्य । न वाऽएष स्त्री न पुमान्यत्केशवः पुरुषो यदह पुमांस्तेन न स्त्री यदु केशवस्तेनो न पुमान्नैतदयो न हिरण्यं यल्लोहायसं नैते क्रिमयो नाक्रिमयो यद्दन्दशूका अथ यल्लोहायसं भवति लोहिता-इव हि दन्दशूकास्तस्मात्केशवस्य पुरुषस्य ॥२॥ अथैनं दिशः समारोहयति । प्राचीमारोह गायत्री त्वावतु रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ॥३॥ दक्षिणामारोह । त्रिष्टुप्त्वावतु बृहत्साम पञ्चदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम् ॥४॥ प्रतीचीमारोह । जगती त्वावतु वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऋतुर्विड् द्रविणम् ॥५॥ उदीचीमारोह । अनुष्टुप्त्वावतु वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फल द्रावेणम् ॥६॥ ऊर्धामारोह । पङ्क्तिस्त्वावतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्तशि-

शिरावृतू वर्चो द्रविणमिति ॥ ७ ॥ तग्यदेनं दिशः समारोक्ष्यति । ऋतूनामेवैतद्रूपमृतूनेवैनमेतत्संवत्सरꣳ समारोक्ष्यति स ऋतूत्संवत्सरꣳ समारुक्ष्य सर्वमेवेदमुपर्युपरि भवत्यर्वागेवास्मादिदꣳ सर्वं भवति ॥ ८ ॥ शार्दूलचर्मणो ज्ञघनार्धे । सीसं निहितं भवति तत्पदा प्रत्यस्यति प्रत्यस्तं नमुचेः शिर इति नमुचिर्ह वै नामासुर आस तमिन्द्रो निविव्याध तस्य पदा शिरोऽभितष्ठौ स यदभिष्ठित उद्बाधत स उड्डङ्कस्तस्य पदा शिरः प्रचिच्छेद ततो रक्षः समभवत्तद्ध स्मैनमनुभाषते क्व गमिष्यसि क्व मे मोक्ष्यसऽइति ॥ ९ ॥ तत्सीसेनापजघान । तस्मात्सीसं मृदु सृतज्ञवꣳ हि सर्वेण हि वीर्येणापजघान तस्माद्धिरण्यरूपꣳ सन्न कियच्चनार्हति सृतज्ञवꣳ हि सर्वेण हि वीर्येणापजघान तद्ध स तन्नाष्ट्रा रक्षाꣳस्यपजघान तथोऽएवैष एतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति ॥ १० ॥ अथैनꣳ शार्दूलचर्मारोक्ष्यति । सोमस्य त्विषिरसीति यत्र वै सोम इन्द्रमत्यपवत स यत्ततः शार्दूलः समभवत्तेन सोमस्य त्विषिस्तस्मादाह सोमस्य त्विषिरसीति तवेव मे त्विषिर्भूयादिति शार्दूलत्विषिमेवास्मिन्नेतद्दधाति तस्मादाह तवेव मे त्विषिर्भूयादिति ॥ ११ ॥ अथ रुक्ममधस्ताद्रुपास्यति । मृत्योः पाह्येत्यमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति ॥ १२ ॥ अथ रुक्मः शतवितृण्णो वा भवति । नववितृण्णो वा स यदि शतवितृण्णः शतायुर्वाऽअयं पुरुषः शततेजाः शतवीर्यस्तस्माच्छतवितृण्णो यद्यु नववितृण्णो नवेमे पुरुषे प्राणास्तस्मान्नववितृण्णः ॥ १३ ॥ तमुपरिष्टाच्छीर्ष्णो निदधाति । ओजोऽसि सहोऽस्यमृतमसीत्यमृतमायुर्हिरण्यं तदस्मिन्नमृतमायुर्दधाति तद्यद्रुक्माऽऽभयतो भवतोऽमृतमायुर्हिरण्यं तदमृतेनैवैनमेतदायुषोभयतः परिगृह्णाति तस्माद्रुक्माऽऽभयतो भवतः ॥ १४ ॥ अथ बाहूऽउद्गृह्णाति । हिरण्यरूपाऽउषसो विरोकऽउभाविन्द्रोऽउदियः सूर्यश्च । आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं चेति बाहू वै मित्रावरुणौ पुरुषो गर्तस्तस्मादाहारोहतं वरुण मित्र गर्तमिति ततश्चक्षाथा-

मदितिं दितिं चेति ततः पश्यतꣳ स्वं चारणं चेत्येवैतदाह ॥१५॥ नैतेनोदृह्लीयात् । मित्रोऽसि वरुणोऽसीत्येवोदृह्लीयाद्बाह्वै वै मित्रावरुणौ बाहुभ्यां वै राज्ञन्यो मैत्रावरुणास्तस्मान्मित्रोऽसि वरुणोऽसीत्येवोदृह्लीयात् ॥१६॥ तद्यदेनमूर्ध्वबाहुमभिषिञ्चति । वीर्यं वाऽएतद्राज्ञन्यस्य यद्बाहू वीर्यं वाऽएतद्पाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति नेन्मऽइदं वीर्यं वीर्यमपाꣳ रसः सम्भृतो बाह्वोर्लिनादिति तस्मादेनमूर्ध्वबाहुमभिषिञ्चति ॥१७॥ ब्राह्मणम् ॥३ [४. १.] ॥॥

तं वै प्राञ्चं तिष्ठन्तमभिषिञ्चति । पुरस्ताद्ब्राह्मणोऽभिषिञ्चत्यधर्युर्वा यो वास्य पुरोहितो भवति पश्चादितरे ॥१॥ सोमस्य त्वा द्युम्नेनाभिषिञ्चामीति । वीर्येणैतदाहाग्नेर्भ्राजसेति वीर्येणैवैतदाह सूर्यस्य वर्चसेति वीर्येणैवैतदाहेन्द्रस्येन्द्रियेणेति वीर्येणैवैतदाह क्षत्राणां क्षत्रपतिरेधीति राज्ञामधिराज एधीत्येवैतदाहाति दिव्यून्याकृतीषवो वै दिव्यव इषुबधमेवैनमेतदतिनयति तस्मादाहाति दिव्यून्याकृतीति ॥२॥ इमं देवाः । असपत्नꣳ सुवध्यमितीमं देवा अभ्रातृव्यꣳ सुवध्यमित्येवैतदाह मरुते क्षत्राय मरुते ज्यैष्ठ्यायेति नात्र तिरोहितमिवास्ति मरुते ज्ञानराज्यायेति मरुते ज्ञानानाꣳ राज्यायेत्येवैतदाहेन्द्रस्येन्द्रियायेति वीर्यायेत्येवैतदाह यदाहेन्द्रस्येन्द्रियायेतीममुष्य पुत्रममुष्यै पुत्रमिति तद्यदेवास्य जन्म तत एवैतदाहास्यै विशऽइति यस्यै विशो राज्ञा भवत्येष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेति तदस्माऽइदꣳ सर्वमाह्य करोति ब्राह्मणमेवापोद्धरति तस्माद्ब्राह्मणोऽनाद्यः सोमराज्ञा हि भवति ॥३॥ ॥शतम्३२००॥॥ अथैतमभिषेकम् । कृष्णविषाणयानुविमृष्टे वीर्यं वाऽएतद्पाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चतीदं मे वीर्यꣳ सर्वमात्मानमुपस्पृशादिति तस्मादाऽआनुविमृष्टे ॥४॥ सोऽनुविमृष्टे । प्र पर्वतस्य वृषभस्य पृष्ठादिति यथायं पर्वतोऽतिष्ठावा यथऽर्षभः पशूनतिष्ठावैवं वाऽएष इदꣳ सर्वमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यो

राजसूयेन यजते तस्मादाह प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः । ता आववृत्रन्नधरागुदक्ता अहिं बुध्यमनु रीयमाणा इति ॥५॥ अथैनमन्तरेव शार्दूलचर्मणि विष्णुक्रमान्क्रमयति । विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसीतीमे वै लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तं तदिमानेव लोकान्त्समारुक्ष्य सर्वमेवेदमुपर्युपरि भवत्यर्वागेवास्मादिदꣳ सर्वं भवति ॥६॥ अथ ब्राह्मणस्य पात्रे । सꣳस्रवान्त्समवनयति तद्ब्राह्मणꣳ राजानमनु यशः करोति तस्माद्ब्राह्मणो राजानमनु यशः ॥७॥ तय्योऽस्य पुत्रः प्रियतमो भवति । तस्माऽएतत्पात्रं प्रयच्छतीदं मेऽयं वीर्यं पुत्रोऽनुसंतनवदिति ॥८॥ अथ प्रतिपरेत्य गार्हपत्यमन्वारब्धे जुहोति । प्रजापते न वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पितेति तय्यः पुत्रस्तं पितरं करोति यः पिता तं पुत्रं तदेनयोर्वीर्यं व्यतिषजत्यसावस्य पितेति तय्यः पिता तं पितरं करोति यः पुत्रस्तं पुत्रं तदेनयोर्वीर्यं व्यतिषज्य पुनरेव यथायथं करोति वयꣳ स्याम पतयो रयीणाꣳ स्वाहेत्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते ॥९॥ अथ य एष सꣳस्रवोऽतिरिक्तो भवति । तमाग्नीध्रीये जुहोत्यतिरिक्तो वाऽएष सꣳस्रवो भवत्यतिरिक्त आग्नीध्रीयो गार्हपत्ये हवीꣳषि श्रपयत्याहवनीये जुहोत्यथैषोऽतिरिक्तस्तदतिरिक्तऽएवैतदतिरिक्तं दधात्युत्तरार्धे जुहोत्येष ह्येतस्य देवस्य दिक्तस्मादुत्तरार्धे जुहोति स जुहोति रुद्र यत्ते क्रिवि परं नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहेति ॥१०॥ ब्राह्मणम् ॥४ [४. २.] ॥॥

तय्योऽस्य स्वो भवति । तस्य शतं वा परःशता वा गा उत्तरेणाहवनीयꣳ स्थापयति तय्यदेवं करोति ॥१॥ वरुणाद्ध वाऽअभिषिषिचानात् । इन्द्रियं वीर्यमपचक्राम शश्वय्य एषोऽपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति सोऽस्येन्द्रियं वीर्यं निर्जघान तत्पशुष्वविन्दत्तस्मात्पशवो यशो यदेघन्वविन्दत्तत्पशु-

धनुविद्येन्द्रियं वीर्यं पुनरात्मन्नधत्त तथोऽएवैष एतन्नाद्दैवास्माच्विन्द्रियं वीर्यमपक्रामति वरुणसवो वाऽएष यद्राजसूयमिति वरुणोऽकरोदिति ह्येवैष एतत्करोति ॥२॥ अथ रथमुपावहरति । यद्वै राजन्न्यात्पराग्भवति रथेन वै तदनुयुङ्क्ते तस्माद्रथमुपावहरति ॥३॥ स उपावहरति । इन्द्रस्य वज्रोऽसीति वज्रो वै रथ इन्द्रो वै यजमानो द्वयेन वाऽएष इन्द्रो भवति यच्च क्षत्रियो यट्ट च यजमानस्तस्मादाहेन्द्रस्य वज्रोऽसीति ॥४॥ तमन्तर्वेद्यभ्यववर्त्य युनक्ति । मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मीति बाहू वै मित्रावरुणौ बाहुभ्यां वै राजन्यो मैत्रावरुणास्तस्मादाह मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मीति ॥५॥ तं चतुर्युजं युनक्ति । स जघनेन सदोऽग्रेण शालां येनैव दक्षिणा यन्ति तेन प्रतिपद्यते तं जघनेन चात्वालमग्रेणाग्नीध्रमुच्यहृति ॥६॥ तमातिष्ठति । अव्यथायै त्वा स्वधायै त्वेत्यनार्त्यै त्वेत्येवैतदाह यदाहाव्यथायै त्वेति स्वधायै त्वेति रसाय त्वेत्येवैतदाहारिष्टोऽअर्जुन इत्यर्जुनो ह वै नामेन्द्रो यदस्य गव्यं नाम द्वयेन वाऽएष इन्द्रो भवति यच्च क्षत्रियो यट्ट च यजमानस्तस्मादाहारिष्टोऽअर्जुन इति ॥७॥ अथ दक्षिणायुग्यमुपार्षति । मरुतां प्रसवेन जयेति विशो वै मरुतो विशा वै तत्क्षत्रियो जयति यद्जिगीषति तस्मादाह मरुतां प्रसवेन जयेति ॥८॥ अथ मध्ये गवामुच्यहृति । आपाम मनसेति मनसा वाऽइदꣳ सर्वमाप्तं तन्मनसैवैतत्सर्वमाप्नोति तस्मादाहापाम मनसेति ॥९॥ अथ धनुरार्त्न्या गामुपस्पृशति । समिन्द्रियेणेतीन्द्रियं वै वीर्यं गाव इन्द्रियमेवैतद्वीर्यमात्मन्धत्तेऽथाह जिनामीमाः कुर्वऽइमा इति ॥१०॥ तद्यत्स्वस्य गोषूच्यहृति । यद्वै पुरुषात्पराग्भवति यशो वा किंचिद्वा स्वꣳ हैवास्य तत्प्रतमामिवाभ्यपक्रामति तत्स्वादेवैतदिन्द्रियं वीर्यं पुनरात्मन्धत्ते तस्मात्स्वस्य गोषूच्यहृति ॥११॥ तस्मै तावन्मात्रीर्वा भूयसीर्वा प्रतिददाति । न वाऽएष क्रूरकर्मणे भवति यच्यजमानः क्रूरमिव वाऽएतत्करोति यदाह

ज्ञिनामीमाः कुर्वञ्इमा इति तथो ह्यस्यैतद्क्रूरं कृतं भवति तस्मात्तावन्मात्रीर्वा भूयसीर्वा प्रतिददाति ॥ १२ ॥ अथ दक्षिणानायहति । सोऽग्रेण यूपं दक्षिणेन वेदिं येनैव दक्षिणा यन्ति तेन प्रतिपद्यते तं ज्ञघनेन सदोऽग्रेण शालामुद्यहति ॥ १३ ॥ मा न इन्द्र ते वयं तुराषाट् । अयुक्तासोऽअब्रह्मता विदसाम । तिष्ठा रथमधि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वानित्युद्यहत्येवैतयाभीशवो वै रश्मयस्तस्मादाहा रश्मीन्देव यमसे स्वश्वानित्यथ रथविमोचनीयानि जुहोति प्रीतो रथो विमुच्याताऽइति तस्माद्रथविमोचनीयानि जुहोति ॥ १४ ॥ स जुहोति । अग्नये गृहपतये स्वाहेति स यदेवाग्नेयꣳ रथस्य तदेवैतेन प्रीणाति वहा वाऽआग्नेया रथस्य वहानेवैतेन प्रीणाति श्रीर्वै गार्हपतं यावतो-यावत ईष्टे तस्मियमेवास्यैतद्गार्हपतꣳ राज्यमभिविमुच्यते ॥ १५ ॥ सोमाय वनस्पतये स्वाहेति । द्वयानि वै वानस्पत्यानि चक्राणि रथ्यानि चानसानि च तेभ्यो न्वेवैतदुभयेभ्योऽरिष्टिं कुरुते सोमो वै वनस्पतिः स यदेव वानस्पत्यꣳ रथस्य तदेवैतेन प्रीणाति दारूणि वै वानस्पत्यानि रथस्य दारूणेवैतेन प्रीणाति क्षत्रं वै सोमः क्षत्रमेवास्यैतद्राज्यमभिविमुच्यते ॥ १६ ॥ मरुतामोजसे स्वाहेति । स यदेव मारुतꣳ रथस्य तदेवैतेन प्रीणाति चत्वारोऽश्वा रथः पञ्चमो द्वौ सव्यष्टृसारथी ते सप्त सप्त-सप्त व मारुतो गणः सर्वमेवैतेन रथं प्रीणाति विशो वै मरुतो विशमेवास्यैतद्राज्यमभिविमुच्यते ॥ १७ ॥ इन्द्रस्येन्द्रियाय स्वाहेति । स यदेवैन्द्रꣳ रथस्य तदेवैतेन प्रीणाति सव्यष्ठा वाऽइन्द्रो रथस्य सव्यष्ठारमेवैतेन प्रीणातीन्द्रियं वै वीर्यमिन्द्र इन्द्रियमेवास्यैतद्वीर्यꣳ राज्यमभिविमुच्यते ॥ १८ ॥ अथ वाराह्याऽउपानहाऽउपमुञ्चते । अग्नौ ह वै देवा घृतकुम्भं प्रवेशयां चक्रुस्ततो वराहः सम्बभूव तस्माद्वराहो मेदुरो घृताद्धि सम्भूतस्तस्माद्वराहे गावः संजानते स्वमेवैतद्रसमभिसंजानते तत्पशूनामेवैतद्रसे प्रतितिष्ठति तस्माद्वाराह्याऽउपानहाऽउपमुञ्चते ॥ १९ ॥ अथेमां

प्रत्यवेक्षमाणो जपति । पृथिवि मातर्मा मा हिꣳसीर्मोऽअहं त्वामिति वरुणाद्ध वाऽअभिषिषिचानात्पृथिवी बिभयां चकार महद्वाऽअयमभूद्योऽभ्यषेचि यद्वै मायं नावदृणीयादिति वरुण उ ह पृथिव्यै बिभयां चकार यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयमकुरुत न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥ २० ॥ वरुणसवो वाऽएष यद्राजसूयम् । पृथिव्यु हैतस्माद्बिभेति महद्वाऽअयमभूद्योऽभ्यषेचि यद्वै मायं नावदृणीयादित्येष उ ह्यस्यै बिभेति यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयं कुरुते न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरं तस्मादेवं जपति ॥ २१ ॥ सोऽवतिष्ठति । हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदित्येतामतिछन्दसं जपन्नेषा वै सर्वाणि छन्दाꣳसि यदतिछन्दास्तथैनं पाप्मा नान्ववतिष्ठति ॥ २२ ॥ तं न संग्रहीतान्ववतिष्ठेत् । नेत्तं लोकमन्ववतिष्ठाद्यꣳ सुषुवाणो ऽन्ववास्यादिति तꣳ सरथमेव रथवाहनऽआदधति ततोऽवाङुपप्रवते तथा तं लोकं नान्ववतिष्ठति यꣳ सुषुवाणोऽन्ववास्यात् ॥ २३ ॥ उत्तरेणाहवनीयं पूर्वाग्निरुद्धृतो भवति । स रथवाहनस्य दक्षिणमन्वनुष्यन्दꣳ शतमानौ प्रवृत्तावाबध्नाति ॥ २४ ॥ औदुम्बरीꣳ शाखामुपगूहति । तयोरन्यतरमुपस्पृशतीयदस्यायुरस्यायुर्मयि धेहि युङ्क्ष्वि वर्चोऽसि वर्चो मयि धेहीति तदायुर्वर्च आत्मन्धत्ते ॥ २५ ॥ अथौदुम्बरीꣳ शाखामुपस्पृशति । ऊर्गस्यूर्ज्जं मयि धेहीति तदूर्ज्जमात्मन्धत्ते तस्यैतस्य कर्मण एतावेव शतमानौ प्रवृत्तौ दक्षिणा तौ ब्रह्मणे ददाति ब्रह्मा हि यज्ञं दक्षिणतोऽभिगोपायति तस्मात्तौ ब्रह्मणे ददाति ॥ २६ ॥ अग्रेण मैत्रावरुणस्य धिष्ण्यम् । मैत्रावरुणी पयस्या निहिता भवति तामस्य बाहूऽअभ्युपावहरतीन्द्रस्य वां वीर्यकृतो बाहूऽअभ्युपावहरामीति पशूनां वाऽएष रसो यत्पयस्या तत्पशूनामेवास्यैतद्रसं बाहूऽअभ्युपावहरति तस्मान्मैत्रावरुणी भवति मित्रावरुणाऽउ

हि बाह्वृ तस्मान्मैत्रावरुणी भवति ॥२७॥ ब्राह्मणम् ॥५ [४. ३.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या११९ ॥ ॥

मैत्रावरुण्या पयस्यया प्रचरति । तस्या अनिष्ट एव स्विष्टकृद्वत्यथास्माऽआसन्दीमाहरत्युपरिसव्यं वाऽएष क्षयति यो क्षयत्यन्तरिक्षसव्यं तदेनमुपर्यासीनमधस्तादिमाः प्रजा उपासते तस्मादस्माऽआसन्दीमाहरन्ति सैषा खादिरी विवृक्षा भवति येयं वर्ध्रव्युता भरतानाम् ॥१॥ तामग्रेण । मैत्रावरुणस्य धिष्ण्यं निदधाति स्योनासि सुषदासीति शिवामेवैतद्गृह्मां करोति ॥२॥ अथाधीवासमास्तृणाति । क्षत्रस्य योनिरसीति तस्यैव क्षत्रस्य योनिस्तामेवैतत्करोति ॥३॥ अथैनमासादयति । स्योनामासीद सुषदामासीदेति शिवाꣳ शग्मामासीदित्येवैतदाह क्षत्रस्य योनिमासीदेति तस्यैव क्षत्रस्य योनिस्तस्यामेवैनमेतद्दधाति ॥४॥ अथात्तराꣳसेऽभिमृश्य क्षपति । निषसाद धृतव्रत इति धृतव्रतो वै राजा न वाऽएष सर्वस्माऽइव वदनाय न सर्वस्माऽइव कर्मणे यदेव साधु वदेद्यत्साधु कुर्यात्तस्मै वाऽएष च श्रोत्रियश्चेतौ ह वै द्वौ मनुष्येषु धृतव्रतौ तस्मादाह निषसाद धृतव्रत इति वरुणः पस्त्यास्वेति विशो वै पस्त्या विद्वित्येवैतदाह साम्राज्याय सुक्रतुरिति राज्यायित्येवैतदाह यदाह साम्राज्याय सुक्रतुरिति ॥५॥ अथास्मै पश्चात्क्षान्याणावावपति । अभिभूरस्येतास्ते पञ्च दिशः कल्पन्तामित्येष वाऽअयानभिभूर्यत्कलिरेष हि सर्वानयानभिभवति तस्मादाहाभिभूरसीत्येतास्ते पञ्च दिशः कल्पन्तामिति पञ्च वै दिशस्तदस्मै सर्वा एव दिशः कल्पयति ॥६॥ अथैनं पृष्ठतस्तूष्णीमेव दण्डैर्घ्नन्ति । तं दण्डैर्घ्नन्तो दण्डबधमतिनयन्ति तस्माद्राजादण्ड्यो यदेनं दण्डबधमतिनयन्ति ॥७॥ अथ वरं वृणीते । यꣳ ह वै कं च सुषुवाणो वरं वृणीते सोऽस्मै सर्वः समृध्यते तस्माद्वरं वृणीते ॥८॥ स ब्रह्मन्नित्येव प्रथममामन्त्रयते । ब्रह्म प्रथममभिव्याहराणि ब्रह्मप्रसूतां वाचं वदानीति तस्माद्ब्रह्मन्नि-

त्येव प्रथममामन्त्रयते त्वं ब्रह्मासीतीतरः प्रत्याह सवितासि सत्यप्रसव इति वीर्यमेवास्मिन्नेतद्दधाति सवितारमेव सत्यप्रसवं करोति ॥ ९ ॥ ब्रह्मन्नित्येव द्वितीयमामन्त्रयते । त्वं ब्रह्मासीतीतरः प्रत्याह वरुणोऽसि सत्यौजा इति वीर्यमेवास्मिन्नेतद्दधाति वरुणमेव सत्यौजसं करोति ॥ १० ॥ ब्रह्मन्नित्येव तृतीयमामन्त्रयते । त्वं ब्रह्मासीतीतरः प्रत्याहेन्द्रोऽसि विशौजा इति वीर्यमेवास्मिन्नेतद्दधातीन्द्रमेव विशौजसं करोति ॥ ११ ॥ ब्रह्मन्नित्येव चतुर्थमामन्त्रयते । त्वं ब्रह्मासीतीतरः प्रत्याह रुद्रोऽसि सुशेव इति तद्वीर्याण्येवास्मिन्नेतत्पूर्वाणि दधात्यथैनमेतद्भयत्येव तस्मादेष सर्वस्येशानो मृडयति यदेनꣳ शमयति ॥ १२ ॥ ब्रह्मन्नित्येव पञ्चममामन्त्रयते । त्वं ब्रह्मासीतीतरोऽनिरुक्तं प्रत्याह परिमितं वै निरुक्तं तत्परिमितमेवास्मिन्नेतत्पूर्वं वीर्यं दधात्यथात्रानिरुक्तं प्रत्याहापरिमितं वाऽअनिरुक्तं तदपरिमितमेवास्मिन्नेतत्सर्वं वीर्यं दधाति तस्मादत्रानिरुक्तं प्रत्याह ॥ १३ ॥ अथ सुमङ्गलनामानꣳ ह्वयति । बभ्रुकार श्रेयस्कर भूयस्करेति य एवंनामा भवति कल्याणमेवैतन्मानुष्ये वाचो वदति ॥ १४ ॥ अथास्मै ब्राह्मण स्फ्यं प्रयच्छति । अध्वर्युर्वा यो वास्य पुरोहितो भवतीन्द्रस्य वज्रोऽसि तेन मे रध्येति वज्रो वै स्फ्यः स एतेन वज्रेण ब्राह्मणो राजानमात्मनोऽबलीयाꣳसं कुरुते यो वै राज्ञा ब्राह्मणाद्बलीयानमित्रेभ्यो वै स बलीयान्भवति तदमित्रेभ्य एवैनमेतद्बलीयाꣳसं करोति ॥ १५ ॥ तꣳ राज्ञा राजभ्रात्रे प्रयच्छति । इन्द्रस्य वज्रोऽसि तेन मे रध्येति तेन राज्ञा राजभ्रातरमात्मनोऽबलीयाꣳसं कुरुते ॥ १६ ॥ तꣳ राजभ्राता सूताय वा स्थपतये वा प्रयच्छति । इन्द्रस्य वज्रोऽसि तेन मे रध्येति तेन राजभ्राता सूतं वा स्थपतिं वात्मनोऽबलीयाꣳसं कुरुते ॥ १७ ॥ तꣳ सूतो वा स्थपतिर्वा ग्रामण्ये प्रयच्छति । इन्द्रस्य वज्रोऽसि तेन मे रध्येति तेन सूतो वा स्थपतिर्वा ग्रामण्यमात्मनोऽबलीयाꣳसं कुरुते ॥ १८ ॥ तं ग्रामणीः सज्ञाताय प्रयच्छति । इन्द्रस्य वज्रो

ऽसि तेन मे रध्येति तेन ग्रामणीः सज्ञातमात्मनोऽबलीयाꣳसं कुरुते तद्यदेवꣳ सम्प्रयच्छन्ते नेत्यापवस्यसमसद्यथापूर्वमसदिति तस्मादेवꣳ सम्प्रयच्छन्ते ॥११॥ अथ सज्ञातश्च प्रतिप्रस्थाता च । एतेन स्फ्येन पूर्वाग्नौ शुक्रस्य पुरोरुचाधिदेवनं कुरुतोऽत्ता वै शुक्रोऽत्तारमेवैतत्कुरुतः ॥२०॥ अथ मन्थिनः पुरोरुचा विमितं विमिनुतः । आग्नो वै मन्थी तदत्तारमेवैतत्कृत्वाथास्माऽएतदाग्नं जनयतस्तस्मान्मन्थिनः पुरोरुचा विमितं विमिनुतः ॥२१॥ अथाधर्युः । चतुर्गृहीतमाज्यं गृहीत्वाधिदेवने हिरण्यं निधाय जुहोत्यग्निः पृथुर्धर्मणास्पतिर्जुषाणोऽग्निः पृथुर्धर्मणास्पतिराज्यस्य वेतु स्वाहेति ॥२२॥ अथाज्ञान्निवपति । स्वाहाकृताः सूर्यस्य रश्मिभिर्यतधꣳ सज्ञातानां मध्यमेष्ठायेत्येष वाऽअग्निः पृथुर्यदधिदेवनं तस्यैतेऽङ्गारा यदज्ञास्तमेवैतेन प्रीणाति तस्य ह वाऽएषानुमता गृहेषु हन्यते यो वा राजसूयेन यजते यो वैतदेवं वेदैतेष्वेषाह गां दीव्यधमिति पूर्वाग्निवाहौ दक्षिणा ॥२३॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । तद्यदन्तरेणाङ्कतीऽएतत्कर्म क्रियत ऽएष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतस्मिन्वाप्येतर्ह्यनु प्रजायन्ते तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति तस्मादन्तरेणाङ्कतीऽएतत्कर्म क्रियतऽआश्राव्याहाग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोति ॥२४॥ अथेडामादधाति । उपहूतायामिडायामप उपस्पृश्य माहेन्द्रं ग्रहं गृह्णाति माहेन्द्रं ग्रहं गृहीत्वा स्तोत्रमुपाकरोति तꣳ स्तोत्राय प्रमीवति स उपावरोहति सोऽन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्य ॥२५॥ ब्राह्मणम् ॥ १ [४. ४.] ॥ ॥

वरुणाद्ध वाऽअभिषिषिचानाद्भर्गोऽपचक्राम । वीर्यं वै भर्ग एष विष्णुर्यज्ञः सोऽस्मादपचक्राम शश्वद्य एषोऽपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति सोऽस्य भर्गं निर्जघान ॥१॥ तमेताभिर्देवताभिरनुसमसर्पत् । सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्ण पशुभिरिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणे-

नौज्ञसाग्निना तेज्ञसा सोमेन राज्ञा विष्णुनैव दशम्या देवतयान्वविन्दत् ॥२॥ तद्यदेनमेताभिर्देवताभिरनुसमसर्पत् । तस्मात्सꣳसृपो नामाथ यद्दशमिꣳकृन्प्रसुतो भवति तस्माद्दशपेयोऽथो यद्दश-दशैकैकं चमसमनुप्रसृप्ता भवन्ति तस्माद्वैव दशपेयः ॥३॥ तदाहुः । दश पितामकृात्सोमपात्संख्याय प्रसर्पेत्तथो कृास्य सोमपीथमश्नुते दशपेयो कृीति तद्वै ज्या द्वौ त्रीनित्येव पितामकृात्सोमपान्विन्दन्ति तस्मादेता एव देवताः संख्याय प्रसर्पेत् ॥४॥ एताभिर्वै देवताभिर्वरुण एतस्य सोमपीथमाश्नुत । तथोऽएवैष एताभिरेव देवताभिरेतस्य सोमपीथमश्नुते तस्मादेता एव देवताः संख्याय प्रसर्पेदथ यदैवैषोदवसानीयेष्टिः संतिष्ठतऽएतस्याभिषिचनीयस्य ॥५॥ अथैतानि कृवीꣳषि निर्वपति । सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशꣳ सविता वै देवानां प्रसविता सवितृप्रसूत एव तद्वरुणोऽनुसमसर्पत्तथोऽएवैष एतत्सवितृप्रसूत एवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयकृति ॥६॥ अथ सारस्वतं चरुं निर्वपति । वाग्वै सरस्वती वाचैव तद्वरुणोऽनुसमसर्पत्तथोऽएवैष एतद्वाचैवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयकृति ॥७॥ अथ त्वाष्ट्रं दशकपालं पुरोडाशं निर्वपति । त्वष्टा वै रूपाणामीष्टे त्वष्ट्रैव तद्रूपैर्वरुणोऽनुसमसर्पत्तथोऽएवैष एतत्वष्ट्रैव रूपैरनुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयकृति ॥८॥ अथ पौष्णं चरुं निर्वपति । पशवो वै पूषा पशुभिरेव तद्वरुणोऽनुसमसर्पत्तथोऽएवैष एतत्पशुभिरेवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयकृति ॥९॥ अथैन्द्रमेकादशकपालं पुरोडाशं निर्वपति । इन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणैव तद्वीर्येण वरुणोऽनुसमसर्पत्तथोऽएवैष एतदिन्द्रियेणैव वीर्येणानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयकृति ॥१०॥ अथ बार्कृस्पत्यं चरुं निर्वपति । ब्रक्ष वै बृकृस्पतिर्ब्रक्षणैव तद्वरुणोऽनुसमसर्पत्तथोऽएवैष एतद्ब्रक्षणैवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयकृति ॥११॥ अथ वारुणं यवमयं चरुं निर्वपति । स येनैवौज्ञसेमाः प्रजा वरुणोऽगृ-

ह्यात्तेनैव तदोजसा वरुणोऽनुसमसर्पत्तेनोऽएवैष तदोजसानुसऽसर्पति तत्रैकं पुण्डरीकं प्रयच्छति ॥ १२ ॥ उपसदो दशम्यो देवताः । तत्र पञ्च पुण्डरीकाण्युपप्रयच्छति तां द्वादशपुण्डरीकाꣳ स्रजं प्रतिमुञ्चते सा दीक्षा तया दीक्षया दीक्षते ॥ १३ ॥ अथ यद्द्वादश भवन्ति । द्वादश वै मासाः संवत्सरस्य सर्वे वै संवत्सरः सर्वेणैवैनमेतद्दीक्षयति यानि पुण्डरीकाणि तानि दिवो रूपं तानि नक्षत्राणाꣳ रूपं ये वधकास्तेऽन्तरिक्षस्य रूपं यानि बिसानि तान्यस्यै तदेनमेषु लोकेष्वधि दीक्षयति ॥ १४ ॥ अथ राजानं क्रीत्वा । द्वेधोपनह्य परिवहन्ति ततोऽर्धमासन्यामासाय्य प्रचरत्यथ य एषोऽर्धो ब्रह्मणो गृहे निहितो भवति तमासन्यामासाय्यातिथ्येन प्रचरति यदातिथ्येन प्रचरत्यथोपसद्भिः प्रचरति यदोपसद्भिः प्रचरति ॥ १५ ॥ अथैतानि हवीꣳषि निर्वपति । आग्नेयमष्टाकपालं पुरोडाशꣳ सौम्यं चरुं वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन यथेष्ट्यैवं यजते ॥ १६ ॥ तदु तथा न कुर्यात् । स्खलति वाऽएष यो यज्ञयथादेत्येति वाऽएष यज्ञपथाय्य उपसत्पथादेति तस्मादुपसत्पथादेव नेयात् ॥ १७ ॥ स यदग्निं यजति । अग्निनैवैतत्तेजसानुसऽसर्पत्यथ यत्सोमं यजति सोमेनैवैतद्राज्ञानुसऽसर्पत्यथ यद्विष्णुं यजति यज्ञो वै विष्णुस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमाप्त्वात्मन्कुरुते ॥ १८ ॥ स एष सप्तदशोऽग्निष्टोमो भवति । सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमाप्त्वात्मन्कुरुते ॥ १९ ॥ तस्य द्वादश प्रथमगर्भाः षष्टौक्ष्यो दक्षिणा । द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमाप्त्वात्मन्कुरुते ॥ २० ॥ तासां द्वादश गर्भाः । ताश्चतुर्विꣳशतिश्चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमाप्त्वात्मन्कुरुते ॥ २१ ॥ ता ब्रह्मणे ददाति । ब्रह्मा हि यज्ञं दक्षिणातोऽभिगोपायति तस्मात्ता ब्रह्मणे ददाति हिरण्मयीꣳ स्रजमुद्गात्रे रुक्मꣳ होत्रे हि-

रणमयौ प्राकाशावधर्युभ्यामश्वं प्रस्तोत्रे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छंसिने वाससी नेष्टापोतृभ्यामन्यतरतोयुक्तं यवाचितमच्छावाकाय गामग्नीधे ॥ २२ ॥ ता वाऽएताः । द्वादश वा त्रयोदश वा दक्षिणा भवन्ति द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमात्वात्मन्कुरुते ॥ २३ ॥ ब्राह्मणम् ॥ २ [४. ५.] ॥ चतुर्थोऽध्यायः [३४.] ॥ ॥

आग्नेयोऽष्टाकपालः पुरोडाशो भवति । तं पूर्वार्धऽआसादयत्यैन्द्र एकादशकपालः पुरोडाशो भवति सौम्यो वा चरुस्तं दक्षिणार्धऽआसादयति वैश्वदेवश्चरुर्भवति तं पश्चार्धऽआसादयति मैत्रावरुणी पयस्या भवति तामुत्तरार्धऽआसादयति बार्हस्पत्यश्चरुर्भवति तं मध्यऽआसादयत्येष चरुः पञ्चबिलस्तद्यत्पञ्च कृत्वीषि भवन्ति तेषां पञ्च बिलानि तस्माच्चरुः पञ्चबिलो नाम ॥ १ ॥ तद्यदेतेन राजसूययाजी यजते । यदेवैनं दिशः समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्मादेवैनमेतेन निष्क्रीणाति स यद्येतेन राजसूययाजी न यजेतोद्धा ह माद्येत्प्र वा पतेत्तस्माद्धाऽएतेन राजसूययाजी यजते ॥ २ ॥ स यदाग्नेयेनाष्टाकपालेन पुरोडाशेन प्रचरति । यदेवैनं प्राचीं दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्मादेवैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति ॥ ३ ॥ अथ यदैन्द्रेणैकादशकपालेन पुरोडाशेन प्रचरति । सौम्येन वा चरुणा यदेवैनं दक्षिणां दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्मादेवैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति ॥ ४ ॥ अथ यद्वैश्वदेवेन चरुणा प्रचरति । यदेवैनं प्रतीचीं दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्मादेवैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति ॥ ५ ॥ अथ यन्मैत्रावरुण्या पयस्यया प्रचरति । यदेवैनमुदीचीं दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्मादेवैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति तद्यत्सꣳस्रवा-

न्बार्हस्पत्ये चरावनयति सर्वत एवास्मिन्नेतदन्नाद्यं दधाति तस्माद्व दिशो-दिश एव राज्ञेऽन्नाद्यमभिह्रियते ॥ ६ ॥ अथ यद्बार्हस्पत्येन चरुणा प्रचरति । यदेवैनमूर्ध्वा दिशꣳ समारोहयति यदतून्यत्स्तोमान्यच्छन्दाꣳसि तस्मादेवैनमेतेन निष्क्रीणाति ॥ ७ ॥ स य एष आग्नेयोऽष्टाकपालः पुरोडाशो भवति । तस्य हिरण्यं दक्षिणाग्नेयो वाऽएष यज्ञो भवत्यग्नेरेतो हिरण्यं तस्माद्धिरण्यं दक्षिणा तदग्नीधे ददात्यग्निर्वाऽएष निदानेन यदाग्नीध्रस्तस्मात्तदग्नीधे ददाति ॥ ८ ॥ अथ य एष ऐन्द्र एकादशकपालः पुरोडाशो भवति । तस्यर्षभो दक्षिणा स ह्यैन्द्रो यदृषभो यद्यु सौम्यश्चरुर्भवति तस्य बभ्रुर्गौर्दक्षिणा स हि सौम्यो यद्बभ्रुस्तं ब्रह्मणे ददाति ब्रह्मा हि यज्ञं दक्षिणतोऽभिगोपायति तस्मात्तं ब्रह्मणे ददाति ॥ ९ ॥ अथ य एष वैश्वदेवश्चरुर्भवति । तस्य पृषन्गौर्दक्षिणा भूमा वाऽएतद्रूपाणां यत्पृषतो गोर्विशो वै विश्वे देवा भूमा वै विट्तस्मात्पृषन्गौर्दक्षिणा तꣳ होत्रे ददाति होता हि भूमा तस्मात्तꣳ होत्रे ददाति ॥ १० ॥ अथ यैषा मैत्रावरुणी पयस्या भवति । तस्यै वशा दक्षिणा सा हि मैत्रावरुणी यद्वशा यदि वशां न विन्देदपि यैव का चाप्रवीता स्यात्सर्वा ह्येव वशाप्रवीता तामध्वर्युभ्यां ददाति प्राणोदानौ वाऽअध्वर्यू प्राणोदानौ मित्रावरुणौ तस्मात्तामध्वर्युभ्यां ददाति ॥ ११ ॥ अथ य एष बार्हस्पत्यश्चरुर्भवति । तस्य शितिपृष्ठो गौर्दक्षिणैषा वाऽऊर्ध्वा बृहस्पतेर्दिक्कदेष उपरिष्टादर्यम्णः पन्थास्तस्माच्छितिपृष्ठो बार्हस्पत्यस्य दक्षिणा तं ब्रह्मणे ददाति बृहस्पतिर्वै देवानां ब्रह्मैष वाऽएतस्य ब्रह्मा भवति तस्मात्तं ब्रह्मणे ददाति स ह्येतेनापि विष्ठाव्राज्यन्नाद्यकामो यजेत तदस्मिन्त्सर्वतोऽन्नाद्यं दधाति स ह्यन्नाद एव भवति ॥ १२ ॥ ब्राह्मणम् ॥ ३ [५. १.] ॥ ॥

स वै प्रयुजाꣳ हविर्भिर्यजते । तद्यत्प्रयुजाꣳ हविर्भिर्यजतऽऋतून्वाऽएतत्सुषुवाणो युङ्क्ते तऽएनमृतवो युक्ता वहन्त्यृतून्वा प्रयुक्ताननुचरति तस्मात्प्रयुजाꣳ

ऋविर्भिर्यजते ॥१॥ तानि वै द्वादश भवन्ति । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश भवन्ति मासि-मासि यजेतित्याहुः को वेद मनुष्यस्य तस्मान्न मासि-मासि यजेत शम्यापराव्याधे-शम्यापराव्याधऽएव षड्भिर्यजते प्राङ् यानथ पुनरावृत्तः शम्यापराव्याधे-शम्यापराव्याधऽएव षड्भिर्यजते ॥२॥ तद्ध तथा न कुर्यात् । षडेवैतानि पूर्वाणि ऋवीꣳषि निर्वपति समानबर्हीꣳषि तासां देवतानाꣳ रूपं यथा शिशिरे युक्ता प्राञ्च आप्रावृषं यायुस्तत्षड्भूतून्युङ्क्ते तऽएनꣳ षड्भूतवो युक्ताः प्राञ्च आप्रवृषं वहन्ति षड्ऽर्तून्प्रयुक्तानाप्रावृषमनुचरति पूर्वाग्निवाहो द्वौ दक्षिणा ॥३॥ षडेवोत्तराणि ऋवीꣳषि निर्वपति । समानबर्हीꣳषि तासां देवतानाꣳ रूपं यथा पुनरावर्तेरन्वार्षिकमभि तत्षड्भूतून्युङ्क्ते तऽएनꣳ षड्भूतवो युक्ता वार्षिकमभि वहन्ति षड्ऽर्तून्प्रयुक्तान्वार्षिकमनुचरति पूर्वाग्निवाहो द्वौ दक्षिणा तद्यत्पूर्वाग्निवाहो दक्षिणाऽर्तून्वाऽएतत्सुषुवाणो युङ्क्ते वहन्ति वाऽअनड्वाहस्तस्मात्पूर्वाग्निवाहो दक्षिणा ॥४॥ तद्ध स्मैतत्पुरा कुरुपञ्चाला आहुः । ऋतवो वाऽअस्मान्युक्ता वहन्त्यृतून्वा प्रयुक्ताननुचराम इति यदेषाꣳ राजानो राजसूयायाजिन आसुस्तद्ध स्म तद्ब्याहुः ॥५॥ आग्नेयोऽष्टाकपालः पुरोडाशो भवति । सौम्यश्चरुः सावित्रो द्वादशकपालो वाष्टाकपालो वा पुरोडाशो बार्हस्पत्यश्चरुस्त्वाष्ट्रो दशकपालः पुरोडाशो वैश्वानरो द्वादशकपाल एतानि षट् पूर्वाणि ऋवीꣳषि भवन्ति ॥६॥ ॥ शतम्३०० ॥ ॥ षडेवोत्तरे चरवः । सारस्वतश्चरुः पौष्णश्चरुर्मैत्रश्चरुः कैत्रपत्यश्चरुर्वारुणश्चरुरादित्यश्चरुरेतऽउ षडुत्तरे चरवः ॥७॥ अथ श्येनीं विचित्रगर्भामदित्याऽआलभते । तस्या एषैवावृद्यष्टापय्ये वशायाऽइयं वाऽअदितिरस्या एवैनमेतद्गर्भं करोति तस्या एतादृश्येव श्येनी विचित्रगर्भा दक्षिणा ॥८॥ अथ पृषतीं विचित्रगर्भां मरुद्भ्य आलभते । तस्या एषैवावृद्विशो वै मरुतो विशामेवैनमेतद्गर्भं करोति तस्या एतादृश्येव पृषती विचित्रगर्भा दक्षिणा ॥९॥ एतौ पशु-

बन्धौ । तदेतावेव सत्तावन्यथेवालभते यामदित्याऽआलभतऽआदित्येभ्यस्तामालभते सर्वं वाऽआदित्याः सर्वस्यैवैनमेतद्गर्भं करोति यां मरुद्भ्य आलभते विश्वेभ्यस्तां देवेभ्य आलभते सर्वं वै विश्वे देवाः सर्वस्यैवैनमेतद्गर्भं करोति ॥१०॥ ब्राह्मणम् ॥४ [५. २.] ॥ ॥

अभिषेचनीयेनेष्ट्वा । केशान्न वपते तद्यत्केशान्न वपते वीर्यं वाऽएतद्पाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति तस्याभिषिक्तस्य केशान्प्रथमान्प्राप्नोति स यत्केशान्वपेतैताꣳ श्रियं ज्ञिक्षां विनाशयेद्युदुक्त्वात्तस्मात्केशान्न वपते ॥१॥ संवत्सरं न वपते । संवत्सरसंमिता वै व्रतचर्या तस्मात्संवत्सरं न वपते स एष व्रतविसर्जनीयोपयोगो नाम स्तोमो भवति केशवपनीयः ॥२॥ तस्यैकविꣳशं प्रातःसवनꣳ । सप्तदशं माध्यन्दिनꣳ सवनं पञ्चदशं तृतीयसवनꣳ सक्थ्यैः सह षोडशिना सह रात्र्या ॥३॥ त्रिवृद्रथन्तरः संधिर्भवति । एष एवैकविꣳशो य एष तपति स एतस्मादेकविꣳशाद्पयुङ्क्ते स सप्तदशमभिप्रत्यवैति सप्तदशात्पञ्चदशं पञ्चदशादस्यामेव त्रिवृति प्रतिष्ठायां प्रतितिष्ठति ॥४॥ तस्य रथन्तरं पृष्ठं भवति । इयं वै रथन्तरमस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठत्यतिरात्रो भवति प्रतिष्ठा वाऽअतिरात्रस्तस्मादतिरात्रो भवति ॥५॥ स वै न्येव वर्तयते । केशान्न वपते वीर्यं वाऽएतद्पाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति तस्याभिषिक्तस्य केशान्प्रथमान्प्राप्नोति स यत्केशान्वपेतैताꣳ श्रियं ज्ञिक्षां विनाशयेद्युदुक्त्वादथ यन्निवर्तयते तदात्मन्येवैताꣳ श्रियं नियुनक्ति तस्मान्न्येव वर्तयते केशान्न वपते तस्यैषैव व्रतचर्या भवति यावज्जीवं नास्यां प्रतितिष्ठति ॥६॥ आसन्द्या उपानहाऽउपमुञ्चते । उपानद्भ्यामधि यदस्य यानं भवति रथो वा किंचिद्वा सर्वं वाऽएष इदमुपर्युपरि भवत्यर्वागेवास्मादिदꣳ सर्वं भवति यो राजसूयेन यजते तस्मादस्यैषैव व्रतचर्या भवति यावज्जीवं नास्यां प्रतितिष्ठति ॥७॥ ब्राह्मणम् ॥५ [५. ३.] ॥ ॥

०००

श्येत आश्विनो भवति । श्येताविव ह्याश्विनावविर्मल्हा सारस्वती भवत्यृषभमिन्द्राय सूत्राम्णेऽआलभते दुर्वेदा एवꣳसमृद्धाः पशवो यस्यैवꣳसमृद्धान्न विन्देदप्यज्ञानिवालभेरंस्ते हि सुश्रपतरा भवन्ति स यस्याज्ञानालभेरंल्लोहित आश्विनो भवति तस्यैतया यजते ॥१॥ त्वष्टुर्ह वै पुत्रः । त्रिशीर्षा षडक्ष आस तस्य त्रीण्येव मुखान्यासुस्तस्यैवꣳरूप आस तस्माद्विश्वरूपो नाम ॥२॥ तस्य सोमपानमेवैकं मुखमास । सुरापाणमेकमन्यस्माऽअशनायैकं तमिन्द्रो द्विक्षे तस्य तानि शीर्षाणि प्रचिक्षेद ॥३॥ स यत्सोमपानमास । ततः कपिञ्जलः समभवत्तस्मात्स बभ्रुक-इव बभ्रुरिव हि सोमो राजा ॥४॥ अथ यत्सुरापाणमास । ततः कलविङ्कः समभवत्तस्मात्सोऽभिमाय्यत्क-इव वदत्यभिमाय्यन्निव हि सुरां पीत्वा वदति ॥५॥ अथ यदन्यस्माऽअशनायास । ततस्तित्तिरिः समभवत्तस्मात्स विश्वरूपतम-इव सर्त्येव घृतस्तोका-इव वन्मधुस्तोका-इव वत्पर्णेषाश्युतिता एवꣳरूपमिव हि स तेनाशनमावयत् ॥६॥ स त्वष्टा चुक्रोध । कुविन्मे पुत्रमबधीदिति सोऽपेन्द्रमेव सोममाजह्रे स यथायꣳ सोमः प्रसुत एवमपेन्द्र एवास ॥७॥ इन्द्रो ह वाऽईक्षां चक्रे । इदं वै मा सोमादन्तर्यन्तीति स यथा बलीयानबलीयस एवमनुपदूत एव यो द्रोणकलशे शुक्र आस तं भक्षयां चकार स हैनं जिह्विꣳस सोऽस्य विषवृक्ण इव प्राणेभ्यो दुद्राव मुखाद्वैवास्य न दुद्राव तस्मात्प्रायश्चित्तिरास स यद्यपि मुखाद्द्रोष्यन्न हैव प्रायश्चित्तिरभविष्यत् ॥८॥ चत्वारो वै वर्णाः । ब्राह्मणो राजन्यो वैश्यः शूद्रो न हैतेषामेकश्चन भवति यः सोमं वमति स यद्धैतेषामेकश्चित्स्यात्स्याद्धैव प्रायश्चित्तिः ॥९॥ स यन्नस्तोऽद्रवत् । ततः सिꣳहः समभवद्यत्कर्णाभ्यामद्रवत्ततो वृकः समभवद्यद्वाचः प्राणादद्रवत्ततः शार्दूलऋष्टयः श्वापदाः समभवन्नथ यदुत्तरात्प्राणाद्द्रवत्सा परिस्रुद्य त्रिर्निरष्ठीवत्ततः कुवलं कर्कन्धु बदरमिति समभवत्स सर्वेणैव व्यार्ध्यत सर्वꣳ हि सोमः ॥१०॥ स सोमातिपूतो

मङ्कुरिव चचार । तमेतयाश्विनावभिषञ्यतां तꣳ सर्वेणैव समार्धयताꣳ सर्वꣳ हि सोमः स वसीयानेवेष्ट्वाभवत् ॥ ११ ॥ ते देवा अब्रुवन् । सुत्रातं बतैनमत्रासतामिति तस्मात्सौत्रामणी नाम ॥ १२ ॥ स कैतयापि सोमातिपूतं भिषञ्येत् । सर्वेण वाऽएष व्यृध्यते यꣳ सोमोऽतिपवते सर्वꣳ हि सोमस्तꣳ सर्वेणैव समर्धयति सर्वꣳ हि सोमः स वसीयानेवेष्ट्वा भवति तस्माद्ध कैतयापि सोमातिपूतं भिषञ्येत् ॥ १३ ॥ तद्यदेतया राजसूययाजी यजते । सवान्वाऽएष यज्ञक्रतूनवरुन्द्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वाऽएषेष्टिर्यत्सौत्रामण्यनया मेऽपीष्टमसदनयापि सूयाऽइति तस्माद्धाऽएतया राजसूययाजी यजते ॥ १४ ॥ अथ यदाश्विनो भवति । अश्विनौ वाऽएनमभिषञ्यतां तथोऽएवैनमेष एतदश्विभ्यामेव भिषञ्यति तस्मादाश्विनो भवति ॥ १५ ॥ अथ यत्सारस्वतो भवति । वाग्वै सरस्वती वाचा वाऽएनमश्विनावभिषञ्यतां तथोऽएवैनमेष एतद्धाचैव भिषञ्यति तस्मात्सारस्वतो भवति ॥ १६ ॥ अथ यदैन्द्रो भवति । इन्द्रो वै यज्ञस्य देवता तयैवैनमेतद्भिषञ्यति तस्मादैन्द्रो भवति ॥ १७ ॥ एतेषु पशुषु । सिꣳहलोमानि वृकलोमानि शार्दूललोमानीत्यावपत्येतद्वै ततः समभवद्यदेनꣳ सोमोऽत्यपवत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादेतान्यावपति ॥ १८ ॥ तदु तथा न कुर्यात् । उल्कया ह स्म नखिन्या पशूननुषुवति य एतानि पशुष्वावपति तस्मादु परिस्रुत्येवावपेत्तथा ह्येवोल्कया नखिन्या पशून्नानुषुवति तथोऽएवैनꣳ समर्धयति कृत्स्नं करोति तस्मादु परिस्रुत्येवावपेत् ॥ १९ ॥ अथ पूर्वेद्युः । परिस्रुतꣳ संदधात्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेति सा यदा परिस्रुद्वत्यथैनया प्रचरति ॥ २० ॥ द्वावग्नीऽउद्धरन्ति । उत्तरवेदावेवोत्तरमुद्धते दक्षिणं नेत्सोमाकृतीश्च सुराकृतीश्च सꣳ स्रुक्स्वमिति तस्माद्द्वावग्नीऽउद्धरत्युत्तरवेदावेवोत्तरमुद्धते दक्षिणमथ यदा वपाभिः प्रचरत्यथैतया परिस्रुता प्रचरति ॥ २१ ॥ तां दर्भैः

पावयति । पूतासदिति वायुः पूतः पवित्रेण प्रत्यङ् सोमोऽतिस्रुतः । इन्द्रस्य युज्यः सखेति तत्कुवलसक्तून्कर्कन्धुसक्तून्बदरसक्तूनित्यावपत्येतद्वै ततः समभवत्त्विर्निरष्ठीवत्तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादितानावपति ॥ २२ ॥ अथ ग्रहान्गृह्णाति । एकं वा त्रीन्वैकस्त्वेव ग्रहीतव्य एका हि पुरोरुग्भवत्येकानुवाक्यैका याज्या तस्मादेक एव ग्रहीतव्यः ॥ २३ ॥ स गृह्णाति । कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिं यजन्ति । उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्ण ऽइति यद्यु त्रीन्गृह्णीयादेतयैव गृह्णीयाद्उपयामैस्तु तर्हि नाना गृह्णीयाद्यथाश्विभ्याꣳ सरस्वत्याऽइन्द्राय सुत्राम्णोऽनुब्रूहीति ॥ २४ ॥ सोऽन्वाह । युवꣳ सुराममश्विना नमुचावासुरे सचा । विपिपाना शुभस्पतीऽइन्द्रं कर्मस्वावतमित्याश्राव्याहाश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणं यजेति ॥ २५ ॥ स यजति । पुत्रमिव पितराववश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः । यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णगिति द्विर्होता वषट्करोति द्विरध्वर्युर्हुहोत्याहरति भक्षं यद्यु त्रीन्गृह्णीयादेतस्यैवानु होममितरौ हूयेते ॥ २६ ॥ अथ कुम्भः । शतवितृण्णो वा भवति नववितृण्णो वा स यदि शतवितृण्णः शतायुर्वाऽअयं पुरुषः शततेजाः शतवीर्यस्तस्माच्छतवितृण्णो यद्यु नववितृण्णो नवेमे पुरुषे प्राणास्तस्मान्नववितृण्णः ॥ २७ ॥ तꣳ शिक्योऽतनत् । उपर्युपर्याकवनीयं धारयन्ति सा या परिशिष्टा परिस्रुद्भवति तामासिञ्चति तां विच्छरन्तीमुपतिष्ठते पितृणाꣳ सोमवतां तिसृभिर्ऋग्भिः पितृणां बर्हिषदां तिसृभिर्ऋग्भिः पितृणामग्निष्वात्तानां तिसृभिर्ऋग्भिस्तद्यदेवमुपतिष्ठते यत्र वै सोम इन्द्रमत्यपवत स यत्पितॄनगच्छत्तया वै पितरस्तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादेवमुपतिष्ठते ॥ २८ ॥ अथैतानि हवीꣳषि निर्वपति । सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं वारुणं यवमयं चरुमैन्द्रमेकादशकपालं

पुरोडाशम् ॥२१॥ स यत्सावित्रो भवति । सविता वै देवानां प्रसविता सवितृप्रसूत एवैतद्विषज्यति तस्मात्सावित्रो भवति ॥३०॥ अथ यद्वारुणो भवति । वरुणो वाऽआर्पयिता तथ एवार्पयिता तेनैवैतद्विषज्यति तस्माद्वारुणो भवति ॥३१॥ अथ यदैन्द्रो भवति । इन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तयैवैतद्विषज्यति तस्मादैन्द्रो भवति ॥३२॥ स यदि कैतयापि सोमातिपूतं भिषज्येत् । इष्टा अनुयाज्ञा भवत्यव्यूढे स्रुचावथैतैर्हविर्भिः प्रचरति पश्चाद्वै सोमोऽतिपवते पश्चादेवैनमेतेन मेधेनापिदधात्याश्विनमु तर्हि द्विकपालं पुरोडाशं निर्वपेदथ यदा वपाभिः प्रचरत्यथैतेनाश्विनेन द्विकपालेन पुरोडाशेन प्रचरति ॥३३॥ तदु तथा न कुर्यात् । स्खलति वाऽएष यो यज्ञपथादेत्येति वाऽएष यज्ञपथाथ एवं करोति तस्माद्यत्रैवैतेषां पशूनां वपाभिः प्रचरन्ति तदेवैतैर्हविर्भिः प्रचरेयुर्नो तर्ह्याश्विनं द्विकपालं पुरोडाशं निर्वपेत् ॥३४॥ तस्य नपुंसको गौर्दक्षिणा । न वाऽएष स्त्री न पुमान्यन्नपुंसको गौर्यदु पुमांस्तेन न स्त्री यदु स्त्री तेनो न पुमांस्तस्मान्नपुंसको गौर्दक्षिणाश्वा वा रथवाही सा हि न स्त्री न पुमान्यदश्वा रथवाही यदु रथं वहति तेन न स्त्री यदु स्त्री तेनो न पुमांस्तस्मादश्वा रथवाही दक्षिणा ॥३५॥ ब्राह्मणम् ॥ ६ [५. ४.] ॥ ॥

ऐन्द्रवैष्णवं द्वादशकपालं पुरोडाशं निर्वपति । तथ्यदेतया यजते वृत्रे हु वा ऽइदमग्रे सर्वमास यदृचो यथ्सामानि तस्माऽइन्द्रो वज्रं प्राजिहीर्षत् ॥१॥ स हु विष्णुमुवाच । वृत्राय वै वज्रं प्रहरिष्याम्यनु मा तिष्ठस्वेति तथेति हु विष्णुरुवाचानु वा स्थास्ये प्रहरेति तस्माऽइन्द्रो वज्रमुद्यया स उद्यताद्वज्राद्वृत्रो बिभयां चकार ॥२॥ स होवाच । अस्ति वाऽइदं वीर्यं तनु ते प्रयह्वानि मा तु मे प्रहार्षीरिति तस्मै यज्ञूंषि प्रायछत्तस्मै द्वितीयमुद्यया ॥३॥ स होवाच । अस्ति वाऽइदं वीर्यं तनु ते प्रयह्वानि मा तु मे प्रहार्षीरिति तस्माऽऋ-

चः प्रायच्छत्तस्मै तृतीयमुच्चयाम ॥४॥ अस्ति वाऽइदं वीर्यं तन्नु ते प्रयच्छानि मा तु मे प्रहार्षीरिति तस्मै सामानि प्रायच्छत्तस्मादप्येतर्ह्येवमेवैतैर्वेदैर्यज्ञं तन्वते यज्ञुर्भिरेवाग्नेऽथऽग्निभिरथ सामभिरेवꣳ ह्यस्माऽएतत्प्रायच्छत् ॥५॥ तस्य यो योनिराशय आस । तमनुपरामृश्य संलुप्याहिनत्सैषेष्टिरभवत्तद्यदेतस्मिन्नाशये त्रिधातुरिवैषा विद्याशेत तस्मात्त्रेधातवी नाम ॥६॥ अथ यदैन्द्रावैष्णवꣳ हविर्भवति । इन्द्रो हि वज्रमुदयच्छद्विष्णुरन्वतिष्ठत ॥७॥ अथ यद्द्वादशकपालो भवति । द्वादश वै मासाः संवत्सरस्य संवत्सरसंमितैषेष्टिस्तस्माद्द्वादशकपालो भवति ॥८॥ तमुभयेषां व्रीहियवाणां गृह्णाति । व्रीहिमयमेवाग्ने पिण्डमधिश्रयति तद्यजुषाꣳ रूपमथ यवमयं तदृचाꣳ रूपमथ व्रीहिमयं तत्साम्नाꣳ रूप तदेतत्त्रय्यै विद्यायै रूपं क्रियते सैषा राजसूययाज्ञिन उदवसानीयेष्टिर्भवति ॥९॥ सर्वान्वाऽएष यज्ञक्रतूनवरुन्द्धे । सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते तस्य यातयामेव यज्ञो भवति सोऽस्मात्पराडिव भवत्येतावान्वै सर्वो यज्ञो यावानेष त्रयो वेदस्तस्यैतद्रूपं क्रियतऽएष योनिराशयस्तदेतेन त्रयेण वेदेन पुनर्यज्ञमारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥१०॥ सर्वान्वाऽएष यज्ञक्रतूनवरुन्द्धे । सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वाऽएषेष्टिर्यत्त्रेधातव्यनया मेऽपीष्टमसदनयापि सूयाऽइति तस्माद्वाऽएषा राजसूययाज्ञिन उदवसानीयेष्टिर्भवति ॥११॥ अथो यः सकृत्सं वा भूयो वा दद्यात् । तस्य ह्याप्युदवसानीया स्यादिरिचान इव वाऽएष भवति यः सकृत्सं वा भूयो वा ददात्येतद्वै सकृत्सं वाचः प्रज्ञातं यदेष त्रयो वेदस्तत्सकृत्सेण रिरिचानं पुनराप्याययति तस्माद्ध ह तस्याप्युदवसानीया स्यात् ॥१२॥ अथो ये दीर्घसत्त्रमासीरन् । संवत्सरं वा भूयो वा तेषाꣳ ह्याप्युदवसानीया स्यात्सर्वं वै तेषामाप्तं भवति सर्वं जितं ये दीर्घसत्त्रमासते संवत्सरं वा भूयो वा सर्वमेषा तस्माद्ध ह तेषामप्युदवसानीया

स्यात् ॥१३॥ अथो ह्रैनयाप्यभिचरेत् । एतया वै भद्रसेनमाजातशत्रवमारुणिरभिचचार क्षिप्रं किलास्तृणुतेति ह स्माह याज्ञवल्क्योऽपि ह वाऽएनयेन्द्रो वृत्रस्यास्थानमक्षिनदपि ह वाऽएनयास्थानं क्षिनत्ति य एनयाभिचरति तस्माद्ध ह्रैनयाप्यभिचरेत् ॥१४॥ अथो ह्रैनयापि भिषज्येत् । यं न्वेवैकयर्चा भिषज्येदेकेन यजुषैकेन साम्ना तं न्वेवागदं कुर्यात्किमु यं त्रयेण वेदेन तस्माद्ध ह्रैनयापि भिषज्येत् ॥१५॥ तस्यै त्रीणि शतमानानि हिरण्यानि दक्षिणा । तानि ब्रह्मणे ददाति न वै ब्रह्मा प्रचरति न स्तुते न शꣳसत्यथ स यशो न वै हिरण्येन किं चन कुर्वन्त्यथ तद्यशस्तस्मात्त्रीणि शतमानानि ब्रह्मणे ददाति ॥१६॥ तिस्रो धेनूर्होत्रे । भूमा वै तिस्रो धेनवो भूमा होता तस्मात्तिस्रो धेनूर्होत्रे ॥१७॥ त्रीणि वासाꣳस्यध्वर्यवे । तनुते वाऽअध्वर्युर्यज्ञं तन्वते वासाꣳसि तस्मात्त्रीणि वासाꣳस्यध्वर्यवे गामग्नीधे ॥१८॥ ता वाऽएताः । द्वादश वा त्रयोदश वा दक्षिणा भवन्ति द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरसंमितिषेष्टिस्तस्माद्द्वादश वा त्रयोदश वा दक्षिणा भवन्ति ॥१९॥ ब्राह्मणम् ॥ ७ [५. ५.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या१३१ ॥ पञ्चमोऽध्यायः [३५.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ४७१ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे सवनाम पञ्चमं काण्डं समाप्तम् ॥५॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYANÂCÂRYA.

काश्चित्संस्थाः समुदितास्तुर्येऽग्निष्टोमपूर्विकाः । काण्डे तु पञ्चमे वाजपेयः प्रस्तूयते ततः ॥ राजसूयः सम्पन्न(श्च) मन्त्राम्नानक्रमेण तु । प्रकृतावुपदिष्टत्वादङ्गज्ञातस्य नो वचः ॥ वैशेषिकास्तु वक्ष्यन्ते यज्ञद्वयगता गुणाः । व्याख्यायते तन्निपुणं ब्राह्मणं तद्विधायकम् ॥ तत्र वाजपेयं विधातुं प्रस्तौति देवाश्च वाऽइति ॥१॥ आजिमाजन्त अधावन् अज गतिक्षेपणयोः आजिर्नाम धावनप्रदेशस्यावधिर्भूमिविशेषः ॥३॥ यद्वाऽउत्तरत्र यूपारोहणं स्वो रोहावेति म-

त्रलिङ्गात्स्वर्गारोहणप्रतिनिधिवेन वक्ष्यते ततः स्वर्गनूपाशूपादवरोहणं ज्ञानश्रुतेयपूर्वकमित्यर्थः प्रत्यवरोहलिङ्गादनुमीयतऽइत्याह तथे हेति । अथवा वाजपेययाजिनोऽग्नेष्ट्वा (? °नो स्वा Cod.) साम्राज्येनाभिषिञ्चामीत्याद्यैर्मन्त्रलिङ्गैरन्याद्विसाम्राज्येऽभिषिक्तावादेव [°देव च देव Cod.] सोऽपि मनुष्यं प्रति गजादिवाहनान्न प्रत्यवरोहेदिति प्रत्यवरोहणनिषेधो विहितस्तैत्तिरीयके तस्माद्वाजपेययाजी न कं चन प्रत्यवरोहतीति न च प्रत्यवरोहणं विहितम् आपस्तम्बेन तु तन्निषेधस्तदुपायश्च दर्शितः यावज्जीवं न कं चन प्रत्यवरोहेदबृहस्पतिसवेन वा प्रत्यवरोहणीयेन यजेतेति तस्मादुभयत्रानुग्राहकमिदं ब्राह्मणमित्याह । ज्ञानश्रुतेः पुत्रेण श्रौपाविनाम्नैकेन राजर्षिणा प्रत्यवरूढं प्रत्यवरोहः कृतः भावे निष्ठा इतश्चानिज इति (पा° ४. १. १२२) ज्ञानश्रुतेः प्रत्ययः ॥५॥ तस्मान्तस्य यजमानस्य प्रजा पापीयसी अतिशयेन दारिद्र्यवती भवितोर्भवितुमीश्वरा समर्थेत्यतो हेतोर्वाजपेयो न कर्तव्यः ॥१॥ तत्र विदुष एव यष्टृत्वं विदुषामेव याजयितृत्वमित्युभयमुपपादयति य एवमेतमिति यः पुमानेतं वाजपेययज्ञमृगादिवेदत्रयेण स्रुग्घं सेतिकर्तव्यत्वेन विहित इति विद्यात् ज्ञानीयात् ये च प्रज्ञाश्रयः प्रज्ञातवन्तः साङ्गोपाङ्गकर्मज्ञानवन्तः ऋत्विजः तऽएनमन्वादिष्टं विद्वांसं यष्टारं याजयेयुः । अतः साधारणीर्वाजपेययागो न कर्तव्य इत्यभिप्रायेण न वाजपेयेन यजेतेत्युक्तम् ॥१०॥ संवृङ्क्ते संवर्जयति वशीकरोति ॥१४॥ आङ् मयादायाम् श्वःसुत्याया: सुत्यादिनात्पूर्वं नोत्तरत्रेत्यर्थः ॥१६॥१॥१॥

एवं विहिते वाजपेये ग्रहविशेषा द्वितीयब्राह्मणेऽभिधीयन्ते प्राकृतास्वतिदिश्यन्ते तत्र तावदंशुग्रहं विधत्ते अंशुमिति अंशुं सोमग्रहं सोमद्रव्येण गृह्णीयात् अंश्वदाभ्ययोरप्राकृतत्वेन चोदकादप्राप्तयोरिह विधानं युक्तम् अत एवापस्तम्बः भ्रातृव्यवतादाभ्यो ग्रहीतव्यो बुभूषतांशुस्तौ न सर्वत्र ग्रहीतव्यौ वाजपेये राजसूये सत्रे सह (?) इति । अथ प्रकृतिगतानुपांश्वन्तर्यामादीनतिदिशति अथैतानिति प्रज्ञातान्प्रसिद्धानाग्निष्टोमिकानग्निष्टोमे विहितान्ग्रहानाग्रयणपर्यन्तान्गृह्णीयात् उपांश्वन्तर्यामौ ऐन्द्रवायवमैत्रावरुणाश्विनान् शुक्रामन्थिनौ आग्रयणं च ॥१॥ पृष्ठ्यान् अतिग्राह्यान् ते हि पृष्टस्तोत्रसम्बन्धात्पृष्ठ्या इत्यर्थः पृष्ठ्ये (ष्ठ्य Cod.) षडहे प्रतिदिवसमेकैकस्य विश्वजिति सर्वपृष्ठे चैकाहे ग्रहणात्पृष्ठ्यसञ्ज्ञा see 8, 8, 5, 2-13. ॥२॥ उपयामगृहीतोऽसि पृथिव्यात्मकेन पात्रेण गृहीतोऽसि ते तव एष स्वप्रदेशो योनिः स्थानम् ॥8॥ अन्धसो अन्ने ॥१०॥ प्राकृतं सोमक्रयणविधिमनूद्य परिस्रुत्क्रयणं विधत्ते अथ यत्रेति यत्र प्रदेशे राजानं सोमलतां क्रीणीयात् तस्य दक्षिणे प्रतिवेशे स्थाने केशवात्पुरुषात्सोसद्रव्येण परिस्रुतं क्रीणीयात् लोके हि सुरा तत्साधनभूतैः (? सुतरांत्सा° Cod.) परिपक्वद्रव्यैः क्रियते अत्र तु (तु Cod.) सुरासाधनाय (°या: Cod.) पर्याप्तपरिपाकैः शष्पैर्निष्पन्नो (°के: शष्पो नि° Cod.) रसः परिस्रुदित्युच्यते । पुमान् पुंलक्षणवान् श्मश्रुयुक्तः । केशबाङ्ग्ल्यवत्त्वेन पुमांश्च न भवति केशबाङ्ग्ल्यं तु स्त्रीलक्षणम् अतः केशवः क्लीवः पुरुषः स्त्रिया अधिकः पुरुषान्न्यूनः । सोसमप्ययसोऽधिकं हिरण्यात्तु न्यूनम् ॥१४॥ पुरोऽक्षं शकटस्याधस्तादक्षस्य पुरोभागे एकम् पश्चादक्षमक्षस्य पश्चाद्भागे अपरम् ॥१५॥ नेष्टा नाम ऋत्विग्ध्वर्युवर्गे तृतीयः । प्रपादयति [हविर्धानं] प्रवेशयेत् । हविर्धानस्य दक्षिणतो द्वारं कृत्वा तेन सोमग्रहपात्राणि सुराग्रहपात्राणि च प्रवेशयति । व्यत्यासं व्यत्यस्य व्यत्यस्य ॥१६॥ अक्षस्य

पश्चाद्भागं प्रति सोमग्रहमध्वर्युर्नातिक्रामयेत् एवं नेष्टापि सुराग्रहं शकटाक्षस्य पुरोदेशं नातिहरेत् ॥१७॥ उपर्युपर्येवाक्षमक्षस्य संनिकृष्टोपरिभागऽएव see पा° ८. १. ७. । यथा मुञ्जतृणादिषीकां मध्यवर्तिं तृणं विवृहेत्पृथक्कुर्यात् ॥१८॥ अथ प्राकृतावुक्थ्यध्रुवग्रहौ दर्शयति अथोक्थ्यमिति । द्विविधग्रहाणां होमकालं भक्षणं च विधत्ते अथैतानिति तान्प्रातःसवने गृहीतान्सोमग्रहानुत्तमे स्तोत्रे तृतीयसवने बृहत्स्तोत्रे वाजपेयसंस्थापननिमित्ते स्तुते सति ऋत्विक्चमसेष्ववनयनं कृत्वा भुञ्जयुः भक्षयेयुश्च तत्प्रसङ्गात्सुराग्रहाणां मधुग्रहस्य (च) माध्यन्दिनसवनमध्ये विनियोगो भविष्यतीत्याह अथ माध्यन्दिनऽइति उद्यतऽइति वद व्यक्तायां वाचि कर्मणि यकि सम्प्रसारणम् एतेषां होमस्तावत्तद्विनियोगप्रकारोऽस्मिन्नेवाध्याये (५. २८.) वक्ष्यतऽइत्यर्थः । अतः सोमग्रहहोमभक्षणप्रतिपादनानन्तरं तस्याम्नातस्य सुराग्रहविनियोगप्रतिपादकवाक्यस्य पाठानुसंधानं कार्यम् ॥१६॥२॥१॥

तृतीये पशुतन्त्रमभिधीयते तत्र तावद्वाजपेयस्याग्निष्टोमोक्थ्यषोडश्यतिरात्रसंस्थालक्षणसद्भावेन सर्वक्रतुविरोधकत्वमस्तीति वैदिकत्वप्रसिद्धिः तत्तत्क्रतुसाधारणपशुसद्भावे सत्युपपद्यते नान्यथा अतस्तानग्निष्टोमादिगतानाग्नेयादिसवनीयपशून्विधत्ते आग्नेयमिति । तत्राग्निष्टोमस्य द्वादश स्तोत्रशस्त्राणि उक्थ्यस्य (उक्थ Cod.) उक्थत्रयेण पञ्चदश षोडशिनः षोडशिस्तोत्रेण सह षोडश वाजपेयस्य बृहत्स्तोत्रेण सह सप्तदश अतिरात्रपर्यायत्रयेण सह षोडशिपक्षे एकोनत्रिंशत् अन्यदा अष्टाविंशतिः पशूनाम् तत्तत्क्रतुसाधारण्यं द्योतयितुमग्निष्टोमादिपदाभिधानम् अग्निः स्तूयतेऽस्मिन्नित्यग्निष्टोमो नाम साम तस्मिन्विषयभूते आग्नेयमालभते एतेन पशुनास्मिन्वाजपेये अग्निष्टोमसंस्थं क्रतुमेवानुष्ठितवान्भवतीत्यर्थः एवमुत्तरत्रापि योज्यम् । उक्थेभ्यः (उक्थ्ये° Cod.) तृतीयसवने स्तूयमानेभ्योऽन्येभ्यस्त्रिभ्य उक्थ्यस्तोत्रेभ्यः । षोडशिस्तोत्राय ॥१॥ सप्तदशसंख्यापूरकाय बृहत्स्तोत्राय अत्रिममिदं बृहत्स्तोत्रं वाजपेयस्यासाधारणं लिङ्गम् । कथं वाजपेयेऽतिरात्रान्तर्भाव इत्याशङ्क्यानेन सारस्वतालम्भनेनातिरात्रस्यान्तर्भावं दर्शयति तदेतदिति ॥२॥ अथास्य यज्ञस्यासाधारणं पशुं विधत्ते अथ मरुद्भ्य इति । उर्वेदे लब्धुमशक्ये ॥३॥ आवृत् तन्त्रम् अनुशंसति अनुशंसितवान्भवतीति भूतार्थपरत्वेन व्याख्येयम् एष वै इन्द्रस्यासाधारणो ग्रहः ग्रहणमन्त्रे केवलेन्द्रस्यैव देवतात्वेन प्रतिपादनात् निःशेषेण केवलमिन्द्रस्यैवायमिति निष्केवल्यो ग्रहः माध्यन्दिने सवने हि माहेन्द्रग्रहग्रहणम् तच्च सवनमिन्द्रस्येति नियतम् ॥४॥ पञ्चवदानानामथैकध्येन अपणं सिद्धान्तयितुं द्वैध्यं (द्वैविध्यं Cod.) पूर्वपक्षयति द्वेधावदानानि अपयन्तीति कात्यायनस्तु उक्तं वपाप्रचरणमवदानानां द्वेधा अपणं च विकल्पेन सूत्रयामास (का° १४, २, १६, २१-२३.) । हृदयं जिह्वा वक्षो यकृद्वृक्कौ सव्यो (°त्या Cod.) दोरुभे पार्श्वे दक्षिणा श्रोणिर्गुदतृतीयमिति दैवतानि दक्षिणो (°णं Cod.) दोः सव्या श्रोणिः गुदतृतीयमिति सौविष्टकृतानीत्येतानि सर्वाण्यवदानानि द्विधा (!) पृथक् अपयन्ति पक्षानि कुर्युः दैवतानां हृदयादीनां सौविष्टकृतानां त्र्यङ्गानां च पृथक् अपणमित्यर्थः । हविषामवदानप्रकारमाह ततोऽर्धानामिति अथ भुक्त्वामाज्येनोपस्तरणं कृत्वा अर्धानां प्रधानहविषां हृदयादीनां मध्ये एकैकस्माद्द्विर्द्विरवद्येत् एवमेकादशावदानान्यवदाय पुनराज्येनैकवारमभिघारणं कुर्यात् एवमुपस्तरणाद्विरवदानपुनरभिघारणैर्हविषां चतुरवत्तत्वं सम्पादितम् अनन्तरं

स्विष्टकृदर्थान्यवदानानि घृतेन प्रत्यञ्च्यात् अथोपभृतीति वाक्यं स्पष्टार्थम् अत्र उपस्तरणावदाने सकृत्सकृद्द्विरभिधारणमिति चतुरवदानसम्पत्तिः अपात्रस्थितानि अवत्तशेषाणि न प्रत्यञ्च्याद्उत्तरत्र विनियोगाभावात् अर्धानां हृदयादीनां प्रत्येकं देवतार्थं स्विष्टकृदर्थं च द्विरवद्यतीति यत् तेन द्विरवदानेन सा वशा कृत्स्ना सम्पूर्णा भवति यथेतरः पशुस्तथेत्यर्थः । अथार्धानीति यागार्थार्धहविषः पृथक्पक्वानि त्र्यङ्गानि मनुष्यसम्बन्धिन्यै प्रजायै ददाति ॥५॥ तदिदं माहेन्द्रात्ते वपाचरणं हविषां द्विधा (!) अपणं च दूषयति तदु तथेति । अथ प्राकृतपशुवपाप्रचरणकाले [=प्रातःसवने] मारुतीवपाप्रचरणं हविषामैकध्येन अपणं च विधत्ते तस्माद्यत्रैवेत्यादिना ॥६॥ पञ्चत्तराणि विधत्ते अथ सप्तदशेति । तूपरा अविषाणाः । श्यामाः शुक्लकृष्णवर्णाः । मुष्कराः मुष्कवृद्धिः सर्वाङ्गवृद्धिमत्त्वेन न घटतऽइति पुष्टाङ्गाः ॥७॥ न हि प्रजापतेः परमुत्कृष्टं पूर्वभावि किंचिदप्यस्ति यदर्थं पशुरालभ्यते यद्यस्ति वागेवास्ति तस्या अव्यक्तशब्दब्रह्मत्वेन पूर्वमवस्थानादिति भावः ॥११॥ उक्तानां प्राजापत्यपशूनां वपाप्रचरणस्य हविर्यागस्य च प्राकृतपशुवपाहविर्भिः सह होमकालं विधास्यति तत्र तावत्पूर्वपक्षमाह तेषामावृद्यत्रेति । वामदेव्यं सामानुशंसति अनुशंसितवान्भवति ॥१२॥ तृतीयसवने अनुयाजयागानन्तरं स्रुक्प्रभृतेर्व्यूहनादर्वागेषां प्राजापत्यानां हविर्यागः कर्तव्यः स एव कालोऽस्तः सवनीये कर्तव्यानां यागानामवधिः प्रजापतेः सर्वोत्तमत्वादत्तत्वम् (सर्वोक्तम° Cod.) तस्मादत्तरूपे तस्मिन्काले क्रियमाणेन हविर्होमेन प्रजापतिमेवोऽऽप्नोतवान्भवति । यत् यदि उक्तकालात्पुरा प्राकृतऽएव काले वपाहविर्भिः प्रचरेत् तर्हि मध्य (ब्राध्य Cod.) ऽएव प्रजापतिप्राप्तेरुत्तरकर्मकलापकरणमयुक्तमितीममर्थं प्रदर्शयितुं दृष्टान्तः यथायमिति यथा लोके पुरुषो यं मार्गं गमिष्यन्भवेत्तं लक्ष्यं देशं प्राप्य क्व कुत्र गच्छति लक्ष्यप्राप्तेः सिद्धत्वात् (?सद्यन्त्वात् Cod.) एवमेतत्काले होमकरणफलरूपप्रजापतिप्राप्तेः (°णं°-तिंप्राप्तेः Cod.) सिद्धत्वादुपरितनकर्मानुष्ठानं निःफलं स्यात् तस्मादनुयाजान्ते स्रुग्व्यूहनात्प्राक्पशुहविर्होम इति केषांचिन्मतम् ॥१३॥ तदूदूषयन्सिद्धान्तयति तदु तथेति । एतेषां पशूनां सप्तदशयागात्मकत्वात्प्रतियागं याज्यापुरोऽनुवाक्याभेदमाशङ्क्य देवतैक्यात्सह प्रदानमिति मन्वानो याज्यापुरोऽनुवाक्ययोरैक्यमाह एकानुवाक्येति । अनुवाक्यापाठात्प्रागध्वर्युणा कर्तव्ये ऽनुवचनप्रैषे विशेषं विधत्ते प्रजापतयऽइति । हे मैत्रावरुण प्रजापतये देवतायै छागानां पशूनां हविषोऽवदीयमानस्यार्थाय अनुवचनं कुरु । आश्रावणानन्तरकर्तव्यप्रैषेऽपि विशेषं विधत्ते प्रजापतयऽइति अत्रापि मैत्रावरुणः सम्बोध्यः । अथ होतुः कर्तव्यं दर्शयति वषट्कृतमिति होत्रा याज्यान्ते वषट्कारे कृते सति जुहोति अध्वर्युरिति शेषः ॥१४॥३॥१॥

अथ माध्यन्दिनसवने कर्तव्यः प्रयोगोऽभिधीयते तत्र यज्ञमानाभिषेकमाग्निधावनं(च) प्राधान्येन विधत्ते तं वाऽइति ॥१॥ माहेन्द्रग्रहात्पूर्वम् ॥२॥ पूर्वं रथवाहने काष्ठविशेषे स्थापितमाग्निधावनाय सज्जीकर्तुं तस्य रथस्य तस्मात्काष्ठादवहरणं समन्त्रकं विधत्ते अथ रथमिति ॥३॥ धूरित्यश्वबन्धनस्थानं युगम् । अन्तर्वेदि सौमिकवेदिमध्ये प्रादक्षिण्येनानयेत् ॥४॥ उदच्य उद्यम्य ॥५॥ कक्कान् (!) कक्कब्देन वृषभस्कन्धे उन्नतप्रदेश उच्यते तत्समानैरुदकनिचयैस्तद्वान् । सेत् सिनुयात्साधयतु वेति ॥६॥ दक्षिणा दक्षिणतो युग्यं युगस्य वोढारम् । सव्यायुग्यं सव्यभागयोढनीयम् दीर्घस्छन्दसः ॥७॥ गन्धर्वाः नक्षत्राणीत्यर्थः

॥८॥ इन्द्रस्याश्व-इव दक्षिणः प्रवृद्धः पुष्टाङ्गः श्रिया शोभया युक्त एधि भव । प्रष्टिर्नाम पादत्रयोपेतो भोजनपात्रादिकाधारः (°दिवाधारः Cod.) तद्वदश्वैस्त्रिभिर्युक्तं रथं कुर्यात् अत्र पूर्वमश्वद्वयस्य युक्तत्वात्तृतीयस्य प्रष्टित्वमुक्तम् ॥१॥ चतुर्थस्याश्वस्यानुगमनं विधत्ते अधिप्रष्टीति तृतीयस्याश्वस्य युगप्रदेशे अधिः सप्तम्यर्था वुवादीमत्रेणायुक्तः (ग्रीवादिबध्नेणायुक्तः?) सन्नेवानुगच्छेत् । यदैष यज्ञुर्युक्तो रथोऽध्वर्यवे दीयते तस्मिन्प्रदानसमये चतुर्थस्य रथयोजनं दर्शयति तं यत्रेति ॥१२॥४॥१॥

विहितमाग्निधावनमनूद्य प्रशंसति तद्यदाग्निमिति । नाभिदघ्ने नाभिमात्रे उद्यिते उन्नते ॥१॥ सप्तदशदुन्दुभीननुवेद्यन्तं वेदिसमीपे प्रतीचः आग्नीध्रीयपश्चिमप्रदेशे स्थितान्संमिन्वन्ति वादयितुमाबध्नन्ति (वेद° Cod.) ॥६॥ संवाक् समुदिता वाक् ॥११॥ प्रव्याधान् प्रकर्षेण बलाधिक्येन विमुक्तो वाणो (षानाणो Cod.) यावति देशे लक्ष्यं विध्यति तावानेकः प्रव्याधः । तिर्यङ् स्थौल्येन विस्तारवान् अन्वङ् आयामवान् ॥१३॥ राजन्योऽपि निय इत्यक्षरविश्लेषाच्चतुरक्षरः ॥१४॥ अदः अमुष्मिन्विप्रकृष्टे काले ॥१६॥ अथ यजमानस्य रथारोहणानन्तरमध्वर्युशिष्यो वा अन्यो ब्रह्मचारी वा एतत् वक्ष्यमाणं मन्त्रमधीयात्स्मरेत् स तमेव रथमन्वास्थाय तूष्णीमारुह्य वाजिन इति मन्त्रं वाचयति यजमानमिति शेषः । काष्ठामाग्निधावनस्यावधिभूतां सप्तदशप्रव्याधान्ते निर्मितामौदुम्बरीं शाखां लक्ष्यभूतस्वर्गात्मिकां स्वर्गो वै लोकः काष्ठेति श्रुतेः वेगेन गच्छत ॥१७॥ प्रत्युपतिष्ठते आग्निधावनं कृत्वा तीर्थदेशं प्रत्यागच्छतोऽश्वान्प्रति नैवारचरणा सह गच्छेत् ॥२५॥ सुराग्रहाणां मधुग्रहस्य च विनियोगप्रकारो माध्यन्दिने सवने वक्ष्यतऽइति द्वितीयब्राह्मणे (२. १३.) प्रतिज्ञातम् तमिदानीमवसरप्राप्तं दर्शयितुमाह अथैतेषामिति । आग्निं प्रति सरिष्यतां रथानां यजमानरथव्यतिरिक्तानामेकस्मिन्रथे वैश्यराजन्ययोरन्यतरः सुराग्रहान्प्रतिग्रहीतुमासीनो भवति स रथादवरुह्योत्तरस्यां श्रोणावुपविशेत् । हविर्धानस्य पूर्वद्वारेण । शालां हनघनेन पत्नीशालायाः पश्चिमप्रदेशादागत्योत्तरस्यां वेदिश्रोणावुपविश्य उक्तयोरन्यतरस्य पाणावेकं सुराग्रहं प्रयच्छन् । इमं मधुग्रहम् । सुराग्रहप्रतिग्रहीतारं वैश्यं विध्यति बाधते । प्रतिगृहीतानां तु सुराग्रहाणामैक्किकव्यवहारं दर्शयति तैः स यं भागमिति । ब्रह्मप्रतिगृहीतस्य मधुग्रहस्य च स यमिति ॥२८॥५॥१॥

अथ यूपारोहणमुच्यते । तत्र प्रथममाग्निहोत्रं विधित्सुराह अथ स्रुवमिति आज्यं विलाप्यते अस्यामित्याज्यविलापनी स्थाली स्रुववचनं हुङ्कपभृन्निवृत्त्यर्थम् । आपये स्वाहेत्याग्निलिङ्गसमवायात् प्राणभृत उपदधातीतिवदाहृत्यनाग्निसमुदाये आग्निशब्दः ॥१॥ संवत्सरस्य यज्ञात्मप्रज्ञापतेरेतानि नामानि ॥२॥ क्लृपिधातुनिष्पन्नशब्दयुक्तमन्त्रकरणिका आज्ञप्तीः ॥३॥ वेष्टितः यथा यूपो न दृश्यते तदाच्छादनं वा कार्यम् विग्रथितः यूपस्यैकत्र प्रदेशे वाससां ग्रन्थनं वा कार्यम् ॥५॥ दारुमयवापवादाय गौधूममिति गोधूमपिष्टमयम् । अवक्त अश्वत्थादिवृक्ष-इव बाह्यवग्रहितः ॥६॥ यूपस्याग्रे निम्नप्रदेशः कार्यः । गर्तवान् अनो नुडिति (पा° ८. २. १६.) अत्रत्वात्परस्य मतुपो नुडागमो विहितः व्यत्ययेनाकारात्तादपि भवति । अतीक्ष्णाग्रः अतनूकृताग्रः स्थूलाग्रप्रदेशः । चतुर्विंशत्यङ्गुलपरिमितोऽरत्निः ॥७॥ उदानेष्यन् शालातो निर्गमयिष्यन् । कौशं कुशमयं दर्भमयं वासः अत्रापस्तम्बः क्षत्रस्य योनिरसीति दर्भमयं पत्नीमिति श्रुतिश्च भवति दर्भमयं परिधापयतीति यद्वा क्रिमिकोशविकारभूतं वा-

सः तेन परित आच्छादयेत् । यद्वा कौशं कुशमयं (? यद्वा कौशमयं Cod.) चण्डातकं चलनमुच्यते एवं च्यभियुक्तोपदेशः अर्धोरुकं विलासिन्या वासश्चण्डातकं स्मृतमिति नृत्तोपायिकत्वेनाच्छादनीयमूरुकञ्चुकमर्धोरुकं (नृत्तोपयिक° Cod.) वासः (see अमर° २. ६. ११३.) । वसनस्य प्रदेशं विधत्ते अन्तरमिति दीक्षाकाले यद्वस्त्रं परिहितं तस्माद्बहिःप्रदेशे इत्यर्थः अन्तरशब्दो बहिर्योगे वर्तते । दर्भैरेव वासः कर्तव्यमित्यत्रोपपत्तिं दर्शयति ज्ञघनार्ध इत्यादिना पूर्वदेशस्थाहवनीयसाध्यत्वाद्यज्ञः प्राच्यां दिश्यवस्थितः तस्य यज्ञस्य पश्चिमभागे पत्नी यज्ञस्य ज्ञघनार्ध इति निरूप्यते तां पत्नीमेतर्हि प्राचीं प्राङ्मुखां पूर्वदिगवस्थितं यज्ञं प्रापयिष्यन्भवति तदुपायत्वेन दर्भमयवासःपरिधापनस्य मेध्यत्वापादकत्वमाह अस्ति वाऽइति ॥ ८ ॥ अथ निश्रेणीमिति निश्रेणी (!) यूपारोहणार्थं सोपानसदृशः काष्ठनिर्मितपदार्थः । निश्रयति यूपे निदध्यात् । तुशब्दः पक्षान्तरव्यावृत्त्यर्थः तथा हि एवं कृते सति उदग्भवति कर्मण उदगयवर्गता सिध्यति ॥ १ ॥ शिरसा यूपमत्युद्गृह्णीते अतिक्रम्योद्गमयति यूपं शिरसा स्पृशन् तमतिक्रम्य स्वशिर उन्नमयेत् ॥ १४ ॥ ऊषपुटैः ऊषक्षेत्रपांसव ऊषाः तानश्वत्थपत्रैः पुटीकृत्य तैः पुटैः यूपेऽवस्थितं यज्ञमानमभिलक्ष्योदस्यन्ति ऊर्ध्वान्प्रतिदिशं प्रक्षिपेयुः । अतः पशुद्वारा ऊषाणामन्नत्वादूषपुटहननेन यज्ञमानेऽन्नमेव निहितवान्भवति ॥ १६ ॥ उपनद्धाः सम्बद्धाः । अश्वत्थेऽवस्थितान्मरुतः ॥ १७ ॥ अवदृणीयादवदारयेत् अवधून्वीत विचालयेत् ॥ १८ ॥ हिरण्यमभिलक्ष्य यूपादवरोहेत् ॥ २० ॥ यो यूपारोहणेनान्तरिक्षसद्यमाकाशे उपवेशनं ज्ञयति ॥ २२ ॥ हविर्धाने इति द्वितीयाद्विवचनान्तं पदम् ते अग्रेण तयोरग्रप्रदेशम् ॥ २३ ॥ आसन्या अज्ञाजिनेनाच्छादनं विधत्ते अथेति । विज्ञायमानाः सुवानाः ॥ २४ ॥ १ ॥ २ ॥

नैवारचरुप्रचारं विधत्ते बार्हस्पत्येनेति । प्रधाननैवाराङ्गतेरनन्तरं कर्तव्यं वाज्ञप्रसवीयहोमं विधातुं कालं विधत्ते तस्यानिष्ट इति तस्य नैवारस्य स्विष्टकृदनिष्टः अकृतो (°ष्टं अकृतो Cod.) भवति प्रधानयागादूर्ध्वं स्विष्टकृतः प्रागित्यर्थः । होमार्थमन्त्रसम्भरणं विधत्ते अथास्माऽइति अस्मै यज्ञमानाय तदभिषेकार्थमन्त्रं सम्भरेत् ॥ १ ॥ यथोपस्मारमुपस्मृतिमनतिक्रम्य यानि तदा स्मृतिपथमवतरन्ति तानि । तत्र ग्राम्यारण्यभेदेन चतुर्दशान्नान्यापस्तम्बेन सूत्रितानि तान्यपि यथोपस्मारपदेन ग्राह्याणि तिलमाषा व्रीहियवाः प्रियङ्गवणवो गोधूमा वेणुः श्यामाकनीवाराः ज्ञर्तिलाश्च (लश्च Cod.) गवीधुका आरण्या (?) मर्कटका विज्ञेया गार्मुतसप्तमा (?) कुलत्थसप्तमा वेति ब्रुवन्ति स्थानि यानि वा तानि सम्भरेत् यथोपस्मारमन्त्राणि सम्बिभृयादित्यत्र संख्याया अनुक्तेर्यावन्ति स्मर्यमाणानि तावन्ति सम्भरेदित्यर्थो भवति ॥ २ ॥ संख्याविशेषं पूर्वपक्षयति तत्रैकऽइति । ब्रुवन्तिस्थानामपि सर्वेषां सम्भरणे प्राप्ते एकस्य निषेधति एकमन्त्रमिति ॥ ३ ॥ यदत्र न सम्भरेत्तस्य उदब्रुवीत (°वी Cod.) न सम्भृतमित्युच्चैस्तन्नाम ब्रूयात् । मिलितस्य सर्वस्यान्नाद्यस्यैकदेशं स्रुवेणोपघातमुपहत्योपहत्य गृहीत्वा वाज्ञप्रसवशब्दयुक्तमन्त्रकरणकहोमान्कुर्यात् ॥ ४ ॥ यन्त्रे (!) नियमे अभ्यनुज्ञायाम् ॥ १३ ॥ अत्र तु सारस्वत्यै वाच इत्यस्य स्थाने सारस्वत्यै वा वाच इति युष्मच्छब्दं प्रक्षिप्य प्रयोक्तव्यमिति विधातुं पूर्वपक्षं सोपपत्तिकमुद्भावयति तदु हैकऽइति ॥ १४ ॥ उज्ज्ञयलिङ्गयुक्तमन्त्रकारणिका आज्ञतय उज्ज्ञितयः ॥ १६ ॥ अत्राग्नेरोकाक्षोणेति प्रज्ञापतिः सप्तदशाक्षोणेत्याद्यन्तयोर्ग्रहणेन सर्वेऽपि [सप्तदश मन्त्राः] गृह्यन्ते । तेषां संग्रहेणायमर्थः श्रोश्रावयेति चतुरक्षरम् अस्तु

श्रौषडिति चतुरक्षरम् यजेति द्व्यक्षरम् ये यजामहऽइति पञ्चाक्षरम् द्व्यक्षरो वषट्कारः स एष सप्तदशः प्रजापतिरिति (see १, ५, २, १६. १७.) सप्तदशाक्षराणि विद्यन्ते तत्राग्न्यादिसप्तदशदेवाः एकाक्षरप्रभृत्येकैकाक्षरवृद्धियुक्तैः प्राणमनुष्यादीन्जितवन्तः ॥ १७॥ नैवारहविषः प्रधानस्विष्टकृतोर्मध्येऽनुष्ठेयं कर्मजातमुपदर्श्य चोदकप्राप्तं स्विष्टकृत्यागादिकमनुसंधत्ते अथाहेत्यादि । अनुब्रूहि अनुवाक्यां पठेति सम्बोध्यो होता । नैवारहविःस्विष्टकृदाज्ञत्योर्मध्ये क्रियमाणेनान्नसम्भरणवाजप्रसवीयहोमादिना यज्ञरूपं प्रजापतिं जितवान्भवति । अनुवचनानन्तरमाश्रावणादिकं प्रकृतिवत्स्विष्टकृतः कार्यमित्यनुक्रामति आश्राव्येति वषट्कृते होत्रा याज्यान्ते वषट्कारे प्रयुक्ते सति जुहोति सैविष्टकृतं हविः ॥ १८॥ माहेन्द्रग्रहानन्तरं तदीयं पृष्टस्तोत्रमुपाकरोति आरम्भयेत् । तमासन्न्यामधिष्ठितमभिषिक्तं यजमानं स्तोत्राय प्रमीवति ज्ञापयेत् आह्वयेत् । स सुन्वन्नुपावरोहति आसन्न्याः सकाशात् स एवं स्तोत्रशस्त्रयोरन्ते समीपस्थितो भवेत् ॥ १९॥ अत्र केचिदुद्गातिवाचनानन्तरं माहेन्द्रग्रहणं स्तोत्रशस्त्रे च कृत्वा स्विष्टकृदादिकं यजमानस्य पश्चादवरोहणमिच्छन्ति तद्दूषयितुमनुवदति तद्यैकऽइति एतत् माहेन्द्रग्रहणादिहोमान्तं तत्कर्म कृत्वा अथानन्तरं तदुक्तं स्विष्टकृदिडोपह्वानान्तं कर्म कुर्वन्ति तद्दूषयति तदु तथेति यद्यासन्न्यामासीनऽएव यजमाने सत्येव आत्मप्रज्ञारूपे स्तोत्रशस्त्रे कुर्यात् तर्हि यजमानमात्मप्रज्ञाहीनं कुर्यात् असांनिध्यकारणेनेत्यर्थः (असान्निध्य° Cod.) ॥ २०॥ अत उक्त एव पक्षः श्रेयानिति दर्शयितुं पुनः पठति अथेडामिति ॥ २१ ॥ २ ॥ २ ॥ ॥

ब्राह्मणक्षत्रियोभयकर्तृकसंस्थारूपो वा (?) वाजपेय उक्तः अथैकतरकर्तृको विकृतिभूतो राजसूयो विधास्यते । तत्राकृतवाजपेयस्य राजन्यस्यैव राजसूयेऽधिकारः न तु तेनेष्टवतः राज्यफलादपि साम्राज्यफलस्यातिशयितत्वेनोत्तमफलसाधनयागानन्तरमवरफलहेतुक्रतुकरणस्यायुक्तत्वात् । इष्टिपशुसोमदर्विहोमैः शतप्रधानो (?) राजसूयः तत्र श्वो भूतेऽनुमत्यै पुरोडाशमष्टाकपालमित्यादिना (२. ३. २) विहिता इष्टयः अथ श्येनीं विचित्रगर्भामदित्या ऽआलभत इत्यादिना (५. २. ८) विहिताः पशवः पवित्राभिषेचनीयदशपेयकेशवपनीयव्युष्टिद्विरात्रवत्रधृतिसंज्ञकाः सप्त सोमयागाः पञ्चवातीयादयो (२. ४. ४) दर्विहोमाः । तत्र पवित्रनामके प्रथमसोमयागे प्रवृत्तिसमानत्वेन वक्तव्याभावात्तं परित्यज्य तदवसाने कर्तव्यं तत्र (? तत्र Cod.) पूर्णाज्ञप्तिप्रभृति वैशेषिकमुत्तरतन्त्रमभिधीयते । पूर्णाज्ञप्तेः कालं कात्यायनः सूत्रयामास (१५, १, ४-७) पवित्रश्चतुर्दीक्षः सहस्रदक्षिणो माघीपक्षयजनीये दीक्षा तदन्ते पूर्णाज्ञप्तिर्गर्हेष्विक्त इति तद्विधत्ते पूर्णाज्ञप्तिमिति आज्यपूर्णया जुह्वा ह्रियतऽइति पूर्णाज्ञप्तिः सा अनाम्नातमन्त्रत्वात्प्राजापत्या यन्नूष्णीं तत्प्राजापत्यमिति श्रुतेः । सूये अभिषिक्तो भूयासम् ॥ १॥ आरम्भणीयस्थानीयात्पवित्राख्यादग्निष्टोमादङ्गः परस्मिन्नहनि कर्तव्यं विधत्ते अथ श्व इति । यागानुष्ठानस्याधारत्वेनानुज्ञाकरणादनुमतिः पृथिवी । दृषदमभ्याधातुमधः स्थापितायाः शम्यायाः पश्चाद्ये तण्डुलपिष्टलेशा अवशीयन्ते अधः पतन्ति । इरिणमूषरक्षेत्रम् । श्वभ्रप्रदरे गर्ताकारणे (°रे ?) विदीर्णप्रदेशे ॥ २॥ भूमिर्द्विविधा शालिगोधूमादिसर्वसस्याढ्या तदयोग्या च तत्राद्यभूमिरूपानुमतिः द्वितीयभूमिरूपा निर्ऋतिः सैवानिष्टकारिणी पापदेवता ॥ ३॥ यथा लोके पुरुषो वस्त्रसहितः सन्नरण्यगमनं चोरादिभयान्न कामयते तद्वस्त्रं भयरहिते स्थाने निधाय चेद्गच्छति तदा अतिमुच्यते भयाद्विमुक्तो भवति तद्वद्वासोदानेन सूयमानमेनं यजमा-

[नमा]सङ्गो भयं न प्राप्नोति ॥५॥ तं यथेष्टीति प्रकृतोष्टिवदेवैषेष्टिः (प्राकृतोष्टि° Cod.) कार्या तेनानुमतोष्टिवत्तन्मध्ये वैकृतं तन्त्रं किंचिदपि न विद्यतऽइति भावः तद्यदेवेति अदः अमुष्मिन्विप्रकृष्टे सोमप्रकरणे प्रज्ञातं दीक्षणीयं दीक्षायां निरूप्तमाग्नावैष्णवं हविः तदेवेदानीं निरूप्यमाणं हविरिति तत्तादात्म्येन प्रशंसा । अवरार्ध्यः आदौ स्थितः परार्ध्यः यज्ञस्य चरमभागेऽवस्थितः ॥६॥ यथेष्टीति सर्वेष्टीनां पौर्णमासेष्टिः प्रकृतिभूता तद्वदत्रापि तदीयमङ्गज्ञातं कुर्यात् । उत्सृष्टो गौरिति कियत्तं कालं शकटवहनादौ विनियोज्य पश्चाद्य उत्सृज्यते स उत्सृष्टः । अमुमन्तरिक्षे दृश्यमानं चन्द्रमसमुत्सर्जमुत्सृज्योत्सृज्य घ्नन्ति पौर्णमासीं खल्वारभ्य देवाः घ्नन्ति प्रतिदिनमेकैककलापकार एव तस्य हननम् अमावास्याकालमारभ्योत्सृजन्ति प्रतिदिनं तस्यैकैककलावृद्धेः तस्मादस्य हविषः सोमदेवतासम्बन्धादेतादृशो गौर्दक्षिणात्वेन युक्ताः ॥७॥ वहं नाम युगवहनदेशः ककुत्प्रदेशः । आण्डाभ्यामैन्द्रः सेचनसमर्थत्वात् ॥८॥ इष्टिपशुसोमदर्विहोमात्मकत्वाद्राजसूयस्य तदनुष्ठानेन यज्ञक्रतवोऽप्यादयः सर्वेऽनुष्ठिता भवन्ति आग्रयणेष्टिरपि देवसृष्टत्वेन प्रशस्तत्वादत्रावरोद्धव्या ॥९॥ चातुर्मास्याख्यो यज्ञक्रतुरप्यवरोद्धव्य इत्यनेनाभिप्रायेण तदनुष्ठानम् ॥१०॥३॥२॥

एव चातुर्मास्यानि सामान्येन विधाय वैश्वदेवाख्यं प्रथमं पर्व विधत्ते वैश्वदेवेनेति । भूमानं भूयसीः प्रज्ञाः ॥१॥ प्रुनो वायुः सोर आदित्यः । उभौ रसाविति see २, ६, ३. ४. । प्रुनासीरीयप्रयोगकालः सूत्रितः [का° १५. १. १९.] पवित्रदीक्षास्थाने प्रुनासीरीयमिति पवित्राख्यस्य सोमयागस्य (°गत Cod.) संवत्सरे यस्यां तिथौ दीक्षा कृता तस्यां फाल्गुनशुक्लप्रतिपदि चतुर्थं पर्व कार्यम् अर्थात्पवित्रप्रुनासीर्ययोर्मध्ये वैश्वदेवादीनि त्रीणि पर्वाणि क्रमेण चतुर्षु मासेषु कार्याणि । आहवनीयमग्निं पञ्चधा व्युह्य प्रतिदिशं मध्ये च पृथक् कृत्वा आज्यस्थाल्याः स्रुवेणोपघातमुपहत्योपहत्य गृहीत्वा जुहोति ॥४॥ तत्र पूर्वादिक्रमेण पञ्चस्वग्निषु समन्त्रकं हवनं विधत्ते स पूर्वार्ध्यऽइति पूर्वार्धे भवः पूर्वार्ध्योऽग्निः ॥५॥ उत्पिबन्ते उत्कटं पिबन्ति प्राणिनो भक्षयन्ति ॥७॥ क्षणवन्ति हिंसन्ति क्षणु हिंसायाम् विवृहन्ति विश्लेषयन्ति ॥८॥ रथस्य सव्यभागे तिष्ठन्नेकः सारथिश्चैक इति द्वौ ॥९॥ आरोग्यकामस्यापीमं होमं विधत्ते स हैतेनेति । यस्तु गतासुरिव भवति तमप्यनेन होमेनाहरत्येव पुनर्जीवयत्येव ॥१०॥ इन्द्रस्तुरीयश्चतुर्थहविर्देवता यस्मिन्कर्मणि तदिन्द्रतुरीयम् । गवीधुका (!) आरण्यगोधूमाः । वहलायै वहं नाम ककुत्प्रदेशः तद्वत्यै षष्ठ्यर्थे चतुर्थी ॥११॥ वरुणो रुद्रश्चोभावप्यग्नेव तथाच तैत्तिरीयके ते देवा अग्निमब्रुवन्निति प्रस्तुत्य स त्रेधात्मानं व्यकुरुताग्निं तृतीयं रुद्रं तृतीयं वरुणं तृतीयमिति । वास्तव्य इति रुद्रः खलु वास्तुभवः ग्रामाद्बाह्यो यज्ञभूमिश्मशानादिर्वास्तुः । गवीधुका अपि वास्तुभवाः अतो गवीधुकहविषो रुद्रदेवत्यत्वं युक्तम् । स्त्रीत्वे सत्यप्यधर्मेण स्त्रिया अयोग्येनानोवहनेन वारुणी ॥१३॥ तं राज्ञो विजितिसाधनत्वेन प्रशंसति अपामार्गैर्वाऽइति । अपामृजत अपमार्जनं कृतवन्तः ॥१४॥ एतेनापामार्गहोमेनापि न केवलं पञ्चवातीयहोमेन प्रतिसरं स्वस्यात्मानमभिचार्यमाणः कुर्यात् । प्रतीचीनफलः स्वात्मानं प्रति गतैरवाङ्मुखैः (°रर्वा° ?) फलैर्युक्तः । योऽभिचारकोऽस्मै यजमानाय किंचित्पीडादिकं कुर्यात् तमेवैतेनापामार्गहोमेन प्रतिमुखं धूर्वति हिनस्ति तत्कृतोऽभिचारस्तमेव प्रतिनिवृत्य (°त्यंपि Cod.) हिनस्ति ॥२०॥४॥२॥

अथ त्रिषंयुक्तोष्टित्रयं विधित्सुः प्रथमं त्रिषंयुक्तमनुक्रामति आग्नावैष्णवमिति । त्रिभिर्हविर्भिः संयुक्तं तेन यजेत । देवा एतेन त्रिषंयुक्तेन सहायभूतान्कर्मकरान्पुरुषान्प्राप्नवन्तः ॥ १ ॥ विष्णोरवतारस्वीकारेण मनुष्यसम्बन्धान्मनुष्याः सर्वे वैष्णवाः विष्णवधिष्ठिताः ॥ २ ॥ पुरुषवान् पुरुषसहायवान् । वामनो ह्रस्वाङ्गः ॥ ४ ॥ वर्चो ब्राह्मं तेजः ॥ १ ॥ अवर्चसः अतेजस्कस्य यद्यपि व्याप्तिः सर्वपदार्थव्यापनशक्तिरस्ति तथापि तया व्याप्त्यापि न खल्वर्थः प्रयोजनं विद्यते ॥ १२ ॥ अथानन्तरदिवसकर्तव्यं द्विहविष्कं यागं विधत्ते अथ श्व इति । अनूचीने पूर्वापरीभूते अहनी अनूचीनाहम् क्रियाविशेषणमेतत् वैश्वानरेष्ट्या पूर्वस्मिन्दिने यजेत वारुण्यापरस्मिन्दिने एवं भिन्नतन्त्रेणैतौ यागौ कार्यौ एकस्मिन्नेवाहनि वा समानतन्त्राभ्यां यष्टव्यमित्याह समानबर्हिर्भ्यामिति बर्हिरुपलक्षितं कृत्स्नं तन्त्रं समानं साधारणं ययोः ते समानबर्हिषौ ॥ १३ ॥ ग्रन्थिर्नाम पाशः । अयं दक्षिणाभेद इष्ट्योर्भिन्नतन्त्रत्वे वेदितव्यः समानतन्त्रत्वे हि एकेनैव द्रव्येण परिक्रीता ऋत्विजः कृत्स्नं प्रयोगजातं कुर्वन्ति ॥ १७ ॥ ५ ॥ २ ॥

प्रथमब्राह्मणे द्वादश रत्नहवींष्यनुदिनं क्रमेण कर्तव्यान्युच्यन्ते । अग्नौ गार्हपत्याहवनीययोः अरण्योः पृथक् पृथक् संरोप्य प्रतिदिवसं तत्तद्गृहं गत्वा तत्र तत्र निर्मथ्य यष्टव्यमिति सर्वेष्टिसाधारणमिदम् । रत्नं रत्नवत्प्रशस्तं गवेषणीयं वस्तु । तस्मै सेनान्यै सूयते तेनानुज्ञायते । तद्गृहगमनेन तं सेनान्यं स्वमात्मीयमनपक्रमिणमनतिलङ्घिनं कृतवान्भवति ॥ १ ॥ शितिपृष्ठः श्वेतपृष्ठः । तस्या उपरिभागे अर्यम्णः सूर्यस्य एष परिदृश्यमानः पन्था मार्गः स च किरणसम्बन्धाच्छ्वेतः ॥ २ ॥ सूयमानस्येति सुन्वतो यजमानस्यैव ॥ ३ ॥ कृताभिषेकस्य राज्ञो मुख्या स्त्री महिषी । दुहे दुग्धे लोपस्त आत्मनेपदेष्विति (पा० ७. १. ४१.) तलोपः ॥ ४ ॥ ग्रामं नयतीति ग्रामणीः वैश्यानां महत्तरः । पृषन् विन्दुमान् श्वेतरक्तकृष्णविन्दुयुतः । पृषतो गोर्यदस्ति एतद्रूपाणां भूमेति पदयोजना ॥ ६ ॥ क्षत्ता नाम यष्टिहस्तोऽन्तःपुराध्यक्षः सर्वेषां नियन्ता प्रतिहारापरपर्यायः । श्वेतः (!) शुक्लवर्णः ॥ ७ ॥ संग्रहीता नाम रथयोजिता । सव्यवृषदंशेन संग्रहीतोच्यते । सयोनी समानस्थानौ । यमौ सहैवैकस्या मातुर्गर्भादुत्पन्नौ अनूचीनगर्भौ अनुक्रमेण पौर्वापर्येण ज्ञातगर्भौ ॥ ८ ॥ राज्ञः प्राप्तं षष्ठं भागं प्रजाभ्यो गृहीत्वा राज्ञे दोग्धि प्रयच्छतीति भागदुघः । पूषा नाम मार्गसंरक्षको देवः देवानां भागदुघः भागं दोग्धि स हि यजमानदत्तानि हवींषि मार्गे रक्षोभ्यः संरक्ष्य तांस्तान्देवान्गमयति । see २. ५. ८. ॥ १ ॥ अक्षावापो नामाक्षाणां क्षेप्ता अक्षगोप्ता वा द्यूतकारः । गोविकर्तः मृगयासहायभूतो गोहिंसको व्याधः । गवीधुकाः (!) अरण्यगोधूमान् । सम्पदः कामाय समृद्ध्यभिलाषसिद्ध्यर्थम् । सभायां सभास्थले द्यूतस्थाने यामिमां पणत्वेन कृतां गां घ्नन्ति कितवाः (see ४. ५. २३.) तत्र तामेतां (°मेतं Cod.) रुद्रोऽभिमन्यते क्रूरकर्मत्वात् स नस्य (?) रुद्रः परम्पर[य]धिदेवनात्मक इत्याह अग्निर्वै रुद्र इति स चाग्निरधिदेवनं द्यूताधिकरणं स्थानम् अधिदेवनात्मकस्याग्नेः अक्षावापाङ्गाराः (!?) तमेवमधिदेवनात्मकं रुद्रमेतेनाक्षावापगृहसम्भृतगवीधुकनिष्पन्नहविषा प्रीणाति तर्पयति । तस्य गृहेषु अनुमता अध्वर्युप्रभृतिभिरनुज्ञाता सती गौर्हन्यते गोविकर्तेन हिंस्यते अतो गोविकर्तगृहादानीतगवीधुका हननाभिमानिनो रुद्रस्य हविष्ट्वे योग्या इत्यर्थः । नक्षरो निःकोशोऽसिः कृपाणः । वालदाम्ना रोमरज्ज्वा प्रबद्धमक्षावपनं पात्रम् अक्षा उप्यन्तेऽस्मिन्नित्यक्षावपनमक्षस्थानावपनपात्रम् । एतद्ध होति तयोस्तद्द्वयं स्वं भ-

वति एकैकस्यैकैकमस्ति ॥१०॥ पालागलो नाम हृतः आपस्तम्बेन तु हृतविशेषपरत्वेन व्याख्यातः अध्वने स्वाहेति पालागलस्य गृहे जुहोत्यनृतहृतं ब्रुवतऽइति पालागलमनृतवादिनं हृतमिति ब्रुवते आचार्या इत्यर्थः । प्रहेयः राज्ञा प्रेष्यः प्रस्थापनीयः । तस्य दक्षिणेति उष्णवेष्टितम् उष्णशब्देन स्नाय्वभिधीयते उष्णविकारैः स्नायुभिः वेष्टितं स्यूतं धनुः । चर्ममया वाणवन्त इषुधयः । लोहितवर्णा उष्णीषः शिरोवेष्टनम् ॥११॥ परिवृक्तिगृहे । परिवृक्तिशब्दस्यार्थमाह या वाऽइति अपुत्रा राज्ञपत्नी केवलं भोगार्था परिवृक्तिः (!) । स जुहोतीति जुहोतिचोदितवात्स्वाहाकारप्रदानवाच्चायं होमो दर्विहोमः । परिमूर्णी मुर्क्षी मोहसमुक्रायायोः अस्मात्क्तानि राल्लोप इति (पा° ६. ४. २१.) क्वस्य लोपे निष्ठानवे च कृते नूपम् परिमूष्टा अक्षमा पर्यारिणी परित आर्तिमती व्याधिगृहीता केनचिदङ्गेनापहता वा कृष्णा गौर्दक्षिणा । इष्यन्ते तां परिवृक्तिमाह (!) वदेत् अथ इदानीमितः परं मे मम ईशायां स्वाम्ये मा वात्सीः मद्गोग्या मा भूरित्यर्थः ॥१३॥१॥३॥

रत्नहविषामुपरि स्वगृहे सौमारुद्रयागः कर्तव्यः । शृतः पक्वः ॥१॥ आसुतेऽसुरपुत्रः । विव्याधाक्षादितवान् । अयज्ञार्हान्सेनान्यादीन् । तमो वा कर्त एनं सुन्वन्तं प्रविशति । वदित्येकपर्यायः एकदा शूद्रान् सेनान्यादीन् वदेकदा यान्कांश्चन गोविकर्तादीन्हीनजातीनपि । ततः पापलेशासंस्पृष्टः सन्दीक्षते दीक्षार्हो भवति ॥२॥ प्रसङ्गात्फलान्तरायास्य होमस्य बाह्यप्रयोगं दर्शयति स हैतेनेति । अपिर्भिन्नक्रमः सोऽपि एतेन सौमारौद्रेण यजेत सः कः यः पुरुषो यशसे यशसः प्राप्तये अलं सन् समर्थो योग्यो भवन्नपि अयशः (!) कीर्तिरहितो भवति । यक्ब्दार्थं विशिनष्टि यो वाऽअनूचान इति साङ्गवेदाध्यायी अनूचानः स यशसे अलं योग्यो भवन्नपि अयशो यशोरहितो भवति यस्तु यशोरहितः स तमसा प्रावृतः तस्यैतेन हविषा सोमारुद्रौ कीर्त्यभावरूपं तमोऽपहत्य कीर्तिमन्तं कुरुतः स यजमानः अयशोरूपतमसा वियुक्तः सन् ज्योतिरात्मको भूत्वा श्रिया सम्पदा यशसा चोपलक्षितो भवति ॥३॥ दीक्षते दीक्षां कर्तुमर्हति ॥४॥ स्वयंप्रशीर्णा स्वयमेव भग्ना । मित्रसम्बन्धिचरुपाकार्थं पात्रम् ॥५॥ पयः आतच्य आतक्षनद्रव्येण दधि कृत्वा विनाटे चर्ममये पात्रे दृतौ आसिच्य रथमश्वैः संयोज्य दधिपूर्णं विनाटं रथे सम्बध्य देदीयितवै रथधावनाय आह नियुक्षोत दीतेर्वा गतिकर्मणो यङ्लुगन्तात्कृत्यार्थे तवैप्रत्ययः । स्वयमुदितं मथनमन्तरेण निष्पन्नं नवनीतम् तदेव स्वयमेव विलीनं सदाज्यं भवति ॥६॥ अणीयांसः अणुतराः परिभिन्नाग्निक्नाग्रास्तण्डुलाः अपरिभिन्नाः अक्षिन्नाग्राः अचूर्णीकृताः ॥७॥ बार्हस्पत्यं चरुमधिश्रित्य अग्निमध्ये स्थाल्यामधिश्रितायां बृहस्पत्यर्थांस्तण्डुलानोप्य तं चरुमश्वत्थशाखानिर्मितेन मैत्रेण पात्रेणापिदध्यात् तत्तस्मिन्पात्रे स्वयमुत्पन्नमाज्यमानयति आसिञ्चेत् तत्र स्थविष्ठानपरिभिन्नान्मैत्रांस्तण्डुलानावपेत् स एव मैत्रश्चरुरूष्मणैव अप्यते पच्यते । अग्निना पक्वो वरुणयो दाहप्रयुक्तहिंसासम्बन्धात् । उभयोश्चर्वोः दधिपयसोर्दार्शिकयोरिव एकैकस्मादूद्विर्द्विरवद्यन् शुल्कां सहावदानं कुर्वन् मित्राबृहस्पतिभ्यामनुब्रूहीत्येवं संस्तुत्यानुवाक्याप्रैषं (संयुत्या° Cod.) ब्रूयात् एवं यजेति याज्याप्रैषेऽपि वषट्कृते सहैव प्रक्षेपः ॥८॥२॥३॥

एवं पवित्राख्यात्प्रथमसोमयागादनन्तरभावीन्यानुमतादीनीष्टिदर्विहोमात्मकानि संवत्सरपर्यन्तमनुष्ठेयानि कर्माण्यनुक्रान्तानि । अथ द्वितीयस्याभिषेचनीयाख्यस्य सोमयागस्य प्रयोगो

ऽभिधास्यते । तत्राभिषेचनीयस्य चोदकप्राप्तां दीक्षामाह स वाऽऽइति । तत्कालः सूत्रे दर्शितः (का० १५. ३. ३४.) फाल्गुनीपत्तयज्ञनीयेऽभिषेचनीयाय दीक्षतऽइति । देवसुवां (!) हवींषि विधित्सुस्तेषामग्नीषोमीयपशुपुरोडाशानन्तरभाविवं वक्तुमाह उपवसथऽइति उपवसथः सुत्यादिवसात्पूर्वमहः । तदनु देवसुवां (!) हवींषि निर्वपेत् सुवत्यनुज्ञानन्तीति सुवः देवाश्च ते सुवश्चेति देवसुवः तेषां देवस्वाम् श्रोः सुपीति (पा० ६. ४. ८३.) यक्षादेशः प्रसवितृवं चैषामाम्नायते देवसुवामेतान (!) हवींषि भवन्ति एतावन्तो वै देवानां सवाः तऽएवास्मै सवान्प्रयच्छन्ति तऽएनं सुवतऽइति ॥ १ ॥ प्राम्रुकानाम् प्रकर्षेण आम्रु शीघ्रं पच्यमानानां पुनःप्ररूढानां व्रीहीणाम् रेफस्य छान्दसो लवनिर्देशः । प्रसुवान् प्रसुवन्तु प्रेरयन्तु ॥ २ ॥ प्राम्रुकाः पुनःप्ररूढा व्रीहय इत्युक्तम् ततोऽप्यधिककाले पक्षत्रये पच्यमानाः षष्टिका व्रीहयः आशवः तेषामाम्रुवं च त्रिचतुरमासनियतपरिपाकव्रीह्यपेक्षम् । श्रोः खलु गार्हपतं गृहपतिवमेव तस्माद्यजमानो यावतो धनस्येष्टे ईश्वरो भवति तद्गार्हपतं गृहपतिसम्बन्धि सर्वं वस्तुजातमभि एनं यजमानं गृहपतिगुणकोऽग्निः प्रापयति ॥ ३ ॥ ज्येष्ठगुणकायेन्द्राय हायनानां संवत्सरपक्वानां रक्तशालीनां चरुं निर्वपेत् । अतिष्ठा अतीत्य तिष्ठन्त्य ओषधयः चिरकालेन पाकात् इन्द्रोऽप्यतिष्ठाः सर्वानतिक्रम्य तिष्ठति ॥ ६ ॥ आम्बा नाम अकृष्टपच्याः स्वयंजाता व्रीहयः । कृष्टक्षेत्रोत्पन्ना ओषधयो वरुण्याः कर्षणादिलक्षणहिंसासम्बन्धात् ॥ ८ ॥ अथ देवसुवां हविर्यागानन्तरं स्विष्टकृतः पूर्वम् । अभिपद्य गृहीत्वा । मित्रः सत्य इति सत्यशब्दाच्चतुर्थ्यर्थे सुः सत्यायेत्यर्थः ॥ ११ ॥ अमी इत्यस्य स्थाने भरतपदं प्रक्षिप्य पठितं (पतितं Cod.) बौधायनेन अथैनं रत्निभ्य आवेदयति एष वो भरता राजेति आपस्तम्बेन तु राजविशेषेण जनपदनामग्रहणमुक्तम् अथैनं रत्निभ्य आवेदयति एष वो भरता राजेत्येष वः कुरवो राजेति कौरव्यमेष वः पञ्चाला राजेति पाञ्चालमेष वः कुरुपाञ्चाला राजेति वा कुरुपञ्चालमेष वो जनता (!) राजेत्यन्यान्राज्ञ इति । आद्यं भोग्यम् । तस्माद्ब्राह्मणो क्षत्रियेणानाद्यः (!°येणानाद्यः) । सोमराजा सोमो राजा यस्येति बहुव्रीहिः ॥ १२ ॥ सुवते अनुजानन्ति । देवसूहविःप्रचारस्याग्नीषोमीयदिवसकर्तव्यत्वात् श्च इत्यनेन सुत्यादिनं विवक्ष्यते ॥ १३ ॥ सुवाताऽइति पञ्चमलकारान्तपदम् ॥ १४ ॥ अग्नीषोमीयपशुपुरोडाशप्रधानाङ्गतेरनन्तरं कर्तव्यं विधाय प्राकृतं स्विष्टकृद्यागमनुवदति अथाहेति । प्रधानस्विष्टकृदाङ्गत्योर्मध्ये देवसूहविःप्रचारेण यज्ञरूपप्रजापतिमध्यऽएव यजमानं निहितवान्भवति ॥ १५ ॥ ३ ॥ ३ ॥

चतुर्थब्राह्मणे यजमानाभिषेकार्थं सप्तदशसंख्याकानामपां सम्भरणमुच्यते । आतपवर्ष्याद्यान्युदकानि यूपस्योत्तरप्रदेशे निधाय गृह्णीयात् इतराः सम्भविनीरपस्तु तत्र तत्र गत्वा गृह्णीयात् ॥ १ ॥ सारस्वतीरेवेति सरस्वत्यां नद्यां भवाः अपः एवशब्दोऽन्ययोगव्यवच्छेदार्थः । एता वाऽएका इति सारस्वत्य आप एका एकमुदकम् एवं सारस्वतीरपो गृहीत्वा षोडशापो गृह्णीयात् ॥ ३ ॥ अभ्यवेते अवगाढे सति । व्यदर्तः विविधं पूर्वापरभावेन गक्तः ॥ ४ ॥ उदर्दति उद्गकेत् । स्वाहान्तो हवनमन्त्रः द्वितीयो ग्रहणमन्त्रः ॥ ५ ॥ प्रतीपं प्रतिकूलम् ॥ ६ ॥ नदीप्रवाहं परित्यज्य पृथक्प्रवाहरूपेण याः स्यन्दन्ते अपयत्यः ताः । एतस्यै वाऽइति एषा परिणदी एतस्या महानद्याः सकाशादवक्रिय (!) पृथक्कृत्य परिवहति तत एषैव पुनर्भवति संसृष्टा परिणदी पुनरेषैव महानदी भवति । यस्मादपक्रिन्ना नदी पुनस्तां महानदीं प्रा-

म्नोति तस्मादस्यैताभिरद्भिरभिषिक्तस्यान्यराष्ट्रीयः पुरुषः राष्ट्रे स्वराष्ट्रे भवति । अवहरते वशयति । यथा महानदी परिणदीसंसर्गेण भूयसी ज्ञाता तथा तस्मिन्नाज्ञि अन्यराष्ट्रीयसमवधानेन भूमानं भूयस्त्वं दधाति ॥९॥ अथ समुद्रोदकग्रहणं विधत्ते अथ नदीपतिमिति ॥१०॥ निवेष्ठते (!) आवर्त्यतेऽस्मिंस्तृणादिकमिति निवेष्य आवर्तः । गर्भोऽपत्यम् ॥११॥ सूर्यवचसं सूर्यसमानतेजस्कम् ॥१२॥ सूर्ये आतपति सति । इमां भूमिमप्राप्ता भूमौ न पतिता भवन्ति ॥१३॥ वेशन्तोऽल्पसरः तत्र भवाः । प्रवाहाभावान्मन्दस्वभावाः ॥१४॥ कूपे भवाः कूप्याः । तथा इमामिति इमां भूमिं परेण भूमेरधस्ताद्विप्रकृष्टे देशे कूपे स्थिताः ॥१५॥ प्रुषा नीहाराः । सस्यानामातपज्ञातम्लानिशमाय (? समये Cod.) नीहारगता आपोऽभ्यवयत्यः ॥१६॥ प्रसूयमानायाः गोरुल्ब्याः उल्बे गर्भवेष्टने भवाः अपः ॥१७॥ एतदेव सारस्वतवर्ज चतुर्गृहीताज्येन पूर्वं ज्ञत्वा-ज्ञत्वा पञ्चदशानामपां ग्रहणं विहितम् अथान्तिमस्य जलस्य ग्रहणं सविशेषं विधत्ते अथेति । मरीचोरञ्जलिना पात्रेण संगृह्य गृहीत्वा अपिसृजति सर्वासु गृहीतास्वप्सु संसृजेत् । अत्र होमाभावात्स्वाहान्तः पूर्वो मन्त्रो न पठितः । कथं मरीचीनामप्त्वेन परिगणनमिति तदुपपादयति एता वाऽआप इति यस्मात्ता मरीचयः स्यन्दन्तऽइव प्रवहन्तीव इवशब्दोऽल्पार्थे (?परार्थे Cod.) सान्तात्प्रवहणाभावात् यथा जलसंघा उपर्युपरिभावेन वर्तन्ते तद्वदेता मरीचयः अन्योऽन्यस्य मरीचेः श्रिये (!) शोभायै अतिष्ठमानाः स्थातुमसहिष्णवः उत्तराधरा-इव भवन्त्यो गच्छन्ति अतो जलसाम्यादप्त्वेन परिगणनम् ॥२१॥ ताः षोडश ऊर्मिद्वयस्य विवेके षोडशसंख्याका भवन्ति ॥२३॥ होमपूर्वकं ग्रहणं प्रशंसति अथ यद्धुवेति । वज्रनूपेणाज्येन स्पृवा स्पृवा हिंसिवा हिंसिवा ततः स्वीकृत्य स्वाधीनं कृवा गृह्णनो भवेत् ॥१४॥ मरीचिष्वपि अनद्वा अस्थाने तासां होमाधिकरणत्वासम्भवान्न होतव्यम् ॥२६॥४॥३॥

पञ्चमे ब्राह्मणे यजमानाभिषेकस्तत्रत्या धर्माश्च विधीयन्ते ॥१॥ माहेन्द्रे ग्रहे अगृहीते सोमरसेनापूर्णे मरुत्वतीयान्ते इत्यर्थः । माहेन्द्रग्रहणात्पूर्वं यजमानाभिषेकं स्वायतननिधानरूपेण प्रशंसति एष वाऽइति see १.४.२. ॥२॥ पूर्वमिन्द्रेण पीयमानः सोमः तमत्यपवत शरीरादधो निगच्छन् स सोमो यदात्यपवत ततः सोऽतिपवितः सोमः शार्दूलः सम्भूतवान् see ५.४.१०. ॥३॥ अथाभिषेकस्य पुरस्तात्पश्चाच्च क्रियमाणान्पार्थहोमान्विधत्ते अथ पार्थानीति । वेनो नाम राजा तस्य पुत्रः पृथो नाम । सवमन्त्रायं स्वाधीनं कुर्यामिति कामयमानाय पृथये (!) एतानि पार्थान्यजुहवुः अध्वर्यवः । अस्मै यजमानाय असाविति तत्तन्मृगनाम्नः सम्बुद्धान्तस्य सामान्यनिर्देशः हे पशो एहि आगच्छ अयं राजा वां पक्ष्यते भोक्तुं पक्तां करिष्यतीति सोऽयं पशुः तद्वचः श्रुवा तत्समीपं स्वयमेवागच्छति ॥४॥ अर्यमणं नियन्तारमधिपतिम् ॥१॥ स्वः ज्ञातिर्भ्राता ॥१२॥ न्यग्रोधो नाम वटः तस्य पादः शाखावरोहः तेन निमितं नैयग्रोधपादम् तेन मित्र्यः सखिकर्मणि साधुर्योऽपि (?) न बङ्कभाषी (°षां Cod.) नासाधुकर्मकारी सखा (धुः साध्य Cod.) राजन्योऽभिषिञ्चेत् । न्यग्रोधस्य पादैरिव प्रतिष्ठा दृश्यते राजापि हितोपदेशकैरामात्यैः सखिभिः प्रतिष्ठितो भवति नान्यथा अतस्तेन पात्रेण मित्रकर्तृकमभिषेककरणं युक्तम् ॥१३॥ प्रवयति वेञ् तन्तुसंताने संग्रथ्नीयात् ॥१५॥ हे उदक अनिभृष्टम् भ्रस्ज पाके यवादिवद्वह्निसंयोगेऽपि नितरां भृष्टं न विनश्यतीति यावत् रक्षोभिर्निबाधितमसीत्यर्थः ॥१६॥ उदकसम्बन्धादेव सोमरसनिष्पत्तिः तादृशो रस एव क्षयते

अतः सोमस्य दानसाधनभूता भवथ ॥१८॥ एनं यज्ञमानं वासांसि तार्प्यपाण्डाधिवासोष्णीषाणि परिधापयेत् तत् तत्रे तेषु प्रथमं तार्प्यमिति वासः न वन्यत्कम्बलादिकम् अत एव का° (१५. ५. ७-१०) तार्प्यं परिधापयति क्षौमं त्रिपाणं वा घृतोन्नमेकऽइति तृपा नामौषधिविशेषः तन्तुनिर्मितं क्षौमं वस्त्रं तार्प्यं त्रिःकृवः पायितं वा घृतोन्नमुन्दी क्लोदने घृतसिक्तमित्येके आचार्या वदन्ति । यज्ञनूपाणि स्रुक्चमसादीनि तत्र स्यूतानि भवेयुः ॥२०॥ पाण्डुं पाण्डुरं श्वेतं कम्बलं तार्प्यस्योपरि प्रावृणुयात् ॥२१॥ अधि उपरि वसनीयमाच्छादनीयं वस्तु अधिवासं (!) तत्प्रतिमुञ्चेत् तार्प्यमुपसंव्याय (°धाय ?) पाण्डरमुत्तरीयवदाच्छाद्य अधीवासकञ्चुकादिकमुपरि प्रतिमुञ्चेत् ॥२२॥ उष्णीषं संहत्य निवीतरूपेण कण्ठेऽवसज्य पुरस्तात्पूर्वभागे नाभिदेशे अवगूहति उष्णीषान्तं नोविस्थाने ग्रथयेत् ॥२३॥ एके शाखान्तरानुसारिणः तदुष्णीषं समन्तं सर्वतो नाभिदेशे परिवेष्टयन्ति । अस्य क्षत्रियस्य उष्णीषरूपा नाभिरपि समन्तं पर्येति परिवेष्टिता भवति ॥२४॥ पूर्वं निहितस्य दीक्षितवसनस्य परित्यागं विधित्सुरेकेषां मतमुपन्यस्यति यद्वा विहितानां (विदि° Cod.) तार्प्यादीनां परिधापनादिकमेव दूषयितुं पूर्वपक्षयति तद्यैकऽइति । एके शाखिन एकवारं परिधापितानि एतानि वासांसि निदधति विसृज्य निदध्युः अथ तदानीमेव तार्प्यादिवसनकाले निहितं दीक्षितवसनमेनं यज्ञमानं पुनः परिधापयति । जनूरङ्गानि सहोत्पन्नानि वयूपाण्यङ्गानि see ३, १, २, १३-१६ । अतो वासोभिः परिधापनेन जन्वा तन्वा सहोत्पन्नैः शरीररूपैरङ्गैः समर्धितवान्भवति ॥२५॥ निहितस्य दीक्षितवसनस्यावभृथे प्रासनं विधत्ते स यत्रेति अवभृथमभ्यवहरन्ति आहरेयुरप्सु प्रक्षिपेयुः । सलोम प्रकृतिगतमनुसृतम् प्रकृतौ दीक्षितवसनस्यावभृथे परित्याग उक्तः । अवसाने कर्तव्या उदवसानीयेष्टिः ॥२६॥ बाङ्गद्वयं विमृज्यत् कर्कोपाध्यायेन तु बाङ्गशब्दस्य धनुष्कोटिपरत्वं व्याख्यातम् (का° १५. ५. १८.) ॥२८॥ दृ विदारणे दृणातीति दृबा विदारिका दृप्यतेर्वा रूपम् । रुजा भङ्गहेतुः । क्षुमा क्षुप विधूनने क्षुपतीति क्षुपा पकारस्य स्थाने मकारः शत्रुक्षपणकारिणी (!) । समर्पणेन परित्यागमात्रेण यया परान्भिनत्ति (!) शत्रून्विदारयति । यया विद्धस्य ताडितस्य जीवने संदेहः । यया राजा शत्रुमपराध्नोति हिनस्त्येव ॥२९॥ अशरव्याः अहिंसकाः शरव्यं शरलक्ष्यं तद्रहिताः करोति अनेन सर्वास्वपि दिक्षु परकीयशरलक्ष्यत्वं निवर्त्यते ॥३०॥ आविक्तपदयुक्ताः सप्त मन्त्रा आविदः । आवेदयन्ति ज्ञापयन्ति देवताभ्य एनं यज्ञमानमिति । अनिरुक्तां साक्षाद्देवतावाचकपदरहितं मन्त्रं वाचयेत् । हे मर्या मरणयोग्या मनुष्याः आविः प्रकाशोऽभूत् । सवमभिषेकम् ॥३१॥ आविक्तः आवेदितः ज्ञापितः विक्तो भोगप्रत्यययोरिति (पा° ८. २. ५८.) निपातितः अग्नये यज्ञमानं ज्ञापितवानित्यर्थः ॥३२॥५॥३॥

सदसो मध्येऽउपविष्टस्य केशवस्य क्लीबस्य वदने लोहायसं ताम्रमर्पयेत् । दंशनशीला मृत्यव इहाभिप्रेताः । अवपूर्वो यज्ञिर्नाशार्थे ॥१॥ केशवलोहायसदन्दश्यूकानामन्तरालवर्तिबमुपपादयति अथ यदिति ॥२॥

The explanation of ४. १. ३ — ४. ४. ५ is wanting in AB.

यज्ञमानहस्ते पञ्चाक्षावपनं विधत्ते अथेति अक्षा नाम कपर्दकाः सुवर्णनिर्मिताः विभीदकफलानि सौवर्णा वा । ते चाक्षा द्यूतस्थाने निवपनीयाः तेषां चतुर्णामक्षाणां कृतसंज्ञा पञ्चा-

नां (!) कलिसंज्ञा तथा च शाखान्तरे स्तोमसंख्यायां कृतादिव्यवहारः कृतः ये वै चत्वारः स्तोमाः कृतं तत् अथ ये पञ्च कलिः स इति यदा पञ्चाप्यक्षा उत्ताना (? उत्पन्ना Cod.) भवन्ति तदा देवितुर्जयो भवति पञ्चसु वेकनूपासु (!) जय एव भविष्यतीत्यन्यत्रोक्तम् अतः कलेः सर्वाक्षाभिभावुकत्वात्सुन्वतोऽपि जयापेक्षित्वात्पञ्चाक्षनिवाप इत्यर्थः । अयशब्दोऽक्षवाची ॥६॥ दण्डैर्यज्ञियवृक्षकाष्टैः एनं सुन्वन्तं पृष्ठतः पश्चाद्भागे तूष्णीममन्त्रकं घ्नन्ति हन्युः । तस्माद्राज्ञोऽदण्ड्यभावः यथा राज्ञा स्वा अपरुद्धाः प्रजा दण्डयति एवं स्वयं न दण्ड्यः ॥७॥ रध्य रध्यतिर्वशगमने मदीयाय यजमानाय सर्वं वशीकुरु यद्वा द्यूतस्थानपरिलेखनरूपं कार्यं साधय ॥१५॥ पापवस्यसं पापिष्ठं कर्म नेदसत् न भवेत् ॥११॥ आहवनीयस्योत्तरप्रदेशे स्थापितः स पूर्वाग्निः तस्मिन् तत्संस्पृष्टम् अधिदीव्यत्यत्रेति अधिदेवनं द्यूतभूमिः तां शुक्रग्रहस्य पुरोरुचा तं प्रत्नथा पूर्वथा विश्वथेमथेत्यनया कुरुतः । ४, २, १, ३-१० ॥२०॥ मन्थिग्रहपुरोरुचा अयं वेन इत्यनया विमितं विमिन्वत्यत्रेति विमितं चतुर्द्वारं चतुरश्रं मण्डपम् तद्विमितुः कुरुतः ॥२१॥ तस्मात्तेनाक्षनिधानेनाग्निमेव प्रीणितवान्भवति । देवनकाले यामेव पणत्वेन कृत्वा गां दीव्यध्वमिति द्यूतकारणप्रैषं ब्रूयात् ततोऽस्य पणत्वेनाङ्गीकृतां गामानीय घ्नन्ति हन्तिश्चा[ह]ननमात्रार्थो न मारणार्थः । पूर्वाग्निमाहवनीयं वहत इति पूर्वाग्निवाहौ तावनड्वाहौ दक्षिणा । तदिदं देवनं संनिधिबलादभिषेचनीयाख्यसोमयागमध्यगतमपि महाप्रकरणबलादिष्टिपशुसोमयागात्मकराजसूयशेष इति गम्यते प्रकरणेन संनिधेर्वा इति सिद्धान्तितम् ॥२३॥ अथ पय यास्त्विष्टकृदिडादिकं दर्शयति अथाहेति प्रधानसौविष्टकृतहविषोर्मध्ये यद्देवनादिकं कृतं तत्प्रजापतिमध्यनिधानरूपेण प्रशंसति ॥ २४ ॥ ४ ॥ ४ ॥

पञ्चमे ब्राह्मणे संसृपां हवींषि दशसंख्याकानि दशपेयाख्यसोमयागस्य दीक्षा उपसद्यागः ऋत्विग्विशेषेण दक्षिणाश्च विधीयन्ते । भर्गो यज्ञरूपं वीर्यम् ॥१॥ तमपसृतं गर्भमेताभिर्वक्ष्यमाणाभिः सावित्रादिभिरनुसमसर्पत् अनुक्रमेण प्राप्तवान् ॥२॥ सम्यक् सृप्यते प्राप्यते वीर्यमाभिरग्न्यादिभिर्देवताभिरिति संसृपो देवताः तासां हवींष्यपि तन्त्रामानि प्रत्येकमेकैकदिने कर्तव्यानि । अयमत्र क्रमः दशानां संसृपां हविषां मध्ये सप्त हवींषि प्रतिदिनं क्रमेणैकैकं कृत्वा सप्तमे दिने सप्तम्यामिष्टावतीतायामष्टमं हविर्निर्वपेत् अष्टपराह्णे (?) दशपेयस्य द्वादशपुण्डरीकस्रक्प्रतिमोकलक्षणां दीक्षां कृत्वा तदानीमेव प्रथमामुपसदं कृत्वा तदन्ते संसृपामष्टमं (!) हविरनवपेत् अष्टमे दिने उपसदन्ते संसृपां नवमं हविर्निरुप्य नवमे दिवसे तृतोयोपसदन्ते संसृपां दशमं हविर्निरुप्य तस्मिन्नेवाहनि अग्नीषोमीयपशुप्रचारं कुर्यात् ततो दशमेऽहनि सोमोऽभिषूयते ज्ञतशषश्च पीयतऽइति दशपेयवम् । एकैकस्मिन्पात्रे दशभिर्ब्राह्मणैः पातव्यः सोमरसो यस्मिन् (स) दशपेयः ॥३॥ अत्र यदुक्तं सूत्रकृता (का° १५ ८. १५-१६) अस्यार्थः भक्षणार्थं सदःप्रसर्पणकाले सोम्यानां शतसंख्याकब्राह्मणानां मध्ये एकैकस्य पात्रस्य भक्षयितारो दश दश पुरुषाः यजमानस्य दश सोमपान्पितामहान्यजमानस्य पितामहस्तत्पितामह इत्येवं पितामहदशगणं संख्याय गणयित्वा प्रसर्पेयुः यद्वा सवित्रा प्रसवित्रेति संहितोक्तमन्त्रेण प्रसर्पणं कुर्यादित्यर्थः । अत्र पितामहगणनेन प्रसर्पणं पूर्वपक्षयति तदाङ्गरिति तदूहषयति यद्वै (!) ज्येति ज्या ज्यानिर्निकृष्ट इत्यर्थः अत्रोपपत्तिमाह द्वौ त्रीनिति यदि पितामहान्जानीयुः तर्हि द्वौ त्रीनेव जानीयुः न सर्वान् तस्मात्सवित्रादिदशदेवताः

संख्याय प्रसर्पणं कुर्यात् ॥४॥ संसृप्शब्दवाच्यहविर्निर्वापकालं दर्शयति अभिषेचनीयाध्यसोमयागस्योदवसानीयेष्टिर्यदा समाप्यते तदनन्तरमेतानि हवींषि निर्वपेत् ॥५॥ तत्प्रकारः कात्यायनेन (१५, ८, ४-१. १४) स्पष्टीकृतः सप्त हवींषि पूर्वमिष्टितन्त्रेण कृत्वा सप्त हिरण्मयपुण्डरीकाणि दत्त्वा उत्तरासु तिसृषु पञ्च दत्त्वा द्वादशपुण्डरीकस्रक्प्रतिमोकदक्षिणां दशपेयदीक्षां कृत्वा सप्तम्यां संसृप्यागसम्बन्धिन्यां (सृप्र Cod.) सप्तमदिने क्रियमाणायां वारुण्यामिष्टावतीतायां पूर्वमेवाभिषेचनीयदेशपेययोरपि द्विधा (!) सोमं क्रीत्वा दशपेयार्थं ब्रह्मागारे स्थापितं सोममाहृत्यासन्न्यभिमर्शनाद्यातिथ्यान्तं कृत्वा संसृपां हविषां मध्येऽन्त्यान्याग्नेयसौम्यवैष्णवानि त्रीणि हवींष्युपसत्प्रतिनिधित्वेन कर्तव्यानि उपसदामप्यग्निसोमविष्णुदेवता अन्तिमत्वात् (!°तास्वन्ति°??)। तथाप्यग्निसोमयोरेकस्याप्यभावे दशसंख्यापूरणाभावात्तयोरपि दशमत्वमुच्यते तत्र तिसृषु देवतासु तद्देवत्यहविः[षु] पञ्च पुण्डरीकाणि देयानि भवन्ति । दत्तानि सप्त अन्तिमहविस्त्रये दास्यमानानि पञ्चेति द्वादश पुण्डरीकाणि भवन्ति । प्रकृतावप्सु स्नात्यपोऽश्नातीत्यादिना यद्दीक्षामात्रं विहितं तदत्रापवदितुं दत्तदास्यमानपुण्डरीकस्रक्प्रतिमोको विहितः ॥६-१३॥ पद्मगतप्रत्रनालविसानां स्वर्गान्तरिक्षभूम्याख्यलोकत्रयात्मकत्वात्तत्प्रतिमोकलक्षणदीक्षाकारणेनैनं यजमानमेषु त्रिषु लोकेषु दीक्षितवान्भवति ॥१४॥ पूर्वमभिषेचनीयदीक्षान्ते राजानं क्रीत्वा द्वैधमुपनय्य तत्रैकं दशपेयार्थं पर्युह्य ब्रह्मागारे स्थापयित्वा एकेनाभिषेचनीये प्रचारः कृतः अथ दशपेये तं ब्रह्मगृहे स्थापितं सोममाहृत्यासन्न्यामासद्यातिथ्यया प्रचरेयुः तदनन्तरमुपसद्यागः तत्राग्निसोमविष्णुदेवताकोपसत्प्रतिनिधित्वेन संसृप्यागसम्बन्धिनामुत्तमानां (संसृपया° Cod.) त्रयाणामाग्नेयसौम्यवैष्णवानामेव निर्वापं पूर्वपक्षयति यदोपसद्भिरिति ॥१५॥ तेन यथेष्टेति एकैकोपसत्स्थाने तेन एकेन हविषा यथेष्टि इष्टितन्त्रेण कुर्यात् उपसत्त्रयार्थमेतद्धविस्त्रयं कर्तव्यमिति शाखान्तरीयः पक्षः तमिमं निराकरोति तदु तथेति । नेयात् न प्रच्युतो भवेत् तत उपसदः पृथक्कुर्यात्तदन्तरेतानि संसृपामन्तिमानि त्रीणि हवींषि चेष्टितन्त्रेण पृथक्कुर्यात् ॥१६॥१७॥ स एष दशपेयः क्रतुः सप्तदशस्तोमसाध्योऽग्निष्टोमसंस्थो भवति ॥१८॥ प्राकाशौ दीपस्तम्भावित्येके स्वर्णमयदर्पणावित्यपरे । वशां वन्ध्याम् । एकेनानड्वाहा युक्तस्य यवपूर्णस्य शकटस्य दानं विधत्ते अन्यतरत इति ॥२२॥ द्वादश चैत्रादयोऽधिकमासेन सह त्रयोदश वा मासाः ॥२३॥५॥४॥

अथ पञ्चमाध्याये पञ्चबिलसंज्ञकचरुः द्वादश प्रयुजां हवींषि पशुद्वयं केशवपनीयातिरात्रः सौत्रामणीप्रयोगो राजसूयसमाप्त्युदवसानीयेष्टिर्विधीयते । वेदिमध्ये पूर्वार्धे पूर्वभागे ॥१॥ दिगादिभ्यः सकाशात्पुनर्निष्क्रीणाति स्वाधीनं कृतवान्भवति ॥२॥ प्रत्येकहविःप्रचारादनन्तरं बार्हस्पत्ये चरौ संस्रवानयनं विधत्ते संस्रवमिति ॥३॥ निदानेन कारणेन निरूपणे सति ॥८॥ पृषन् बिन्दुयुक्तश्चित्रवर्णः ॥१०॥ वशा वन्ध्या । अप्रवीता वेतेः प्रजननार्थान्निष्ठा अप्रजाता अगृहीतगर्भा ॥११॥ शितिपृष्ठः श्वेतपृष्ठः । अर्यम्णः सूर्यस्य । अथैतस्य हविःपञ्चकस्य फलान्तराय राजसूयाद्बहिःप्रयोगं दर्शयति स हैतेनेति । विष्टाव्राजी (!) एकत्र संनिविष्टाः (!) इतस्ततः पर्यटनमकुर्वन् अन्नाद्यकामः एकत्र (? एवत्र Cod.) स्थित्वैव सर्वतो मेऽन्नं स्यादिति कामयमानः ॥१२॥१॥५॥

द्वितीये प्रयुजां हवींषि विधीयन्ते । एष यष्टा ऋतून्मासान्प्रयुङ्क्ते कर्मणे योजयति ।

ऋतवोऽप्येनं युक्ताः सन्तो वहन्ति प्रापयन्तीष्टं फलम् इदानीमनुष्ठातापि प्रयुक्तानृतूननुलक्ष्य चरति अनुसरति तत्तदनुग्रहितफलं प्राप्तुकामः ॥१॥ मनुष्यस्यायुःपरिमाणस्यावगन्तुमशक्यत्वान्मासि-मासि यजनं न कर्तव्यम् । हविःषट्कस्यैकीकृत्य यागकरणेऽपि कंचिद्विशेषं पूर्वपक्षत्वेनोपन्यस्यति शम्यापराव्याधऽइति शम्या परास्ता विध्यति निपतति यत्रेति स शम्यापराव्याधो देशः तत्र देशे पूर्वैः षड्भिः प्राङ्मुखो यान्गाक्न्यजेत आहवनीयात्पूर्वदेशे एकैकशम्याप्रासे षट् कर्तव्यानि पुनरावृत्तेन एकैकशम्याप्रासप्रदेशे अपराणि षट् कर्तव्यानि ॥२॥ तं पक्षं निराकृत्य पक्षान्तरं विधत्ते तदु तथेति । समानबर्हीषि बर्हिःशब्दस्तन्त्रोपलक्षकः एकतन्त्राणि कर्तव्यानि । तासां पूर्वहविःषट्कस्य देवतानामग्निषोमादीनां षण्णां रूपमेतत् यथा शिशिरऋतौ युक्ताश्वा राजानः प्राञ्चः सन्त आप्रावृषं प्रावृट्कालपर्यन्तं यायुः गच्छेयुः तदिदं प्राङ्मुखं यानं पूर्वपूर्वशम्याप्रासेषु यष्टव्यानामग्न्यादिदेवतानां सम्बन्धि रूपम् । तैत्तिरीयके शिशिरादिषु षट्सु मासेषु राजभेदेन प्राङ्मुखा यात्रा प्रतिमासं व्यापारभेदश्च स्पष्टमाम्नातः आग्नेयमष्टाकपालं निर्वपति तस्माच्छिशिरे कुरुपाञ्चालाः प्राञ्चो यान्ति सौम्यं चरुं तस्माद्बसन्तं व्यवसायादयन्ति सावित्रं द्वादशकपालं तस्मात्पुरस्तायवानां सवित्रा विरुन्धते (°ते)

बार्हस्पत्यं चरुं सवित्रैव विरुध्य ब्राह्मणा (?) यवानादधते वाष्ट्रमष्टाकपालं रूपाण्येव तेन कुर्वते वैश्वानरं द्वादशकपालं तस्माद्ग्रीष्मे नैदाघे प्रत्यञ्चं (!) कुरुपाञ्चाला यान्तीति । पूर्वाग्निमाहवनीयं वहन्तीति पूर्वाग्निर्वाहोऽनड्वाहः तेषां मध्ये द्वौ दक्षिणावेन देयौ ॥३॥ वार्षिकमभि वर्षर्तुसम्बन्धिनं प्रथममासमभिलक्ष्य पुनरावर्तेरन् शिशिरे दिग्विजयाय प्राञ्चः प्रयाताः कुरुपञ्चालादयो निदाघर्तुद्वितीयमासे परकीयं राष्ट्रं सर्वात्मना विनाश्य स्वदेशं प्रति प्रत्यङ्मुखा निवर्तन्ते तदेतत्सारस्वत्यादिदेवतानां प्रतिनिवृत्य (त्या॰ Cod.) यष्टव्यानां रूपम् । तेनोत्तरहविःषट्कयागेन प्रावृडादीन्षण्मासान्योजितवान्भवति ॥४॥ उक्तं द्वादशप्रयुग्घविःकरणेनऽर्तुप्रयोगं कुरुपञ्चालवृत्तान्तमुखेन दूषयति तद्ध स्मैतदिति पूर्वं कुरुपञ्चाला आङ्ङर्वदन्ति विचारयन्ति अस्मानृतवो युक्ताः सन्तो वहन्ति युक्तानृतूननुलक्ष्य चरामोऽनुसराम इति आशंसमा[ना]नामेषां राज्ञां मध्ये राजान आसुः ते राजसूययाजितः प्रयुग्घविःकरणमृतुप्रयोगरूपमिति प्रत्यूचुरिति तस्यार्थः ॥५॥ तानि द्वादश हवींष्युद्दिशति आग्नेय इति ॥६॥ श्येनीं श्वेतवर्णाम् विचित्रगर्भां प्रज्ञातगर्भाम् । see 8. ५. २. १ ॥८॥ पृषतीं विन्दुयुक्तां विचित्रवर्णां गर्भिणीम् ॥९॥ शाखाभेदेन देवतान्तरसम्बन्धः ॥१०॥२॥५॥

तृतीये केशवपनोयातिरात्रस्य वैशेषिका धर्मा उच्यन्ते । पशुबन्धद्वयादनन्तरं केशवपनीयातिरात्रयागः कर्तव्यः । अभिषेचनीयसोमयागं कृत्वा संवत्सरपर्यन्तं केशवपनाकरणलक्षणं व्रतमाचर्यम् ततस्तद्व्रतविसर्जनार्थमेकः सोमयागः पौर्णमासीसुत्यः कार्यः स एव केशवपनीयातिरात्र उच्यते रात्रिमतीत्य वर्ततऽइत्यतिरात्रः अतिरात्रसंस्थया कार्य इत्यर्थः । विदुष्यात् (!) गतसारोऽपि भवेत् ॥१॥ केशवपनार्थमुपयुज्यमानः क्रियमाणः स्तोमः एकविंशादिस्तोमवान्यागः केशवपनीयः ॥२॥ तत्र सामगैर्गीयमानेषु स्तोत्रेषु चोदकेन प्रातःसवनादिषु त्रिवृदादिस्तोमप्राप्तौ तानपवदितुं विशेषं दर्शयति तस्यैकविंशमिति । प्रातःसवनमेकविंशस्तोमयुक्तं कर्तव्यम् माध्यन्दिनं सप्तदशस्तोमकम् अस्य सोमयागस्यातिरात्रसंस्था[ना]तृतीयसवनेऽग्निष्टोमवद्द्वादश स्तोत्राणि तत उत्तरं त्रीण्युक्थस्तोत्राणि एकं षोडशि-

स्तोत्रं रात्रिपर्यायस्तोत्राणि द्वादश तानि सर्वाण्यपि पञ्चदशस्तोमकानि कर्तव्यानि ॥ २ ॥ स्तोमत्रिवृत्प्रचारस्तु (तृत्यिप्रचारतस्तु Cod.) प्राचीमारोहेत्यत्र (४. १. ३.) दिक्समारोहणमन्त्र-व्याख्यावसरे दर्शितः किं च पूर्वदिवसरात्रिशेषे उत्तरदिवसस्योषःकाले यज्ञसंस्थापकमेकं चरमं स्तोत्रं तृतीयपर्यायस्यान्ते रथन्तरसाम्ना गातव्यम् तत्संधिस्तोत्रमित्युच्यते तत्स्तोत्रं त्रिवृत्स्तोत्रयुक्तं कार्यम् । एकविंशादवरोहणं (ण Cod.) त्रिवृत्पर्यन्तं यत्स्तोमकारणमुक्तं तत्सूर्यलोकादिक्रमाद्भूम्यवस्थानात्मना प्रशंसति एष एवैकविंश इति य एष तपति स एकविंशः सूर्य इत्यर्थः तस्मादपयुङ्क्ते अवरोहतीत्यर्थः सोऽवरुह्यावरुह्य (भोवरु° Cod.) त्रिवृद्रूपायामस्यां (अत्रवद्रू° Cod.) भूमिलक्षणायां प्रतिष्ठायां प्रतिष्ठितवान्भवति ॥ ४ ॥ माध्यन्दिनसवने रथन्तरं बृहत्साम वा पृष्ठस्तोत्रं प्रकृतौ विकल्पितम् अत्रैक्रं (°त्रैकं) नियमयति तस्य रथन्तरमिति । अस्य सोमयागस्यातिरात्रसंस्थात्वं प्रतिष्ठात्मना प्रशंसति अतिरात्र इति अतिरात्रसंस्थात्मना कृत एष क्रतुः प्रतिष्ठारूपः ॥ ५ ॥ अस्य क्रतोः केशावापव्रतविसर्जनार्थं (कशवा° Cod.) क्रियमाणत्वात्तद्धर्मे केशवापः कार्यः । तत्र कंचिद्विशेषं विधत्ते स वै न्येवेति स यज्ञमानो निवर्तयते केशान्निकृन्तेदेव न वपेत् वपनं नाम मुण्डनं तन्न कुर्यात् निवर्तनं कर्तनं तत्कुर्यात् । एषा केशकर्तनलक्षणा व्रतचर्या यावज्जीवनं (वन Cod.) कर्तव्या न केशमुण्डनं कार्यम् कदाचिदप्यनुपानद्भ्कोऽपादुकोऽस्यां (? चिदप्यपि उपानद्भो पादुके स्यां Cod.) भूमौ न प्रतितिष्ठति अवस्थानं न कुर्यात् ॥ ६ ॥ आसन्या अवरोहणसमयेऽपि उपानद्भौ पादुके उपमुञ्चेत इतस्ततः संचरणसमये रथं वा यानं वारोहेत् ॥ ७ ॥ ३ ॥ ५ ॥

समप्रधाने राजसूये सप्त सोमयागाः । तत्र पवित्राख्यसोमयागे विशेषाभावे स नोक्तः । अभिषेचनीयदशपेयकेशवपनीयातिरात्रेषु केषुचिद्वैशेषिका धर्मा उक्ताः । व्युष्टिद्विरात्रोऽग्निष्टोमातिरात्रः (त्रो Cod.) क्षत्रधृतिरिति सोमयागत्रयं केशवपनीयादनन्तरं कर्तव्यम् तेषां सोमयागविकृतित्वादग्निष्टोमवत्सर्वमङ्गजातं कर्तव्यम् तत्र विशेषाभावादत्र नोक्ताः । तदनन्तरकर्तव्या सौत्रामण्यभिधीयते तत्र पशुत्रयं (तस्पशु° Cod.) देवतासम्बन्धविशिष्टं विधत्ते प्येत इति । मल्हा (यृल्ला Cod.) मणिला (?) गलस्तनयुता अविर्मेषी । सुअपतराः सुखेन अपयितुमर्हाः ॥ १ ॥ अवयत् (!) वेतेः खादनार्थाच्छान्दसः शप् (शव् Cod.) ॥ ६ ॥ कुवित् व्यर्थं मम पुत्रमबधीदिति क्रुद्धः सन् इन्द्रवर्जितमेव सोमयागमाजह्रे अनुष्ठितवान् यथा सोम इन्द्रवर्जितः सुतोऽभिषुतः स्यात्तथेत्यर्थः ॥ ७ ॥ विषङ् ऋवतः । तस्मादिन्द्रः प्रायश्चित्तियोग्य आस प्रायो विनाशः तस्य चित्तिः संधानं यस्येति तथाविधो बभूव ॥ ८ ॥ अवाचः अधोमुखादपानद्वारात् उत्तरात्प्राणाद्गुह्यद्विद्वात् । कुवलकर्कन्धुबदराणि सूक्ष्मतरस्थूलमध्यपरिमाणानि बदरजातिफलानि । व्यार्ध्यत व्यृद्धो विहीनो बभूव ॥ १० ॥ सोमातिपूतः अपानद्वारादिभ्यः सुतसोमः । मङ्कुः मकि प्रतिबन्धे संचलद्गतिः (? सवल° Cod.) पङ्गुरिव । वसीयान्वसुमत्तरः ॥ ११ ॥ बतेति हर्षे ॥ १२ ॥ इयं राजसुयाद्बहिरपि प्रयोक्तव्या ॥ १३ ॥ नखिन्या कण्टकवत्या । अनुष्ठवति प्रेरितवान्भवति ॥ १९ ॥ उत्तरवेद्यामेकमग्निं तद्दक्षिणभागे उद्यते प्रदेशे एकम् ॥ २१ ॥ तां दर्भैः पावयेत् ॥ २२ ॥ होत्रा द्विवारं वषट्कारः कर्तव्यः अध्वर्युणापि द्विवारं हवनं कार्यम् हवनानन्तरं भक्षार्थमाहरेयुः । एतस्य होममन्वितरौ द्वौ परिस्तुद्रोमौ होतव्यौ एष परिस्तुद्रोमो दक्षिणेऽग्नाविति प्रागुक्तः ॥ २६ ॥ क्षतायाः सुत्रायाः शेषं हु-

कमवति शतच्छिद्रे नवच्छिद्रे वा कुम्भे आसिच्य तं कुम्भं दक्षिणस्याहवनीयस्योपरि शिक्ये कृत्वा स्रवन्तं सोमवदादिपितॄणां त्रिभिस्तृचैरुपतिष्ठेत । अथ कुम्भ शतवितृष्ण इति रुक्मब्राह्मणे व्याख्यातम् (४. १. १३.) ॥२७॥ आहवनीयस्योपरि उद्यते प्रदेशे परिस्तृत्प्रचारार्थं दक्षिणत स्थापितस्याग्नेरुपरि । विच्छरन्तीं कुम्भात्स्रवन्तीम् परिस्तृतम् । सोमदेवतायुतानां पितॄणां याज्यापुरोऽनुवाक्यारूपा उदीरतामवरऽउत्परास इत्याद्यास्तिस्र ऋचः बर्हिषदां पितॄणां बर्हिष्प्रदः पितर ऊत्यर्वागित्याद्यास्तिस्र ऋचः अग्निष्वात्तानां पितॄणामायन्तु नः पितरः सोम्यास इत्याद्यास्तिस्र ऋचः इति नवऽर्चः संहितायां क्रमेणाम्नाताः (११, ४१-५१. ५५-६०.) ताभिरुपस्थानं कर्तव्यम् ॥२८॥ अथ पशुपुरोडाशार्थं सावित्रवारुणैन्द्राख्यं हविस्त्रयं विधत्ते अथैतानीति ॥२९॥ कात्यायनस्य (१५, १०, १९-२१) अयमर्थः एषा सौत्रामणी सोमातिपूतस्यापि भैषज्यार्थं कर्तव्येति राजसूयाद्बहिः प्रयोगः तत्र पशुपुरोडाशार्थं विहितान्येतानि सावित्रादिहवींषि अनुयाजान्ते यष्टव्यानि तदा छिद्रपिधानार्थं पशुवपाचरणानन्तरमवदानात्पुराश्विनेन पुरोडाशेन यागः कर्तव्य इत्येकः शाखान्तरीयः पक्षः पशुवपाप्रचरणानन्तरमेवैतैः सावित्रादिभिर्हविर्भिर्यागः करणीयः तदा यज्ञपतिश्छिद्रपिधानार्थमेतेषामिष्टवादाश्विनहविर्निर्वापो न कर्तव्य इत्यपरः पक्षः । तत्र पूर्वपक्षमाह स यदि हैतयापीति । भिषज्येत्समाद्ध्यात् । तर्हि अनुयाजयागान्ते स्रुग्व्यूहनात्पुरस्तादेतैः सावित्रादिहविर्भिः प्रचरणं कर्तव्यम् पश्चाद्वाऽइति सोमः पश्चाद्वागेऽतिपूतः अत एतस्मिन्काले यज्ञस्य पश्चाद्वागे एतद्धविःप्रचरणेन (रक्षो-न Cod.) तं सोमातिपूतं पुरुषमपिहितवान्भवतीति तत्पक्षे हविरन्तरं विधत्ते आश्विनमु तह (!) इति तस्य प्रचारकालमाह अथ यदेति ॥३३॥ तं पक्षं निराकृत्य स्वमतं दर्शयति तदु तथेति । स्पष्टोऽर्थः ॥३४॥४॥५॥

The explanation of ५. ५. १-१४ (किलास्तृणुत) is wanting in AB.

तस्मिन्नर्थे श्रुतिर्याज्ञवल्क्यं प्रमाणयति इति ह स्माहेति इन्द्रोऽप्येतयेष्ट्या वृत्रस्य स्थानं त्रयीविद्याशयमाक्रिनत् तस्मात्परस्य स्थाननाशार्थमेतयाभिचारः कर्तव्यः ॥१४॥ अनयेष्ट्या कथं परकृताभिचारपरिहार इत्याशङ्क्य तत्कैमुतिकन्यायेन समर्थयते । किमु (किल Cod.) किमुत ॥१५॥ शतमानलक्षणमुक्तं पुरस्तात् (४. ३. २४.) । ब्रह्मा हि न प्रचरति हवनादिकमध्वर्युवर्गवन्न क्रोति न स्तुते उद्गातृवन्न स्तोत्रं प्रयुङ्क्ते न शंसति होतृवक्त्रं न पठति । हिरण्यं साधनं कृत्वान्यदन्नादिकमुपभुञ्जते न तु हिरण्यमेव भक्षयन्ति (भञ्ज° Cod.) अतो व्यवहारादिषु सुवर्णे दत्तेऽपि तस्य स्वरूपहानिर्नास्ति ॥१६॥ तिसृणां सवत्सानां भूयस्त्वम् होतुरपि नानामन्त्रपठनात् अतस्तासां होतृसम्प्रदानकत्वं युक्तम् ॥१७॥ वस्त्राणां सर्वशरीराक्रादकत्वाद्वासस्त्वम् अध्वर्योरपि यज्ञशरीरविस्तारकत्वमस्ति यज्ञस्य मात्रां विमिमीतऽउ त्व इति मन्त्रवर्णात् तत्र त्व एकोऽध्वर्युरिति यास्कवचनम् (निरु° १. ८.) ॥१८॥ त्रीणि शतमानानि तिस्रो धेनवः त्रीणि वासांसीति नव श्रुत्युक्तानि वत्ससहितानां पयस्विनीनां दानस्य सिद्धत्वात्तासां वत्सा अपि त्रय इति द्वादश । अग्नीध्रस्य ब्रह्मणा सह परिगणनाभावात्तद्दक्षिणां विहाय द्वादश दक्षिणाः गामग्नीधऽइति पृथग्दक्षिणाविधानात्तेन सह परिगणनपक्षे त्रयोदश भवन्ति संवत्सरस्यापि यथोक्तं चैत्रादयो (?°क्ता सौत्रदिस Cod.) मासा द्वादश यदा मलिम्लुचो भवति तदा त्रयोदश ॥१९॥५॥५॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये पञ्चमकाण्डव्याख्या समाप्ता ॥ ५ ॥ ॥

VARIOUS READINGS.

Adhyâya १. १. ४ वेद् यश्च AB. - १ ईश्वरा Sây. - १० विद्यात् Sây. - ३. ६ अपयन्ति A. - १४ Read: °नुवाक्या भवत्येका. - ४. ६ ककुभान् Sây. —

Adhyâya २. १. १ निश्रेणीम् Sây. - २. १० अह् A. - १३ यल्ये Sây. - ३. ६ and ७ यथेष्टि Sây. - ६ Read: प्रज्ञातमा°. - ४. ११ and १३ गावीधुक° Sây. —

Adhyâya ३. १. ७ तस्य श्वेतो Sây. - १० गवीधुकाः Sây. - ११ उद्गवेष्टितं Sây. - १३ परिवृत्ये ABC. - १३ परिवृत्तिः Sây. - १३ परिमूर्णी वेष्टितमुखी पीतपुच्छी वा पर्यारिणी रोगग्रस्ता marginal gloss in B. - १३ वात्सीः Sây. २. ३ सन् अयशो Sây. (against the accent). - ३. १ देवसुवां Sây. - ६ अतिष्ठाः Sây. - १ धर्मा उप° Sây. - १३ क्षीमा भव° ABC. क्षीमां भव° Sây. - २४ सम्भरति ॥ २४ ॥ काण्डस्यार्धं २३६ ॥ शतपथस्यार्धम् ॥ १२००० ॥ A. सम्भरति ॥ २४ ॥ शतपथस्यार्धं ॥ B. ॥ ३१२१ ॥ marginal gloss in B. In C. is no such indication of the Çatapatha's one half here ending, an indication, which I must remark is in direct conflict with the present bulk of the work, but which if it could be proved to be correct might contribute to trace some of its parts to a more modern origin, or at least to a later annexation to the whole, than the rest. - ५. ४ भिषिषिंचे AC. भिषिषिचे B. -

१८ °भिरभिषुणव° ABC. - २३ सञ्हत्य A. - २५ सञ्जन्वा C. सञ्जन्वा AB. - २६ परान्भिनत्ति Sây. (?) —

Adhyâya ४. ३. २ सम्भृतो भवति A. B sec. m. C. सम्भृतो भवति B prima manu. - ५ युनक्मीति AC. - २३ रथवाहणा° ABC. and thus also the mss. of Kâtyâyana. See पाणि° ८. ४. ८. - २४ °ग्निरुद्वृत्तो C. °ग्निरुद्वृतो A. B sec. m. and a marginal gloss at Kâty. १५. ६. २८. °ग्निरुधृतो B pr. m. from उधृ instead of उद्वृ. - ४. १ भरतानां C. - २३ पूर्वाग्निवाहौ Sây. - ५. १ सम्भृतो भवति ABC. - १ सोऽस्य गर्भं A. B pr. m. Sây. सोऽस्य भर्गं B sec. m. C. Bodl. Wils. 452. - १६ यथेष्टि Sây. see २. ३. ७. - °णाय ऋषभं A. B sec. m. —

Adhyâya ५. १. १ तस्य ऋषभो A. B sec. m. - १० यत्पृषतो गौर्विशो A. see ३. १. ६. - २. ३ शिशिरे युक्ता AB. (युक्ताश्चा Sây.). - ४ दक्षिणा ऋतू° A. B pr. m. - ३. १ विद्युत्यात् Sây. - ४. १ शुश्रयतरा A. - १८ स एतेषु C. - २४ We expect इडेडेषां. - २६ आहरन्ति ? (आहरेयुः Sây.). - ३५ हि न स्त्री A. रथं वहति A. - ५. ३ मा नु ABC. - ५ मा नु AB. - ६ यो योनि° B pr. m. C. - ६ संलुप्याह्नि° A. - १० त्रयो वेदस्तस्मै A. - ११ सूया A. - १५ यन्वे° तन्वे ABC. —

ओम् । असद्वाऽइदमग्रऽआसीत् । तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रे ऽसदासीत्तदाहुः के तऽऋषय इति प्राणा वाऽऋषयस्ते यत्पुरास्मात्सर्वस्मादिदमिङ्क्तः अनेन तपसारिषंस्तस्मादृषयः ॥१॥ स योऽयं मध्ये प्राणः । एष एवेन्द्रस्तानेष प्राणान्मध्यत इन्द्रियेणैन्द्ध यदैन्द्ध तस्मादिन्ध इन्धो ह वै तमिन्द्र इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तऽइङ्धाः सप्त नाना पुरुषानसृज्यन्त ॥२॥ तेऽब्रुवन् । न वाऽइत्थꣳ सन्तः शक्ष्यामः प्रजनयितुमिमान्त्सप्त पुरुषानेकं पुरुषं करवामेति तऽएतान्त्सप्त पुरुषानेकं पुरुषमकुर्वन्यद्ऊर्ध्वं नाभेस्तौ द्वौ समौब्जन्यदवाङ्नाभेस्तौ द्वौ पद्भ्यः पुरुषः पद्भ्यः पुरुषः प्रतिष्ठैक आसीत् ॥३॥ अथ यैतेषाꣳ सप्तानां पुरुषाणां श्रीः । यो रस आसीत्तमूर्ध्वꣳ समुदौह्यस्तदस्य शिरोऽभवद्यक्ष्रियꣳ समुदौह्यंस्तस्माक्ष्रिरस्तस्मिन्नेतस्मिन्प्राणा अश्रयन्त तस्माद्वैवैतक्ष्रिरोऽथ यत्प्राणा अश्रयन्त तस्माद्उ प्राणाः श्रियोऽथ यत्सर्वस्मिन्नश्रयन्त तस्माद्उ शरीरम् ॥४॥ स एव पुरुषः प्रजापतिरभवत् । स यः स पुरुषः प्रजापतिरभवदयमेव स योऽयमग्निश्चीयते ॥५॥ स वै सप्तपुरुषो भवति । सप्तपुरुषो ह्ययं पुरुषो यच्चत्वार आत्मा त्रयः पद्मपुष्कानि चत्वारो हि तस्य पुरुषस्यात्मा त्रयः पद्मपुष्कान्यथ यदेकेन पुरुषेणात्मानं वर्धयति तेन वीर्येणायमात्मा पद्मपुष्कान्युच्यक्षति ॥६॥ अथ यश्चितेऽग्निर्निधीयते । यैवैतेषाꣳ सप्तानां पुरुषाणाꣳ श्रीर्यो रसस्तमेतदूर्ध्वꣳ समुद्वक्ष्यन्ति तदस्यैतक्ष्रिरस्तस्मिन्नेतस्मिन्त्सर्वे देवाः श्रिता अत्र हि सर्वेभ्यो देवेभ्यो जुह्वति तस्माद्वैवैतक्ष्रिरः ॥७॥ सोऽयं पुरुषः प्रजापतिरकामयत । भूयात्स्यां प्रजायेयेति

सोऽश्राम्यत्स तपोऽतप्यत स श्रान्तस्तेपानो ब्रह्मैव प्रथममसृजत त्रयीमेव विद्याꣳ सैवास्मै प्रतिष्ठाभवत्तस्मादाहुर्ब्रह्मास्य सर्वस्य प्रतिष्ठेति तस्मादनूच्य प्रतितिष्ठति प्रतिष्ठा ह्येषा यद्ब्रह्म तस्यां प्रतिष्ठायां प्रतिष्ठितोऽतप्यत ॥ ८॥ सोऽपोऽसृजत । वाच एव लोकाद्वागेवास्य सासृज्यत सेदꣳ सर्वमाप्नोद्यदिदं किं च यदाप्नोत्तस्मादापो यदवृणोत्तस्माद्वाः ॥ ९॥ सोऽकामयत । आभ्योऽद्योऽधि प्रजायेयेति सोऽनया त्रय्या विद्यया सहापः प्राविशत्तत आण्डꣳ समवर्तत तदभ्यमृशदस्त्वित्यस्तु भूयोऽस्त्वित्येव तदब्रवीत्ततो ब्रह्मैव प्रथममसृज्यत त्रय्येव विद्या तस्मादाहुर्ब्रह्मास्य सर्वस्य प्रथमजमित्यपि हि तस्मात्पुरुषाद्ब्रह्मैव पूर्वमसृज्यत तदस्य तन्मुखमेवासृज्यत तस्मादनूचानमाहुरग्निकल्प इति मुखꣳ ह्येतदग्रेर्यद्ब्रह्म ॥ १०॥ अथ यो गर्भोऽन्तरासीत् । सोऽग्निरसृज्यत स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्निरग्रिर्ह वै तमग्निरित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यदभ्रुसंदारितमासीत्सोऽश्रुरभवदश्रुर्ह वै तमश्व इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यदरसदिव स रासभोऽभवदथ यः कपाले रसो लिप्त आसीत्सोऽजोऽभवदथ यत्कपालमासीत्सा पृथिव्यभवत् ॥ ११॥ सोऽकामयत । आभ्योऽद्योऽधीमां प्रजनयेयमिति ताꣳ संक्लिश्यापसु प्राविध्यत्तस्यै यः पराङ् रसोऽत्यक्षरत्स कूर्मोऽभवदथ यदूर्ध्वमुदौक्ष्यतेदं तर्ह्यदिदमूर्ध्वमद्योऽधि जायते सेयꣳ सर्वाप एवानुव्यैत्तदिदमेकमेव रूपꣳ समदृश्यताप एव ॥ १२॥ सोऽकामयत । भूय एव स्यात्प्रजायेतेति सोऽश्राम्यत्स तपोऽतप्यत स श्रान्तस्तेपानः फेनमसृजत सोऽवेदन्यद्वाऽएतद्रूपं भूयो वै भवति श्राम्याण्येवेति स श्रान्तस्तेपानो मृदꣳ शुष्कापमूषसिकतꣳ शर्करामश्मानमयो हिरण्यमोषधिवनस्पत्यमसृजत तेनेमां पृथिवीं प्राच्छादयत् ॥ १३॥ ता वाऽएता नव सृष्टयः । इयमसृज्यत तस्मादाहुस्त्रिवृदग्निरितीयꣳ ह्यग्निरस्यै हि सर्वोऽग्निश्चीयते ॥ १४॥ अभूद्वाऽइयं प्रतिष्ठेति । तद्भूमिरभवत्तामप्रथय-

त्सा पृथिव्यभवत्सेयꣳ सर्वा कृत्स्ना मन्यमानागायद्यद्गायत्तस्मादियं गायत्र्यथो ऽआङ्गिरग्निरिवास्यै पृष्ठे सर्वः कृत्स्नो मन्यमानोऽगायद्यद्गायत्तस्मादग्निर्गायत्र इति तस्माद्वै तेतय्यः सर्वः कृत्स्नो मन्यते गायति वैव गीते वा रमते ॥१५॥ ब्राह्मणम् ॥१॥ ॥

सोऽकामयत प्रजापतिः । भूय एव स्यात्प्रजायेतेति सोऽग्निना पृथिवीं मिथुनꣳ समभवत्तत आण्डꣳ समवर्तत तद्भ्यमृशत्पुष्यविति पुष्यतु भूयोऽस्त्वित्येव तद्ब्रवीत् ॥१॥ स यो गर्भोऽन्तरासीत् । स वायुरसृज्यताथ यद्श्रु संन्नरितमासीत्तानि वयाꣳस्यभवन्नथ यः कपाले रसो लिप्त आसीत्ता मरीचयोऽभवन्नथ यत्कपालमासीत्तदन्तरिक्षमभवत् ॥२॥ सोऽकामयत । भूय एव स्यात्प्रजायेतेति स वायुनान्तरिक्षं मिथुनꣳ समभवत्तत आण्डꣳ समवर्तत तद्भ्यमृशद्यशो बिभृक्षीति ततोऽसावादित्योऽसृज्यतैष वै यशोऽथ यद्श्रु संन्नरितमासीत्सोऽश्मा पृश्निरभवद्श्रुर्ह वै तमश्मेत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यः कपाले रसो लिप्त आसीत्ते रश्मयोऽभवन्नथ यत्कपालमासीत्सा द्यौरभवत् ॥३॥ सोऽकामयत । भूय एव स्यात्प्रजायेतेति स आदित्येन दिवं मिथुनꣳ समभवत्तत आण्डꣳ समवर्तत तद्भ्यमृशद्रेतो बिभृक्षीति ततश्चन्द्रमा असृज्यतैष वै रेतोऽथ यद्श्रु संन्नरितमासीत्तानि नक्षत्राण्यभवन्नथ यः कपाले रसो लिप्त आसीत्ता अवान्तरदिशोऽभवन्नथ यत्कपालमासीत्ता दिशोऽभवन् ॥४॥ स इमांल्लोकान्त्सृष्ट्वाकामयत । ताः प्रजाः सृजेय या मऽएषु लोकेषु स्युरिति ॥५॥ स मनसा वाचं मिथुनꣳ समभवत् । सोऽष्टौ द्रप्सान्गर्भ्यभवत्तेऽष्टौ वसवोऽसृज्यन्त तानस्यामुपादधात् ॥६॥ स मनसैव । वाचं मिथुनꣳ समभवत्स एकादश द्रप्सान्गर्भ्यभवत्तऽएकादश रुद्रा असृज्यन्त तानन्तरिक्षऽउपादधात् ॥७॥ स मनसैव । वाचं मिथुनꣳ समभवत्स द्वादश द्रप्सान्गर्भ्यभवत्ते द्वादशादित्या असृज्यन्त तान्दिव्युपादधात् ॥८॥ स मन-

सैव । वाचं मिथुनꣳ समभवत्स गर्भ्यभवत्स विश्वान्देवानसृजत तान्दिक्षूपादधात् ॥ १ ॥ अथोऽआङ्गः । अग्निमेव सृष्टं वसवोऽन्वसृज्यन्त तानस्यामुपादधाद्वायुꣳ रुद्रास्तानन्तरिक्षेऽआदित्यमादित्यास्तान्दिवि विश्वे देवाश्चन्द्रमसं तान्दिक्षूपादधादिति ॥ १० ॥ अथोऽआङ्गः । प्रजापतिरेवेमाँल्लोकान्त्सृष्ट्वा पृथिव्यां प्रत्यतिष्ठत्तस्माऽइमा ओषधयोऽन्नमपच्यन्त तदाश्नात्स गर्भ्यभवत्स ऊर्ध्वभ्य एव प्राणेभ्यो देवानसृजत येऽवाञ्चः प्राणास्तेभ्यो मर्त्याः प्रजा इत्यतो यतमथासृजत तथासृजत प्रजापतिस्त्वेवेदꣳ सर्वमसृजत यदिदं किं च ॥ ११ ॥ स प्रजाः सृष्ट्वा । सर्वमाज्रिमित्वा व्यस्रꣳसत तस्माद्धितयः सर्वमाज्रिमेति व्येव स्रꣳसते तस्माद्धिस्रस्तात्प्राणो मध्यत उदक्रामत्तस्मिन्नेनमुत्क्रान्ते देवा अजङ्गः ॥ १२ ॥ सोऽग्निमब्रवीत् । त्वं मा संधेह्यीति किं मे ततो भविष्यतीति त्वया माचक्षाते यो वै पुत्राणाꣳ राध्यते तेन पितरं पितामहं पुत्रं पौत्रमाचक्षते त्वया माचक्षाताऽअथ मा संधेह्यीति तथेति तमग्निः समदधात्तस्मादेतं प्रजापतिꣳ सन्तमग्निरित्याचक्षतऽआ ह वाऽएनेन पितरं पितामहं पुत्रं पौत्रं चक्षते य एवं वेद ॥ १३ ॥ तमब्रवीत् । कस्मिंस्त्वोपधास्यामीति हितऽएवेत्यब्रवीत्प्राणो वै हितं प्राणो हि सर्वेभ्यो भूतेभ्यो हितस्तस्यैदेनꣳ हितऽउपादधात्तस्मादाह्येपधास्याम्युपदधाम्युपाधामिति ॥ १४ ॥ तदाङ्गः । किꣳ हितं किमुपहितमिति प्राण एव हितं वागुपहितं प्राणे ह्येयं वागुपैव हिता प्राणास्त्वेव हितमङ्गान्युपहितं प्राणे ह्येमान्यङ्गान्युपैव हितानि ॥ १५ ॥ सोऽस्यैष चित्य आसीत् । चेतव्यो ह्यस्यासीत्तस्माच्चित्यश्चित्य उ ह्येवायं यजमानस्य भवति चेतव्यो ह्यस्य भवति तस्माद्वेव चित्यः ॥ १६ ॥ तदेता वाऽअस्य ताः । पञ्च तन्वो व्यस्रꣳसन्त लोम त्वङ्माꣳसमस्थि मज्जा ता ह्येताः पञ्च चितयस्तस्यत्पञ्च चितीश्चिनोत्येताभिरेवैनं तत्तनूभिश्चिनोति यच्चिनोति तस्माच्चितयः ॥ १७ ॥ स यः स प्रजापतिर्व्यस्रꣳसत । संवत्सरः सोऽथ या अस्यैताः पञ्च तन्वो

व्यश्नुवंस्तऽर्तवस्ते पञ्च वाऽऋतवः पञ्चैताश्चितयस्तद्यत्पञ्च चितीश्चिनोत्यृतुभिरे-वैनं तच्चिनोति यच्चिनोति तस्माच्चितयः ॥१८॥ स यः स संवत्सरः प्रजापतिर्व्य-श्नुवंस्तत । अयमेव स वायुर्योऽयं पवतेऽथ या अस्य ता ऋतवः पञ्च तन्वो व्य-श्नुवंस्तत दिशस्ताः पञ्च वै दिशः पञ्चैताश्चितयस्तद्यत्पञ्च चितीश्चिनोति दिग्भिरे-वैनं तच्चिनोति यच्चिनोति तस्माच्चितयः ॥१९॥ अथ यश्चितेऽग्निर्निधीयते । असौ स आदित्यः स एष एवैषोऽग्निश्चित एतावन्तु तद्यदेनमग्निः समदधात् ॥२०॥ ॥श-तम् ३४०० ॥॥ अथो आहुः । प्रजापतिरेव विस्रस्तो देवानब्रवीत्सं मा धत्तेति ते देवा अग्निमब्रुवंस्त्वयीमं पितरं प्रजापतिं भिषज्यामेति स वाऽअब्रवीदस्मिन्त्स-र्वस्मिन्नेव विशानीति तथेति तस्मादेतं प्रजापतिꣳ सन्तमग्निरित्याचक्षते ॥२७॥ तं देवा अग्नावाकुतिभिरभिषज्यन् । ते यां-यामाकुतिमजुह्वुः सा-सैनं पक्वेष्टका भूत्वाप्यपद्यत तद्यदिष्टात्समभवंस्तस्मादिष्टकास्तस्मादग्निरिष्टकाः पचत्याकुतीरेवै-नास्तत्कुर्वन्ति ॥२२॥ सोऽब्रवीत् । यावद्यावद्वै जुहुथ तावत्तावन्म कं भवतीति तद्यदस्माऽइष्टे कमभवत्तस्माद्वेवेष्टकाः ॥२३॥ तद्व स्माहोक्ताद्यः । य एव यजु-ष्मतीर्भूयसीरिष्टका विद्यात्सोऽग्निं चिनुयाद्भूय एव तत्पितरं प्रजापतिं भिषज्यती-ति ॥२४॥ अथ ह स्माह ताण्ड्यः । क्षत्रं वै यजुष्मत्य इष्टका विशो लोकम्पृणा अत्ता वै क्षत्रियोऽन्नं विड्यत्र वाऽअत्तुरन्न भूयो भवति तद्राष्ट्रꣳ समृद्धं भवति तदेधते तस्माल्लोकम्पृणा एव भूयसीरुपदध्यादित्येतदह तयोर्वचोऽन्या ह्येवात स्थितिः ॥२५॥ स एष पिता पुत्रः । यदेषोऽग्निमसृजत तेनैषोऽग्नेः पिता यदेत-मग्निः समदधात्तेनैतस्याग्निः पिता यदेष देवानसृजत तेनैष देवानां पिता यदेतं देवाः समदधुस्तेनैतस्य देवाः पितरः ॥२६॥ उभयꣳ ह्येतद्भवति । पिता च पुत्रश्च प्रजापतिश्चाग्निश्चाग्निश्च प्रजापतिश्च प्रजापतिश्च देवाश्च देवाश्च प्रजापतिश्च य एवं वेद ॥२७॥ स उपदधाति । तया देवतयेति वाग्वै सा देवताङ्गिरस्वदिति प्राणो

वाऽअङ्गिरा ध्रुवा सीदेति स्थिरा सीदेत्येतद्यो प्रतिष्ठिता सीदेति वाचा चैवैनमेतत्प्राणेन च चिनोति वाग्वाऽअग्निः प्राण इन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्चिनोतीन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्चिनोति ॥२८॥ तदाहुः । कस्मादस्याऽअग्निश्चीयत ऽइति यत्र वै सा देवता व्यस्रꣳसत तदिमामेव रसेनानु व्यक्षरत्तं यत्र देवाः समस्कुर्वंस्तदेनमस्याऽएवाधि समभरꣳस्तस्मादेवेष्टकेयमेवेयꣳ श्चाग्निरस्यै हि सर्वोऽग्निश्चीयते सेयं चतुःस्रक्तिर्दिशो श्चस्यै स्रक्तयस्तस्माच्चतुःस्रक्तय इष्टका भवन्तीमाꣳ श्चानु सर्वा इष्टकाः ॥२९॥ तदाहुः । यदेवमेकेष्टकोऽथ कथं पञ्चेष्टक इतीयं न्वेव प्रथमा मृन्मयीष्टका तश्यत्किं चात्र मृन्मयमुपदधात्येकैव सेष्टकाथ यत्पशुशीर्षाण्युपदधाति सा पञ्चिष्टकाथ यद्रुक्मपुरुषाऽउपदधाति यद्धिरण्यशकलैः प्रोक्षति सा हिरण्येष्टकाथ यत्स्रुचाऽउपदधाति यदुलूखलमुसले याः समिध आदधाति सा वानस्पत्येष्टकाथ यत्पुष्करपर्णमुपदधाति यत्कूर्मं यद्दधि मधु घृतं यत्किं चात्रान्नमुपदधाति सैवान्नं पञ्चमीष्टकैवमु पञ्चेष्टकः ॥३०॥ तदाहुः । कतरत इष्टकायाः शिर इति यत उपस्पृश्य यजुर्वदतीत्यु हैकऽआहुः स स्वयमातृण्णाया एवार्धादुपस्पृश्य यजुर्वदत्तथो ह्यस्यैताः सर्वाः स्वयमातृण्णामभ्यावृत्ता भवन्तीति न तथा कुर्यादङ्गानि वाऽअस्यैतानि पङ्क्तꣳषं यदिष्टका यथा वाऽअङ्गेऽङ्गे पर्वन्पर्वञ्छिरः कुर्यात्तादृक्तद्यो वाव चितेऽग्निर्निधीयते तदेवैतासाꣳ सर्वासाꣳ शिरः ॥३१॥ तदाहुः । कति पशवोऽग्नाऽउपधीयन्तऽइति पञ्चेति न्वेव ब्रूयात्पञ्च क्षेत्रान्यशूनुपदधाति ॥३२॥ अथोऽएक इति ब्रूयात् । अविरितीयं वाऽअविरियꣳ श्चेमाः सर्वाः प्रजा अवतीयमु वाऽअग्निरस्यै हि सर्वोऽग्निश्चीयते तस्मादेक इति ब्रूयात् ॥३२॥ अथो द्वाविति ब्रूयात् । अवीऽइतीयं चासौ चेमे श्चेमाः सर्वाः प्रजा अवतो यन्मृदियं तश्यदापोऽसौ तन्मृच्चापश्चेष्टका भवन्ति तस्माद्द्वाविति ब्रूयात् ॥३३॥ अथो गौरि-

ति ब्रूयात् । इमे वै लोका गौर्यद्धि किं च गह्तीमांस्तल्लोकान्गह्तीमऽउ लोका एषोऽग्निश्चितस्तस्माद्गौरिति ब्रूयात् ॥३४॥ तदाहुः । कस्मै कामायाग्निश्चीयत ऽइति सुपर्णो मा भूत्वा दिवं वक्षादित्यु हैकऽआहुर्न तथा विद्यादेतद्वै रूपं कृत्वा प्राणाः प्रजापतिरभवन्नेतद्रूपं कृत्वा प्रजापतिर्देवानसृजतैतद्रूपं कृत्वा देवा अमृता अभवंस्तद्यद्देवैतेन प्राणा अभवन्यत्प्रजापतिर्यद्देवास्तद्देवैतेन भवति ॥३५॥ ब्राह्मणम् ॥२॥

प्रजापतिर्वाऽइदमग्रऽआसीत् । एक एव सोऽकामयत स्यां प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्माच्छ्रान्तात्तेपानादापोऽसृज्यन्त तस्मात्पुरुषात्तप्तादापो जायन्ते ॥१॥ आपोऽब्रुवन् । क्व वयं भवामेति तप्यध्वमित्यब्रवीत्ता अतप्यन्त ताः फेनमसृजन्त तस्मादपां तप्तानां फेनो जायते ॥२॥ फेनोऽब्रवीत् । क्वाहं भवानीति तप्यस्वेत्यब्रवीत्सोऽतप्यत स मृदमसृजतैतद्वै फेनस्तप्यते यदप्स्वाविष्टमानः प्लवते स यदोपहन्यते मृदेव भवति ॥३॥ मृदब्रवीत् । क्वाहं भवानीति तप्यस्वित्यब्रवीत्सातप्यत सा सिकता असृजतैतद्वै मृत्तप्यते यदेनां विकृषन्ति तस्माद्यद्यपि सुमात्स्ने विकृषन्ति सैकतमिवैव भवत्येतावन्नु तद्यत्क्वाहं भवानि क्वाहं भवानीति ॥४॥ सिकताभ्यः शर्करामसृजत । तस्मात्सिकताः शर्करैवान्ततो भवति शर्कराया अश्मानं तस्माच्छर्कराश्मैवान्ततो भवत्यश्मनोऽयस्तस्मादश्मनोऽयो धमन्त्ययसो हिरण्यं तस्मादयो बभ्रुध्मात७ हिरण्यसंकाशमिवैव भवति ॥५॥ तद्यदसृज्यताक्षरत् । तद्यदक्षरत्तस्मादक्षरं यदष्टौ कृत्वोऽक्षरत्सैवाष्टाक्षरा गायत्र्यभवत् ॥६॥ अभूद्वाऽइयं प्रतिष्ठेति । तद्वै मिरभवत्तामप्रथयत्सा पृथिव्यभवत्तस्यामस्यां प्रतिष्ठायां भूतानि च भूतानां च पतिः संवत्सरायादीक्षन्त भूतानां पतिर्गृहपतिरासीदुषाः पत्नी ॥७॥ तद्यानि तानि भूतानि । ऋतवस्तेऽथ यः स भूतानां पतिः संवत्सरः सोऽथ या सोषाः पत्न्यौषसी सा तानीमानि भूतानि च भू-

तानां च पतिः संवत्सरऽउषसि रेतोऽसिञ्चत्स संवत्सरे कुमारोऽजायत सोऽरोदीत् ॥८॥ तं प्रजापतिरब्रवीत् । कुमार किꣳ रोदिषि यद्भूमात्तपसोऽधि जातोऽसीति सोऽब्रवीदनपहतपाप्मा वाऽअस्म्यहितनामा नाम म धेह्यीति तस्मात्पुत्रस्य जातस्य नाम कुर्यात्पाप्मानमेवास्य तदपहत्यापि द्वितीयमपि तृतीयमभिपूर्वमेवास्य तत्पाप्मानमपहन्ति ॥९॥ तमब्रवीद्रुद्रोऽसीति । तद्यदस्य तन्नामाकरोदग्निस्तद्रूपमभवदग्निर्वै रुद्रो यद्रोदीत्तस्माद्रुद्रः सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१०॥ तमब्रवीत्सर्वोऽसीति । तद्यदस्य तन्नामाकरोदापस्तद्रूपमभवन्नापो वै सर्वोऽद्भ्यो ह्येꣳ सर्वं जायते सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥११॥ तमब्रवीत्पशुपतिरसीति । तद्यदस्य तन्नामाकरोदोषधयस्तद्रूपमभवन्नोषधयो वै पशुपतिस्तस्माद्यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१२॥ तमब्रवीदुग्रोऽसीति । तद्यदस्य तन्नामाकरोद्वायुस्तद्रूपमभवद्वायुर्वाऽउग्रस्तस्माद्यदा बलवद्वात्युग्रो वातीत्याहुः सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१३॥ तमब्रवीदशनिरसीति । तद्यदस्य तन्नामाकरोद्विद्युत्तद्रूपमभवद्विद्युद्वाऽअशनिस्तस्माद्यं विद्युदित्यशनिरबधीदित्याहुः सोऽब्रवीज्ज्यायान्वा अतोऽस्मि धेह्येव मे नामेति ॥१४॥ तमब्रवीद्भवोऽसीति । तद्यदस्य तन्नामाकरोत्पर्जन्यस्तद्रूपमभवत्पर्जन्यो वै भवः पर्जन्याद्धीदꣳ सर्वं भवति सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१५॥ तमब्रवीन्महान्देवोऽसीति । तद्यदस्य तन्नामाकरोच्चन्द्रमास्तद्रूपमभवत्प्रजापतिर्वै चन्द्रमाः प्रजापतिर्वै महान्देवः सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१६॥ तमब्रवीदीशानोऽसीति । तद्यदस्य तन्नामाकरोदादित्यस्तद्रूपमभवदादित्यो वाऽईशान आदित्यो ह्यस्य सर्वस्येष्टे सोऽब्रवीदेतावान्वाऽअस्मि मा मेतः परो नाम धा इति ॥१५॥ तान्येतान्यष्टावग्निरूपाणि । कुमारो न-

वमः सैवाग्नेस्त्रिवृत्ता ॥१८॥ यद्वेवाष्टावग्निरूपाणि । अष्टाक्षरा गायत्री तस्मादाहुर्गायत्रोऽग्निरिति सोऽयं कुमारो रूपाण्यनुप्राविशन्न वाऽअग्निं कुमारमिव पश्यन्त्येतान्येवास्य रूपाणि पश्यन्त्येतानि हि रूपाण्यनुप्राविशत् ॥१९॥ तमित्सं-वत्सर एव चिनुयात् । संवत्सरेऽनुब्रूयाद्ध्रुयोरित्यु हैकऽआहुः संवत्सरे वै तद्रेतोऽसिञ्चत्स संवत्सरे कुमारोऽजायत तस्माद्ध्रुयोरेव चिनुयाद्ध्रुयोरनुब्रूयादिति संवत्सरे वेव चिनुयात्संवत्सरेऽनुब्रूयाद्यद्धावरेतः सिक्तं तदेव जायते तत्ततो विक्रियमाणमेव वर्धमानꣳ शेते तस्मात्संवत्सरऽएव चिनुयात्संवत्सरेऽनुब्रूयात्तस्य चितस्य नाम करोति पाप्मानमेवास्य तदपहन्ति चित्रनामानं करोति चित्रोऽसीति सर्वाणि हि चित्राण्यग्निः ॥२०॥ ब्राह्मणम् ॥३॥ प्रथमोऽध्यायः [३६.] ॥ ॥

प्रजापतिरग्निरूपाण्यभ्यध्यायत् । स योऽयं कुमारो रूपाण्यनुप्रविष्ट आसीत्तमन्वैक्षत्सोऽग्निरवेदनु वै मा पिता प्रजापतिरिक्षति हन्त तद्रूपमसानि यन्मऽएष न वेदेति ॥१॥ स एतान्पञ्च पशूनपश्यत् । पुरुषमश्वं गामविमजं यदपश्यत्तस्मादेते पशवः ॥२॥ स एतान्पञ्च पशून्प्राविशत् । स एते पञ्च पशवोऽभवत्तमु वै प्रजापतिरन्वेवैक्षत् ॥३॥ स एतान्पञ्च पशूनपश्यत् । यदपश्यत्तस्मादेते पशवस्तेषेतमपश्यत्तस्माद्वैवैते पशवः ॥४॥ स ऐक्षत । इमे वाऽअग्निरिमानेवात्मानमभिसंस्करवै यथा वाऽअग्निः समिद्धो दीप्यतऽएवमेषां चक्षुर्दीप्यते यथाग्नेर्धूम उद्यतऽएवमेषामूष्मोद्यते यथाग्निरभ्राकिꣳ दहत्येवं बप्सति यथाग्नेर्भस्म सीदत्येवमेषां पुरीषꣳ सीदतीमे वाऽअग्निरिमानेवात्मानमभिसंस्करवाऽइति तान्नाना देवताभ्य आलिप्सत वैश्वकर्मणं पुरुषं वारुणमश्वमैन्द्रमृषभं त्वाष्ट्रमविमाग्नेयमजꣳ ॥५॥ स ऐक्षत । नाना वाऽइदं देवताभ्य आलिप्सेऽग्नेर्वꣳ रूपाणि कामये हन्तैनानग्निभ्यः कामायालभाऽइति तानग्निभ्यः कामायालभत तद्यदग्निभ्य इति ब्रूयान्न ह्यग्निरूपाण्यभ्यध्यायदथ यत्कामायेति कामेन ह्यालभत तानाप्रीतान्पर्यग्नि-

कृतानुदीचो नीत्वा समज्ञपयत् ॥ ६ ॥ स ऐक्षत । या वै श्रीरभ्यधासिषमिमास्ताः शीर्षसु कृत्त शीर्षाण्येवोपदधा इति स शीर्षाण्येवोत्कृत्योपाधत्ताथेतराणि कुसिन्धान्यप्सु प्राप्लावयदजेन यज्ञꣳ समस्थापयन्नेन्मे यज्ञो विकृष्टोऽसदित्यात्मा वै यज्ञो नेन्मेऽयमात्मा विकृष्टोऽसदित्येतेन पशुनेष्ट्वा तत्प्रजापतिरपश्यद्यथैतस्याग्नेरुक्तं न पर्येत् ॥ ७ ॥ स ऐक्षत । यमिममात्मानमप्सु प्रापिप्लवं तमन्विच्छानीति तमन्वैच्छत्यदेषामप्सु प्रविद्धानां प्रत्यतिष्ठत्ता अपः समभरद्यथ यदस्यां तां मृदं तदुभयꣳ सम्भृत्य मृदं चापश्चेष्टकामकरोत्तस्मादेतदुभयमिष्टका भवति मृच्चापश्च ॥ ८ ॥ स ऐक्षत । यदि वाऽइदमित्थमेव सदात्मानमभिसंस्करिष्ये मर्त्य कुणापोऽनपक्रुतपाप्मा भविष्यामि कृत्तेतदग्निना पचानीति तदग्निनापचत्तदेनदमृतमकरोदेतद्वै कृविरमृतं भवति यदग्निना पचन्ति तस्मादग्निनेष्टकाः पचत्यमृता एवैनास्तत्कुर्वन्ति ॥ ९ ॥ तद्यदिष्ट्वा पशुनापश्यत् । तस्मादिष्टकास्तस्मादिष्ट्वैव पशुनेष्टकाः कुर्यादनिष्टका ह ता भवन्ति याः पुरा पशोः कुर्वन्त्यथो ह तदन्यदेव ॥ १० ॥ तद्यास्ताः श्रियः । एतानि तानि पशुशीर्षाण्यथ यानि तानि कुसिन्धान्येतास्ताः पञ्च चितयस्तद्यत्पशुशीर्षाण्युपधाय चितीश्चिनोत्येतैरेव तद्ऋषिभिरेतानि कुसिन्धानि संदधाति ॥ ११ ॥ तऽएते सर्वे पशवो यदग्निः । तस्मादग्नौ पशवो रमन्ते पशुभिरिव तत्पशवो रमन्ते तस्माद्यस्य पशवो भवन्ति तस्मिन्नग्निराधीयतेऽग्निर्ह्येष यत्पशवस्ततो वै प्रजापतिरग्निरभवत् ॥ १२ ॥ तद्वैकऽआहुः । अत्रैवैतैः सर्वैः पशुभिर्यजेत यद्वाऽएतैरत्र सर्वैः प्रजापतिरयजत तदेवाग्नेरुक्तं पर्येष्यत्तद्यदेतैरत्र सर्वैर्यजेत तदेवाग्नेरुक्तं परीयादिति न तथा कुर्यादविदानां तदितादियादथो पथस्तदियादथो किं ततः सम्भरेदेतानि वाऽएतत्कुसिन्धान्येताश्चितीः सम्भरति तस्मात्तथा न कुर्यात् ॥ १३ ॥ यद्वैवैतान्पशूनालभते । आयतनमेवैतदग्नये करोति न ह्यनायतने कश्चन रमतेऽन्नं वाऽआयतनं तदेतत्पुरस्तान्निदधाति तदेनं पश्यन्नग्निरुपावर्तते ॥ १४ ॥

पुरुषोऽश्वो गौरविरजो भवन्ति । एतावन्तो वै सर्वे पशवोऽन्नं पशवस्तद्यावदन्नं तदेतत्पुरस्तान्निदधाति तदेनं पश्यन्नग्निरुपावर्तते ॥१५॥ पञ्च भवन्ति । पञ्च क्षेत्रेऽग्नया यदेताश्चितयस्तेभ्य एतत्पञ्चायतनानि निदधाति तदेनं पश्यन्नग्निरुपावर्तते ॥१६॥ तद्यदग्निभ्य इति । बह्वो क्षेत्रेऽग्नयो यदेताश्चितयोऽथ यत्कामायेति यथा तं काममाप्नुयाद्यजमानो यत्काम एतत्कर्म कुरुते ॥१७॥ पुरुषं प्रथममालभते । पुरुषो हि प्रथमः पशूनामथाश्वं पुरुषञ्च क्यन्वश्वोऽथ गामञ्च क्यनु गौरथाविं गाञ्च क्यन्वविरथाजमविञ्च क्यन्वजस्तदेनान्यथापूर्वं यथाश्रेष्ठमालभते ॥१८॥ तेषां विषमा रशनाः स्युः । पुरुषस्य वर्षिष्ठाथ ह्रसीयस्यथ ह्रसीयसी तद्यथारूपं पशूनाञ्च रशनाः करोत्यपापवस्यसाय सर्वास्त्वेव समाः स्युः सर्वाः सदृश्यः सर्वे क्षेत्रे समाः सर्वे सदृशा अग्नयो क्युच्यन्तेऽन्नञ्च क्युच्यन्ते तेन समास्तेन सदृशाः ॥१९॥ तदाहुः । कथमस्यैषोऽग्निः पञ्चेष्टकः सर्वः पशुधारब्धो भवतीति पुरोडाशकपालेषु न्वेवाप्यतऽइयं प्रथमा मृन्मयीष्टकाथ यत्पशुमालभते तेन पञ्चेष्टकाप्यतेऽथ यद्वपामभितो हिरण्यशकलौ भवतस्तेन हिरण्येष्टकाप्यतेऽथ यदिध्मो यूपः परिधयस्तेन वानस्पत्येष्टकाप्यतेऽथ यदाज्यं प्रोक्षणीः पुरोडाशस्तेनान्नं पञ्चमीष्टकाप्यतऽएवमु ह्यस्यैषोऽग्निः पञ्चेष्टकः सर्वः पशुधारब्धो भवति ॥२०॥ तेषां चतुर्विंशतिः सामिधेन्यः । चतुर्विंशत्यर्धमासो वै संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥२१॥ यद्वेव चतुर्विंशतिः । चतुर्विंशत्यक्षरा वै गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥२२॥ यद्वेव चतुर्विंशतिः । चतुर्विंशो वै पुरुषो दश कृत्या अङ्गुलयो दश पाद्याश्चवार्यङ्गानि पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥२३॥ उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । प्राणो गायत्र्यात्मा त्रिष्टुप्प्राणमेवास्य गायत्रीभिः समिन्द्धेऽआत्मानं त्रिष्टुब्भिर्मध्ये त्रिष्टुभो भवत्यभि-

तो गायत्र्यो मध्ये क्वयमात्माभितः प्राणा भूयसीः पुरस्ताद्गायत्रीरन्वाह कनीयसीरुपरिष्टाद्बृहतीर्वाऽसो ह्येमे पुरस्तात्प्राणाः कनीयाꣳस उपरिष्टात् ॥२४॥ सोऽन्वाह । समास्त्वाग्ऽऋतवो वर्धयन्विति प्रजापतिं विस्रस्तं यत्राग्निः समदधात्तमब्रवीद्या मत्संमिताः सामिधेन्यस्ताभिर्मा समित्स्वेति ॥२५॥ स एता अपश्यत् । समास्त्वाग्ऽऋतवो वर्धयन्विति समाश्च त्वाग्ऽऋतवश्च वर्धयन्वित्येतत्संवत्सरा ऋषयो यानि सत्येति संवत्सराश्च त्वर्ऽषयश्च सत्यानि च वर्धयन्वित्येतत्सं दिव्येन दीदिहि रोचनेनेत्यसौ वाऽआदित्यो दिवꣳ रोचनं तेन संदीदिह्योत्येतद्विश्वा आभाहि प्रदिशश्चतस्र इति सर्वा आभाहि प्रदिशश्चतस्र इत्येतत् ॥२६॥ ता एता एकव्याख्यानाः । एतमेवाभि यथैतमेव संस्कुर्यादितꣳ संदध्यादेतं जनयेत्ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिꣳ समैन्द्ध तेन प्राजापत्याः ॥२७॥ द्वादशाप्रियः । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदाप्रीणाति ॥२८॥ यद्वेव द्वादश । द्वादशाक्षरा वै जगतीयं वै जगत्यस्याꣳ ह्येदꣳ सर्वं जगदियमु वाऽअग्निरस्यै हि सर्वोऽग्निश्चीयते यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदाप्रीणाति ॥२९॥ यद्वेव द्वादश । द्वादशाक्षरा वै जगती जगती सर्वाणि छन्दाꣳसि सर्वाणि छन्दाꣳसि प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदाप्रीणाति ॥३०॥ ता एता ऊर्धा अस्य समिधो भवन्तीति । प्रजापतिं विस्रस्तं यत्राग्निः समदधात्तमब्रवीद्या मत्संमिता आप्रियस्ताभिर्माप्रीणीह्योति ॥३१॥ स एता अपश्यत् । ऊर्धा अस्य समिधो भवन्तीत्यूर्धा ह्येतस्य समिद्धस्य समिधो भवन्त्यूर्धा शुक्रा शोचीꣳष्यग्नेरित्यूर्धानि ह्येतस्य शुक्राणि शोचीꣳष्यर्चीꣳषि भवन्ति द्युमत्तमेति वीर्यवत्तमेत्येतत्सुप्रतीकस्येति सर्वतो वाऽअग्निः सुप्रतीकः सूनोरिति यदेनं जनयति तेनास्यैष सूनुः ॥३२॥ ता एता एकव्याख्यानाः । एतमेवाभि यथैतमेव संस्कुर्यादितꣳ संदध्यादेतं जनयेत्ता

आग्नेय्यः प्राजापत्या यद्ग्निरुपश्यत्तेनाग्नेय्यो यत्प्रजापतिमाप्रीणात्तेन प्राजापत्याः ॥३३॥ ता विषमा विषमपदाः । विषमाक्षरा विषमाणि हि छन्दाꣳस्यथो यान्यस्याध्यात्ममङ्गानि विषमाणि तान्यस्यैताभिराप्रीणाति ॥३४॥ वैश्वानरः पशुपुरोडाशः । वैश्वानरो वै सर्वेऽग्नयः सर्वेषामग्नीनामुपाप्त्यै ॥३५॥ यद्वै वैश्वानरः । ऋतवो हैते यदेताश्चितयोऽग्नयो वाऽऋतव ऋतवः संवत्सरः संवत्सरो वैश्वानरो यदग्नय इति स्यादिति तद्वेचयेद्द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानर आग्नेय्यो याज्यानुवाक्या अग्निरूपाणामुपाप्त्यै कामवत्यः कामानामुपाप्त्यै ॥३६॥ तद्वैके । इत्येवैतानि पशुशीर्षाणि विच्छोपदधत्युभयेनैते पशव इति ते ह ते मर्त्याः कुणपाः सम्भवत्यनाप्रीतानि हि तानि तद्ध तथाषाढः सौश्रोमतेयस्योपदधुः स ह क्षिप्रꣳएव ततो ममार ॥३७॥ हिरण्मयान्यु वैके कुर्वन्ति । अमृतेष्टका इति वदन्तस्ता ह ता अनृतेष्टका न हि तानि पशुशीर्षाणि ॥३८॥ मृन्मयान्यु वैके कुर्वन्ति । उत्सन्ना वाऽएते पशवो यद्वै किंचोत्सन्नमियं तस्य सर्वस्य प्रतिष्ठा तथ्यत्रैते पशवो गतास्तत एनानधि सम्भराम इति न तथा कुर्याद्यो वाऽएतेषामावृतं च ब्राह्मणं च न विद्यात्तस्यैतऽउत्सन्नाः स्युः स एतानेव पञ्च पशूनालभेत यावदस्य वशः स्यात्तान्वैतान्प्रजापतिः प्रथम आलेभे श्यापर्णाः सायकायनोऽन्तमोऽथ ह स्मैतानेवान्तरेणालभन्तेऽथैतर्हीमौ द्वाविवालभ्येते प्राजापत्यश्च वायव्यश्च तयोरुतो ब्राह्मणमुद्यते ॥३९॥ ब्राह्मणम् ॥४ [२. १.] ॥ प्रथमः प्रपाठकः । कण्डिकासंख्या११० ॥॥

प्राजापत्यं चरुका आलभन्ते । प्रजापतिरग्निं चित्वाग्निरभवत्तद्यदेतमालभते तदेवाग्नेरन्तं पर्येतीति ॥१॥ श्यामो भवति । द्वयानि वै श्यामस्य लोमानि शुक्लानि च कृष्णानि च द्वन्द्वं मिथुनं प्रजननं तदस्य प्राजापत्यꣳ रूपं तूपरो भवति तूपरो हि प्रजापतिः ॥२॥ तस्यैकविꣳशतिः सामिधेन्यः । द्वादश मासाः पञ्चर्तु-

वस्त्रय इमे लोका असावादित्य एकविꣳश एष प्रजापतिः प्रजापतिरग्निर्यावान-ग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥३॥ यद्वैवैकविꣳशतिः । एकविꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविꣳशः पुरुषः प्रजापतिः प्र-जापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥४॥ उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । तासामुक्तो बन्धुरुक्तम्वेवान्वृचꣳ हिरण्यगर्भवत्याघारमाघारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापतिरग्निर्द्वादशाप्रियस्तासामुक्तो बन्धुरुक्तम्वेवान्वृच प्राजापत्यः पशुपुरोडाशो य एव पशोर्बन्धुः स पुरोडाशस्य द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः कद्वत्यो याज्यानुवाक्याः को हि प्रजापतिः ॥५॥ अथैतं वायवे नियुवते । शुल्कं तूपरमालभते प्रजापतिः प्रजाः सृष्ट्वानुव्यैक्ष-त तस्यात्यानन्देन रेतः परापतत्सोऽज्ञः शुल्कस्तूपरो लप्सुह्यभवद्रसो वै रेतो यावानु वै रसस्तावानात्मा तद्यदेतमालभते तदेवाग्नेरन्नं पर्येति शुल्को भवति शुल्कꣳ हि रेतस्तूपरो भवति तूपरꣳ हि रेतो वायवे भवति प्राणो वै वायुर्नि-युवते भवत्युदानो वै नियुतः प्राणोदानावेवास्मिन्नेतद्दधाति ॥६॥ यद्वैवैतं वायवे नियुवते । शुल्कं तूपरमालभते प्रजापतिं विस्रस्तं यत्र देवाः समस्कुर्वन्त्स यो ऽस्मात्प्राणो मध्यत उदक्रामत्तमस्मिन्नेतेन पशुनादधुस्तथैवास्मिन्नयमेतद्दधाति वा-यवे भवति प्राणो वै वायुर्नियुवते भवत्युदानो वै नियुतः प्राणोदानावेवास्मि-न्नेतद्दधाति शुल्को भवति शुल्को हि वायुस्तूपरो भवति तूपरो हि वायुः ॥७॥ तस्य सप्तदश सामिधेन्यः । सप्तदशो वै संवत्सरो द्वादश मासाः पञ्चर्तवः संव-त्सरः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥८॥ यद्वैव सप्तदश । सप्तदशो वै पुरुषो दश प्राणाश्चतस्रोऽङ्गान्यात्मा पञ्चदशो ग्रीवाः षोडश्यः शिरः सप्तदश पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥९॥ उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । तासामुक्तो

बन्धुरुक्तम्वेवान्वृचं द्वादशाप्रियस्तासामुक्तो बन्धुरुक्तम्वेवान्वृचं प्राजापत्यः पशुपुरोडाशोऽत्रो स काम उपात इति ह स्माह माहित्थिर्यं चरकाः प्राजापत्ये पशावाकुरिति ॥१०॥ यद्वेव वायव्यः पशुर्भवति । प्राजापत्यः पशुपुरोडाशोऽर्धꣳ ह प्रजापतेर्वायुरर्धं प्रजापतिस्तथ्यद्वुभौ वायव्यौ स्यातामुभौ वा प्राजापत्यावर्धꣳ हैवास्य कृतꣳ स्यान्नार्धमथ यद्वायव्यः पशुर्भवति प्राजापत्यः पशुपुरोडाशस्तेन हैवैतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति ॥११॥ यद्वेव वायव्यः पशुर्भवति । प्राजापत्यः पशुपुरोडाशः प्रजापतिं विस्रस्तं यत्र देवाः समस्कुर्वन्स योऽस्मात्प्राणो मध्यत उदक्रामत्तमस्मिन्नेतेन पशुनाद्धुरथास्यैतेन पुरोडाशेनात्मानꣳ समस्कुर्वन्स यत्प्राजापत्यो भवति प्रजापतिर्वा आत्मा द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः कद्वत्यौ याज्यानुवाक्ये को हि प्रजापतिः ॥१२॥ तथ्यद्वपां पुरस्ताज्जुहोति । य एवायं पुरस्तात्प्राणस्तमस्मिन्नेतद्दधात्यथ यदेतेन मध्यतश्चरन्ति मध्यतो ह्ययमात्माथ यद्धविषोपरिष्टाच्चरन्ति य एवायमुपरिष्टात्प्राणस्तमस्मिन्नेतद्दधाति शुल्कवत्यो याज्यानुवाक्याः स्युः शुल्कद्रूपाणामुपाप्त्यै नियुवत्यो यदेव नियुवद्रूपं तस्योपाप्त्यै ॥१३॥ तदु वाऽआहुः । वपाया एव शुल्कवत्यौ स्यातामिताविद्वै पशौ शुल्कं यद्वपाशुल्कवत्यौ नियुवत्यौ हविषो यदेव नियुवद्रूपं तस्योपाप्त्या ऽइति ॥१४॥ यद्वैवैतं पशुमालभते । एतस्मिन्ह पशौ सर्वेषां पशूनाꣳ रूपं यत्तूपरो लप्सुदी तत्पुरुषस्य रूपं तूपरो हि लप्सुदी पुरुषो यत्तूपरः केसरवांस्तदश्वस्य रूपं तूपरो हि केसरवानश्वो यदष्टाशफस्तद्गो रूपमष्टाशफो हि गौरथ यदस्यावेरिव शफास्तद्वे रूपं यदजस्तदजस्य तथ्यदेतमालभते तेन हैवास्यैते सर्वे पशवः आलब्धा भवन्त्यतो यतमदस्य कर्मोपकल्प्येतैते वा पञ्च पशव एष वा प्राजापत्य एष वा नियुवतीयः ॥१५॥ तं पौर्णमास्यामालभेत । अमावास्यायामालभेतेत्यु हैकऽआहुरसौ वै चन्द्रः प्रजापतिः स एताꣳ रात्रिमिह वसति तथ्-

थोपतिष्ठन्तमालभेतैवं तदिति ॥ १६ ॥ तद्वै पौर्णमास्यामेव । असौ वै चन्द्रः पशुस्तं देवाः पौर्णमास्यामालभन्ते यत्रैनं देवा आलभन्ते तदेनमालभाऽइति तस्मात्पौर्णमास्यां यद्वेव पौर्णमास्यां पौर्णमासी ह वाव प्रथमा व्युवास तस्माद्वेव पौर्णमास्याम् ॥ १७ ॥ तद्वै फाल्गुन्यामेव । एषा ह संवत्सरस्य प्रथमा रात्रिर्यत्फाल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वा मुखत एव तत्संवत्सरमारभते ॥ १८ ॥ स वाऽइष्ट्वैव पौर्णमासेन । अथ पशुमालभेत पौर्णमासेन वाऽइन्द्रो वृत्रं पाप्मानꣳ हत्वापहतपाप्मैतत्कर्मारभत तथैवैतद्यजमानः पौर्णमासेनैव वृत्रं पाप्मानꣳ हत्वापहतपाप्मैतत्कर्मारभते ॥ ११ ॥ तद्वाऽउपाꣳशु भवति । एतद्वैतैः प्रजापतिः पशुभिः कर्मैषेष तद्वात्रानड्वेवैवासानिरुक्तमिव तस्मादुपाꣳशु ॥ २० ॥ यद्वेवोपाꣳशु । प्राजापत्यं वाऽएतत्कर्म प्रजापतिꣳ ह्येतेन कर्मणारभतेऽनिरुक्तो वै प्रजापतिः ॥ २१ ॥ यद्वेवोपाꣳशु । रेतो वाऽअत्र यज्ञ उपाꣳशु वै रेतः सिच्यते वपा पशुपुरोडाशो ह्यविरेतावान्हि पशुः ॥ २२ ॥ अष्टकायामुखाꣳ सम्भरति । प्राजापत्यमेतद्यदष्टका प्राजापत्यमेतत्कर्म यदुखा प्राजापत्यऽएव तद्यत्प्राजापत्यं कर्म करोति ॥ २३ ॥ यद्वेवाष्टकायाम् । पर्वैतत्संवत्सरस्य यदष्टका पर्वैतद्यद्यदुखा पर्वण्येव तत्पर्व करोति ॥ २४ ॥ यद्वेवाष्टकायाम् । अष्टका वाऽउखा निर्धिद्वाऽउद्धी तिरश्ची रात्रा तच्चतुश्चतस्र ऊर्धास्तदष्टावष्टकायामेव तदष्टकां करोति ॥ २५ ॥ ॥ शतम्३५०० ॥ ॥ अमावास्यायां दीक्षते । अमावास्यायै वाऽअधि यज्ञस्तायते यतो यज्ञस्तायते ततो यज्ञं जनयानीति ॥ २६ ॥ यद्वेवामावास्यायाꣳ । रेतो वाऽएतद्भूतमात्मानꣳ सिञ्चत्युखायां योनौ यद्दीक्षते तस्माऽएतं पुरस्ताल्लोकं करोति यद्दीक्षितो भवति तं कृतं लोकमभि ज्ञायते तस्मादाकुः कृतं लोकं पुरुषोऽभि ज्ञायतऽइति ॥ २७ ॥ स यत्कनीयः संवत्सराद्दीक्षितः स्यात् । अलोका इष्टका उपदध्यादेष्टका लोकानतिरिच्येरन्नथ यद्बहवो लोकान्कृत्वेष्टका नानूपदध्या-

छ्लोका इष्टका अतिरिच्येरन्नथ यदमावास्यायां दीक्षित्वामावास्यायां क्रीणाति तद्यावत्तमेव लोकं करोति तावतीरिष्टका उपदधात्यथास्यापूर्यमाणपक्षे सर्वोऽग्निश्चीयते ॥२८॥ तदाहुः । यद्यावत्य एतस्याग्नेरिष्टकास्तावन्ति क्रयेऽहोरात्राणि सम्पद्यन्तेऽथ यान्यूर्ध्वानि क्रयादहानि कथमस्य ते लोका अनूपदधिता भवन्तीति यद्वाऽअमावास्यायां दीक्षित्वामावास्यायां क्रीणाति तद्यावत्तमेव लोकं करोति तावतीरिष्टका उपदधात्यथ यान्यूर्ध्वानि क्रयादहानि तस्मिन्नवकाशेऽर्धर्युरग्निं चिनोति को हि चिनुयान्न च सोऽवकाशः स्याद्यावन्ति वै संवत्सरस्याहोरात्राणि तावत्य एतस्याग्नेरिष्टका उप च त्रयोदशो मासस्त्रयोदशो वाऽएष मासो यान्यूर्ध्वानि क्रयादहानि तद्या अमूस्त्रयोदशस्य मास इष्टकास्ताभिरस्य ते लोका अनूपदधिता भवन्ति तत्समा लोकाश्चेष्टकाश्च भवन्ति ॥२९॥ एतद्वै यैव पथमा पौर्णमासी । तस्यां पशुमालभते या प्रथमाष्टका तस्यामुखाꣳ सम्भरति या प्रथमामावास्या तस्यां दीक्षतऽएतद्वै यान्येव संवत्सरस्य प्रथमान्यहानि तान्यस्य तदारभते तानि च तदाप्नोत्यथातः सम्पदेव ॥३०॥ तदाहुः । कथमस्यैतत्कर्म संवत्सरमग्निमाप्नोति कथꣳ संवत्सरेणाग्निना सम्पद्यतऽइत्येतेषां वै पञ्चानां पशूनां चतुर्विꣳशतिः सामिधेन्यो द्वादशाप्रियस्तत्षट्त्रिꣳशदेकादशानुयाजा एकादशोपयजस्तद्दष्टापञ्चाशत् ॥३१॥ ततो याष्टाचत्वारिꣳशत् । साष्टाचत्वारिꣳशदक्षरा जगतीयं वै जगत्यस्याꣳ खीदꣳ सर्वं जगदियमु वाऽअग्निरस्यै हि सर्वोऽग्निश्चीयते यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥३२॥ यद्वैवाष्टाचत्वारिꣳशत् । अष्टाचत्वारिꣳशदक्षरा वै जगती जगती सर्वाणि छन्दाꣳसि सर्वाणि छन्दाꣳसि प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥३३॥ अथ यानि दश । सा दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥३४॥ वपा पशुपुरोडाशः । तत्षष्टिः षष्टिर्मासस्याहोरात्राणि

तन्मासमाप्नोति मास ऋतुमाप्नोत्यृतुः संवत्सरं तत्संवत्सरमग्निमाप्नोति ये च संवत्सरे कामा अथ यदतोऽन्यद्यदेव संवत्सरेऽन्नं तत्तत् ॥३५॥ अथैतस्य प्राजापत्यस्य । एकविꣳशतिः सामिधेन्यो द्वादशाप्रियस्तत्त्रयस्त्रिꣳशदेकादशानुयाजा एकादशोपयज तत्पञ्चपञ्चाशद्वपा पशुपुरोडाशो हविस्तदष्टापञ्चाशत्स योऽष्टापञ्चाशति कामोऽत्रैव तमाप्नोति द्वावाघारौ तत्षष्टिः स यः षष्ट्यां कामोऽत्रैव तमाप्नोत्यथ यदतोऽन्यद्यदेव संवत्सरेऽन्नं तत्तत् ॥३६॥ अथैतस्य नियुत्वतीयस्य । सप्तदश सामिधेन्यो द्वादशाप्रियस्तदेकां न त्रिꣳशदेकादशानुयाजा एकादशोपयजस्तदेकपञ्चाशद्वपा पशुपुरोडाशो हविस्तच्चतुष्पञ्चाशद्धावाघारौ द्वौ स्विष्टकृतौ तदष्टापञ्चाशत्स योऽष्टापञ्चाशति कामोऽत्रैव तमाप्नोति वनस्पतिश्च वसाहोमश्च तत्षष्टिः स यः षष्ट्यां कामोऽत्रैव तमाप्नोत्यथ यदतोऽन्यद्यदेव संवत्सरेऽन्नं तत्तदेवमु हास्यैतत्कर्म संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यते ॥३७॥ तदाहुः । नैतस्य पशोः समिष्टयजूꣳषि जुहुयान्न हृदयशूलेनावभृथमभ्यवेयादारम्भो वाऽएषोऽग्नेः पशुर्व्यवसर्गो देवतानाꣳ समिष्टयजूꣳषि सꣳस्थावभृथो नेदारम्भे देवता व्यवसृजानि नेयजꣳ सꣳस्थापयानीति स वै समेव स्थापयेदेतेन पशुनेष्ट्वा तत्प्रजापतिरपश्यद्यथैतस्याग्नेरक्तं न पर्यैत्तस्मात्सꣳस्थापयेद्यदेव सꣳस्थापयति प्राणा एष पशुस्तस्य यदन्तरियात्प्राणस्य तदन्तरियाद्यदु वै प्राणस्यान्तरियात्तत एवं म्रियेत तस्मात्समेव स्थापयेदथातो व्रतानामेव ॥३८॥ तदाहुः । नैतेन पशुनेष्ट्वोपरि शयीत न माꣳसमश्नीयान्न मिथुनमुपेयात्पूर्वदीक्षा वाऽएष पशुरनवक्लृप्तं वै तद्यद्दीक्षित उपरि शयीत यन्माꣳसमश्नीयाद्यन्मिथुनमपेयादिति नेत्त्वेवैषा दीक्षा नेव हि मेखलास्ति न कृष्णाजिनमिष्टकां वाऽएतां कुरुते तस्मादु काममेवोपरि शयीतैतदु सर्वमन्नं यदेते पशवस्तदस्यात्राप्तमारब्धं भवति तद्यानि कानि चामधुनोऽशनानि तेषामस्य सर्वेषां कामाशनं यदि लभेत मिथुनं तु नोपेयात्पुरा

मैत्रावरुण्यै पयस्यायै तस्योपरि बन्धुः ॥ ३१ ॥ तदाहुः । दध्यादेतस्मिन्यज्ञे दक्षिणां नेन्मेऽयं यज्ञोऽदक्षिणोऽसद्ब्रह्मणऽआदिष्टदक्षिणां दध्याद्ब्रह्मा वै सर्वो यज्ञस्तदस्य सर्वो यज्ञो भिषज्यायितो भवतीति न तथा कुर्यादिष्टकां वाऽएतां कुरुते तस्यैष्टकायामिष्टकायां दध्यात्तादृक्तदमुर्ह्येव दध्याद्यदस्योपकल्पेत ॥ ४० ॥ ब्राह्मणम् ॥ १ [२. २.] ॥ ॥

एतद्वै देवा अब्रुवन् । चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तेषां चेतयमानानां प्रजापतिरिमां प्रथमाꣳ स्वयमातृण्णां चितिमपश्यत्तस्मात्तां प्रजापतिनोपदधाति ॥ १ ॥ तमग्निरब्रवीत् । ऽपाक्मायानीति केनेति पशुभिरिति तथेति पश्विष्टकया क्रꣳ तदुवाचैषा वाव पश्विष्टका यदूर्वेष्टका तस्मात्प्रथमायै स्वयमातृण्णायाऽअनन्तर्हिता दूर्वेष्टकोपधीयते तस्माद्स्याऽअनन्तर्हिता ओषधयोऽनन्तर्हिताः पशवोऽनन्तर्हितोऽग्निरनन्तर्हितो ह्येष एतयोपैत् ॥ २ ॥ तेऽब्रुवन् । चेतयध्वमेवेति चितिमिच्छतेति वाव तदब्रुवन्नित ऊर्धमिच्छतेति तेषां चेतयमानानामिन्द्राग्नी च विश्वकर्मा चान्तरिक्षं द्वितीयाꣳ स्वयमातृण्णां चितिमपश्यंस्तस्मात्तामिन्द्राग्निभ्यां च विश्वकर्मणा चोपदधाति ॥ ३ ॥ तान्वायुरब्रवीत् । ऽपाक्मायानीति केनेति दिग्भिरिति तथेति दिश्याभिर्ह्रꣳ तदुवाच तस्माद्द्वितीयायै स्वयमातृण्णायाऽअनन्तर्हिता दिश्या ऽपधीयन्ते तस्माद्दन्तरिक्षादनन्तर्हिता दिशोऽनन्तर्हितो वायुरनन्तर्हितो ह्येष एताभिरुपैत् ॥ ४ ॥ तेऽब्रुवन् । चेतयध्वमेवेति चितिमिच्छतेति वाव तदब्रुवन्नित ऊर्धमिच्छतेति तेषां चेतयमानानां परमेष्ठी दिवं तृतीयाꣳ स्वयमातृण्णां चितिमपश्यत्तस्मात्तां परमेष्ठिनोपदधाति ॥ ५ ॥ तमसावादित्योऽब्रवीत् । ऽपाक्मायानीति केनेति लोकम्पृणयेति तथेत्येष वाव लोकम्पृणात्मना ह्रैव तदुवाच तस्मात्तृतीया स्वयमातृण्णानन्तर्हिता लोकम्पृणायाऽऽपधीयते तस्मादसावादित्योऽनन्तर्हितो दिवोऽनन्तर्हितो ह्येष एतयोपैत् ॥ ६ ॥ तदेता वाव

षड् देवताः । इदꣳ सर्वमभवन्यदिदं किं च ते देवाश्चर्षयश्चाब्रुवन्निमा वाव षड् देवता इदꣳ सर्वमभूवन्नुप तज्जानीत यथा वयमिहाप्यसामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिहेति वाव तदब्रुवंस्तदिहत यथा वयमिहाप्यसामेति तेषां चेतयमानानां देवा द्वितीयां चितिमपश्यन्नृषयश्चतुर्थीम् ॥७॥ तेऽब्रुवन् । उप वयमायामेति केनेति यदेषु लोकेषूपेति तथेति तद्यदूर्ध्वं पृथिव्या अर्वाचीनमन्तरिक्षात्तेन देवा उपायंस्तदेषा द्वितीया चितिरथ यदूर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तेनऽर्षय उपायंस्तदेषा चतुर्थी चितिः ॥८॥ ते यदब्रुवन् । चेतयध्वमिति चितिमिहेति वाव तदब्रुवन्यच्चेतयमाना अपश्यंस्तस्माच्चितयः ॥९॥ प्रजापतिः प्रथमां चितिमपश्यत् । प्रजापतिरेव तस्या आर्षेयं देवा द्वितीयां चितिमपश्यन्देवा एव तस्या आर्षेयमिन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यꣳस्तऽएव तस्या आर्षेयमृषयश्चतुर्थीं चितिमपश्यन्नृषय एव तस्या आर्षेयं परमेष्ठी पञ्चमीं चितिमपश्यत्परमेष्ठ्येव तस्या आर्षेयꣳ स यो हैतदेवं चितीनामार्षेयं वेदार्षेयवत्यो हास्य बन्धुमत्यश्चितयो भवन्ति ॥१०॥ ब्राह्मणम् ॥ २ [२. ३.] ॥ द्वितीयोऽध्यायः [३७.] ॥ ॥

एतद्वै देवा अब्रुवन् । चेतयध्वमिति चितिमिहेति वाव तदब्रुवंस्तेषां चेतयमानानाꣳ सवितैतानि सावित्राण्यपश्यत्सवितापश्यत्तस्मात्सावित्राणि स एतामष्टागृहीतामाकृतिमजुहोत्ताꣳ कृत्वेमामष्टधाविहितामषाढामपश्यत्पुरैव सृष्टाꣳ सतीम् ॥१॥ ते यदब्रुवन् चेतयध्वमिति चितिमिहेति वाव तदब्रुवन्यच्चेतयमाना अपश्यंस्तस्माच्चितिराकृतिर्वै यज्ञो यदिष्ट्वापश्यत्तस्मादिष्टका ॥२॥ तां वाऽएताम् । एकाꣳ सतीमष्टागृहीतामष्टाभिर्यजुर्भिर्जुहोति तस्मादियमेका सत्यष्टधाविहिता ॥३॥ तामूर्ध्वामुदूहन्जुहोति । इमाꣳ तदूर्ध्वाꣳ ऋषिरुदूहात्ति तस्मादियमूर्ध्वा ऋषिः ॥४॥ ताꣳ संततां जुहोति । एतद्वै देवा अबिभयुर्यद्वै न इह रक्षाꣳसि नाष्ट्रा नान्ववियुरिति तऽएतꣳ संततहोममपश्यन्रक्षसां नाष्ट्राणामनन्ववायनाय त-

स्मात्संततां जुहोति ॥५॥ यद्वैवैतामाकूतिं जुहोति । सवितैषोऽग्निस्तमेतयाकूत्या पुरस्तात्प्रीणाति तमिष्ट्वा प्रीतोऽथैनꣳ सम्भरति तद्यदेतया सवितारं प्रीणाति तस्मात्सावित्राणि तस्माद्वाऽएतामाकूतिं जुहोति ॥६॥ यद्वैवैतामाकूतिं जुहोति । सवितैषोऽग्निस्तमेतयाकूत्या पुरस्ताद्रेतो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यदेतया सवितारꣳ रेतो भूतꣳ सिञ्चति तस्मात्सावित्राणि तस्माद्वाऽएतामाकूतिं जुहोति ॥७॥ स्रुवश्चात्र स्रुक्च प्रयुज्येते । वाग्वै स्रुक्प्राणः स्रुवो वाचा च वै प्राणेन चैतद्ग्रे देवाः कर्मान्वैच्छंस्तस्मात्स्रुवश्च स्रुक्च ॥८॥ यद्वै व स्रुवश्च स्रुक्च । यो वै स प्रजापतिरासीदेष स स्रुवः प्राणो वै स्रुवः प्राणः प्रजापतिरथ या सा वागासीदेषा सा स्रुग्योषा वै वाग्योषा स्रुगथ यास्ता आप आयन्वाचो लोकादेतास्ता यामेतामाकूतिं जुहोति ॥९॥ ताꣳ संततां जुहोति । संतता हि ता आप आयन्नथ यः स प्रजापतिस्त्रय्या विद्यया सहापः प्राविशदेष स यैरेतद्यजुर्भिर्जुहोति ॥१०॥ तद्यानि त्रीणि प्रथमानि । इमे ते लोका अथ यच्चतुर्थं यजुस्त्रयी सा विद्या जगती सा भवति जगती सर्वाणि छन्दाꣳसि सर्वाणि छन्दाꣳसि त्रयी विद्याथ यानि चत्वार्युत्तमानि दिशस्तानीमे च वै लोका दिशश्च प्रजापतिरयैषा त्रयी विद्या ॥११॥ स जुहोति । युञ्जानः प्रथमं मन इति प्रजापतिर्वै युञ्जानः स मन एतस्मै कर्मणेऽयुङ्क्त तद्यन्मन एतस्मै कर्मणेऽयुङ्क्त तस्मात्प्रजापतिर्युञ्जानः ॥१२॥ तत्वाय सविता धिय इति । मनो वै सविता प्राणा धियोऽग्नेर्ज्योतिर्निरचाय्येत्यग्नेर्ज्योतिर्दृष्ट्वेत्येतत्पृथिव्याऽअध्याभरदिति पृथिव्यै ह्येनदध्याभरति ॥१३॥ युक्तेन मनसा वयमिति । मन एवैतदेतस्मै कर्मणे युङ्क्ते न ह्ययुक्तेन मनसा किं चन सम्प्रति शक्नोति कर्तुं देवस्य सवितुः सवऽइति देवेन सवित्रा प्रसूता इत्येतत्स्वर्ग्याय शक्त्येति यथैतेन कर्मणा स्वर्गं लोकमियादेवमेतदाह शक्त्येति शक्त्या हि स्वर्गं लोकमेति ॥१४॥ युक्ताय सविता देवानिति । मनो वै

सविता प्राणा देवाः स्वर्यतो धिया दिवमिति स्वर्गꣳ हैनांलोकं यतो धियैतस्मै कर्मणे युयुजे बृहज्ज्योतिः करिष्यत इत्यसौ वाऽआदित्यो बृहज्ज्योतिरेष ऽएषो ऽग्निरेतम्वेते संस्करिष्यन्तो भवन्ति सविता प्रसुवाति तानिति सवितृप्रसूता एतत्कर्म करवन्नित्येतत् ॥१५॥ युञ्जते मन उत युञ्जते धिय इति । मनश्चैवैतत्प्राणांश्चैतस्मै कर्मणे युङ्क्ते विप्रा विप्रस्येति प्रजापतिर्वै विप्रो देवा विप्रा बृहतो विपश्चित इति प्रजापतिर्वै बृहन्विपश्चिद्धि होत्रा दधऽइति यद्वाऽएष चीयते तदेष होत्रा विधत्ते चिते स्वेतस्मिन्होत्रा अधिविधीयन्ते वयुनाविदित्येष हीदं वयुनमविन्ददेक इदित्येको ह्येष इदꣳ सर्वं वयुनमविन्दन्मही देवस्य सवितुः परिष्टुतिरिति महती देवस्य सवितुः परिष्टुतिरित्येतत् ॥१६॥ युञ्जे वां ब्रह्म पूर्व्यं नमोभिरिति । प्राणो वै ब्रह्म पूर्व्यमन्नं नमस्तत्तदेषेवाङ्कृतिरन्नमेतयैव तदाङ्कृत्यैतेनान्नेन प्राणानेतस्मै कर्मणे युङ्क्ते वि श्लोक एतु पथ्येव सूरेरिति यथोभयेषु देवमनुष्येषु कीर्तिश्लोको यजमानस्य स्यादेवमेतदाह शृण्वन्तु विश्वेऽअमृतस्य पुत्रा इति प्रजापतिर्वाऽअमृतस्तस्य विश्वे देवाः पुत्रा आ ये धामानि दिव्यानि तस्थुरितीमे वै लोका दिव्यानि धामानि तष्वऽएषु लोकेषु देवास्तानेतदाह ॥१७॥ यस्य प्रयाणमन्वन्यऽइयुरिति । प्रजापतिर्वाऽएतदग्रे कर्माकरोत्तत्ततो देवा अकुर्वन्देवा देवस्य महिमानमोजसेति यज्ञो वै महिमा देवा देवस्य यज्ञं वीर्यमोजसेत्येतद्यः पार्थिवानि विममे स एतश इति यद्वै किं चास्यां तत्पार्थिवं तदेष सर्वं विमिमीते रश्मिभिर्ऋक्वनदभ्यवतनोति रजाꣳसि देवः सविता महित्वनेतीमे वै लोका रजाꣳस्यसावादित्यो देवः सविता तानेष महिम्ना विमिमीते ॥१८॥ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति । असौ वाऽआदित्यो देवः सविता यज्ञो भगस्तमेतदाह प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति दिव्यो गन्धर्वः केतपूः केतं नः पुनात्वित्यसौ वाऽआदित्यो दिव्यो गन्धर्वोऽन्नं केतोऽन्नपूरन्नं नः

पुनात्वित्येतद्वाचस्पतिर्वाचं नः स्वदयतिति वाग्वाऽइदं कर्म प्राणो वाचस्पतिः प्राणो न इदं कर्म स्वदयत्वित्येतत् ॥ ११ ॥ इमं नो देव सवितर्यज्ञं प्रणयेति । असौ वाऽआदित्यो देवः सविता यदु वाऽएष यज्ञियं कर्म प्रणयति तदुनार्तꣳ स्वस्त्युदृचमश्नुते देवाव्यमिति यो देवानवदित्येतत्सखिविदꣳ सत्राजितं धनजितꣳ स्वर्जितमिति य एतत्सर्वं विन्दादित्येतदृचेत्यृचा स्तोमꣳ समर्धय गायत्रेण रथन्तरं बृहद्वायत्रवर्तनीति सामानि स्वाहेति यजूꣳषि सैषा त्रयी विद्या प्रथमं जायते यथैवादोऽमुत्राजायतैवमथ यः सोऽग्निरसृज्यतैष स योऽत ऊर्ध्वमग्निश्चीयते ॥ २० ॥ तान्येतान्यष्टौ सावित्राणि । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्गतो भूतꣳ सिञ्चति तानि नव भवन्ति स्वाहाकारो नवमो नव दिशो दिशोऽग्निर्नव प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्गतो भूतꣳ सिञ्चति तानि दश भवन्त्याकृतिर्दशमी दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥ २१ ॥ एतस्यामाकृत्याꣳ कृतायाम् । अग्निर्देवेभ्य उदक्रामत्ते देवा अब्रुवन्यशुर्वाऽअग्निः पशुभिरिममन्विच्छाम स स्वाय रूपायाविर्भविष्यतीति तं पशुभिरन्वैच्छन्स स्वाय रूपायाविरभवत्तस्माद्वै तत्पशुः स्वाय रूपायाविर्भवति गौर्वा गवेऽश्वो वाश्वाय पुरुषो वा पुरुषाय ॥ २२ ॥ तेऽब्रुवन् । यद्यु सर्वैरन्वेषिष्यामो यातयामा अनुपजीवनीया भविष्यन्ति यद्युऽअसर्वैरसर्वमनुवित्स्याम इति तऽएतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपश्यन्नासभं गोश्चाविश्च तद्यदेतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपश्यंस्तस्मादिष एकः सन्द्विरेताः ॥ २३ । अनड्वापुरुषं पुरुषात् । एष वाऽअनड्वापुरुषो यो न देवानवति न पितॄन्न मनुष्यांस्तत्सर्वैरेव पशुभिरन्वैच्छतो यातयामा अनुपजीवनीया अभवन् ॥ २४ ॥ त्रिभिरन्विच्छति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्विच्छति ते पञ्च सम्पदा भवन्ति पञ्चचितिको

ऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्र्यावानग्र्यावत्यस्य मात्रा तावत्तद्भवति ॥२५॥ ते मौञ्जीभिरभिधानीभिरभिहिता भवन्ति । अग्निर्देवेभ्य उदक्रामत्स मुञ्जं प्राविशत्तस्मात्स सुषिरस्तस्माद्वेवान्तरतो धूमरक्त-इव सैषा योनिरग्नेर्यन्मुञ्जोऽग्निमि पशवो न वै योनिर्गर्भ छिनस्त्यक्षिऽसायै योनेर्वै जायमानो जायते योनेर्जायमानो जायाताऽइति ॥२६॥ त्रिवृतो भवन्ति । त्रिवृद्ध्यग्निरश्वाभिधानीकृता भवन्ति सर्वतो वाऽअश्वाभिधानी मुखं परिशेते सर्वतो योनिर्गर्भं परिशेते योनिरूपमेतत्क्रियते ॥२७॥ ते प्राञ्चस्तिष्ठन्ति । अश्वः प्रथमोऽथ रासभोऽथाज एवꣳ ह्येतेऽनुपूर्वं यद्वै तदश्रु सद्धरितमासीदेष सोऽश्वोऽथ यत्तद्रसदिवैष रासभोऽथ यः स कपाले रसो लिप्त आसीदेष सोऽजोऽथ यत्तत्कपालमासीदेषा सा मृण्मयेतदाहरिष्यन्तो भवन्त्येतेभ्यो वाऽएष ऋषेभ्योऽग्रेऽसृज्यत तेभ्य एवैनमेतज्जनयति ॥२८॥ ते दक्षिणतस्तिष्ठन्ति । एतद्वै देवा अबिभयुर्यद्वै नो यज्ञं दक्षिणतो रक्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतं वज्रमपश्यन्नमुमेवादित्यमसौ वाऽआदित्य एषोऽश्वस्तऽएतेन वज्रेण दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञमतन्वत तथैवैतद्यजमान एतेन वज्रेण दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञं तनुते ॥२९॥ दक्षिणत आहवनीयो भवति । उत्तरत एषाग्निरुपशेते वृषा वाऽआहवनीयो योषाग्निर्दक्षिणातो वै वृषा योषामुपशेतेऽरन्निमात्रेऽरन्निमात्राद्धि वृषा योषामुपशेते ॥३०॥ सा वैणवी स्यात् । अग्निर्देवेभ्य उदक्रामत्स वेणुं प्राविशत्तस्मात्स सुषिरः स एतानि वर्माण्यभितोऽकुरुत पर्वाण्यननुप्रज्ञानाय यत्र-यत्र निदद्राह तानि कल्माषाण्यभवन् ॥३१॥ सा कल्माषी स्यात् । सा ह्याग्नेयी यदि कल्माषीं न विन्देदप्यकल्माषी स्यात्सुषिरा तु स्यात्सैवाग्नेयी सैषा योनिरग्नेर्यद्वेणुरग्निरियं मृन्न वै योनिर्गर्भं छिनस्त्यक्षिऽसायै योनेर्वै जायमानो जायते योनेर्जायमानो जायाताऽइति ॥३२॥ प्रादेशमात्री स्यात् ।

प्रादेशमात्रꣳ ह्रीदमभि वाग्वदत्यरत्निमात्री वेव भवति बाहुर्वाऽअरत्निर्बाहुनो वै वीर्यं क्रियते वीर्यसंमितेव तद्भवति ॥ ३३ ॥ अन्यतःह्नुत्स्यात् । अन्यतरतो ह्रीदं वाचः ह्नुतमुभयतःह्नुत्वेव भवत्युभयतो ह्रीदं वाचः ह्नुतं यदनया दैवं च वदति मानुषं चाथो यत्सत्यं चानृतं च तस्मादुभयतःह्नुत् ॥ ३४ ॥ यद्वेवोभयतःह्नुत् । अतो वाऽअग्नेर्वीर्यं यतोऽस्यै ह्नुतमुभयत एवास्यामेतद्वीर्यं दधाति ॥ ३५ ॥ यद्वेवोभयतःह्नुत् । एतद्वाऽएनं देवा अनुविद्यैभ्यो लोकेभ्योऽखनंस्तथैवैनमयमेतदनुविद्यैभ्यो लोकेभ्यः खनति ॥ ३६ ॥ स यदिति खनति । तदेनमस्माल्लोकात्खनत्यथ यदूर्ध्वाच्चरति तदमुष्माल्लोकादथ यदन्तरेण संचरति तदन्तरिक्षलोकात्सर्वेभ्य एवैनमेतदेभ्या लोकेभ्यः खनति ॥ ३७ ॥ तामादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे गायत्रेण छन्दसाङ्गिरस्वदिति सवितृप्रसूत एवैनामेतदेताभिर्देवताभिरादत्ते गायत्रेण छन्दसाथोऽअस्यां गायत्रं छन्दो दधाति पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरेति पशवो वै पुरीषं पृथिव्या उपस्थादग्निं पशव्यमग्निवदाभरेत्येतत्त्रैष्टुभेन छन्दसाङ्गिरस्वदिति तदेनां त्रैष्टुभेन छन्दसादत्तेऽथोऽअस्यां त्रैष्टुभं छन्दो दधाति ॥ ३८ ॥ अभ्रिरसीति । अभ्रिर्वै योषा तदेनꣳ सत्येनादत्ते नार्यसीति वज्रो वाऽअभ्रिर्योषा नारी न वै योषा कं चन हिनस्ति शमयत्येवैनामेतद्धिꣳसायै त्वया वयमग्निꣳ शकेम खनितुꣳ सधस्थ ऽएतीदं वै सधस्थं त्वया वयमग्निꣳ शकेम खनितुमस्मिन्त्सधस्थऽइत्येतज्जागतेन छन्दसाङ्गिरस्वदिति तदेनां जागतेन छन्दसादत्तेऽथोऽअस्यां जागतं छन्दो दधाति ॥ ३९ ॥ त्रिभिरादत्ते । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतदादत्ते त्रिभिरादायाथैनां चतुर्थेनाभिमन्त्रयतऽएतद्वाऽएनां देवास्त्रिभिरादायाथास्यां चतुर्थेन वीर्यमदधुस्तथैवैनामयमेतत्त्रिभिरादायाथास्यां चतुर्थेन वीर्यं दधाति ॥ ४० ॥ हस्त ऽआधाय सवितेति । हस्ते न्यस्याहिता भवति बिभ्रदग्निमिति बिभर्ति कोनाꣳ

हिरण्मयीमिति हिरण्मयी ह्येषा या ह्यन्दोमय्यग्नेर्ज्योतिर्निचाय्येत्यग्नेर्ज्योतिर्दृष्ट्वेत्ये-तत्पृथिव्याऽअध्याभरदिति पृथिव्यै ह्येनदध्याभरत्यानुष्टुभेन ह्यन्दसाङ्गिरस्वदिति त-देनामानुष्टुभेन ह्यन्दसादत्तेऽथोऽअस्यामानुष्टुभं ह्यन्दो दधाति तान्येतान्येव ह्य-न्दाꣳस्येषाग्निरारम्भायैवेयं वैणवी क्रियते ॥४१॥ ताꣳ ह्येके हिरण्मयीं कुर्वन्ति । हिरण्मयीति वाऽअभ्युक्तेति न तथा कुर्याद्यद्वाऽएषा ह्यन्दाꣳसि तेनैषा हिरण्मम-मृतꣳ हिरण्ममृतानि ह्यन्दाꣳसि ॥४२॥ तां चतुर्भिरादत्ते । चतुरक्षरा वै सर्वा वाग्वागित्येकमक्षरमक्षरमिति ऋक्षरं तद्यत्तद्वागित्येकमक्षरं यैवैषानुष्टुब्बुत्तमा सा साथ यदक्षरमिति ऋक्षरमेतानि तानि पूर्वाणि यजूꣳषि सर्वयैवैतद्वाचाग्निं ह्वनति सर्वया वाचा सम्भरति तस्माच्चतुर्भिः ॥४३॥ यद्वेव चतुर्भिः । चतस्रो वै दिशश्चतसृषु तद्दिक्षु वाचं दधाति तस्माच्चतसृषु दिक्षु वाग्वदति ह्यन्दोभिश्च यजु-र्भिश्चादत्ते तदष्टौ चतस्रो दिशश्चतस्रोऽवान्तरदिशः सर्वासु तद्दिक्षु वाचं दधाति तस्मात्सर्वासु दिक्षु वाग्वदति ॥४४॥ ब्राह्मणम् ॥३ [३. १.] ॥ ॥

कृस्तऽएषाग्निर्भवत्यथ पशूनभिमन्त्रयते । एतद्वाऽएषु देवा अन्वेषिष्यन्तः पुर-स्ताद्वीर्यमदधुस्तथैवैषयमेतदन्वेषिष्यन्पुरस्ताद्वीर्यं दधाति ॥१॥ सोऽश्वमभिमन्त्रयते । प्रतूर्तं वाजिन्नाद्रवेति यद्वै क्षिप्रं तत्तूर्तमथ यत्क्षिप्रान्नेपीयस्तत्प्रतूर्तं वरिष्ठामनु संवतमितीयं वै वरिष्ठा संवदिमामनु संवतमित्येतद्दिवि ते ज्ञन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरिदिति तदेनमेता देवताः करोत्यग्निं वायुमादित्यं तदस्मे वीर्यं दधाति ॥२॥ अथ रासभम् । युञ्जाथाꣳ रासभं युवमित्यधर्युं चैतद्यज-मानं चाह्यास्मिन्यामे वृषण्वसूऽइत्यस्मिन्कर्मणि वृषण्वसूऽइत्येतदग्निं भरन्तमस्म-युमित्यग्निं भरन्तमस्मत्प्रेषितमित्येतत्तद्रासभे वीर्यं दधाति ॥३॥ अथाज्ञम् । योगे-योगे तवस्तरं वाजे-वाजे हवामहऽइत्यन्नं वै वाजः कर्मणि-कर्मणि तवस्तरमन्ने ऽन्ने हवामहऽइत्येतत्सखाय इन्द्रमूतयऽइतीन्द्रियवन्तमूतयऽइत्येतत्तदन्ने वीर्यं

दधाति ॥४॥ त्रिभिरभिमन्त्रयते । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैष तद्वीर्यं दधाति ॥५॥ अथैनान्प्राच उत्क्रमयति । तदेनमेतैः पशुभिरन्विच्छति नोपस्पृशत्यग्निरेष यत्पशवो नेन्मायमग्निर्हिंसदिति ॥६॥ सोऽश्वमुत्क्रमयति । प्रतूर्वन्नेत्यवक्रामन्नशस्तीरिति पाप्मा वाऽअशस्तिस्त्वरमाणः एत्यवक्रामन्पाप्मानमित्येतदुद्रस्य गाणपत्यं मयोभूरेह्येति रौद्रा वै पशवो या ते देवता तस्यै गाणपत्यं मयोभूरेह्येत्येतत्तदेनमश्वेनान्विच्छति ॥७॥ अथ रासभम् । उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन्निति यथैव यज्ञुस्तथा बन्धुः पूष्णा सयुजा सहेतीयं वै पूषानया सयुजा सहेत्येतत्तदेनꣳ रासभेनान्विच्छति ॥८॥ अथाजम् । पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरेति पृथिव्या उपस्थादग्निं पशव्यमग्निवदाभरेत्येतत्तदेनमजेनान्विच्छति ॥९॥ त्रिभिरन्विच्छति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्विच्छति त्रिभिः पुरस्तादभिमन्त्रयते तत्षट् ऋतवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१०॥ ब्राह्मणम् ॥४ [३.२.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १०४ ॥॥

प्रदीप्ता एतेऽग्नयो भवन्ति । अथ मृदमह्यन्तीमे वै लोका एतेऽग्नयस्ते यदा प्रदीप्ता अथैतऽइमे लोकाः पुरो वाऽएतदेभ्यो लोकेभ्योऽग्नेर्देवाः कर्मान्वैच्छंस्तस्यैतानग्नीनतीत्य मृदमाहरति तदेनं पुरेभ्यो लोकेभ्योऽन्विच्छति ॥१॥ प्राञ्चो यन्ति । प्राची हि दिगग्नेः स्वायामेवैनमेतद्दिश्यन्विच्छति स्वायां दिशि विन्दति ॥२॥ ते प्रयन्ति । अग्निं पुरीष्यमङ्गिरस्वदहेम इत्यग्निं पशव्यमग्निवदहेम इत्येतत् ॥३॥ अथानड्वापुरुषमीक्षते । अग्निं पुरीष्यमङ्गिरस्वद्धरिष्याम इत्यग्निं पशव्यमग्निवद्धरिष्याम इत्येतत्तदेनमनड्वापुरुषेणान्विच्छति ॥४॥ अथ वल्मीकवपा सुषिरा व्यधे निहिता भवति । तामन्वीक्षतऽइयं वै वल्मीकवपेयमु वाऽइमे लोका एतद्वाऽएनं देवा एषु लोकेषु विग्राहमैच्छंस्तथैवैनमयमेतदेषु लोकेषु विग्राहमि-

ह्वति ॥५॥ अन्वग्निरुषसामग्रमख्यदिति । तदेनमुषःस्वैह्वन्वह्वानि प्रथमो ज्ञातवेदा इति तदेनमह्नःस्वैह्वन्नु सूर्यस्य पुरुत्रा च रश्मीनिति तदेनꣳ सूर्यस्य रश्मिष्वैह्वन्नु द्यावापृथिवीऽआततन्थेति तदेनं द्यावापृथिव्योरैह्वंस्तमविन्दंस्तथैवैनमयमेतद्विन्दति तं यदा परापश्यत्यथ तामवास्यत्यागह्वति मृदम् ॥६॥ अथाश्वमभिमन्त्रयते । एतद्वै देवा अब्रुवन्पाप्मानमस्यापह्वनामेति श्रमो वै पाप्मा श्रममस्य पाप्मानमपह्वनामेति तस्य श्रमं पाप्मानमपाघ्नंस्तथैवास्यायमेतच्छ्रमं पाप्मानमपह्वति ॥७॥ आगत्य वाज्यधानमिति । आगतो ह्यस्याधा भवति सर्वा मृधो विधूनुत ऽइति पाप्मा वै मृधः सर्वान्पाप्मनो विधूनुतऽइत्येतत्तस्माद्व ह्वैतदश्वः स्यन्त्वा विधूनुतेऽग्निꣳ सधस्थे महति चक्षुषा निचिकीषऽइतीदं वै महत्सधस्थमग्निमस्मिन्महति सधस्थे चक्षुषा दिदृक्षतऽइत्येतत् ॥८॥ अथैनमाक्रमयति । एतद्वाऽएष एतं देवेभ्योऽनुविद्य प्राब्रवीद्यथायमिह्वेत्येवम् ॥९॥ यद्वैवाक्रमयति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न ह्वन्युरिति तस्माऽएतं वज्रमुपरिष्टादभिगोप्तारमकुर्वन्नमुमेवादित्यमसौ वाऽआदित्य एषोऽश्वस्तथैवास्माऽअयमेतं वज्रमुपरिष्टादभिगोप्तारं करोति ॥१०॥ आक्रम्य वाजिन् । पृथिवीमग्निमिह रुचा त्वमिति चक्षुर्वै रुगाक्रम्य त्वं वाजिन्पृथिवीमग्निमिह चक्षुषेत्येतद्ब्रूम्या वृत्राय नो ब्रूहि यतः खनेम तं वयमिति भूमेस्तत्स्पाशयित्वाय नो ब्रूहि यत एनं खनेमेत्येतत् ॥११॥ अथैनमुन्मृशति । एतद्वाऽएनं देवाः प्रोचिवाꣳसं वीर्येण समार्धयंस्तथैवैनमयमेतत्प्रोचिवाꣳसं वीर्येण समर्धयति द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिरितीत्थमसीत्थमसीत्येवैतदाह विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यत इति विख्याय चक्षुषा त्वमभितिष्ठ सर्वान्पाप्मन इत्येतन्नोपस्पृशति वज्रो वाऽअश्वो नेन्माꣳ वज्रो हिꣳसदिति ॥१२॥ अथैनमुत्क्रमयति । एतद्वै देवा अब्रुवन्किमिममभ्युत्क्रमिष्याम इति महत्सौभगमिति तं महत्सौभगमभ्युद-

क्रमयंस्तथैवैनमयमेतन्मरुत्सौभगमभ्युत्क्रमयत्युत्क्राम मरुते सौभगायेत्युत्क्राम मरुत्ते सौभगमित्येतत्तस्माद्धैतदृषः पशूनां भगितमोऽस्मादास्थानादिति यत्रैतत्तिष्ठसीत्येतद्ध्रुविणोदा इति ध्रुविणꣳ क्षेभ्यो ददाति वाजिन्निति वाजी क्षेषि वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थेऽस्या इति वयमस्यै पृथिव्यै सुमतौ स्यामाग्निमस्या उपस्थे खनन्त इत्येतत् ॥ १३ ॥ अथैनमुत्क्रान्तमभिमन्त्रयते । एतद्वा ऽएनं देवाः प्रोचिवाꣳसं यथा ददिवाꣳसं वन्देतैवमुपास्तुवन्नुपामरुयंस्तथैवैनमयमेतदुपस्तौत्युपमरुयत्युदक्रमीदित्युद्यक्रमीद्ध्रुविणोदा इति ध्रुविणꣳ क्षेभ्यो ददाति वाज्यर्वेति वाजी च क्षेषोऽर्वा चाकः सुलोकꣳ सुकृतं पृथिव्यामित्यकरः सुलोकꣳ सुकृतं पृथिव्यामित्येतत्ततः खनेम सुप्रतीकमग्निमिति तत एनं खनेमेत्येतत्सुप्रतीकमिति सर्वतो वाऽग्निः सुप्रतीकः स्वो रुहाणा अधि नाकमुत्तममिति स्वर्गो वै लोको नाकः स्वर्गं लोकꣳ रोहन्तोऽधि नाकमुत्तममित्येतत्तं दक्षिणोपसंक्रमयति यत्रेतरौ पशू भवतस्ते दक्षिणतः प्राञ्चस्तिष्ठन्ति स य एवामुत्र दक्षिणत स्थानस्य बन्धुः सोऽत्र ॥ १४ ॥ अथोपविश्य मृदमभिजुहोति । एतद्वै देवा अब्रुवंश्चेतयधमिति चितिमिकृतेति वाव तदब्रुवंस्ते चेतयमाना एतामाकृतिमपश्यंस्तामजुहवुस्ताꣳ हुत्वेमांल्लोकानुखामपश्यन् ॥ १५ ॥ तेऽब्रुवन् । चेतयधमेवेति चितिमिकृतेति वाव तदब्रुवंस्ते चेतयमाना एतां द्वितीयामाकृतिमपश्यंस्तामजुहवुस्ताꣳ हुत्वा विश्वज्योतिषोऽपश्यन्नेता देवता अग्निं वायुमादित्यमेता एव देवता विश्वं ज्योतिस्तथैवैतद्यजमानऽएते आकृती हुत्वेमांश्च लोकानुखां पश्यत्येताश्च देवता विश्वज्योतिषो व्यतिषक्ताभ्यां जुहोतीमांश्च तल्लोकानेताश्च देवता व्यतिषजति ॥ १६ ॥ यद्वैवैतेऽआकृती जुहोति । मृदं च तदपश्च प्रीणाति तेऽइष्ट्वा प्रीतायैने सम्भरति व्यतिषक्ताभ्यां जुहोति मृदं च तदपश्च व्यतिषजति ॥ १७ ॥ आज्येन जुहोति । वज्रो वाऽआज्यं वज्रमेवास्माऽएतदभिगोपारं करोत्यथो रेतो

वाऽआज्यꣳ रेत एवैतत्सिञ्चति स्रुवेण वृषा वै स्रुवो वृषा वै रेतः सिञ्चति स्वाहाकारेण वृषा वै स्वाहाकारो वृषा वै रेतः सिञ्चति ॥१८॥ आ त्वा ऽग्निर्घर्मि मनसा घृतेनेति । आ त्वा जुहोमि मनसा च घृतेन चेत्येतत्प्रतिक्षियन्तं भुवनानि विश्वेति प्रत्यङ् क्षेष सर्वाणि भुवनानि क्षियति पृथुं तिरश्चा वयसा बृहन्तमिति पृथुर्वाऽएष तिर्यङ्व्यसो बृहन्धूमेन व्यचिष्ठमन्ने रभसं दृशानमित्यवकाशवन्तमन्नैरन्नादं दीप्यमानमित्येतत् ॥१९॥ आ विश्वतः प्रत्यञ्चं जिघर्मीति । आ सर्वतः प्रत्यञ्चं जुहोमीत्येतदरक्षसा मनसा तज्जुषेतेत्यक्रीडमानेन मनसा तज्जोषयेतेत्येतन्मर्यश्री स्पृहयद्वर्णोऽअग्निरिति मर्यश्रीर्क्षेष स्पृहयद्वर्णोऽग्निर्नाभिमृशे तन्वा जर्भुराण इति न क्षेषोऽभिमृशे तन्वा दीप्यमानो भवति ॥२०॥ द्वाभ्यामभिजुहोति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चत्याग्नेयीभ्यामग्निमेवैतद्रेतो भूतꣳ सिञ्चति ते यदाग्नेय्यौ तेनाग्निरथ यत्त्रिष्टुभौ तेनेन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चतीन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति ॥२१॥ ॥ शतम् ३६०० ॥ ॥ अश्वस्य पदे जुहोति । अग्निरेष यदश्वस्तथो ह्यस्यैतेऽग्निमत्येवाऽऽहुती हुते भवतः ॥२२॥ अथैनं परिलिखति । मात्रामेवास्माऽएतत्करोति यथैतावानसीत्येवम् ॥२३॥ यद्वैवैनं परिलिखति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न कन्युरिति तस्माऽएतां पुरं पर्यश्रयंस्तथैवास्माऽअयमेतां पुरं परिश्रयत्यश्वा वज्रो वाऽअश्विर्वज्रमेवास्माऽएतदभिगोप्तारं करोति सर्वतः परिलिखति सर्वत एवास्माऽएतं वज्रमभिगोप्तारं करोति त्रिष्कृत्वः परिलिखति त्रिवृतमेवास्माऽएतं वज्रमभिगोप्तारं करोति ॥२४॥ परि वाजपतिः कविः । परि त्वाग्ने पुरं वयं त्वमग्ने द्युभिरित्यग्निमेवास्माऽएतदुपस्तुत्य वर्म करोति परिवतीभिः परीव हि पुर आ-

ग्नेयीभिरग्निपुरामेवास्माऽएतत्करोति सा ह्येषाग्निपुरा दीप्यमाना तिष्ठति तिसृभि-स्त्रिपुरामेवास्माऽएतत्करोति तस्माद्धैतत्पुरां परमꣳ रूपं यत्त्रिपुरꣳ स वै वर्षी-यसा-वर्षीयसा ह्रन्दसा परां-परां लेखां वरीयसीं करोति तस्मात्पुरां परा-परा वरीयसी लेखा भवन्ति लेखा हि पुरः ॥२५॥ अथैनमस्यां खनति । एतद्वै देवा अबिभयुर्यद्वै न इमामिꣳ रक्षाꣳसि नाष्ट्रा न हन्युरिति तस्माऽइमामेवात्मानम-कुर्वन्गुप्त्याऽआत्मात्मानं गोप्स्यतीति सा समंबिला स्यात्तद्यस्येयमात्मा भवति य-द्वै व समंबिला योनिर्वाऽइयꣳ रेत इदं यद्वै रेतसो योनिमतिरिच्यतेऽमुया तद्भव-त्यथ यन्यूनं व्यृद्धं तदेतद्वै रेतसः समृद्धं यत्समंबिलं चतुःस्रक्तिरेष कूपो भवति चतस्रो वै दिशः सर्वाभ्य एवैनमेतद्दिग्भ्यः खनति ॥२६॥ ब्राह्मणम् ॥१ [३. ३.] ॥ तृतीयोऽध्यायः [३८.] ॥॥

अथैनमतः खनत्येव । एतद्वाऽएनं देवा अनुविद्याखनंस्तथैवैनमयमेतदनुविद्य खनति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्नो हस्ताभ्यां पृथिव्याः सध-स्थादग्निं पुरीष्यमङ्गिरस्वत्खनामीति सवितृप्रसूत एवैनमेतदेताभिर्देवताभिः पृथि-व्या उपस्थादग्निं पशव्यमग्निवत्खनति ॥१॥ ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमिति । ज्योतिष्मान्वाऽअयमग्निः सुप्रतीकोऽजस्रेण भानुना दीप्यतमित्यजस्रेणार्चिषा दी-प्यमानमित्येतद्धिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्ख-नाम इति शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्या उपस्थादग्निं पशव्यमग्निवत्खनाम इ-त्येतत् ॥२॥ द्वाभ्यां खनति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्खनत्यथो द्वयꣳ ह्येवैतद्रूपं मृच्चापश्च ॥३॥ स वै खनामि खनाम इति खनति । खनामीति वाऽएतं प्रजापतिरखनत्खनाम इति देवास्त-स्मात्खनामि खनाम इति ॥४॥ स वाऽअभ्या खनन् । वाचा खनामि खनाम इत्याह वाग्वाऽअग्निरारम्भायैवेयं वैणवी क्रियते वाचा वाऽएतमभ्या देवा अ-

खनंस्तथैवैनमयमेतद्वाचैवाभ्या खनति ॥५॥ अथैनं कृष्णाजिने सम्भरति । यज्ञो वै कृष्णाजिनं यज्ञꣳ एवैनमेतत्सम्भरति लोमतश्छन्दाꣳसि वै लोमानि छन्दःस्वेवैनमेतत्सम्भरति तत्तूष्णीमुपस्तृणाति यज्ञो वै कृष्णाजिनं प्रजापतिर्वै यज्ञोऽनिरुक्तो वै प्रजापतिरुत्तरतस्तस्योपरि बन्धुः प्राचीनग्रीवि तद्धि देवत्रा ॥६॥ अथैन पुष्करपर्णे सम्भरति । योनिर्वै पुष्करपर्णं योनौ तद्रेतः सिञ्चति यद्वै योनौ रेतः सिच्यते तत्प्रजननिषु भवति तन्मन्त्रेणोपस्तृणाति वाग्वै मन्त्रो वाक्पुष्करपर्णम् ॥१७॥ अपां पृष्ठमसि योनिरग्नेरिति । अपाꣳ ह्येतत्पृष्ठं योनिर्ह्येतदग्नेः समुद्रमभितः पिन्वमानमिति समुद्रो ह्येतदभितः पिन्वते वर्धमानो महाꣳ२॥ऽआ च पुष्करऽइति वर्धमानो महीयस्व पुष्करऽइत्येतद्दिवो मात्रया वरिम्णा प्रथस्वेत्यनुविमार्ष्यसौ वाऽआदित्य एषोऽग्निर्नो हैतमन्यो दिवो वरिमा यन्तुमर्हति द्यौर्भूर्वनं यछेत्येवैतदाह ॥८॥ तदुत्तरं कृष्णाजिनादुपस्तृणाति । यज्ञो वै कृष्णाजिनमियं वै कृष्णाजिनमियमु वै यज्ञोऽस्याꣳ हि यज्ञस्तायते द्यौष्पुष्करपर्णमापो वै द्यौरापः पुष्करपर्णमुत्तरो वाऽअसावस्यै ॥९॥ अथैनेऽअभिमृशति । संज्ञामेवाभ्यामेतत्करोति शर्म च स्थो वर्म च स्थ इति शर्म च ह्यस्यैते वर्म चाछिद्रे बक्रुलेऽउभेऽइत्यछिद्रे ह्येते बक्रुलेऽउभे व्यचस्वती संवसाथामित्यवकाशवती संवसाथामित्येतद्धृतमग्निं पुरीष्यमिति बिभृतमग्निं पशव्यमित्येतत् ॥१०॥ संवसाथाꣳ स्वर्विदा । समीचीऽउरसा त्मनेति संवसाथामेनꣳ स्वर्विदा समीचीऽउरसा चात्मना चेत्येतदग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमऽत्रमिदित्यसौ वाऽआदित्य एषोऽग्निः स एष ज्योतिष्मानऽत्रस्तमेतेऽअन्तरा बिभृतस्तस्मादाह ज्योतिष्मन्तमऽत्रमिदिति ॥११॥ द्वाभ्यामभिमृशति । द्विपाद्यजमानो यजमानोऽग्र्यावानग्र्यावत्यस्य मात्रा तावतैवाभ्यामेतत्संज्ञां करोत्यथो द्वयꣳ ह्येवैतद्रूपं कृष्णाजिनं च पुष्करपर्णं च ॥१२॥ ब्राह्मणम् ॥२ [४. १.] ॥ ॥

अथ मृत्पिण्डमभिमृशति । पुरीष्योऽसीति पशव्योऽसीत्येतद्विश्वभरा इत्येष क्षीद७ सर्वं बिभर्त्यथर्वा वा प्रथमो निरमन्थदग्न्ऽइति प्राणो वाऽअथर्वा प्राणो वाऽएतमग्रे निरमन्थत्तस्योऽसावग्रेऽग्निरसृज्यत सोऽसीति तदाह तमेवैनमेतत्करोति ॥१॥ अथैनं परिगृह्णाति । अभ्या च दक्षिणतो हस्तेन च हस्तेनैवोत्तरतस्त्वामग्ने पुष्कराद्ध्यथर्वा निरमन्थतेत्यापो वै पुष्करं प्राणोऽथर्वा प्राणो वाऽएतमग्रेऽह्नो निरमन्थन्मूर्ध्नो विश्वस्य वाघत इत्यस्य सर्वस्य मूर्ध्न इत्येतत् ॥२॥ तमु वा दध्यङ्ङृषिः । पुत्र ईधेऽअथर्वण इति वाग्वै दध्यङ्वाथर्वणः स एनं तत ऐन्द्ध वृत्रहणं पुरंदरमिति पाप्मा वै वृत्रः पाप्महनं पुरंदरमित्येतत् ॥३॥ तमु वा पाथ्यो वृषा । समीधे दस्युहन्तममिति मनो वै पाथ्यो वृषा स एनं तत ऐन्द्ध धनंजयꣳ रणे-रणेऽइति यथैव यजुस्तथा बन्धुः ॥४॥ गायत्रीभिः । प्राणो गायत्री प्राणमेवास्मिन्नेतद्दधाति तिसृभिस्त्रयो वै प्राणाः प्राण उदानो व्यानस्तानेवास्मिन्नेतद्दधाति तासां नव पदानि नव वै प्राणाः सप्त शीर्षन्नवास्यौ द्वौ तानेवास्मिन्नेतद्दधाति ॥५॥ अथैते त्रिष्टुभाऽउत्तरे भवतः । आत्मा वै त्रिष्टुबात्मानमेवास्यैताभ्याꣳ संस्करोति सीद होत. स्वऽउ लोके चिकित्वानित्यग्निर्वै होता तस्यैष स्वो लोको यत्कृष्णाजिनं चिकित्वानिति विद्वानित्येतत्साद्या यज्ञꣳ सुकृतस्य योनाविति कृष्णाजिनं वै सुकृतस्य योनिर्देवावीर्देवान्हविषा यजासीति देवः सन्देवानवन्हविषा यजासीत्येतदग्ने बृहद्यजमाने वयो धा इति यजमानायाशिषमाशास्ते ॥६॥ नि होता होतृषदने विदान इति । अग्निर्वै होता कृष्णाजिनꣳ होतृषदनं विदान इति विद्वानित्येतत्त्वेषो दीदिवां२॥ऽअसदत्सुदक्ष इति त्वेषो दीप्यमानोऽसदत्सुदक्ष इत्येतद्दद्ब्धव्रतप्रमतिर्वसिष्ठ इत्यदब्धव्रतप्रमतिर्ह्येष वसिष्ठः सहस्रंभरः शुचिजिह्वोऽअग्निरिति सर्वं वै सहस्रꣳ सर्वम्भरः शुचिजिह्वोऽग्निरित्येतद्द्वाभ्यामाग्नेयीभ्यां त्रिष्टुब्भ्यां तस्योक्तो बन्धुः ॥७॥ अथैषा बृहत्युत्तमा भ-

वति । बृहतीं वाऽएष संचितोऽभिसम्पद्यते यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यदेतामत्र बृहतीं करोति तस्मादेष संचितो बृहतीमभिसम्पद्यते ॥८॥ सꣳसीदस्व महाꣳ२॥ऽअसीति । इदमेवैतद्रेतः सिक्तꣳ सꣳसादयति तस्माद्योनौ रेतः सिक्तꣳ सꣳसीदति शोचस्व देववीतम इति दीप्यस्व देववीतम इत्येतद्धूममग्नेऽअरुषं मियेध्य सृज प्रशस्त दर्शतमिति यदा वाऽएष समिध्यतेऽथैष धूममरुषं विसृजते दर्शतमिति ददृशऽइव क्ष्वेषः ॥९॥ ताः षट् सम्पद्यन्ते । षड्वृतवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति यद्वै संवत्सरमभिसम्पद्यते तद्बृहतीमभिसम्पद्यते बृहती हि संवत्सरो द्वादश पौर्णमास्यो द्वादशाष्टका द्वादशामावास्यास्तत्षट्त्रिꣳशत्षट्त्रिꣳशद्धारा बृहती तं दक्षिणत उद्यच्छमाहरति दक्षिणतो वाऽउदग्योनौ रेतः सिच्यतऽएषोऽस्यैतर्हि योनिरविच्छेदमाहरति रेतसोऽविच्छेदाय ॥१०॥ ब्राह्मणम् ॥ ३ [४. २.] ॥ ॥

अथ तत्राप उपनिनयति । यद्वाऽअस्यै क्षतं यद्विलिष्टमद्भिर्वै तत्संधीयतेऽद्भिरेवास्याऽएतत्क्षतं विलिष्टꣳ संतनोति संदधाति ॥१॥ अपो देवीरुपसृज । मधुमतीरयक्ष्माय प्रजाभ्य इति रसो वै मधु रसवतीरयक्ष्मत्वाय प्रजाभ्य इत्येतत्तासामास्थानाडुड्डिक्कृतामोषधयः सुपिप्पला इत्यपां वाऽआस्थानाडुड्डिक्कृतऽओषधयः सुपिप्पलाः ॥२॥ अथैनां वायुना संदधाति । यद्वाऽअस्यै क्षतं यद्विलिष्टं वायुना वै तत्संधीयते वायुनैवास्या एतत्क्षतं विलिष्टꣳ संतनोति संदधाति ॥३॥ सं ते वायुर्मातरिश्वा दधात्विति । अयं वै वायुर्मातरिश्वा योऽयं पवतऽउत्तानाया कृदयं यद्विकस्तमित्युत्तानाया ह्यस्या एतद्धृदयं विकस्तं यो देवानां चरसि प्राणथेनेत्येष हि सर्वेषां देवानां चरति प्राणथेन कस्मै देव वषडस्तु तुभ्यमिति प्रजापतिर्वै कस्तस्माऽएवैतदिमां वषट्करोति नो कैतावत्यन्याकृतिरस्ति यथैषा ॥४॥ अथैनां दिग्भिः संदधाति । यद्वाऽअस्यै क्षतं यद्विलिष्टं दिग्भिर्वै तत्संधीयते

दिग्भिरेवास्या एतत्क्षतं विलिष्टꣳ संतनोति संदधाति स इमां चेमां च दिशौ संदधाति तस्मादेते दिशौ सꣳक्षितिऽअथेमां चेमां च तस्माद्वैवैते सꣳक्षितेऽइत्यग्रेऽथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रानयानया वै भेषजं क्रियतेऽनयैवैनामेतद्भिषज्यति ॥५॥ अथ कृष्णाजिनं च पुष्करपर्णं च समुदूहति । योनिर्वै पुष्करपर्णं योन्या तद्रेतः सिक्तꣳ समुदूहति तस्माद्योन्या रेतः सिक्तꣳ समुदृच्यते सुज्ञातो ज्योतिषा सह शर्म वनवथमासदत्स्वरिति सुज्ञातो ह्येष ज्योतिषा सह शर्म चैतद्वनथं च स्वश्चासीदिति ॥६॥ अथैनमुपनह्यति । योनौ तद्रेतो युनक्ति तस्माद्योनौ रेतो युक्तं न निष्पद्यते योक्त्रेण योक्त्रेण हि योग्यं युञ्जन्ति मौञ्जेन त्रिवृता तस्योक्तो बन्धुः ॥७॥ तत्पर्यस्यति । वासोऽग्ने विश्वरूपꣳ संव्ययस्व विभावसविति वरुण्या वै यज्ञे रज्जुरवरुण्यमेवैनदेतत्कृत्वा यथा वासः परिधापयेदेवं परिधापयति ॥८॥ अथैनमादायोत्तिष्ठति । असौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमुत्थापयत्युद्ध तिष्ठ स्वधरेत्यधरो वै यज्ञ उद्ध तिष्ठ सुयज्ञियेत्येतद्वा नो देव्या धियेति या ते दैवी धीस्तया नोऽवेत्येतद्दृशे च भासा बृहता सुशुक्रनिरिति दर्शनाय च भासा बृहता सुशुक्रनिरित्येतदाग्ने याह्हि सुशस्तिभिरिति ये वोढारस्ते सुशस्तय आग्ने याह्हि वोढृभिरित्येतत् ॥९॥ अथैनमित ऊर्ध्वं प्राञ्चं प्रगृह्णाति । असौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमित ऊर्ध्वं प्राञ्चं दधाति तस्मादसावादित्य इत ऊर्ध्वः प्राङ् धीयतऽऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सवितेति यथैव यजुस्तथा बन्धुर्ऊर्ध्वो वाजस्य सनितेत्यूर्ध्वो वाऽएष तिष्ठन्वाजमत्नꣳ सनोति यदग्निभिर्वाघद्भिर्विक्ष्वयामहऽइति रश्मयो वाऽएतस्याज्रयो वाघतस्तानेतदाह परोबाङ्क प्रगृह्णाति परोबाङ्क ह्येष इतोऽथैनमुपावहरति तमुपावहृत्योपरिनाभि धारयति तस्योपरि बन्धुः ॥१०॥ ब्राह्मणम् ॥ ४ [४. ३.] ॥ ॥

हुस्तऽएष भवत्यथ पशूनभिमन्त्रयते । एतद्वाऽएषु देवाः सम्भरिष्यन्तः पुरस्ता-

द्वीर्यमदधुस्तथैवैषयमेतत्सम्भरिष्यन्पुरस्ताद्वीर्यं दधाति ॥१॥ सोऽश्वमभिमन्त्रयते । स ज्ञातो गर्भोऽसि रोदस्योरितीमे वै द्यावापृथिवी रोदसी तयोरेष ज्ञातो गर्भोऽग्ने चारुर्विभृत ओषधीष्विति सर्वासु ह्येष चारुर्विभृत ओषधिषु चित्रः शिशुः परि तमाꣳस्यक्तूनिति चित्रो वाऽएष शिशुः परेण तमाꣳस्यक्तूनतिरोचते प्र मातृभ्योऽअधि कनिक्रदद्गा इत्योषधयो वाऽएतस्य मातरस्ताभ्य एष कनिक्रदत्प्रेति तदश्वे वीर्यं दधाति ॥२॥ अथ रासभꣳ । स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्निति स्थिरश्च भव वीड्वङ्गश्चाशुश्च भव वाजी चार्वन्नित्येतत्पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहण इति पृथुर्भव सुशीमस्त्वमग्नेः पशव्यवाहन इत्येतत्तद्रासभे वीर्यं दधाति ॥३॥ अथाजꣳ । शिखा भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिर इत्यङ्गिरा वाऽअग्निराग्नेयोऽजः शमयत्येवैनमेतद्हिꣳसायै मा द्यावापृथिवीऽअभिशोचीर्मान्तरिक्षं मा वनस्पतीनित्येतत्सर्वं मा हिꣳसीरित्येतत्तदजे वीर्यं दधाति ॥४॥ त्रिभिरभिमन्त्रयते । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैषेतद्वीर्यं दधाति ॥५॥ अथैनमेतेषां पशूनामुपरिष्टात्प्रगृह्णाति । तदेनमेतैः पशुभिः सम्भरति नोपस्पृशति वज्रो वै पशवो रेत इदं नेदिदꣳ रेतो वज्रेण ह्यनसानीत्यथोऽअग्निरयं पशव इमे नेदयमग्निरिमान्पशून्ह्यनसदिति ॥६॥ तमश्वस्योपरिष्टात्प्रगृह्णाति । प्रेतु वाजी कनिक्रददिति प्रेतु वाजी कनिक्रद्यमान इत्येतन्नानदद्रासभः पवेति तदश्वस्य यजुषि रासभं निराह तद्रासभे शुचं दधाति भरन्नग्निं पुरीष्यं मा पाह्यायुषः पुरेति भरन्नग्निं पशव्यं मोऽअस्मात्कर्मणः पुरा पादीत्येतत्तदेनमश्वेन सम्भरति ॥७॥ अथ रासभस्य । वृषाग्निं वृषणं भरन्निति वृषा वाऽअग्निर्वृषा रासभः स वृषा वृषाणं भरत्यपां गर्भꣳ समुद्रियमित्यपाꣳ ह्येष गर्भः समुद्रियस्तदेनꣳ रासभेन सम्भरति ॥८॥ अथापादत्ते । अग्नऽआयाहि वीतयऽइत्यवितवऽइत्येतत्तदेनं ब्रह्मणा यजुषैतस्माद्धौद्गाद्वर्णादपादत्ते ॥९॥ अथाजस्य । ऋतꣳ सत्यमृतꣳ सत्यमित्ययं वा

ऽग्निर्ऋतमसावादित्यः सत्यं यदि वासावृतमयꣳ सत्यमुभयम्वेतद्यमग्निस्तस्मादाह ऽर्तꣳ सत्यमृतꣳ सत्यमिति तदेनमत्रैन सम्भरति ॥ १० ॥ त्रिभिः सम्भरति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्सम्भरति त्रिभिः पुरस्तादभिमल्लयते तत्षट् तस्योक्तो बन्धुः ॥ ११ ॥ अथैतान्यशूनावर्तयन्ति । तेषामज्ञः प्रथम एत्यथ रासभोऽथाश्वोऽथेतो यतामश्वः प्रथम एत्यथ रासभोऽथाज्ञः क्षत्रं वाऽअन्वश्वो वैश्यं च शूद्रं चानु रासभो ब्राह्मणमज्ञः ॥ १२ ॥ तद्यदितो यताम् । अश्वः प्रथम एति तस्मात्क्षत्रियं प्रथमं यन्तमितरे त्रयो वर्णाः पश्चादनुयन्त्यथ यदमुत आयतामज्ञः प्रथम एति तस्माद्ब्राह्मणं प्रथमं यन्तमितरे त्रयो वर्णाः पश्चादनुयन्त्यथ यन्नैवेतो यतां नामुतो रासभः प्रथम एति तस्मान्न कदा चन ब्राह्मणश्च क्षत्रियश्च वैश्यं च शूद्रं च पश्चादन्वितस्तस्मादेवं यन्त्यपापवस्यसायाथो ब्रह्मणा चैवैतत्क्षत्रेण चैतौ वर्णावभितः परिगृह्णीतेऽनपक्रमिणौ कुरुते ॥ १३ ॥ अथानड्वापुरुषमीक्षते । अग्निं पुरीष्यमङ्गिरस्वद्धराम इत्यग्निं पशव्यमग्निवद्धराम इत्येतत्तदेनमनड्वापुरुषेण सम्भरति ॥ १४ ॥ तमज्ञस्योपरिष्टात्प्रगृह्णन्नेति । आग्नेयो वाऽअज्ञः स्वेनैवैनमेतदात्मना स्वया देवतया सम्भरत्यथो ब्रह्म वाऽअज्ञो ब्रह्मणैवैनमेतत्सम्भरति ॥ १५ ॥ अथैनमुपावकरति । ओषधयः प्रतिमोदध्वमग्निमेतꣳ शिवमायन्तमभ्यत्र युष्मा इत्येतद्वैतस्मादायत ओषधयो बिभ्यति यद्वै नोऽयं न हिꣳस्यादिति ताभ्य एवैनमेतद्भयति प्रत्येनं मोदध्वꣳ शिवो वोऽभ्येति न वो हिꣳसिष्यतीति व्यस्यन्विश्वा अनिरा अमीवा निषीदन्नोऽअप दुर्मतिं जह्यीति व्यस्यन्विश्वा अनिरा अमीवाश्च निषीदन्नोऽप सर्वं पाप्मानं जह्यीत्येतत् ॥ १६ ॥ ओषधयः प्रतिगृभ्णीत । पुष्पवतीः सुपिप्पला इत्येतद्वैतासाꣳ समृद्धꣳ रूपं यत्पुष्पवत्यः सुपिप्पलाः समृद्धा एनं प्रतिगृह्णीतेत्येतदयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासददित्ययं वो गर्भ ऋतव्यः सनातनꣳ सधस्थमासददित्येतत् ॥ १७ ॥ द्वाभ्यामुपावकरति । द्विपाद्यज्ञ-

मानो यज्ञमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपावक्रामति तं दक्षिणत उदञ्चमुपावक्रामति तस्योक्तो बन्धुरुद्धतमवोक्षितं भवति यत्रैनमुपावक्रामत्युद्धते वाऽअवोक्षितेऽग्निमादधति सिकता उपकीर्णा भवन्ति तासामुपरि बन्धुः ॥१८॥ परिश्रितं भवति । एतद्वै देवा अबिभयुर्यद्वै न इममिꣳ रक्षाꣳसि नाष्ट्रा न क्रव्युरिति तस्माऽएतां पुरं पर्यश्रयंस्तथैवास्माऽअयमेतां पुरं परिश्रयत्यथो योनिर्वाऽइयꣳ रेत इदं तिर इव वै योनौ रेतः सिच्यते योनिरूपमेतत्क्रियते तस्मादपि त्वया ज्ञायया तिर इवैव चिचरिषति ॥१९॥ अथैनं विष्यति । तद्यदेवास्यात्रोपनद्धस्य सꣳशुच्यति तामेवास्मादेतद्रुचं बर्हिर्धा दधात्यथोऽएतस्या एवैनमेतद्योनेः प्रजनयति ॥२०॥ वि पाजसा पृथुना शोशुचान इति । वि पाजसा पृथुना दीप्यमान इत्येतद्बाधस्व द्विषो रक्षसोऽअमीवा इति बाधस्व सर्वान्याप्मन इत्येतत्सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीताविति्याशिषमाशास्ते ॥२१॥ अथाऽइडामन्याक्रम्य । उदीचः प्राचः पशून्प्रसृजत्येषा क्षेभ्येषां देवमनुष्याणां दिग्यदुदीची प्राच्येतस्यां तद्दिशि पशून्दधाति तस्मादुभये देवमनुष्याः पशूनुपजीवन्ति ॥२२॥ ब्राह्मणम् ॥५ [४. ४.] ॥ चतुर्थोऽध्यायः [३१.] ॥ ॥

पर्णाकषायनिष्पक्वा एता आपो भवन्ति । स्थेम्ने न्वेव यद्वै पर्णाकषायेण सोमो वै पर्णाश्चन्द्रमा ऽ वै सोम एतद्वै वाऽएकमग्निरूपमेतस्यैवाग्निरूपस्योपाप्त्यै ॥१॥ ता उपसृजति । आपो हि ष्ठा मयोभुव इति यां वै देवतामृगभ्यनूक्ता यां यजुः सैव देवता सऽर्क्सो देवता तद्यजुस्ता ऽएता आप एवैष त्रिचस्तद्या अमूराप एकꣳ रूपꣳ समदृश्यन्त ता एतास्तदेवैतद्रूपं करोति ॥२॥ अथ फेनं ज्ञानयित्वान्ववदधाति । यदेव तत्फेनो द्वितीयꣳ रूपमसृज्यत तदेवैतद्रूपं करोत्यथ यामेव तत्र मृदꣳ संयौति सैव मृद्यत्ततृतीयꣳ रूपमसृज्यतैतेभ्यो वाऽएष रूपेभ्योऽग्रेऽसृज्यत तेभ्य एवैनमेतज्ज्ञानयति ॥३॥ अथाऽइडामैः सꣳसृजति । स्थेम्ने न्वेव

यद्वै वाजलोमैरेतद्वाऽएनं देवाः पशुभ्योऽधि समभरंस्तथैवैनमयमेतत्पशुभ्योऽधि सम्भरति तथ्यद्वाजलोमैरेवाज्ञे हि सर्वेषां पशूनाꣳ रूपमथ यल्लोम लोम हि रूपम् ॥४॥ मित्रः सꣳसृज्य । पृथिवीं भूमिं च ज्योतिषा सहेति प्राणो वै मित्रः प्राणो वाऽएतदग्रे कर्माकरोत्सुज्ञातं ज्ञातवेदसमयद्भ्माय वा सꣳसृज्ञामि प्रज्ञाभ्य इति यथैव यज्ञस्तथा बन्धुः ॥५॥ अथैतत्त्रयं पिष्टं भवति । शर्कराश्मायोरसस्तेन सꣳसृज्ञति स्थेम्ने न्वेव यद्वै तेनैतावती वाऽइयमग्रेऽसृज्यत तथ्यावतीयमग्रेऽसृज्यत तावतीमेवैनामेतत्करोति ॥६॥ रुद्राः सꣳसृज्य । पृथिवीं बृहज्ज्योतिः समीधिरऽइत्यसौ वाऽआदित्य एषोऽग्निरेतद्वै तद्रुद्राः सꣳसृज्य पृतिवीं बृहज्ज्योतिः समीधिरे तेषां भानुरज्ञस्र इव्रुक्रो देवेषु रोचतऽइत्येष वाऽएषां भानुरज्ञस्रः शुक्रो देवेषु रोचते ॥७॥ द्वाभ्याꣳ सꣳसृज्ञति । द्विपाद्यज्ञमानो यज्ञमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्सꣳसृज्ञति ॥८॥ अथ प्रयौति । सꣳसृष्टां वसुभी रुद्रैरिति सꣳसृष्टा ह्येषा वसुभिश्च रुद्रैश्च भवति यन्मित्रेण तद्वसुभिर्यद्रुद्रैस्तद्रुद्रैर्धीरैः कर्मण्यां मृदमिति धीरा हि ते कर्मण्योऽइयं मृद्धस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु तामिति वाग्वै सिनीवाली सैनाꣳ हस्ताभ्यां मृद्वीं कृत्वा करोवित्येतत् ॥९॥ सिनीवाली सुकपर्दा सुकुरीरा स्वौपशेति । योषा वै सिनीवाल्येतद्वै वै योषायै समृद्धꣳ रूपं यत्सुकपर्दा सुकुरीरा स्वौपशा समर्धयत्येवैनामेतत्सा तुभ्यमदिते मक्ष्वोखां दधातु हस्तयोरितीयं वाऽअदितिर्मक्ष्यस्यै तदाह ॥१०॥ उखां कृणोतु । शक्त्या बाहुभ्यामदितिर्धिषेति शक्त्या च हि करोति बाहुभ्यां च धिया च माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भऽइति यथा माता पुत्रमुपस्थे बिभृयादेवमग्निं गर्भे बिभर्वित्येतत् ॥११॥ त्रिभिः प्रयौति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्प्रयौति द्वाभ्याꣳ सꣳसृज्ञति तत्पञ्च पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्त-

द्भवति त्रिभिरुप उपसृजति तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवत्यथोऽअष्टाक्षरा वाऽइयमग्नेऽसृज्यत तयावतीयमग्नेऽसृज्यत तावतीमेवैनामेतत्करोति ॥ १२ ॥ ब्राह्मणम् ॥ ६ [५. १.] ॥

अथ मृत्पिण्डमपादत्ते । यावन्तं निधयेऽलं मन्यते मखस्य शिरोऽसीति यज्ञो वै मखस्तस्यैतच्छिर आहवनीयो वै यज्ञस्य शिर आहवनीयमु वाऽएतं चेष्यन्भवति तस्मादाह मखस्य शिरोऽसीति ॥ १ ॥ यद्वेवाह मखस्य शिरोऽसीति । ज्ञायतऽएष एतयच्चीयते शीर्षतो वै मुखतो ज्ञायमानो ज्ञायते शीर्षतो मुखतो ज्ञायमानो ज्ञायाताऽइति ॥ २ ॥ तं प्रथयति । वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वदित्यय्ँ ह्येष लोको निधिस्तमेतद्वसवो गायत्रेण छन्दसाकुर्वंस्तथैवैनमयमेतद्गायत्रेण छन्दसा करोत्यङ्गिरस्वदिति प्राणो वाऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतद्यो प्रतिष्ठितासीति पृथिव्यसीति पृथिवी ह्येष निधिर्धार्या मयि प्रजाय्ँ रायस्पोषं गौपत्यय्ँ सुवीर्यय्ँ सजातान्यजमानायेत्येतद्वै वसव इमं लोकं कृत्वा तस्मिन्नेतामाशिषमाशासत तथैवैतद्यजमान इमं लोकं कृत्वा तस्मिन्नेतामाशिषमाशास्ते तां प्रादेशमात्रीं कृत्वाथास्यै सर्वतस्तीरमुन्नयति ॥ ३ ॥ अथ पूर्वमुद्धिमादधाति । रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदित्यन्तरिक्षय्ँ ह्येष उद्धिस्तमेतद्रुद्रास्त्रैष्टुभेन छन्दसाकुर्वंस्तथैवैनमयमेतत्त्रैष्टुभेन छन्दसा करोत्यङ्गिरस्वदिति प्राणो वाऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतद्यो प्रतिष्ठितासीत्यन्तरिक्षमसीत्यन्तरिक्षय्ँ ह्येष उद्धिर्धार्या मयि प्रजाय्ँ रायस्पोषं गौपत्यय्ँ सुवीर्यय्ँ सजातान्यजमानायेत्येतद्वै रुद्रा अन्तरिक्षं कृत्वा तस्मिन्नेतामाशिषमाशासत तथैवैतद्यजमानोऽन्तरिक्षं कृत्वा तस्मिन्नेतामाशिषमाशास्ते ताय्ँ संलिप्य सय्ँस्रवेण्य ॥ ४ ॥ अथोत्तरमुद्धिमादधाति । आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाङ्गिरस्वदिति द्यौर्ह्येष उद्धिस्तमेतदादित्या जागतेन छन्दसाकुर्वंस्तथैवैनमयमेतज्जागतेन छन्दसा करोत्यङ्गिरस्वदिति

प्राणो वाऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति द्यौरसीति द्यौर्वै-
ष उद्विर्धारया मयि प्रज्ञाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सज्ञातान्यज्ञमानायेत्येतद्वा
ऽआदित्या दिवं कृत्वा तस्यामितामाशिषमाशासत तथैवैतद्यज्ञमानो दिवं कृत्वा
तस्यामितामाशिषमाशास्ते ॥५॥ अथैतेन चतुर्थेन यजुषा करोति । विश्वे त्वा दे-
वा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदिति दिशो वैतद्यजुरेतद्वै विश्वे
देवा वैश्वानरा एषु लोकेषूखायामेतेन चतुर्थेन यजुषा दिशोऽदधुस्तथैवैतद्यज्ञमा-
न एषु लोकेषूखायामेतेन चतुर्थेन यजुषा दिशो दधात्यङ्गिरस्वदिति प्राणो वा
ऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति दिशोऽसीति दिशो वैत-
द्यजुर्धारया मयि प्रज्ञाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सज्ञातान्यज्ञमानायेत्येतद्वै वि-
श्वे देवा वैश्वानरा दिशः कृत्वा तास्वेतामाशिषमाशासत तथैवैतद्यज्ञमानो दिशः
कृत्वा तास्वेतामाशिषमाशास्ते ॥६॥ तेनैतेनान्तरतश्च बाह्यतश्च करोति । तस्मा-
देषां लोकानामन्तरतश्च बाह्यतश्च दिशाऽपरिमितमेतेन करोत्यपरिमिता हि
दिशः ॥७॥ तां प्रादेशमात्रीमेवोर्ध्वां करोति । प्रादेशमात्रीं तिरश्चीं प्रादेशमात्रो
वै गर्भो विष्णुर्योनिरेषा गर्भसंमितां तद्योनिं करोति ॥८॥ सा यदि वर्षीयसी
प्रादेशात्स्यात् । एतेन यजुषा क्रुसीयसीं कुर्याद्यदि क्रुसीयस्येतेन वर्षीयसीम् ॥९॥
स यद्येकः पशुः स्यात् । एकप्रादेशां कुर्यादथ यदि पञ्च पशवः स्युः पञ्चप्रादेशां
कुर्यादिषुमात्रीं वा वीर्यं वाऽइषुर्वीर्यसंमितेव तद्भवति पञ्चप्रादेशा ह स्म वै पु-
रेषुर्भवति ॥१०॥ अथ तिरश्चीꣳ रास्नां पर्यस्यति । दिशो वै सैतद्वै देवा इमांलो-
कानुखां कृत्वा दिग्भिरदृꣳहन्दिग्भिः पर्यतन्वंस्तथैवैतद्यज्ञमान इमांलोकानुखां कृ-
त्वा दिग्भिदृꣳहति दिग्भिः परितनोति ॥११॥ तामुत्तरे वितृतीये पर्यस्यति । अत्र
वै षां लोकानामन्ताः समायन्ति तदेवैनांस्तद्दृꣳहति ॥१२॥ अदित्यै रास्नासीति ।
वरुणया वै यज्ञे रज्जुरवरुण्यामेवैनामेतद्रास्नां कृत्वा पर्यस्यति ॥१३॥ अथ चतस्र

ऊर्धाः करोति । तूष्णीमेव दिशो ह्येव ता एतद्वै देवा इमांल्लोकानुखां कृत्वा दिग्भिः सर्वतोऽदृꣳहंस्तथैवैतद्यजमान इमांल्लोकानुखां कृत्वा दिग्भिः सर्वतो दृꣳहति ॥१४॥ ता एता एतस्मै भवन्ति । एतद्वाऽएता एतामस्तभ्नुवंस्तथैवैनामेतत्तस्तभ्नुवन्ति तद्यदूत ऊर्ध्वं तदेतया तिरश्च्या दृꣳहति यदूतोऽर्वाक्तदेताभिः ॥१५॥ तासामग्नेषु स्तनानुन्नयन्ति । एतद्वै देवा इमांल्लोकानुखां कृत्वैते स्तनैः सर्वान्कामानदुहत तथैवैतद्यजमान इमांल्लोकानुखां कृत्वैते स्तनैः सर्वान्कामान्दुहे ॥१६॥ सैषा गौरेव । इमे वै लोका उखेमे लोका गौस्तस्याऽएतद्दुधो यैषा तिरश्ची रास्ना सा वितृतीये भवति वितृतीये हि गोर्दुधः ॥१७॥ तस्यै स्तनानुन्नयति । ऊधस्तत्स्तनानुन्नयति सा चतुस्तना भवति चतुस्तना हि गौः ॥१८॥ ताꣳ ह्येके द्विस्तनां कुर्वन्ति । अथोऽअष्टस्तनां न तथा कुर्याद्ये वै गोः कनीयस्तनाः पशवो ये भूयस्तना अनुपजीवनीयतरा वाऽअस्यैतेऽनुपजीवनीयतराꣳ ह्येनां ते कुर्वन्तेऽथो ह ते न गां कुर्वते शुनीं वाविं वा वडबां वा तस्मात्तथा न कुर्यात् ॥१९॥ अथास्यै बिलमभिपद्यते । अदितिष्टे बिलं गृभ्णात्विति वाग्वाऽअदितिरेतद्वाऽएनां देवाः कृत्वा वाचादित्या निरष्ठापयंस्तथैवैनामयमेतत्कृत्वा वाचादित्या निष्ठापयति ॥२०॥ तां परिगृह्य निदधाति । कृत्वाय सा मह्यीमुखामिति कृत्वाय सा महतीमुखामित्येतन्मृन्मयीं योनिमग्नयऽइति मृन्मयी ह्येषा योनिरग्नेः पुत्रेभ्यः प्रायच्छददितिः अपयानित्येतद्वाऽएनामदितिः कृत्वा देवेभ्यः पुत्रेभ्यः अपणाय प्रायच्छत्तयैवैनामयमेतत्कृत्वा देवेभ्यः अपणाय प्रयच्छति ॥२१॥ ता ह्येके तिस्रः कुर्वन्ति । त्रयो वाऽइमे लोका इमे लोका उखा इति वदन्तोऽथो अन्योऽन्यस्मै प्रायश्चित्त्यै यदीतरा भेत्स्यतेऽथेतरस्यां भरिष्यामो यदीतराथेतरस्यामिति न तथा कुर्याद्यो वाऽएष निधिः प्रथमोऽयꣳ स लोको यः पूर्व उद्धिरत्तरिक्षं तद्य उत्तरो द्यौः साथ यदेतच्चतुर्थं यज्ञुर्दिशो ह्येव तदेतावद्वाऽइदꣳ सर्वं यावदिमे च लोका दि-

शश्च स यदत्रोपाकुरेदति तद्रेचयेच्चदु वै यज्ञेऽतिरिक्तं क्रियते यज्ञमानस्य तद्दुष्कृतं भ्रातृव्यमभ्यतिरिच्यते यदु भिन्नायै प्रायश्चित्तिरुत्तरस्मिंस्तदन्वाख्याने ॥ २२ ॥ ब्राह्मणम् ॥ ७ [५. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या ११४ ॥ ॥

तस्या एतस्या अषाढां पूर्वां करोति । इयं वाऽअषाढियमु वाऽएषां लोकानां प्रथमासृज्यत तामेतस्या एव मृदः करोत्येषाऽ ह्येव लोकानामियं महिषी करोति महिषी ह्येयं तयैव प्रथमा वित्ता सा महिषी ॥ १ ॥ पादमात्री भवति । प्रतिष्ठा वै पाद इयमु वै प्रतिष्ठा त्र्यालिखिता भवति त्रिवृद्धीयम् ॥ २ ॥ अथोखां करोति । इमांस्तल्लोकान्करोत्यथ विश्वज्योतिषः करोत्येता देवता अग्निं वायुमादित्यमेता ह्येव देवता विश्वं ज्योतिस्ता एतस्या एव मृदः करोत्येभ्यस्तल्लोकेभ्य एतान्देवान्निर्मिमीते यजमानः करोति त्र्यालिखिता भवन्ति त्रिवृतो ह्येते देवा इत्यधिदैवतम् ॥ ३ ॥ अथाध्यात्मम् । आत्मैवोखा वागषाढा तां पूर्वां करोति पुरस्ताद्धीयमात्मनो वाक्तामेतस्या एव मृदः करोत्यात्मनो ह्येवेयं वाङ्महिषी करोति महिषी हि वाक्त्र्यालिखिता भवति त्रेधाविहिता हि वाग्ऋचो यजूꣳषि सामान्यथो यदिदं त्रयं वाचो रूपमुपाꣳशु व्यत्तरामुच्चैः ॥ ४ ॥ अथोखां करोति । आत्मानं तत्करोत्यथ विश्वज्योतिषः करोति प्रज्ञा वै विश्वज्योतिः प्रज्ञा ह्येव विश्वं ज्योतिः प्रज्ञाननमेवैतत्करोति ता एतस्या एव मृदः करोत्यात्मनस्तत्प्रज्ञां निर्मिमीते यजमानः करोति यजमानस्तदात्मनः प्रज्ञां करोत्यनन्तर्हिताः करोत्यनन्तर्हितां तदात्मनः प्रज्ञां करोत्युत्तराः करोत्युत्तरां तदात्मनः प्रज्ञां करोति त्र्यालिखिता भवन्ति त्रिवृद्धि प्रज्ञातिः पिता माता पुत्रोऽथो गर्भ उल्बं जरायु ॥ ५ ॥ ता एता यजुष्कृतायै करोति । अथ यजुष्कृतायाऽइतरा निरुक्ता एता भवत्यनिरुक्ता इतराः परिमिता एता भवत्यपरिमिता इतराः ॥ ६ ॥ प्रजापतिरेषोऽग्निः । उभयम्वेतत्प्रजापतिर्निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च तथा यजुष्कृतायै करोति

यदेवास्य निरुक्तं परिमितꣳ रूपं तदस्य तेन संस्करोत्यथ या अयज्ञुष्कृतायै यदेवास्यानिरुक्तमपरिमितꣳ रूपं तदस्य तेन संस्करोति स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति य एवं विद्वानेतदेवं करोत्यथोपशयायै पिण्डं परिशिनष्टि प्रायश्चित्तिभ्यः ॥ ७॥ ॥ शतम् ३७०० ॥ ॥ अथैनां धूपयति । स्थेम्ने न्वेवाथो कर्मणः प्रकृततायै यद्वेव धूपयति शिर एतद्यज्ञस्य यदुखा प्राणो धूमः शीर्षंस्तत्प्राणं दधाति ॥ ८॥ अश्वशकैर्धूपयति । प्राजापत्यो वाऽअश्वः प्रजापतिरग्निर्नो वा आत्मात्मानꣳ हिनस्त्यहिꣳसायै तद्वै शर्क्वेव तद्धि जग्धं यातयाम तथो ह नैवाश्वꣳ हिनस्ति नेतरान्पशून् ॥ १॥ वसवस्त्वा धूपयन्तु । गायत्रेण छन्दसाङ्गिरस्वदुद्वास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदिन्द्रस्त्वा धूपयतु वरुणास्त्वा धूपयतु विष्णुस्त्वा धूपयत्वित्येताभिरेवैनामेतद्देवताभिर्धूपयति ॥ १०॥ सप्ताश्वशकानि भवन्ति । सप्त यज्ञूꣳषि सप्ततय्य एता देवताः सप्त शीर्षन्प्राणा यदु वाऽअपि बह्वकृत्वः सप्त-सप्त सप्तैव तच्छीर्षण्येव तत्सप्त प्राणान्दधाति ॥ १७॥ ब्राह्मणम् ॥ १ [५. ३] ॥ ॥

अथैनमस्यां खनति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तस्माऽइमामेवात्मानमकुर्वन्गुप्त्याऽआत्मात्मानं गोप्स्यतीति ॥ १॥ तं वाऽअदित्या खनति । इयं वाऽअदितिर्नो वाऽआत्मात्मानꣳ हिनस्त्यहिꣳसायै यदन्यया देवतया खनेद्धिꣳस्याद्धैनम् ॥ २॥ अदितिष्ट्वा देवी विश्वदेव्यावती । पृथिव्याः सधस्थेऽअङ्गिरस्वत्खनतवव्ठेत्यवठो वै षः देवत्रात्र सा वैणव्यभ्रिरुत्सीदति चतुःस्रक्तिरेष कूपो भवति चतस्रो वै दिशः सर्वाभ्य एवैनमेतद्दिग्भ्यः खनत्यथ पचनमवधायाषाढामवद्धाति तूष्णीमेव ताꣳ हि पूर्वा करोति ॥ ३॥ अथोखामवद्धाति । देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वद्धत्तूख

ऽइति देवानाꣳ हैतामग्रे पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद्ध्रुवास्ताभिरेवैनामेतद्धाति ता ह ता ओषधय एवौषधयो वै देवानां पत्न्य ओषधिभिर्हीदꣳ सर्वꣳ हितमोषधिभिरेवैनामेतद्धात्यथ विश्वज्योतिषोऽवद्धाति तूष्णीमेवाथ पचनमवधायाभीन्द्ध ॥४॥ धिषणास्त्वा देवीः । विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वद्भीन्धतामुखऽइति धिषणा हैतामग्रे देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद्भीधिरे ताभिरेवैनामेतद्भीन्द्धे सा ह सा वागेव वाग्वै धिषणा वाचा ह्येदꣳ सर्वमिद्धं वाचैवैनामेतद्भीन्द्धेऽथैतानि त्रीणि यजूꣳषीद्धमाण एव जपति ॥५॥ वनूत्रीष्ट्वा देवीः । विश्वदेव्यावतीः पृथिव्याः सधस्थऽअङ्गिरस्वक्रपयन्तूखऽइति वनूत्रीर्हैतामग्रे देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वक्रपयां चक्रुस्ताभिरेवैनामेतक्रपयति तानि ह तान्यहोरात्राण्येवाहोरात्राणि वै वनूत्रयोऽहोरात्रैर्हीदꣳ सर्वं वृतमहोरात्रैरेवैनामेतक्रपयति ॥६॥ ग्रास्त्वा देवीः । विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वत्पचन्तूखऽइति ग्रा हैतामग्रे देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वत्पेचुस्ताभिरेवैनामेतत्पचति तानि ह तानि ह्रन्दाꣳस्येव ह्रन्दाꣳसि वै ग्राश्छन्दोभिर्हि स्वर्गं लोकं गच्छन्ति छन्दोभिरेवैनामेतत्पचति ॥७॥ ज्ञनयस्त्वाच्छिन्नपत्रा देवीः । विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वत्पचन्तूखऽइति ज्ञनयो हैतामग्रेऽच्छिन्नपत्रा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वत्पेचुस्ताभिरेवैनामेतत्पचति तानि ह तानि नक्षत्राण्येव नक्षत्राणि वै ज्ञनयो ये हि ज्ञनाः पुण्यकृतः स्वर्गं लोकं यन्ति तेषामेतानि ज्योतीꣳषि नक्षत्रैरेवैनामेतत्पचति ॥८॥ स वै खनत्येकेन । अवदधात्येकेनाभीन्द्धेऽएकेन अपयत्येकेन द्वाभ्यां पचति तस्माद्विः संवत्सरस्यान्नं पच्यते तानि षट् सम्पद्यन्ते षड्वृतवः संवत्सरः संवत्सरोऽग्र्यावानग्र्यावत्यस्य मात्रा तावत्तद्भवति ॥९॥ अथ मित्रस्य चर्षणीधृत इति । मैत्रेण यजुषोपन्याचरति यावत्कियच्चो-

पन्याचरति न वै मित्रं कं चन हिनस्ति न मित्रं कश्चन हिनस्ति तथो ह्येष एतां न हिनस्ति नोऽएतमेषा तां दिवैवोपवपेद्दिवोद्वपेद्दक्ष्यग्नेयम् ॥१०॥ ताꣳ सावित्रेण यजुषोद्वपति । सविता वै प्रसविता सवितृप्रसूत एवैनामेतदुद्वपति देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाङ्रुत शक्त्येति सर्वꣳ ह्येतत्सविता ॥११॥ अथैनां पर्यावर्तयति । अव्यथमाना पृथिव्यामाशा दिश आपृणेत्यव्यथमाना त्वं पृथिव्यामाशा दिशो रसेनापूरयेत्येतत् ॥१२॥ अथैनामुच्छ्रयति । उत्थाय बृहती भवेत्युत्थाय ह्येमे लोका बृहन्त उदु तिष्ठ ध्रुवा त्वमित्युदु तिष्ठ स्थिरा त्वं प्रतिष्ठितेत्येतत् ॥१३॥ तां परिगृह्य निदधाति । मित्रैतां तऽउखा परिददाम्यभित्याऽएषा मा भेदीत्ययं वै वायुर्मित्रो योऽयं पवते तस्माऽएवैनामेतत्परिददाति गुप्त्यै ते ह्येमे लोका मित्रगुप्तास्तस्मादेषां लोकानां न किं चन मीयते ॥१४॥ अथैनामाक्रूणत्ति । स्येन्न्वेवायो कर्मणः प्रकृततायै यद्वेवाक्रूणत्ति शिर एतच्छस्य यदुखा प्राणः पयः शीर्षंस्तत्प्राणं दधात्यथो योषा वाऽउखा योषायां तत्पयो दधाति तस्माद्योषायां पयः ॥१५॥ अज्ञायै पयसाक्रूणत्ति । प्रजापतेर्वै शोकादज्ञा समभवत्प्रजापतिरग्निर्नो वाऽआत्मात्मानꣳ हिनस्त्यहिꣳसायै यद्वेवाज्ञायाऽअज्ञा ह सर्वा ओषधीरत्ति सर्वासामेवैनामेतदोषधीनाꣳ रसेनाक्रूणत्ति ॥१६॥ वसवस्त्वाक्रून्दन्तु । गायत्रेण छन्दसाङ्गिरस्वदुद्रास्त्वाक्रून्दन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदादित्यास्त्वाक्रून्दन्तु जागतेन छन्दसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आक्रून्दन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदित्येताभिरेवैनामेतद्देवताभिराक्रूणत्ति स वै याभिरेव देवताभिः करोति ताभिर्धूपयति ताभिराक्रूणत्ति यो वाव कर्म करोति स एव तस्योपचारं वेद तस्माद्याभिरेव देवताभिः करोति ताभिर्धूपयति ताभिराक्रूणत्ति ॥१७॥ ब्राह्मणम् ॥ २ [५. ४.] ॥ पञ्चमोऽध्यायः [४०.] ॥ ॥

भूयाꣳसि ह्वीꣳषि भवन्ति । अग्निचित्यायां यदु चानग्निचित्यायामतीनि ह

कर्माणि सन्ति यान्यन्यत्कर्मांति तान्यतीनि तेषामग्निचित्या राजसूयो वाजपेयो ऽश्वमेधस्तथ्यत्तान्यन्यानि कर्माण्यति तस्मात्तान्यतीनि ॥१॥ आग्नाविष्णव एकादशकपालः । तद्धरस्य दीक्षणीयं वैश्वानरो द्वादशकपाल आदित्यश्च चरुस्तेऽग्नेः ॥२॥ स यदाग्नाविष्णवमेव निर्वपेत् । नेतरे हविषीऽधरस्यैव दीक्षणीयं कृतꣳ स्यान्नाग्नेरथ यदितरेऽएव हविषी निर्वपेन्नाग्नाविष्णवमग्नेरेव दीक्षणीयं कृतꣳ स्यान्नाधरस्य ॥३॥ उभयानि निर्वपति । अधरस्य चाग्नेश्चोभयꣳ ह्येतत्कर्माधरकर्म चाग्निकर्म चाधरस्य पूर्वमथाग्नेरुपायि ह्येतत्कर्म यदग्निकर्म ॥४॥ स य एष आग्नाविष्णवः । तस्य तदेव ब्राह्मणं यत्पुरश्चरणे वैश्वानरो द्वादशकपालो वैश्वानरो वै सर्वेऽग्नयः सर्वेषामग्नीनामुपाप्त्यै द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानरः ॥५॥ यद्वैवैतं वैश्वानरं निर्वपति । वैश्वानरं वाऽएतमग्निं जनयिष्यन्भवति तमेतत्पुरस्ताद्दीक्षणीयायाꣳ रेतो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तथ्यदेतमत्र वैश्वानरꣳ रेतो भूतꣳ सिञ्चति तस्मादृषोऽमुत्र वैश्वानरो जायते ॥६॥ यद्वैवैते हविषी निर्वपति । क्षत्रं वै वैश्वानरो विडेष आदित्यश्चरुः क्षत्रं च तद्विशं च करोति वैश्वानरं पूर्वं निर्वपति क्षत्रं तत्कृत्वा विशं करोति ॥७॥ एक एष भवति । एकदेवत्य एकस्यं तत्क्षत्रमेकस्थाꣳ श्रियं करोति चरुरितरो बह्वदेवत्यो भूमा वाऽएष तण्डुलानां यच्चरुर्भूमोऽएष देवानां यदादित्या विशि तद्भूमानं दधातीत्यधिदेवतम् ॥८॥ अथाध्यात्मꣳ । शिर एव वैश्वानर आत्मैष आदित्यश्चरुः शिरश्च तदात्मानं च करोति वैश्वानरं पूर्वं निर्वपति शिरस्तत्कृत्वात्मानं करोति ॥९॥ एक एष भवति । एकमिव हि शिरश्चरुरितरो बह्वदेवत्यो भूमा वाऽएष तण्डुलानां यच्चरुर्भूमोऽएषोऽङ्गानां यदात्मात्मंस्तदङ्गानां भूमानं दधाति ॥१०॥ घृत एष भवति । घृतभाजना ह्यादित्याः स्वेनैवैनानेतद्भागेन स्वेन रसेन प्रीणात्युपाꣳश्वेतानि हवीꣳषि भवन्ति रेतो वा

ऽअत्र यज्ञ उपाꣳशु वै रेतः सिच्यते ॥ ११ ॥ अथौद्भभणानि जुहोति । औद्भभणैर्वै देवा आत्मानमस्माल्लोकात्स्वर्गं लोकमभ्युदगृह्णत यदुदगृह्णत तस्मादौद्भभणानि तथैवैतद्यजमान औद्भभणैरेवात्मानमस्माल्लोकात्स्वर्गं लोकमभ्युद्गृह्णीति ॥ १२ ॥ तानि वै भूयाꣳसि भवन्ति । अग्निचित्यायां यदु चानग्निचित्यायां तस्योक्तो बन्धुरुभयानि भवन्ति तस्योक्तोऽधरस्य पूर्वाण्यथाग्नेस्तस्योऽपरोक्तः ॥ १३ ॥ पश्चाधरस्य जुहोति । पाङ्क्तो यज्ञो यावान्यज्ञो यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति सप्तापूरुषः सप्तचितिकोऽग्निः सप्तर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति तान्युभयानि द्वादश सम्पद्यन्ते द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥ १४ ॥ स जुहोति । आकूतिमग्निं प्रयुजꣳ स्वाहेत्याकूताद्वाऽएतद्यज्ञे कर्म समभवत्तदेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥ १५ ॥ मनो मेधामग्निं प्रयुजꣳ स्वाहेति । मनसो वाऽएतद्यज्ञे कर्म समभवत्तदेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥ १६ ॥ चित्तं विज्ञातमग्निं प्रयुजꣳ स्वाहेति । चित्ताद्वाऽएतद्यज्ञे कर्म समभवत्तदेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥ १७ ॥ वाचो विधृतिमग्निं प्रयुजꣳ स्वाहेति । वाचो वाऽएतद्यज्ञे कर्म समभवत्तामेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥ १८ ॥ प्रजापतये मनवे स्वाहेति । प्रजापतिर्वै मनुः स ह्येदꣳ सर्वमममनुत प्रजापतिर्वाऽएतद्यज्ञे कर्माकरोत्तमेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥ ११ ॥ अग्नये वैश्वानराय स्वाहेति । संवत्सरो वाऽअग्निर्वैश्वानरः संवत्सरो वाऽएतद्यज्ञे कर्माकरोत्तमेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥ २० ॥ अथ सावित्रीं जुहोति । सविता वाऽएतद्यज्ञे कर्माकरोत्तमेवैतदेतस्मै कर्मणे प्रयुङ्क्ते विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहेति यो देवस्य सवितुः सख्यं वृणीते स द्युम्नं च पुष्टिं च वृणीतऽएष वाऽअस्य सख्यं वृणीते य एतत्कर्म करोति ॥ २१ ॥ तान्यु हैके । उखायामेवैतान्यौद्भभणानि जुह्वति कामेभ्यो

वाऽएतानि क्लृप्तऽआत्मोऽएष यज्ञमानस्य यदुखात्मन्यज्ञमानस्य सर्वान्कामान्प्रतिष्ठापयाम इति न तथा कुर्यादितस्य वै यज्ञस्य॰ सꣳस्थितस्यैतासामाकृतीनां यो रसस्तदेतदर्चिर्यद्दीप्यते तद्यत्सꣳस्थिते यज्ञे क्रुतेघौद्भभणेषूखां प्रवृणक्ति तदेनामेष यज्ञ आरोहति तं यज्ञं बिभर्ति तस्मात्सꣳस्थितऽएव यज्ञे क्रुतेघौद्भभणेषूखां प्रवृञ्ज्यात् ॥२२॥ मुञ्जकुलायेनावस्तीर्णा भवति । आदीप्यादिति न्वेव यद्वेव मुञ्जकुलायेन योनिरेषाग्नेर्यन्मुञ्जो न वै योनिर्गर्भꣳ हिनस्त्यक्षिꣳसायै योनेर्वै जायमानो जायते योनेर्जायमानो जायाताऽइति ॥२३॥ शणकुलायमन्तरं भवति । आदीप्यादिति न्वेव यद्वेव शणकुलायं प्रजापतिर्यस्यै योनेरसृज्यत तस्याऽउमा उल्बमासञ्ज्रणा जरायु तस्मात्ते पूतयो जरायु हि ते न वै जरायु गर्भꣳ हिनस्त्यक्षिꣳसायै जरायुणो वै जायमानो जायते जरायुणो जायमानो जायाताऽइति ॥२४॥ ब्राह्मणम् ॥३ [६ १.] ॥ ॥

तां तिष्ठन्प्रवृणक्ति इमे वै लोका उखा तिष्ठन्तीव वाऽइमे लोका अथो तिष्ठन्वै वीर्यवत्तमः ॥१॥ उदङ् प्राङ् तिष्ठन् । उदङ्ङै प्राङ् तिष्ठन्प्रजापतिः प्रजा असृजत ॥२॥ यद्वेवोदङ् प्राङ् तिष्ठन् । एषा ह्येभ्येषां देवमनुष्याणां दिग्यदुदीची प्राची ॥३॥ यद्वेवोदङ् प्राङ् तिष्ठन् । एतस्याꣳ ह दिशि स्वर्गस्य लोकस्य द्वारं तस्मादुदङ् प्राङ् तिष्ठन्नाकृतीर्जुह्वोत्युदङ् प्राङ् तिष्ठन्दक्षिणा नयति द्वारैव तत्स्वर्गस्य लोकस्य वित्तं प्रपादयति ॥४॥ मा सु भित्था मा सु रिष इति । यथैव यजुस्तथा बन्धुरम्ब धृष्णु वीर्यस्व स्विति योषा वाऽउखाम्बेति वै योषाया ऽआमल्लणꣳ स्विव वीर्यस्वाग्निश्चेदं करिष्यथ इत्यग्निश्च ह्येतत्करिष्यन्तौ भवतः ॥५॥ दृꣳहस्व देवि पृथिवि स्वस्तयऽइति । यथैव यजुस्तथा बन्धुरासुरी माया स्वधया कृतासीति प्राणो वाऽअसुस्तस्यैषा माया स्वधया कृता जुष्टं देवेभ्य इदमस्तु हव्यमिति या एवैतस्मिन्नग्नावाकृतीर्हौष्यन्भवति ता एतदाहाथोऽएषैव

कव्यमरिष्टा वमुदिहि यज्ञेऽअस्मिन्निति यथैवारिष्टानार्तेतस्मिन्यज्ञऽउदियादेवमेत-
दाह ॥ ६ ॥ द्वाभ्यां प्रवृणक्ति । द्विपाद्यजमानो यजमानोऽग्रियावानग्रियावत्यस्य
मात्रा तावतैवैनामेतत्प्रवृणक्ति गायत्र्या च त्रिष्टुभा च प्राणो गायत्र्यात्मा त्रिष्टु-
बेतावान्वै पशुर्यावान्प्राणश्चात्मा च तद्यावान्पशुस्तावतैवैनामेतत्प्रवृणक्त्यथो
ऽअग्निर्वै गायत्रीन्द्रस्त्रिष्टुबिन्द्राग्नोऽग्रियावानग्रियावत्यस्य मात्रा तावतैवैनामितत्प्र-
वृणक्तीन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्रियावानग्रियावत्यस्य मात्रा तावतैवै-
नामेतत्प्रवृणक्ति तयोः सप्त पदानि सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संव-
त्सरोऽग्रियावानग्रियावत्यस्य मात्रा तावत्तद्भवति ॥ ७ ॥ तां यदाग्निः संतपति ।
अथैनामर्चिरारोहति योषा वाऽउखा वृषाग्निस्तस्माद्यदा वृषा योषाꣳ संतपत्य-
थास्याꣳ रेतो दधाति ॥ ८ ॥ तद्वैके । यदि चिरमर्चिरारोहत्यङ्गारानिवावपत्युभये-
नैषोऽग्निरिति न तथा कुर्यादस्यन्वान्वाव पशुर्जायतेऽथ तं नाग्रऽएवास्यन्वन्त-
मिव न्यृषन्ति रेत-इवैव दधति रेत ऽएतदनस्थिकं यदर्चिस्तस्मादेनामर्चिरेवा-
रोहेत् ॥ ९ ॥ तां यदार्चिरारोहति । अथास्मिन्त्समिधमादधाति रेतो वाऽएनामित-
दापद्यतऽएषोऽग्निस्तस्मिन्नेताꣳ रेतसि सम्भूतिं दधाति ॥ १० ॥ सा कार्मुकी स्यात् ।
देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त ते देवा अग्निमनीकं कृत्वासुरानभ्यायंस्त-
स्यार्चिषः प्रगृहीतस्यासुरा अग्रं प्रावृश्चंस्तदस्यां प्रत्यतिष्ठत्स कृमुकोऽभवत्तस्मात्स
स्वादू रसो हि तस्माद्ध लोहितोऽचिर्हि स एषोऽग्नेरेव यत्कृमुकोऽग्निमेवास्मि-
न्नेतत्सम्भूतिं दधाति ॥ ११ ॥ प्रादेशमात्री भवति । प्रादेशमात्रो वै गर्भो विष्णुरा-
त्मसंमितामेवास्मिन्नेतत्सम्भूतिं दधाति ॥ १२ ॥ घृते न्युप्ता भवति । अग्निर्यस्यै यो-
नेरसृज्यत तस्यै घृतमुल्बमासीत्तस्मात्तत्प्रत्युद्दीप्यतऽआत्मा ह्यस्यैष तस्मात्तस्य
न भस्म भवत्यात्मैव तदात्मानमप्येति न वाऽउल्बं गर्भꣳ हिनस्त्यहिꣳसाया
ऽउल्बाद्वै जायमानो जायतऽउल्बाज्जायमानो जायताऽइति ॥ १३ ॥ तामादधाति

। द्रुन्नः सर्पिरासुतिरिति दार्वन्नः सर्पिरशन इत्येतत्प्रत्नो होता वरेण्य इति सनातनो होता वरेण्य इत्येतत्सहसस्पुत्रोऽअद्भुत इति बलं वै सहो बलस्य पुत्रोऽद्भुत इत्येतत्तिष्ठन्नादधाति स्वाहाकारेण तस्योपरि बन्धुः ॥ १४ ॥ तद्वाऽआत्मैवोखा । योनिर्मुञ्जाः शणा जरायूल्बं घृतं गर्भः समित् ॥ १५ ॥ बाक्योखा भवति । अन्तरे मुञ्जा बाक्यो ह्यात्मान्तरा योनिर्बाक्ये मुञ्जा भवत्यन्तरे शणा बाक्या हि योनिरन्तरं जरायु बाक्ये शणा भवत्यन्तरं घृतं बाक्यꣳ हि जराय्वन्तरमुल्बं बाक्यं घृतं भवत्यन्तरा समिद्बाक्यꣳ ह्युल्बमन्तरो गर्भ एतेभ्यो वै जायमानो जायते तेभ्य एवैनमेतज्जनयति ॥ १६ ॥ ब्राह्मणम् ॥ ४ [६. २.] ॥ ॥

अथ वैकङ्कतीमादधाति । प्रजापतिर्यो प्रथमामाकृतिमसृजत सृष्ट्वा यत्र न्यमृष्ट ततो विकङ्कतः समभवत्सैषा प्रथमाकृतिर्यद्विकङ्कतस्तामस्मिन्नेतज्जुहोति तयैनमेतत्प्रीणाति परस्या अधि संवतोऽवरां२॥ऽअभ्यातर । यत्राहमस्मि तां२॥ऽअवेति यथैव यजुस्तथा बन्धुः ॥ १ ॥ अथौदुम्बरीमादधाति । देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त ते ह सर्वऽएव वनस्पतयोऽसुरानभ्युपेयुरुदुम्बरो हैव देवान्न जह्रौ ते देवा असुरान्जित्वा तेषां वनस्पतीनवृञ्जत ॥ २ ॥ ते होचुः । हन्त यैषु वनस्पतिषूर्ग्यो रस उदुम्बरे तं दधाम ते यद्यपक्रामियुर्यातयामा अपक्रामियुर्यथा धेनुर्दुग्धा यथानड्वानूक्त्वानिति तद्यैषु वनस्पतिषूर्ग्यो रस आसीदुदुम्बरे तमदधुस्तयैतद्दूर्जा सर्वान्वनस्पतीन्प्रति पच्यते तस्मात्स सर्वदार्द्रः सर्वदा क्षीरी तदेतत्सर्वमन्नं यदुदुम्बरः सर्वे वनस्पतयः सर्वेणैवैनमेतदन्नेन प्रीणाति सर्वैर्वनस्पतिभिः समिन्द्धे ॥ ३ ॥ परमस्याः परावत इति । या परमा परावदित्येतद्धोक्त्वाह यद्गागहोति रोहितो वाग्नेरश्वः पुरीष्यः पुरुप्रिय इति पशव्यो बहुप्रिय इत्येतदग्ने वं तरा मृध इत्यग्ने वं तर सर्वान्यात्मन इत्येतत् ॥ ४ ॥ अथापरशुवृक्णमादधाति । जायतऽएष एतद्यच्छीयते स एष सर्वस्माऽअन्नाय जायतऽएतद्वैकमन्नं यदपरशु-

वृकणं तेनैनमेतत्प्रीणाति यद्ग्ने कानि कानि चिदा ते दारूणि दध्मसि । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठेति यथैव यजुस्तथा बन्धुस्तद्यत्किं चापरशुवृकणं तदस्माऽएतत्स्वदयति तदस्माऽअन्नं कृत्वापिदधाति ॥५॥ अथाधःशयमादधाति । ज्ञायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय ज्ञायतऽएतद्वेकमन्नं यदधःशयं तेनैनमेतत्प्रीणाति यदुत्युपजिघ्विका यद्वमोऽअतिसर्पतीत्युपजिघ्विका वा हि तदुत्ति वमो वातिसर्पति सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठेति यथैव यजुस्तथा बन्धुस्तद्यत्किं चाधःशयं तदस्माऽएतत्स्वदयति तदस्माऽअन्नं कृत्वापिदधाति ॥६॥ अथैता उत्तराः पालाश्यो भवन्ति । ब्रह्म वै पलाशो ब्रह्मणैवैनमेतत्समिन्द्धे यद्वै व पालाश्यः सोमो वै पलाश एषो ह परमाकृतिर्यत्सोमाकृतिस्तामस्मिन्नेतज्जुहोति तयैनमेतत्प्रीणाति ॥७॥ अक्रन्क्रन्प्रयावं भरन्त इति । अक्रन्क्रन्प्रमत्ता आक्रन्त इत्येतद्यथायेव तिष्ठते घासमस्माऽइति यथाश्वाय तिष्ठते घासमित्येतद्रायस्पोषेण समिषा मदन्त इति रय्या च पोषेण च समिषा मदन्त इत्येतद्मे मा ते प्रतिवेशा रिषामेति यथैवास्य प्रतिवेशो न रिष्येदेवमेतदाह ॥८॥ नाभा पृथिव्याः समिधानेऽअग्नाविति । एषा ह नाभिः पृथिव्यै यत्रैष एतत्समिध्यते रायस्पोषाय बृहते ह्वामहऽइति रय्यै च पोषाय च बृहते ह्वामहऽइत्येतदिरंमदमितीरया ह्येष मत्तो बृहदुक्थमिति बृहदुक्थो ह्येष यज्ञत्रमिति यज्ञियमित्येतज्ज्ञेतारमग्निं पृतनासु सासह्मिमिति ज्ञेता ह्यग्निः पृतना उ सासह्मिः ॥९॥ याः सेना अभीवरीः । दृष्टाभ्यां मलिम्लून्ये ज्ञनेषु मलिम्लवो योऽस्मभ्यमरातीयाद्यश्च नो द्वेषते ज्ञनः । निन्दाद्योऽस्मान्धिप्साच्च सर्वं तं मस्मसा कुर्विति ॥१०॥ एतद्वै देवाः । यश्चैनानद्वेद्यं चाद्विषुस्तमस्माऽअन्नं कृत्वाप्यदधुस्तेनैनमप्रीणन्नन्नमदैतस्याभवद्दद्रुडु देवानां पाप्मानं तथैवैतद्यजमानो यश्चैनं द्वेष्टि यं च द्वेष्टि तमस्माऽअन्नं कृत्वापिदधाति तेनैनं प्रीणात्यन्नमदैतस्य भवति दद्रुत्यु यजमानस्य पाप्मा-

नम् ॥ ११ ॥ ता एता एकादशादधाति । अक्षत्रियस्य वापुरोहितस्य वासर्वं वै तच्चदेकादशासर्वं तच्चदक्षत्रियो वापुरोहितो वा ॥ १२ ॥ द्वादश क्षत्रियस्य वा पुरोहितस्य वा । सर्वं वै तच्चद्वादश सर्वं तच्चत्क्षत्रियो वा पुरोहितो वा ॥ १३ ॥ स पुरोहितस्यादधाति । सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम् । सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहित इति तदस्य ब्रह्म च क्षत्रं च सꣳश्यति ॥ १४ ॥ अथ क्षत्रियस्य । उदेषां बाहूऽअतिरमुद्वर्चोऽअथो बलम् । क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वांꣳ२ऽअहमिति यथैव क्षिणुयादमित्रानुन्नयेत्स्वानेवमेतदाहोभे वैवैतेऽआदध्यादयं वाऽअग्निर्ब्रह्म च क्षत्रं चेममेवैतदग्निमेताभ्यामुभाभ्याꣳ समिन्द्धे ब्रह्मणा च क्षत्रेण च ॥ १५ ॥ तास्त्रयोदश सम्पद्यन्ते । त्रयोदश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्क्षत्रेन प्रीणाति ॥ १६ ॥ प्रादेशमात्र्यो भवन्ति । प्रादेशमात्रो वै गर्भो विष्णुरन्नमेतदात्मसंमितेनैवैनमेतद्क्षत्रेन प्रीणाति यदु वाऽआत्मसंमितमन्नं तद्वति तन्न क्षिनस्ति यद्भूयो क्षिनस्ति तच्चत्कनीयो न तद्वति तिष्ठन्नादधाति तस्योपरि बन्धुः स्वाहाकारेण रेतो वाऽइदꣳ सिक्तमयमग्निस्तस्मिन्यत्काष्ठान्यस्वाहाकृतान्यभ्यादध्याद्विꣳस्याद्वैनं ता यत्समिधस्तेन नाकृतयो यदु स्वाहाकारेण तेनान्नमन्नꣳ हि स्वाहाकारस्तथो क्षैनं न क्षिनस्ति ॥ १७ ॥ ब्राह्मणम् ॥ ५ [६. ३.] ॥ ॥

अथ विष्णुक्रमान्क्रान्त्वा । वात्सप्रेणोपस्थायास्तमितऽआदित्ये भस्मैव प्रथममुद्वपत्येतद्वाऽएनमेतेनान्नेन प्रीणात्येताभिः समिद्भिस्तस्यान्नस्य जग्धस्यैष पाप्मा सीदति भस्म तेनैनमेतद्यावर्तयति तस्मिन्नपकृतपाप्मन्वाचं विसृजते वाचं विसृज्य समिधमादधाति रात्र्याऽएवैनमेतद्क्षत्रेन प्रीणाति रात्रीꣳ-रात्रीमप्रयावं भरत्त इति तस्योक्तो बन्धू रात्र्याऽएवैतामरिष्टिꣳ स्वस्तिमाशास्ते तच्चत्किं चातो रात्र्योपसमादधात्याकृतिकृतꣳ क्षैवास्मै तदुपसमादधाति ॥ १ ॥ अथ प्रातरुदितऽआदित्ये ।

भस्मैव प्रथममुद्वपत्येतद्वाऽएनमेतेनान्नेन प्रीणात्येतया समिधा यच्च रात्र्योपसमादधाति तस्यान्नस्य जग्धस्येष पाप्मा सीदति भस्म तेनैनमेतद्यावर्तयति तस्मिन्नपकृतपाप्मन्वाचं विसृजते वाचं विसृज्य समिधमादधात्यङ्क्ऽएवैनमेतदन्नेन प्रीणात्यक्रक्रप्रयावं भरत इति तस्योक्तो बन्धुरङ्क्ऽएवैतामरिष्टिꣳ स्वस्तिमाशास्ते तद्यत्किं चातोऽङ्कोपसमादधात्याकृतिकृतꣳ ह्येवास्मै तदुपसमादधाति ॥२॥ अहोरात्रे वाऽअभिवर्तमाने संवत्सरमाप्नुतः संवत्सरꣳ इदꣳ सर्वमाङ्क्ऽएवैतामरिष्टिꣳ स्वस्तिमाशास्ते ॥३॥ अथ यदास्मै व्रतं प्रयङ्क्ति । अथ व्रते न्यञ्य समिधमादधाति न व्रते न्यङ्ख्यादित्यु ह्येकऽआकुराकृतिं तञ्जुह्वयादनवक्लृप्तं वै तद्यद्दीक्षित आकृतिं जुह्वयादिति ॥४॥ स वै न्यङ्ख्यादेव । दैवो वाऽअस्येष आत्मा मानुषोऽयꣳ स यन्न न्यङ्ख्यान्न ह्येतं दैवमात्मानं प्रीणीयादथ यन्न्यनक्ति तथो ह्येतं दैवमात्मानं प्रीणाति सा यत्समित्तेन नाकृतिर्यदु व्रते न्यक्ता तेनान्नमन्नꣳ हि व्रतꣳ ॥५॥ स वै समिधमाधायाथ व्रतयति । दैवो वाऽअस्येष आत्मा मानुषोऽयं देवा उ वाऽअग्रेऽथ मनुष्यास्तस्मात्समिधमाधायाथ व्रतयति ॥६॥ अन्नपतेऽन्नस्य नो देह्यीति । अशनपतेऽशनस्य नो देह्येत्येतदनमीवस्य शुष्मिण इत्यनशनायस्य शुष्मिण इत्येतत्प्र-प्र दातारं तारिष इति यज्ञमानो वै दाता प्र यज्ञमानं तारिष इत्येतद्वूर्ज नो धेह्यि द्विपदे चतुष्पदऽइत्याशिषमाशास्ते यदु भिन्नायै प्रायश्चित्तिमाहोत्तरस्मिंस्तदन्वाख्यानऽइति ॥७॥ यद्येषोखा भिद्येत । याभिन्ना नवा स्यात्युरुबिलो स्यात्तस्यामेनं पर्यावपेदार्छति वाऽएषोखा या भिद्यतेऽनार्तोऽइयं देवतानार्तायामिममनार्तं बिभराणीति तत्रोखायै कपालं पुरस्तात्प्रास्यति तथो ह्येष एतस्यै स्वायै योनिर्न च्यवते ॥८॥ अथ मृदमाहृत्य । उखां चोपशयां च पिष्ट्वा सꣳसृज्योखां करोत्येतयैवावृतानुपकरन्यजुस्तूष्णीमेव पक्वा पर्यावपति कर्मणिरेव तत्र प्रायश्चित्तिः पुनस्तत्कपालमुखायामुपसमस्योखां चोपशयां च पिष्ट्वा सꣳ-

सृज्य निदधाति प्रायश्चित्तिभ्यः ॥ ९ ॥ अथ यस्येष उख्योऽग्निरनुगच्छेत् । गार्हपत्यं वाव स गच्छति गार्हपत्याद्धि स आहृतो भवति गार्हपत्यादेवैनं प्राञ्चमुद्धृत्योपसमाधायोखां प्रवृञ्च्यादेतयैवावृतानुपकॢप्तान्यज्ञुस्तूष्णीमेव तां यदाग्निरारोहति ॥ १० ॥ अथ प्रायश्चित्ती करोति । सर्वेभ्यो वाऽएष एतं कामेभ्य आधत्ते तद्यदेवास्यात्र कामानां व्यवच्छिद्यतेऽग्नावनुगते तदेवैतत्संतनोति संदधात्युभे प्रायश्चित्ती करोत्यधरप्रायश्चित्तिं चाग्निप्रायश्चित्तिं चाधरस्य पूर्वामथाग्नेस्तस्योक्तो बन्धुः ॥ ११ ॥ स समिधाज्यस्योपकॢप्य । आसीन आकूतिं जुहोति विश्वकर्मणे स्वाहेत्यथोपोत्थाय समिधमादधाति पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैरित्येतास्त्वा देवताः पुनः समिन्धतामित्येतद्धृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामा इति घृतेनाह त्वं तन्वं वर्धयस्व येभ्य उ त्वां कामेभ्यो यजमान आधत्त तेऽस्य सर्वे सत्याः सन्त्वित्येतत् ॥ १२ ॥ अथ यदि गार्हपत्योऽनुगच्छेत् । अरणी वाव स गच्छत्यरणिभ्याꣳ हि स आहृतो भवत्यरणिभ्यामेवैनं मथित्वोपसमाधाय प्रायश्चित्ती करोति ॥ १३ ॥ अथ यदि प्रसुत आहवनीयोऽनुगच्छेत् । गार्हपत्यं वाव स गच्छति गार्हपत्याद्धि स आहृतो भवति गार्हपत्यादेवैनं प्राञ्चꣳ सांकाशिनेन कॢप्त्वोपसमाधाय प्रायश्चित्ती करोति यस्तस्मिन्काले ऽधरः स्यात्तामधरप्रायश्चित्तिं कुर्यात्समान्यग्निप्रायश्चित्तिः ॥ १४ ॥ अथ यद्याग्नीध्रीयोऽनुगच्छेत् । गार्हपत्यं वाव स गच्छति गार्हपत्याद्धि स आहृतो भवति गार्हपत्यादेवैनं प्राञ्चमुत्तरेण सदः कॢप्त्वोपसमाधाय प्रायश्चित्ती करोत्यथ यदि गार्हपत्योऽनुगच्छेत्तस्योक्तो बन्धुः ॥ १५ ॥ ब्राह्मणम् ॥ ६ [६. ४.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १०० ॥ षष्ठोऽध्यायः [४१.] ॥ ॥

रुक्मं प्रतिमुच्य बिभर्ति । सत्यꣳ हैतद्यद्रुक्मः सत्यं वाऽएतं यत्नुमर्हति सत्येनैतं देवा अबिभरुः सत्येनैवैनमेतद्बिभर्ति ॥ १ ॥ तद्यत्तत्सत्यम् । असौ स आदित्यः

स॒ क्रि॒ण्मयो भवति ज्योतिर्वै क्रि॒ण्यं ज्योतिरे॒षोऽमृत॑ क्रि॒ण्यममृतमे॒ष परि॒-
मण्ड॑लो भवति प॒रिम॑ण्ड॒लो ह्ये॒ष एक॑विꣳशतिर्नि॒र्बाध एक॑विꣳशो ह्ये॒ष ब॒हि॒-
ष्टान्नि॒र्बाधं बिभर्ति र॒श्मयो वाऽ ऋ॒तस्य नि॒र्बाधा॒ बाऽऋ॒त उ वाऽ ऋ॒तस्य र॒श्मयः
॥ २ ॥ यद्वे॒व रु॒क्मं प्रति॑मुच्य बिभर्ति । अ॒सौ वाऽआदि॒त्य ए॒ष रु॒क्मो नो ए॒तम-
ग्निं मनु॒ष्यो मनु॒ष्यरू॒पेण य॒न्तुम॑र्हत्ये॒तेने॒व रू॒पेणै॒तद्रू॒पं बिभर्ति ॥ ३ ॥ यद्वे॒व रु॒क्मं
प्रति॑मुच्य बिभर्ति । रे॒तो वाऽइद॑ सिक्त॒मय॒मग्नि॒स्तेज॑ो वी॒र्य॑ रु॒क्मोऽस्मिं॒स्तद्रे॒त-
सि तेज॑ो वी॒र्यं॑ दधाति ॥ ४ ॥ यद्वे॒व रु॒क्मं प्रति॑मुच्य बिभर्ति । ए॒तद्वै दे॒वा अ॒बि-
भ॒यु॒र्यद्वै न इ॒मामि॑ह र॒क्षा॑ꣳसि॒ नाष्ट्रा न॒ हन्यु॒रिति॒ तस्माऽ ऋ॒तमन्ति॑काद्भो॒पा॒रमकु-
र्वन्नमु॒मेवादि॒त्यमसौ वाऽआदि॒त्य ए॒ष रु॒क्मस्तथे॒वास्माऽअ॒यमे॒तमन्ति॑काद्भोपा॒रं क॒-
रोति ॥ ५ ॥ कृ॒ष्णाज॑िने निष्यू॒तो भवति । यज्ञो वै कृ॒ष्णाज॑िनं॒ यज्ञो वाऽ ए॒तं
य॒न्तुम॑र्हति॒ यज्ञे॑नै॒तं दे॒वा अ॒बिभ॒र्यज्ञे॑नै॒वैत॒मे॒तद्बि॑भर्ति लो॒मत॑श्छ॒न्दा॑ꣳसि वै लो॒-
मानि॒ छ॒न्दा॑ꣳसि वाऽ ए॒तं य॒न्तुम॑र्हन्ति छ॒न्दो॒भि॒रे॒तं दे॒वा अ॒बिभ॒रछ॒न्दो॒भि॒रे॒वैन॒मे॒-
त॒द्बि॒भ॒र्ति ॥ ६ ॥ अ॒भि शु॒ल्कानि॑ च कृ॒ष्णानि॑ च लो॒मानि॑ निष्यू॒तो भवति । ऋ॒-
क्सा॒म॒यो॒र्वै ते रू॒पेऽ ऋ॒क्सामे वाऽ ए॒तं य॒न्तुम॑र्हत ऋ॒क्सामा॒भ्यामे॒तं दे॒वा अ॒बिभ॒-
र्ऋ॒क्सामा॒भ्यामे॒वैन॒मे॒त॒द्बि॒भ॒र्ति शा॒णो रु॒क्मपा॒शस्त्रि॒वृत्त॑स्योक्तो ब॒न्धुः ॥ ७ ॥ ॥ श॒-
त॒म् ३८०० ॥ ॥ त॒मुप॑रिनाभि॒ बिभर्ति । अ॒सौ वाऽआदि॒त्य ए॒ष रु॒क्म उ॒परि॑नाभ्यु
वाऽ ए॒षः ॥ ८ ॥ यद्वे॒वोप॑रिनाभि । अ॒वाग्वै नाभे॑ रे॒तः प्र॒जाति॒स्तेज॑ो वी॒र्य॑ रु॒क्मो
ने॒न्मे रे॒तः प्र॒जाति॑ तेज॑ो वी॒र्य॑ रु॒क्मः प्र॒द॒दा॒दि॒ति ॥ ९ ॥ यद्वे॒वोप॑रिनाभि । ए॒तद्वै
प॒शोर्मे॑ध्यत॒रं य॒दुप॑रिनाभि पु॒रीष॑स॒ꣳहि॒त॒त॒रं य॒द्वाऽ॒नाभे॒स्तन्म॒द्वे॒व प॒शोर्मे॑ध्यत॒रं ते-
नैन॒मे॒त॒द्बि॒भ॒र्ति ॥ १० ॥ यद्वे॒वोप॑रिनाभि । यद्वै प्रा॒णस्या॒मृत॒मूर्ध्व तन्नाभे॒रू॒र्ध्वः प्रा॒णो-
रु॒च्च॒र॒त्य॒थ य॒न्मर्त्य॑ परा॒क्तन्नाभि॒मत्ये॑ति तन्म॒द्वे॒व प्रा॒णस्या॒मृत॑ त॒दे॒न॒मे॒त॒दभि॑सम्पाद-
य॒ति ते॒नैन॒मे॒त॒द्बि॒भ॒र्ति ॥ ११ ॥ अ॒थै॒न॒मा॒स॒न्त्या॒ बिभर्ति । इ॒यं वाऽआ॑स॒न्त्य॒स्या॑

क्षीद्ध सर्वमासन्नमियं वाऽएतं यत्तुमर्क्त्यनयैतं देवा अबिभरुरनयैवैनमेतद्बिभर्ति ॥ १२ ॥ औडुम्बरी भवति । ऊर्ग्वै रस उडुम्बर ऊर्जैवैनमेतद्रसेन बिभर्त्यथो सर्व ऽएते वनस्पतयो यदुडुम्बरः सर्वे वाऽएतं वनस्पतयो यत्तुमर्क्हन्ति सर्वैरेतं वनस्पतिभिर्देवा अबिभरुः सर्वैरेवैनमेतद्वनस्पतिभिर्बिभर्ति ॥ १३ ॥ प्रादेशमात्र्यूर्ध्वा भवति । प्रादेशमात्रो वै गर्भो विष्णुर्योनिरेषा गर्भसंमितां तद्योनिं करोत्यरत्निमात्री तिरश्ची बाहुर्वाऽअरत्निर्बाहुनो वै वीर्यं क्रियते वीर्यसंमितैव तद्भवति वीर्यं वाऽएतं यत्तुमर्क्हति वीर्येणैतं देवा अबिभरुर्वीर्येणैवैनमेतद्बिभर्ति ॥ १४ ॥ चतुःस्रक्तयः पादा भवन्ति । चतुःस्रक्तीन्यनूच्यानि चतस्रो वै दिशो दिशो वाऽएतं यत्तुमर्क्हन्ति दिग्भिरेतं देवा अबिभरुर्दिग्भिरेवैनमेतद्बिभर्ति मौञ्जीभी रज्जुभिर्व्युता भवति त्रिवृद्वित्तस्योक्तो बन्धुर्मृदा दिग्धा तस्योऽएवोक्तोऽथोऽअनतिदाहाय ॥ १५ ॥ अथैनꣳ शिक्येन बिभर्ति । इमे वै लोका एषोऽग्निर्दिशः शिक्यं दिग्भिर्क्हीमे लोकाः शक्नुवन्ति स्थातुं यक्ष्नुवन्ति तस्माच्छिक्यं दिग्भिरेवैनमेतद्बिभर्ति षडुद्यामं भवति षड्वै दिशो मौञ्जं त्रिवृत्तस्योक्तो बन्धुर्मृदा दिग्धं तस्योऽएवोक्तोऽथोऽअनतिदाहाय ॥ १६ ॥ तस्याप एव प्रतिष्ठा । अप्सु क्षीमे लोकाः प्रतिष्ठिता आदित्य आसञ्जनमादित्ये क्षीमे लोका दिग्भिरासक्ताः स यो क्षैतदेवं वेदैतेनैव द्रूपेणैतद्रूपं बिभर्ति ॥ १७ ॥ यद्वैवैनꣳ शिक्येन बिभर्ति । संवत्सर एषोऽग्निर्ऋतवः शिक्यमृतुभिर्क्हि संवत्सरः शक्नोति स्थातुं यक्ष्नोति तस्माच्छिक्यमृतुभिरेवैनमेतद्बिभर्ति षडुद्यामं भवति षड्वा ऋतवः ॥ १८ ॥ तस्यार्क्षोरात्रेऽएव प्रतिष्ठा । अर्क्षोरात्रयोर्व्ययꣳ संवत्सरः प्रतिष्ठितश्चन्द्रमा आसञ्जनं चन्द्रमसि व्ययꣳ संवत्सर ऋतुभिरासक्तः स यो क्षैतदेवं वेदैतेनैव द्रूपेणैतद्रूपं बिभर्ति तस्य क्ष वाऽएष संवत्सरभृतो भवति य एवं वेद संवत्सरोपासितो क्षैव तस्य भवति य एवं न वेदेत्यधिदेवतम् ॥ ११ ॥ ॥ शतपथस्यार्धम् कण्डिकाः ३८१२ ॥ ॥ अथाध्यात्मम् । आत्मैवाग्निः

प्राणाः शिक्यं प्राणैर्व्ययमात्मा शक्नोति स्थातुं यद्धक्नोति तस्माद्धिक्यं प्राणैरेवैनमेतद्बिभर्ति षड्वध्यामं भवति षड्वै प्राणाः ॥२०॥ तस्य मन एव प्रतिष्ठा । मनसि व्ययमात्मा प्रतिष्ठितोऽन्नमासञ्जनमन्ने व्ययमात्मा प्राणैरासक्तः स यो ह्येतदेवं वेदैतेनैव रूपेणैतद्रूपं बिभर्ति ॥२१॥ अथैनमुखया बिभर्ति । इमे वै लोका उखेमे वाऽएतं लोका यत्तुमर्ह्ल्येभिरेतं लोकैर्देवा अबिभरुरेभिरेवैनमेतल्लोकैर्बिभर्ति ॥२२॥ सा यदुखा नाम । एतद्वै देवा एतेन कर्मणैतयावृतिमांलोकानुदखनन्यदुदखनंस्तस्मादुत्खोत्खा ह वै तामुखेत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः ॥२३॥ तद्वाऽउखेति द्वेऽअक्षरे । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्बिभर्ति सोऽएव कुम्भी सा स्थाली तत्षट् षड्वृतवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥२४॥ अथैनमिण्डाभ्यां परिगृह्णाति । असौ वाऽआदित्य एषोऽग्निरहोरात्रेऽइण्डेऽअमुं तदादित्यमहोरात्राभ्यां परिगृह्णाति तस्मादेषोऽहोरात्राभ्यां परिगृहीतः ॥२५॥ यद्वैवैनमिण्डाभ्यां परिगृह्णाति । असौ वाऽआदित्य एषोऽग्निरिमाऽउ लोकाविण्डेऽअमुं तदादित्यमाभ्यां लोकाभ्यां परिगृह्णाति तस्मादेष आभ्यां लोकाभ्यां परिगृहीतः परिमण्डले भवतः परिमण्डलौ ह्येमौ लोकौ मौञ्जे त्रिवृती तस्योक्तो बन्धुर्मृदा दिग्धे तस्योऽएवोक्तोऽथोऽअनतिदाहाय ॥२६॥ अथातः सम्पदेव । आसन्दी चोखा च शिक्यं च रुक्मपाशश्चाग्निश्च रुक्मश्च तत्षट् षड्वृतवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवतीण्डे तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥२७॥ अथ सर्वसम्पत् । चत्वारः पादाश्चत्वार्यनूच्यानि शिक्यं च रुक्मपाशश्च यदु किं च रज्जव्यꣳ शिक्यं तदनूखाग्नी रुक्मस्तत्त्रयोदश त्रयोदश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥२८॥ ब्राह्मणम् ॥१ [७. १.] ॥ ॥

तं तिष्ठन्प्रतिमुञ्चते । असौ वाऽआदित्य एष रुक्मस्तिष्ठतीव वाऽअसावादित्योऽथो तिष्ठन्वै वीर्यवत्तर उद्दङ् प्राङ् तिष्ठंस्तस्योक्तो बन्धुः ॥१॥ दृशानो रुक्म उर्व्या व्यद्यौदिति । दृश्यमानो ह्येष रुक्म उर्व्या विद्योतते दुर्मर्षमायुः श्रिये रुचान इति दुर्मरं वाऽएतस्यायुः श्रियोऽएष रोचतेऽग्निरमृतोऽभवद्वयोभिरिति सर्वैर्वाऽएष वयोभिरमृतोऽभवद्यदेनं द्यौरजनयदिति द्यौर्वाऽएतमजनयत्सुरेता इति सुरेता ह्येषा यस्या एष रेतः ॥२॥ अथैनमिणड्भ्यां परिगृह्णाति । नक्तोषासा समनसा विरूपे इत्यहोरात्रे वै नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीचीऽइति यद्वै किं चाहोरात्रयोस्तेनैतमेव समीची धापयेते द्यावाक्षामा रुक्मोऽअन्तर्विभातीति ह्यन्नेतद्यद्यजुर्ऋपतीमे वै द्यावापृथिवी द्यावाक्षामा तेऽएष यन्नक्तरा विभाति तस्मादेतद्ध्यन्यजुर्ऋपति देवा अग्निं धारयन्द्रविणोदा इति परिगृह्य निदधाति प्राणा वै देवा द्रविणोदास्तऽएतमग्रऽएवमधारयंस्तैरेवैनमेतद्धारयति ॥३॥ अथ शिक्यपाशं प्रतिमुञ्चते । विश्वा रूपाणि प्रतिमुञ्चते कविरित्यसौ वाऽआदित्यः कविर्विश्वा रूपा शिक्यं प्रासावीद्भद्रं द्विपदे चतुष्पदऽइत्युभन्वाऽएष द्विपदे चतुष्पदे च भद्रं प्रसौति वि नाकमख्यत्सविता वरेण्य इति स्वर्गो वै लोको नाकस्तमेष उभन्नेवानुविपश्यत्यनु प्रयाणमुषसो विराजतीत्युषा वाऽअग्रे व्युछति तस्याऽएष व्युष्टिं विराजन्ननूदेति ॥४॥ अथैनमतो विकृत्या विकरोति । इदमेवैतद्रेतः सिक्तं विकरोति तस्माद्योनौ रेतः सिक्तं विक्रियते ॥५॥ सुपर्णोऽसि गरुत्मानिति । वीर्यं वै सुपर्णो गरुत्मान्वीर्यमेवैनमेतद्भिसंस्करोति त्रिवृत्ते शिर इति त्रिवृतमस्य स्तोमꣳ शिरः करोति गायत्रं चक्षुरिति गायत्रं चक्षुः करोति बृहद्रथन्तरे पक्षाविति बृहद्रथन्तरे पक्षौ करोति स्तोम आत्मेति स्तोममात्मानं करोति पञ्चविꣳशः छन्दाꣳस्यङ्गानीति छन्दाꣳसि वाऽएतस्याङ्गानि यज्ञꣳषि नामेति यदेनमग्निरित्याचक्षते तदस्य यज्ञꣳषि नाम साम ते

तनूर्वामदेव्यमित्यात्मा वै तनूरात्मा ते तनूर्वामदेव्यमित्येतद्यज्ञायज्ञियं पुरुषमिति यज्ञायज्ञियं पुरुषं करोति धिष्ण्याः शफा इति धिष्ण्यैर्वाऽएषोऽस्मिंल्लोके प्रतिष्ठितः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पतेति तदेनꣳ सुपर्णं गरुत्मन्तं कृत्वाऽऽह देवान्गच्छ स्वर्गं लोकं पतेति ॥ ६॥ तं वाऽएतम्। अत्र पक्षपुच्छवन्तं विकरोति यादृग्वै योनौ रेतो विक्रियते तादृग्जायते तद्यदेतमत्र पक्षपुच्छवन्तं विकरोति तस्मादेषोऽमुत्र पक्षपुच्छवान्जायते ॥ ७॥ तꣳ हैके। एतया विकृत्याभिमल्यान्यां चितिं चिन्वन्ति द्रोणचितं वा रथचक्रचितं वा कङ्कचितं वा प्रउगचितं वोभयतः-प्रउगं वा समुक्ष्यपुरीषं वा न तथा कुर्याद्यथा पक्षपुच्छवन्तं गर्भं परिवृश्चेत्तादृक्तत्तस्मादिनꣳ सुपर्णचितमेव चिनुयात् ॥ ८॥ तमेतया विकृत्या। इत ऊर्ध्वं प्राञ्चं प्रगृह्णात्यसौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमित ऊर्ध्वं प्राञ्चं दधाति तस्मादसावादित्य इत ऊर्ध्वः प्राङ् धीयते परोबाहु प्रगृह्णाति परोबाहु ह्येष इतोऽथैनमुपावहरति तमुपावहृत्योपरिनाभि धारयति तस्योक्तो बन्धुः ॥ ९॥ अथ विष्णुक्रमान्क्रमते। एतद्वै देवा विष्णुर्भूत्वेमांल्लोकानक्रमन्त यद्विष्णुर्भूत्वाक्रमन्त तस्माद्विष्णुक्रमास्तथैवैतद्यजमानो विष्णुर्भूत्वेमांल्लोकान्क्रमते ॥ १०॥ स यः स विष्णुर्यज्ञः सः। स यः स यज्ञोऽयमेव स योऽयमग्निरुखायमितमेव तद्देवा आत्मानं कृत्वेमांल्लोकानक्रमन्त तथैवैतद्यजमान एतमेवात्मानं कृत्वेमांल्लोकान्क्रमते ॥ ११॥ उद्ङ् प्राङ् तिष्ठन्। एतद्वै तत्प्रजापतिर्विष्णुक्रमैरुद्ङ् प्राङ् तिष्ठन्प्रजा असृजत तथैवैतद्यजमानो विष्णुक्रमैरुद्ङ् प्राङ् तिष्ठन्प्रजाः सृजते ॥ १२॥ विष्णोः क्रमोऽसीति। विष्णुर्हि भूत्वा क्रमते सपत्नक्षेति सपत्नान्ह्यत्र क्षन्ति गायत्रं छन्द आरोहेति गायत्रं छन्द आरोक्षति पृथिवीमनु विक्रमस्वेति पृथिवीमनु विक्रमते प्रक्षरति पादं क्रमतऽऊर्ध्वमग्निमुद्गृह्णात्यूर्ध्वो हि रोक्षति ॥ १३॥ विष्णोः क्रमोऽसीति। विष्णुर्हि भूत्वा क्रमतेऽभिमातिक्षेत्यभिमातीर्ह्यत्र क्षन्ति त्रैष्टुभं छन्द आरोहेति त्रैष्टुभं छन्द आरोक्षत्यन्त-

रिक्षमनु विक्रमस्वेत्यन्तरिक्षमनु विक्रमत प्रकरति पादं क्रमतऽऊर्ध्वमग्निमुद्गृह्णात्यूर्ध्वो हि रोकति ॥१४॥ विष्णोः क्रमोऽसीति । विष्णुर्हि भूत्वा क्रमतेऽरातीयतो कृन्तेत्यरातीयतो ह्यत्र कृन्ति जागतं छन्द आरोकेति जागतं छन्द आरोकति दिवमनु विक्रमस्वेति दिवमनु विक्रमते प्रकरति पादं क्रमतऽऊर्ध्वमग्निमुद्गृह्णात्यूर्ध्वो हि रोकति ॥१५॥ विष्णोः क्रमोऽसीति । विष्णुर्हि भूत्वा क्रमते शत्रूयतो कृन्तेति शत्रुयतो ह्यत्र कृन्त्यानुष्टुभं छन्द आरोकेत्यानुष्टुभं छन्द आरोकति दिशोऽनु विक्रमस्वेति सर्वा दिशोऽनु वीक्षते न प्रकरति पादं नेदिमांल्लोकानतिप्रणश्यानीत्यूर्ध्वमेवाग्निमुद्गृह्णाति सꣳ ह्यारोकति ॥१६॥ ब्राह्मणम् ॥२ [७. २.] ॥ ॥

अथैनमिति प्रगृह्णाति । एतद्वै देवा अकामयन्त पर्जन्यो रूपꣳ स्यामेति तेऽएतेनात्मना पर्जन्यो रूपमभवंस्तथैवैतद्यजमान एतेनात्मना पर्जन्यो रूपं भवति ॥१॥ अक्रन्ददग्नि स्तनयन्निव द्यौरिति । क्रन्दतीव हि पर्जन्य स्तनयन्ह्यामा रेरिक्ष्वीरुधः समञ्जन्निति ह्यमा वै पर्जन्यो रेरिक्ष्यमाणो वीरुधः समनक्ति सद्यो जज्ञानो वि ह्येमिद्धोऽअख्यदिति सद्यो वाऽएष जज्ञान इदꣳ सर्वं विख्यापयत्या रोदसी भानुना भात्यन्तरितीमे वै द्यावापृथिवी रोदसी तेऽएष भानुनाभाति परोबाङ्कु प्रगृह्णाति परोबाङ्कु हि पर्जन्यः ॥२॥ अथैनमुपावकरति । एतद्वै यो ऽस्मिंल्लोके रसो यदुपजीवनं तेनैतत्सꣳ ह्यूर्ध इमांल्लोकान्रोकत्यग्निर्वाऽअस्मिंल्लोके रसोऽग्निरुपजीवनं तद्यत्तावदेव स्यान्न ह्यास्मिंल्लोके रसो नोपजीवनꣳ स्यादथ यत्प्रत्यवरोकत्यस्मिन्नेवैतल्लोके रसमुपजीवनं दधाति ॥३॥ यद्वेव प्रत्यवरोकति । एतद्वाऽएतदिमांल्लोकानित ऊर्ध्वो रोकति स स पराङिव रोक इयमु वै प्रतिष्ठा तद्यत्तावदेव स्यात्प्र ह्यास्माल्लोकाद्यजमानश्च्यवेताथ यत्प्रत्यवरोकतीमामेवैतत्प्रतिष्ठामभिप्रत्येत्यस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥४॥ यदेव प्रत्यवरोकति । । एतद्वाऽएतदिमांल्लोकानित ऊर्ध्वो जयति स स पराङिव जयो यो वै पराङिव

ज्ञयत्यन्ये वै तस्य ज्ञितमन्ववस्यत्यथ य उभयथा ज्ञयति तस्य तत्र कामचरणं भवति तद्यत्प्रत्यवरोहतीमानेवैतल्लोकानितश्चोर्धानमुतश्चार्वाचो ज्ञयति ॥५॥ अग्नेऽभ्यावर्तिन् । अभि मा निवर्तस्वाग्नेऽङ्गिरः पुनर्दृज्ञा सह रय्येत्येतेन मा सर्वेणाभिनिवर्तस्वेत्येतच्चतुष्कृत्वः प्रत्यवरोहति चतुर्हि कृत्व ऊर्धो रोहति तद्यावत्कृत्व ऊर्धो रोहति तावत्कृत्वः प्रत्यवरोहति तमुपावकृत्योपरिनाभि धारयति तस्योक्तो बन्धुः ॥६॥ अथैनमभिमन्त्रयते । आयुर्वाऽअग्निरायुरेवैतदात्मन्धत्तऽआ वाहार्षमित्याह क्षेन६ हरत्यन्तरभूरित्यायुरेवैतदात्मन्धत्ते ध्रुवस्तिष्ठाविचाचलिरित्यायुरेवैतद्ध्रुवमन्तरात्मन्धत्ते विशस्त्वा सर्वा वाञ्छन्वित्यन्नं वै विशोऽन्नं वा सर्वं वाञ्छन्वित्येतन्मा त्वद्राष्ट्रमधिभ्रशदिति श्रीर्वै राष्ट्रं मा त्वच्छ्रीरधिभ्रशदित्येतत् ॥७॥ अथ शिक्यपाशं च रुक्मपाशं चोन्मुञ्चते । वारुणो वै पाशो वरुणपाशादेव तत्प्रमुच्यते वारुण्यर्चा स्वेनैव तदात्मना स्वया देवतया वरुणपाशात्प्रमुच्यतऽउदुत्तमं वरुण पाशमस्मद्वाधमं वि मध्यम६ श्रथायेति यथैव यज्ञस्तथा बन्धुरथा वयमादित्य व्रते तवानागसोऽअदितये स्यामेतीयं वाऽअदितिरनागस्स्तुभ्यं चास्यै च स्यामित्येतत् ॥८॥ अथैनमिति प्रगृह्णाति । एतद्वाऽएनमदो विकृत्येत ऊर्ध प्राञ्चं प्रगृह्णाति तं तत इति प्रगृह्णाति तद्यत्तावदेवाभविष्यदत्र ह्येवैष व्यरु६स्यताथ यदेनमिति प्रगृह्णाति तस्मादेष इतीत्राथेति पुनरेति ॥९॥ अग्ने बृहन्नुषसामूर्धोऽअस्यादिति । अग्ने क्षेष बृहन्नुषसामूर्धस्तिष्ठति निर्ज्ञगन्वान्तमसो ज्योतिषागादिति निर्ज्ञगन्वान्वाऽएष रात्र्यै तमसोऽज्ञा ज्योतिषेत्यग्निर्भानुना रुशता स्वङ्ग इत्यग्निर्वाऽएष भानुना रुशता स्वङ्ग आ ज्ञातो विश्वा सद्मान्यप्रा इतीमे वै लोका विश्वा सद्मानि तानेष ज्ञात आपूरयति परोबाङ्ग प्रगृह्णाति परोबाङ्ग क्षेष इतोऽथैनमुपावकृतीमामेवैतत्प्रतिष्ठामभिप्रत्येत्यस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ज्ञगत्या ज्ञगती हेमांल्लोकानमुतोऽर्वाचो व्यश्नुते ॥१०॥ हरः सः

शुचिषदिति । असौ वाऽआदित्यो हꣳसः शुचिषद्वसुरन्तरिक्षसदिति वायुर्वै वसुरन्तरिक्षसद्धोता वेदिषदित्यग्निर्वै होता वेदिषदतिथिरिति सर्वेषां वाऽएष भूतानामतिथिर्दुरोणसदिति विषमसदित्येतन्नृषदिति प्राणो वै नृषन्मनुष्या नरस्तस्योऽयं मनुष्येषु प्राणोऽग्निस्तमेतदाह वरसदिति सर्वेषु क्वेष वरेषु सन्न ऋतसदिति सत्यसदित्येतद्व्योमसदिति सर्वेषु क्वेष व्योमसु सन्नोऽब्जा गोजा इत्यब्जाश्च क्वेष गोजाश्चऽर्तजा इति सत्यजा इत्येतद्द्विजा इत्यद्विजा क्वेष ऋतमिति सत्यमित्येतद्धृहदिति निदधाति बृहद्धेष तद्यदेष तदेनमेतत्कृत्वा निदधाति ॥ ११ ॥ द्वाभ्यामन्नराभ्याम् । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतन्निदधाति ॥ १२ ॥ अथैनमुपतिष्ठते । एतद्वाऽएनमेतच्छ्वघूयतीव यदेनेन सकेति चेति चेमांल्लोकान्क्रमते तस्माऽएवैतन्निष्कृतेऽहिꣳसायै ॥ १३ ॥ यद्वेवोपतिष्ठते । एतद्वै देवा अबिभयुर्यद्वै नोऽयमिमांल्लोकानन्तिकान्न हिꣳस्यादिति तदेभ्य एवैनमेतल्लोकेभ्योऽशमयंस्तथैवैनमयमेतदेभ्यो लोकेभ्यः शमयति ॥ १४ ॥ सीद त्वं मातुः । अस्या उपस्थेऽन्तरग्ने रुचा त्वꣳ शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वमिति शिवः-शिव इति शमयत्येवैनमेतदहिꣳसायै तथो क्वैष इमांल्लोकाञ्छान्तो न हिनस्ति ॥ १५ ॥ त्रिभिरुपतिष्ठते । त्रय इमे लोका अथो त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्माऽएतन्निष्कृतेऽथो तावतैवैनमेतदेभ्यो लोकेभ्यः शमयति ॥ १६ ॥ ब्राह्मणम् ॥ ३ [७. ३.] ॥ ॥

अथ वात्सप्रेणोपतिष्ठते । एतद्वै प्रजापतिर्विष्णुक्रमैः प्रजाः सृष्ट्वा ताभ्यो वात्सप्रेणायुष्यमकरोत्तथैवैतद्यजमानो विष्णुक्रमैः प्रजाः सृष्ट्वा ताभ्यो वात्सप्रेणायुष्यं करोति ॥ १ ॥ स क्वैष दाक्षायणकस्तः । यद्वात्सप्रं तस्माद्यं ज्ञातं कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्तदस्मै ज्ञातायायुष्यं करोति तथो ह स सर्वमायुरेत्यथ यं कामयेत वीर्यवात्स्यादिति विकृत्यैनं पुरस्ताद्भिमल्लयेत तथो ह स

वीर्यवान्भवति ॥२॥ दिवस्परि प्रथमं जज्ञेऽग्निरिति । प्राणो वै दिवः प्राणाद्ध वाऽएष प्रथममजायतास्माद्द्वितीयं परि जातवेदा इति यदेनमदो द्वितीयं पुरुषविधोऽजनयत्तृतीयमस्विति यदेनमदस्तृतीयमद्योऽजनयन्नृमणा अजस्रमिति प्रजापतिर्वै नृमणा अग्निरजस्र इन्धान एनं जरते स्वाधीरिति यो वाऽएनमिन्द्धे स एनं जनयते स्वाधीः ॥३॥ विद्मा तेऽअग्ने त्रेधा त्रयाणीति । अग्निर्वायुरादित्य एतानि ह्यस्य तानि त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रेति यदिदं बहुधा विह्रियते विद्मा ते नाम परमं गुहा यदिति यविष्ठ इति वाऽअस्य तन्नाम परमं गुहा विद्मा तमुत्सं यत आजगन्थेत्यापो वाऽउत्सोऽद्भ्यो वाऽएष प्रथममाजगाम समुद्रे वा नृमणा अप्स्वन्तरिति प्रजापतिर्वै नृमणा अप्सु वा प्रजापतिरित्येतन्नृचद्धा ईधे दिवोऽअग्रऽऊधन्निति प्रजापतिर्वै नृचद्धा आपो दिव ऊधस्तृतीये वा रजसि तस्थिवाꣳसमिति द्यौर्वै तृतीयꣳ रजोऽपामुपस्थे महिषा अवर्धन्निति प्राणा वै महिषा दिवि वा प्राणा अवर्धन्नित्येतत् ॥५॥ ता एता ऋक्व्याख्यानाः । एतमेवाभि ता आग्नेय्यस्त्रिष्टुभस्ता यदाग्नेय्यस्तेनाग्निरथ यत्त्रिष्टुभो यदेकादश तेनेन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपतिष्ठतऽइन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपतिष्ठते ॥६॥ यद्वै विष्णुक्रमवात्सप्रे भवतः । विष्णुक्रमैर्वै प्रजापतिरिमं लोकमसृजत वात्सप्रेणाग्निं विष्णुक्रमैर्वै प्रजापतिरन्तरिक्षमसृजत वात्सप्रेण वायुं विष्णुक्रमैर्वै प्रजापतिर्दिवमसृजत वात्सप्रेणादित्यं विष्णुक्रमैर्वै प्रजापतिर्दिशोऽसृजत वात्सप्रेण चन्द्रमसं विष्णुक्रमैर्वै प्रजापतिर्भूतमसृजत वात्सप्रेण भविष्यद्विष्णुक्रमैर्वै प्रजापतिर्वित्तमसृजत वात्सप्रेणाशां विष्णुक्रमैर्वै प्रजापतिरहरसृजत वात्सप्रेण रात्रिं विष्णुक्रमैर्वै प्रजापतिः पूर्वपक्षानसृजत वात्सप्रेणापरपक्षान्विष्णुक्रमैर्वै प्रजापतिरर्धमासानसृजत वात्सप्रेण मासान्विष्णुक्रमैर्वै प्रजापतिर्ऋतूनसृजत वात्सप्रेण संवत्सरं तद्यद्विष्णुक्रम-

वात्सप्रे भवत एतदेव तेन सर्वꣳ सृजते ॥७॥ यद्वै वि ष्णुक्रमवात्सप्रे भवतः । विष्णुक्रमैर्वै प्रजापतिः स्वर्गं लोकमभिप्रायात्स एतदवसानमपश्यद्वात्सप्रं तेनावास्यद्प्रदाक्षाय यद्धि युक्तं न विमुच्यते प्र तद्दह्यते तथैवैतद्यजमानो विष्णुक्रमैरेव स्वर्गं लोकमभिप्रयाति वात्सप्रेणावस्यति ॥८॥ स वै विष्णुक्रमान्क्रान्त्वा । अथ तदानीमेव वात्सप्रेणोपतिष्ठते यथा प्रयायाथ तदानीमेव विमुच्येत्तादृक्तद्देवानां वै विधामनु मनुष्यास्तस्माद्धैदमुत मानुषो ग्रामः प्रयायाथ तदानीमेवावस्यति ॥९॥ तद्वाऽअहोरात्रेऽएव विष्णुक्रमा भवन्ति । अहोरात्रे वात्सप्रमहोरात्रेऽएव तद्यात्यहोरात्रे नेम्यो भवति तस्माद्धैदमुत मानुषो ग्रामोऽहोरात्रे यावाहोरात्रे नेम्यो भवति ॥१०॥ स वाऽअर्धमेव संवत्सरस्य विष्णुक्रमान्क्रमते । अर्धं वात्सप्रेणोपतिष्ठते मध्ये ह संवत्सरस्य स्वर्गो लोकः स यत्कनीयोऽर्धान्क्रमेत न हैतꣳ स्वर्गं लोकमभिप्राप्नुयादथ यद्भूयोऽर्धात्पराङ् हैतꣳ स्वर्गं लोकमतिप्रणाश्येदथ यदर्धं क्रमतेऽर्धमुपतिष्ठते तत्सम्प्रति स्वर्गं लोकमाप्त्वा विमुच्यते ॥११॥ ताभ्यां वै विपर्यासमेति । यथा महान्तमध्वानं विमोकꣳ समश्नुवीत तादृक्तत्स वै पुरस्ताच्चोपरिष्टाच्चोभे विष्णुक्रमवात्सप्रे समस्यत्यहर्वै विष्णुक्रमा रात्रिर्वात्सप्रमेतद्वाऽइदꣳ सर्वं प्रजापतिः प्रजनयिष्यंश्च प्रजनयित्वा चाहोरात्राभ्यामुभयतः पर्यगृह्णात्तथैवैतद्यजमान इदꣳ सर्वं प्रजनयिष्यंश्च प्रजनयित्वा चाहोरात्राभ्यामुभयतः परिगृह्णाति ॥१२॥ तदाहुः । यदहर्विष्णुक्रमा रात्रिर्वात्सप्रमथोभेऽएवाहन्भवतो न रात्र्यां कथमस्यापि रात्र्यां कृते भवत इत्येतद्वाऽएनेऽग्रदो दीक्षमाणाः पुरस्तादपराह्णेऽभे समस्यति रात्रिर्हैतद्यदपराह्णोऽथैनेऽएतत्संनिवप्स्यन्नुपरिष्टात्पूर्वाह्णेऽभे समस्यत्यहर्हैतद्यत्पूर्वाह्ण एवमु ह्यस्योभेऽएवाहन्कृते भवत उभे रात्र्याꣳ ॥१३॥ स यदहः संनिवप्स्यन्त्स्यात् तदहः प्रातरुदितेऽआदित्ये भस्मैव प्रथममुद्यपति भस्मोद्गृह्य वाचं विसृजते वाचं विसृज्य समिधमादधाति समिधमाधाय भ-

स्मापोऽभ्यवहरंति यथैव तस्याभ्यवहरणं तथापादाय भस्मनः प्रत्येत्योखायामोप्योपतिष्ठतेऽथ प्रायश्चित्ती करोति ॥१४॥ स यदि विष्णुक्रमीयमक्षः स्यात् । विष्णुक्रमान्क्रान्त्वा वात्सप्रेणोपतिष्ठेताथ यदि वात्सप्रीयं वात्सप्रेणोपस्थाय विष्णुक्रमान्क्रान्त्वा वात्सप्रमत्ततः कुर्यान्न विष्णुक्रमानत्ततः कुर्याद्यथा प्रयाय न विमुच्चेत्तादृक्तदथ यद्वात्सप्रमत्ततः करोति प्रतिष्ठा वै वात्सप्रं यथा प्रतिष्ठापयेदवसाययेत्तादृक्तत्तस्माद्ध वात्सप्रमेवात्ततः कुर्यात् ॥१५॥ ब्राह्मणम् ॥४ [७. ४.] ॥ सप्तमोऽध्यायः [४२.] ॥॥

वनीवाह्येताग्निं बिभ्रदित्याहुः । देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त ते देवाश्चक्रमचरञ्छालमसुरा आसंस्ते देवाश्चक्रेण चरन्त एतत्कर्मापश्यंश्चक्रेण हि वै देवाश्चरन्त एतत्कर्मापश्यंस्तस्मादनस एव पौरोडाशेषु यन्नूष्णनसोऽग्नौ ॥१॥ स यो वनीवाह्यते । देवान्कर्मणीति दैवꣳ ह्यस्य कर्म कृतं भवत्यथ यो न वनीवाह्यतेऽसुरान्कर्मणीत्यसुर्यꣳ ह्यस्य कर्म कृतं भवति ॥२॥ तद्वैकऽआहुः । स्वयं वाऽएष वनीवाहितो विष्णुक्रमैर्वाऽएष प्रयाति वात्सप्रेणावस्यतीति न तथा विद्यादैवं वाऽअस्य तत्प्रयाणं यद्विष्णुक्रमा दैवमवसानं यद्वात्सप्रमथास्येदं मानुषं प्रयाणं यदिदं प्रयाति मानुषमवसानं यद्वस्यति ॥३॥ प्रजापतिरेषोग्निः । उभयम्वेतत्प्रजापतिर्यच्च देवा यच्च मनुष्यास्तद्यद्विष्णुक्रमवात्सप्रे भवतो यद्वास्य दैवꣳ रूपं तदस्य तेन संस्करोत्यथ यद्वनीवाह्यते यद्वास्य मानुषꣳ रूपं तदस्य तेन संस्करोति स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति य एवं विद्वान्वनीवाह्यते तस्माद्ध वनीवाह्येतैव ॥४॥ स यदृक्षः प्रयास्यन्स्यात् । तदृक्षरुत्तरतोऽग्नेः प्रागन उपस्थाप्यायास्मिन्त्समिधमादधात्येतद्वाऽएनं देवा एष्यन्तं पुरस्तादन्नेनाप्रीणन्नेतया समिधा तथैवैनमयमेतदेष्यन्तं पुरस्तादन्नेन प्रीणात्येतया समिधा ॥५॥ समिधाग्निं दुवस्यतेति । समिधाग्निं नमस्यतेत्येतदृतैर्बोधयतातिथिमा-

स्मिन्कव्या जुहोतनेति घृतैरुह बोधयतातिथिमोऽअस्मिन्कव्यानि जुह्वतेत्येतद्घृत-वत्येत्याये क्वेनमेतद्बोधयति ॥ ६ ॥ अथैनमुच्चक्रुति । उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिरिति विश्वे वाऽएतमग्ने देवाश्चित्तिभिरुदभरन्नेतद्धैषां तदा चित्तमासीत्तथैवैनमयमेतच्चित्तिभिरुद्धरत्येतद्धास्य तदा चित्तं भवति स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुरिति यथैव यजुस्तथा बन्धुस्तं दक्षिणत उदञ्चमादधाति तस्योक्तो बन्धु स्यात्स्यां गार्हपत्यꣳ समुप्यापरमादधाति स यदि कामयेतोपाधिरोक्ष्येत्यार्श्नतो वा व्रजेत् ॥ ७ ॥ अथानड्वाहौ युनक्ति । दक्षिणमग्रेऽथ सव्यमेवं देवत्रेतरथा मानुषे स यां कां च दिशं यास्यन्स्यात्प्राङेवाग्ने प्रयायात्प्राची हि दिगग्नेः स्वामेव तद्दिशमनु प्रयाति ॥ ८ ॥ प्रेद्धो अग्ने ज्योतिष्मान्याहि । शिवेभिरर्चिभिष्ट्वमिति प्रेद्धो अग्ने त्वं ज्योतिष्मान्याहि शिवेभिरर्चिभिर्दीप्यमानैरित्येतद्बृहद्भिर्भानुभिर्भास्वन्मा हिꣳसीस्तन्वा प्रजा इति बृहद्भिरर्चिभिर्दीप्यमानैर्मा हिꣳसीरात्मना प्रजा इत्येतत् ॥ ९ ॥ स यदाह्व उत्सर्जेत् । अथैतस्यजुर्जपेदसुर्या वाऽएषा वाग्यादास्य तामेतद्धमयति तामेतद्देवत्रा करोति ॥ १० ॥ यद्वैवैतस्यजुर्जपति । यस्मिन्वै कस्मिंश्चाह्नितेऽह्न उत्सर्जति तस्यैव सा वाग्भवति तस्यदग्नावाह्नितेऽह्न उत्सर्जत्यग्नेरेव सा वाग्भवत्यग्निमेव तद्देवा उपास्तुवन्नुपामक्षयंस्तथैवैनमयमेतदुपस्तौत्युपमक्षयत्यक्रन्ददग्निस्तनयन्निव द्यौरिति तस्योक्तो बन्धुः ॥ ११ ॥ स यदि पुरा वसत्यै विमुच्चेत । अनस्येवाग्निः स्यादथ यदा वसत्यै विमुच्चेत प्रागन उपस्थाप्योत्तरत उद्धत्यावोक्षति यत्रैनमुपावक्षरति तं दक्षिणत उदञ्चमुपावक्षरति तस्योक्तो बन्धुः ॥ १२ ॥ अथास्मित्समिधमादधाति । एतद्वाऽएनं देवा ईयिवाꣳसमुपरिष्टाद्व्रतेनाप्रीणन्व्रतया समिधा तथैवैनमयमेतदीयिवाꣳसमुपरिष्टाद्व्रतेन प्रीणात्येतया समिधा ॥ १३ ॥ प्र-प्रायमग्निर्भरतस्य शृण्वऽइति । प्रजापतिर्वै भरतः स ह्येदꣳ सर्वं बिभर्ति वि यत्सूर्यो न रोचते बृहद्भा इति वि यत्सूर्य-इव रोचते बृहद्भा इत्येतदभि यः पूरुं पृतनासु

तस्थाविति पूरुरु॑ नामासुररक्षसमास॒ तमग्निः पृतनास्वभितष्ठौ दीदा॑य दैव्योऽअ॒-तिथिः शिवो॒ न इति दीप्यमानो दैवोऽतिथिः शिवो॒ न इत्येतत्स्थितवत्या वस॒-त्यै क्षेनं॑ तत्स्थापयति ॥१४॥ अथातः सम्पदेव॑ । समि॑धं प्रथमेनाद्धात्युच्चक्रत्ये॒-केन प्रयात्येकेनाक्षमेकेनानुमल्लयते समि॑धमेव॒ पञ्चमेनाद्धाति तत्पञ्च॒ पञ्चचिति॒-कोऽग्निः पञ्चऽर्तवः संवत्सरः॒ संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भ॒-वति ॥१५॥ ब्राह्मणम् ॥५ [८. १.] ॥

अथातो भस्मन एवाभ्यवक्॒रणास्य । देवा वाऽएतद्ग्रे भस्मोदवपं॑स्तेऽब्रुवन्य॒-दि वाऽइदमित्थमेव सदात्मानमभिसंस्करिष्यामहे मर्त्याः कुणपा अनपकृतपाप्मा॒-नो भविष्यामो यद्यु परावप्स्यामो यदत्राग्नेयं॑ बर्हिर्धा तद्ग्नेः करिष्याम उप तज्ज्ञा॒-नीत यथेदं॑ कर॒वामेति॒ तेऽब्रुवंश्चेतयध्वमिति चितिमिक्षतेति वाव तदब्रुवंस्तादिक्षत॒ यथेदं॑ कर॒वामेति ॥१॥ ते चेतयमानाः । एतदपश्यन्नप एवैनदभ्यवक्॒रामापो वा॒ऽअस्य सर्वस्य प्रतिष्ठा तद्यत्रास्य सर्वस्य प्रतिष्ठा तदेनत्प्रतिष्ठाप्य यदत्राग्नेयं तद्॒-ह्योऽधि ज्ञनयिष्याम इति तदपोऽभ्यवाक्॒रंस्तथैवैनद्यमेतदपोऽभ्यवक्॒रति ॥२॥ आपो देवीः । प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्व सुरभाऽउ लोकऽइति ज्ञग्धं वाऽएतद्यातयाम भवति तदेतदाह॒ स्योनेष्ऽएनल्लोके कुरुधमिति तस्मै नमन्तां ज्ञनय इत्यापो वै ज्ञनयोऽह्नो क्षीद्ध सर्वं ज्ञायते सुपत्नीरित्यग्निना वाऽआपः सु॒-पत्न्यो मातेव पुत्रं॑ बिभृताप्स्वेनदिनि यथा माता पुत्रमपस्थे बिभृयादेवमेनद्बिभृते॒-न्येतत् ॥३॥ अप्स्वग्ने सधिष्टवेति । अप्स्वग्ने योनिष्टवेत्येतत्सौषधीरनुरुध्यसऽइ॒-त्योषधीर्क्षोषोऽनुरुध्यते गर्भे सन्ज्ञायसे पुनरिति गर्भे क्षेष सन्ज्ञायते पुनर्गर्भो॒-ऽअस्योषधीनां गर्भो वनस्पतीनाम् गर्भो विश्वस्य भूतस्याग्ने गर्भोऽअपामसीति॒ तदेनमस्य सर्वस्य गर्भं करोति ॥४॥ त्रिभिरभ्यवक्॒रति । त्रिवृदग्निर्यावानग्निर्याव॒-त्यस्य मात्रा तावतैवैनदेतदभ्यवक्॒रत्येकेनाग्रेऽथ द्वाभ्यां द्वाभ्यां वाग्रेऽथैकेन द्वि-

स्तु कृत्वोऽभ्यवहरति तस्मे द्विपादाः पशवस्तैरेवैनदेतदभ्यवहरति ॥५॥ अथापादत्ते । तस्यदत्त्राग्नेयं तदेतदह्नोऽधि जनयत्यनयानया वै भेषजं क्रियतेऽनयैवैनमेतत्सम्भरति प्रसस्य भस्मना योनिमपश्च पृथिवीमग्नऽइति प्रसन्नो क्येष भस्मना योनिमपश्च पृथिवीं च भवति सऽसृज्य मातृभिष्टं ज्योतिष्मान्पुनरासद इति संगत्य मातृभिष्टं ज्योतिष्मान्पुनरासद इत्येतत्पुनरासस्य सदनं पुनर्दृज्ञा सकृ रय्येत्येतेन मा सर्वेणाभिनिवर्तस्वेत्येतत् ॥६॥ चतुर्भिरपादत्ते । तस्मे चतुष्पादाः पशवस्तैरेवैनमेतत्सम्भरत्यथोऽअन्नं वै पशवोऽन्नेनैवैनमेतत्सम्भरति त्रिभिरभ्यवहरति तत्सप्त सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥७॥ अपादाय भस्मनः प्रत्येत्य । उखायामोप्योपतिष्ठतऽएतद्वाऽएतदयथायथं करोति यदग्निमपोऽभ्यवहरति तस्माऽएवैतन्निक्रुते ऽक्षिऽसायाऽआग्नेयीभ्यामग्नयऽएवैतन्निक्रुते बुद्भवतीभ्यां यथैवास्यैतदग्निर्वचो निबोधेत् ॥८॥ बोधा मेऽअस्य वचसो यविष्ठेति । बोध मेऽस्य वचसो यविष्ठेत्येतन्मऽक्षिष्ठस्य प्रभृतस्य स्वधाव इति भूयिष्ठस्य प्रभृतस्य स्वधाव इत्येतत्पीयति त्वोऽअनु त्वो गृणातीति पीयत्येकोऽन्वेको गृणाति वन्दारुष्टे तन्वं वन्देऽअग्नऽइति वन्दिता तेऽहं तन्वं वन्देऽग्नऽइत्येतत्स बोधि सूरिर्मघवा वसुपते वसुदावन् युयोध्यस्मद्द्वेषाऽसीति यथैवास्माद्द्वेषाऽसि युयादेवमेतदाह द्वाभ्यामुपतिष्ठते गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ॥९॥ तानि नव भवन्ति । नव दिशो दिशोऽग्निर्नव प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१०॥ अथ प्रायश्चित्ती करोति । सर्वेभ्यो वाऽएष एतं कामेभ्य आधत्ते तस्यदेवास्यात्र कामानां व्यवहिष्यतेऽग्नावपोऽभ्यवहियमाणे तदेवैतत्संतनोति संदधात्युभे प्रायश्चित्ती करोति येऽएवाग्नावनुगते तस्योक्तो बन्धुः ॥११॥ तानि दश भवन्ति । दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्या-

वानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥ १२ ॥ ब्राह्मणम् ॥ ६ [८. २.] ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या १०२ ॥ अष्टमोऽध्यायः [४३.] ॥ अस्मिन्काण्डे कण्डिकासंख्या ५३० ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे उखासम्भरणनाम षष्ठं काण्डं समाप्तम् ॥ ६ ॥ ॥

VARIOUS READINGS.

Adhyâya १. १. ११ सोऽग्निरसृज्यत ABC first hand. - ३. ११ We expect शर्व instead of सर्व (oxyt.). —

Adhyâya २. २. ३७ °देकान्न C. देकान्न AB. - ४०? भिषड्ज्यतो A. भिषड्जायितो B. C first hand. भिषज्जायितो C second hand. —

Adhyâya ३. १. १३ तत्राय A. - २६ सुखिर° A first hand. - २८ आसोदेष सोऽज्ञो ABC. - ४४ ॥ ब्राह्मणम् ॥ ३ ॥ भार्वट ॥ A. - ३. ८? स्यत्वा ABC see २, ४, १, ६. १२. - ११ वृत्राय ABC. - २०? स्पृक्ष्वर्णो A first hand. स्पृक्षयद्वर्णो A second hand. BC. —

Adhyâya ४. २. १? °ग्रेऽग्निरसृज्यत AB. C second hand. - ६ देवः सं देवा° ABC. - ३. ५ ऽग्नेति । अग्ने° A. ऽग्नेति अग्ने° BC. - ४. ३ सुखदस्त्व° A first hand.—

Adhyâya ५. १. १ पर्णाकखा° A. - २. ५ द्यौर्द्यौष C first hand. —

Adhy. ६. ३. ३ °न्प्रतिपद्यते B first hand. - ४. १? कर्मणिरेव ABC. —

Adhy. ७. २. ८ उभयतःप्रउगं is double-accented! - ३. १० °गन्वांत° ABC.—

ओम्। गार्हपत्यं चेष्यन्पलाशशाखया व्युद्वृहति। अवस्यति वै तद्यद्गार्हपत्यं चिनोति यज्ञ वै के चाग्निचितोऽस्यामेव तेज्वसितास्तद्यद्व्युद्वृहत्यवसितानेव तद्व्युद्वृहति नेदवसितानध्यवस्यानीति ॥१॥ अपेत वीत वि च सर्पतात इति। अप चैवैत वि चेत व्यु च सर्पतात इत्येतद्यज्ञ उदृसर्पिणास्तानेतदाह येज्ञ स्थ पुराणा ये च नूतना इति येज्ञ स्थ सनातना ये चाधुनातना इत्येतत् ॥२॥ अदाग्नमोऽवसानं पृथिव्या इति। यमो ह वाऽअस्या अवसानस्येष्टे स एवास्माऽअस्यामवसानं ददाति ॥३॥ अक्रन्निमं पितरो लोकमस्माऽइति। क्षत्रं वै यमो विशः पितरो यस्मा उ वै क्षत्रियो विशा संविदानोऽस्यामवसानं ददाति तत्सुदत्तं तथो ह्यस्मै क्षत्रं यमो विशा पितृभिः संविदानोऽस्यामवसानं ददाति ॥४॥ पलाशशाखया व्युद्वृहति। ब्रह्म वै पलाशो ब्रह्मणैव तद्वसितान्व्युद्वृहति मल्वेन ब्रह्म वै मल्वो ब्रह्मणैव तद्वसितान्व्युद्वृहति तामुदीचीमुदस्यति ॥५॥ ॥ शतम् ३१०० ॥॥ अथोषान्निवपति। अयं वै लोको गार्हपत्यः पशव ऊषा अस्मिंस्तल्लोके पशून्दधाति तस्मादिमेऽस्मिंल्लोके पशवः ॥६॥ यद्वेवोषान्निवपति। प्रजापतिः प्रजा असृजत ता नानोल्बा असृजत ता न समजानन्त सोऽकामयत संजानीरन्निति ताः समानोल्बा अकरोत्तासामूषानुल्बमकरोत्ताः समजानत तस्माद्ध्येतर्हि समानोल्बाः समेव जानते देवैः समानोल्बोऽसानीत्यु वै यजते यो यजते तद्यदूषान्निवपति देवैरेव तत्समानोल्बो भवति ॥७॥ सजानमसीति। समजानन्त क्षेत्तेन कामधरणमिति पशवो वाऽऊषाः पशवः कामधरणं मयि ते

कामधरणं भूयादिति मयि ते पशवो भूयासुरित्येतत्तैः सर्वं गार्हपत्यं प्रह्लादयति योनिर्वै गार्हपत्या चितिरुल्बमूषाः सर्वा तद्योनिमुल्बेन प्रह्लादयति ॥ ८ ॥ अथ सिकता निवपति । अग्नेरेतद्वैश्वानरस्य भस्म यत्सिकता अग्निमु वाऽएतं वैश्वानरं चेष्यन्भवति न वाऽअग्निः स्वं भस्मातिदहत्यनतिदाहाय ॥ ९ ॥ यद्वेव सिकता निवपति । अग्नेरेतद्वैश्वानरस्य रेतो यत्सिकता अग्निमु वाऽएतं वैश्वानरं चेष्यन्भवति न वाऽअरेतस्कात्किं चन विक्रियतेऽस्माद्रेतसोऽधि विक्रियाताऽइति ॥ १० ॥ अग्नेर्भस्मास्यग्नेः पुरीषमसीति । यातयाम वाऽअग्नेर्भस्मायातयाम्न्यः सिकता अयातयाममेवैनदेतत्करोति ताभिः सर्वं गार्हपत्यं प्रह्लादयति योनिर्वै गार्हपत्या चिती रेतः सिकताः सर्वस्यां तद्योनौ रेतो दधाति ॥ ११ ॥ अथैनं परिश्रिद्भिः परिश्रयति । योनिर्वै परिश्रित इदमेवैतद्रेतः सिक्तं योन्या परिगृह्णाति तस्माद्योन्या रेतः सिक्तं परिगृह्यते ॥ १२ ॥ यद्वेवैनं परिश्रिद्भिः परिश्रयति । अयं वै लोको गार्हपत्य आपः परिश्रित इमं तं लोकमद्भिः परितनोति समुद्रेण ह्येनं तत्परितनोति सर्वतस्तस्मादिमं लोकꣳ सर्वतः समुद्रः पर्येति दक्षिणावृत्तस्मादिमं लोकं दक्षिणावृत्समुद्रः पर्येति खातेन तस्मादिमं लोकं खातेन समुद्रः पर्येति ॥ १३ ॥ चित स्थेति । चिनोति ह्येनाः परिचित स्थेति परि ह्येनाश्चिनोत्यूर्ध्वचितः श्रयधमित्यूर्ध्वा उपदधदाह तस्मादूर्ध्व एव समुद्रो विज्ञतेऽथ यत्तिरश्चीरुपदध्यात्सकृद्धैवेदꣳ सर्वꣳ समुद्रो निर्मज्यान्न सादयत्यसन्ना ह्यापो न सूददोहसाधिवदति ॥ १४ ॥ अस्थीनि वै परिश्रितः । प्राणाः सूददोहा न वाऽअस्थिषु प्राणोऽस्त्येकेन यजुषा बह्वीरिष्टका उपदधात्येकꣳ ह्येतद्रूपं यदापोऽथ यद्बह्व्यः परिश्रितो भवन्ति बह्व्यो ह्यापः ॥ १५ ॥ तद्वै योनिः परिश्रितः । उल्बमूषा रेतः सिकता बाह्याः परिश्रितो भवत्यन्तरऽऊषा बाह्या हि योनिरन्तरमुल्बं बाह्यऽऊषा भवत्यन्तराः सिकता बाह्यꣳ ह्युल्बमन्तरꣳ रेत एतेभ्यो वै जायमानो जायते तेभ्य एवैनमेत-

ज्ञनयति ॥ १६ ॥ अथैनमतश्चिनोति । इदमेवैतद्रेतः सिक्तं विकरोति तस्माद्योनौ रेतः सिक्तं विक्रियते ॥ १७ ॥ स चतस्रः प्राचीरुपदधाति । द्वे पश्चात्तिरश्ची द्वे पुरस्तात्तद्याश्चतस्रः प्राचीरुपदधाति स आत्मा तद्यत्ताश्चतस्रो भवन्ति चतुर्विधो ह्ययमात्माथ ये पश्चात्ते सक्थ्यौ ये पुरस्तात्तौ बाहू यत्र वाऽआत्मा तदेव शिरः ॥ १८ ॥ तं वाऽएतम् । अत्र पद्मपुष्करं विकरोति यादृग्वै योनौ रेतो विक्रियते तादृग्जायते तद्यदेतमत्र पद्मपुष्करं विकरोति तस्मादेषोऽमुत्र पद्मपुष्करान्जायते ॥ १९ ॥ तं वै पद्मपुष्करमेव सन्तम् । न पद्मपुष्करमिव पश्यन्ति तस्माद्योनौ गर्भं न यथारूपं पश्यन्त्यथैनममुत्र पद्मपुष्करं पश्यन्ति तस्माज्जातं गर्भं यथारूपं पश्यन्ति ॥ २० ॥ स चतस्रः पूर्वा उपदधाति । आत्मा ह्येवाग्ने सम्भवतः सम्भवति दक्षिणत उदङ्मुखीन उत्तरार्ध्यौ प्रथमामुपदधाति तथो ह्यस्यैषोऽभ्यात्ममेवाग्निश्चितो भवति ॥ २१ ॥ अयꣳ सोऽअग्निः । यस्मिन्त्सोममिन्द्रः सुतं दधऽइत्ययं वै लोको गार्हपत्य आपः सोमः सुतोऽस्मिंस्तल्लोकेऽप इन्द्रोऽधत्त जठरे वावशान इति मध्यं वै जठरꣳ सक्थ्न्यं वाजमत्यं न सप्तिमित्यापो वै सक्थ्न्यो वाजः सप्तवात्सप्तस्तूयसे जातवेद इति चितः संश्चीयसे जातवेद इत्येतत् ॥ २२ ॥ अग्ने यत्ते दिवि वर्च इति । आदित्यो वाऽअस्य दिवि वर्चः पृथिव्यामित्ययमग्निः पृथिव्यां यदोषधीष्वप्स्वा यजत्रेति य एवौषधिषु चाप्सु चाग्निस्तमेतदाह येनान्तरिक्षमुर्वाततन्थेति वायुः स ह्येषः स भानुरर्णवो नृचक्षा इति महान्स भानुरर्णवो नृचक्षा इत्येतत् ॥ २३ ॥ अग्ने दिवोऽअर्णमछा जिगासीति । आपो वाऽअस्य दिवोऽर्णास्ता एष धूमेनाक्त्यछा देवाँ२॥ऽऊचिषे धिष्ण्या यऽइति प्राणा वै देवा धिष्ण्यास्ते हि सर्वा धिय इङ्खन्ति या रोचने परस्तात्सूर्यस्य यावस्ताडुपतिष्ठन्त ऽआप इति रोचनो ह नामैष लोको यत्रैष एतत्तपति तद्यश्चैतं परेणापो यावरेण ता एतदाह ॥ २४ ॥ पुरीष्यासोऽअग्नय इति । पशव्यासोऽग्नय इत्येतत्प्रा-

वणेभिः सञ्जोषस इति प्रायणꣳरूपं प्रायणꣳ क्वेतद्ग्नेर्यद्गार्हपत्यो जुषन्तां यज्ञमदुह्रोऽनमीवा इषो महीरिति जुषन्तां यज्ञमदुह्रोऽनशनाया इषो महीरित्येतत् ॥२५॥ नानोपदधाति । ये नानाकामा आत्मंस्तांस्तद्दधाति सकृत्साद्यत्येकं तदात्मानं करोति सूददोहसाधिवदति प्राणो वै सूददोहाः प्राणेनैवैनमेतत्संतनोति संदधाति ॥२६॥ अथ जघनेन परीत्य । उत्तरतो दक्षिणासीनोऽपरयोर्दक्षिणाग्नꣳ उपदधातीडाग्ने पुरुदꣳसꣳ सनिं गोरिति पशवो वाऽइडा पशूनामेवास्माऽएतामाशिषमाशास्ते शश्वत्तमꣳ हवमानाय साधेति यजमानो वै हवमानः स्यान्नः सूनुस्तनयो विजावेति प्रजा वै सूनुरग्ने सा ते सुमतिर्भूवस्मेऽइत्याशिषमाशास्ते ॥२७॥ अथोत्तराम् । अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथा इत्ययं ते योनिर्ऋतव्यः सनातनो यतो जातोऽदीप्यथा इत्येतत्तं जानन्नग्नऽआरोहाथा नो वर्धया रयिमिति यथैव यजुस्तथा बन्धुः ॥२८॥ सक्थ्यावस्येते । ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना क्रीमे सक्थ्यौ द्वे भवतो द्वे क्रीमे सक्थ्यौ पश्चादुपदधाति पश्चाद्धीमे सक्थ्यावग्राभ्याꣳ सꣳस्पृष्टे भवत एवꣳ क्रीमे सक्थ्यावग्राभ्याꣳ सꣳस्पृष्टे ॥२९॥ अथ तेनैव पुनः परीत्य । दक्षिणत उदङ्मुखः सीनः पूर्वयोरुत्तरामग्नऽउपदधाति चिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीदित्यथ दक्षिणां परिचिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति ॥३०॥ बाहूऽअस्येते । ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना क्रीमौ बाहू द्वे भवतो द्वौ क्रीमौ बाहू पूर्वार्धऽउपदधाति पुरस्ताद्धीमौ बाहूऽअग्राभ्याꣳ सꣳस्पृष्टे भवत एवꣳ क्रीमौ बाहूऽअग्राभ्याꣳ सꣳस्पृष्टौ स वाऽइतीमाऽउपदधातीतीमेऽइतीमे तद्दक्षिणावृत्तद्धि देवत्रा ॥३२॥ अष्टाविष्टका उपदधाति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तमेवैनमेतच्चिनोति पञ्च कृत्वः सादयति पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्या-

वत्यस्य मात्रा तावत्तमेवैनमेतच्चिनोत्यष्टाविष्टकाः पञ्च कृत्वः सादयति तत्त्रयोदश त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥३२॥ अथ लोकम्पृणामुपदधाति । तस्या उपरि बन्धुस्तिस्रः पूर्वास्त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तमेवैनमेतच्चिनोति दशोत्तरास्तासामुपरि बन्धुर्द्वे वाग्ये अथ दशाथैकामेवꣳ हि चितिं चिन्वन्ति तास्त्रयोदश सम्पद्यन्ते तस्योक्तो बन्धुः ॥३३॥ ता उभय्य एकविꣳशतिः सम्पद्यन्ते । द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳशोऽमुं तदादित्यमस्मिन्नग्नौ प्रतिष्ठापयति ॥३४॥ एकविꣳशतिर्वै व परिश्रितः । द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका अयमग्निरमुतोऽध्येकविꣳश इमं तदग्निममुष्मिन्नादित्ये प्रतिष्ठापयति तद्यदेता एवमुपदधात्येतावैवैतद्न्योऽन्यस्मिन्प्रतिष्ठापयति तावेतावन्योऽन्यस्मिन्प्रतिष्ठितौ तौ वाऽएतावत्र द्वाविकविꣳशौ सम्पादयत्यत्र क्वेवैमौ तदोभौ भवत आहवनीयश्च गार्हपत्यश्च ॥३५॥ अथ पुरीषं निवपति । तस्योपरि बन्धुस्तच्चावालवेलाया आहरत्यग्निरेष यच्चावालस्तथो ह्यस्यैतदाग्नेयमेव भवति सा समम्बिला स्यात्तस्योक्तो बन्धुः ॥३६॥ व्याममात्री भवति । व्याममात्रो वै पुरुषः पुरुषः प्रजापतिः प्रजापतिरग्निरात्मसंमितां तद्योनिं करोति परिमण्डला भवति परिमण्डला हि योनिरथोऽअयं वै लोको गार्हपत्यः परिमण्डल ड वाऽअयं लोकः ॥३७॥ अथैनौ संनिवपति । संज्ञामेवाभ्यामेतत्करोति समितꣳ संकल्पेथाꣳ सं वां मनाꣳसि सं व्रताग्ने वं पुरीष्यो भवतं नः समनसाविति शमयत्येवैनावेतद्हिꣳसायै यथा नान्योऽन्यꣳ हिꣳस्याताम् ॥३८॥ चतुर्भिः संनिवपति । तद्ये चतुष्पदाः पशवस्तैरेवाभ्यामेतत्संज्ञां करोत्यथोऽअन्नं वै पशवोऽन्नेनैवाभ्यामेतत्संज्ञां करोति ॥३९॥ तां न रिक्तामवेक्षेत । नेद्रिक्तामवेक्षाऽइति यद्रिक्तामवेक्षेत ग्रसेत क्वैनम् ॥४०॥ अथास्याꣳ सिकता आवपति । अग्नेरेतद्वैश्वानरस्य रेतो यत्सिकता अग्नि-

मेवास्यामेतद्वैश्वानरꣳ रेतो भूतꣳ सिञ्चति सा समम्बिला स्यात्तस्योक्तो बन्धुः ॥४१॥ अथैनां विमुञ्चति । अप्रदाहाय यद्धि युक्तं न विमुच्यते प्र तद्दह्यतऽएतद्वाऽएतद्युक्ता रेतोऽभार्षीदितमग्निं तमत्राजीजनदथापरं धत्ते योषा वाऽउखा तस्माद्यदा योषा पूर्वꣳ रेतः प्रजनयत्यथापरं धत्ते ॥४२॥ मातेव पुत्रं पृथिवी पुरीष्यमिति । मातेव पुत्रं पृथिवी पशव्यमित्येतदग्निꣳ स्वे योनावभारुखित्यग्निꣳ स्वे योनावभार्षीदुखित्येतत्तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चित्यृतवो वै विश्वे देवास्तदेनां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चति तामुत्तरतोऽग्नेर्निदधात्यरत्निमात्रे तस्योक्तो बन्धुः ॥४३॥ अथास्यां पय आनयति । एतद्वाऽएतद्रेतो धत्तेऽथ पयो धत्ते योषा वाऽउखा तस्माद्यदा योषा रेतो धत्तेऽथ पयो धत्तेऽधराः सिकता भवन्त्युत्तरं पयोऽधरꣳ हि रेत उत्तरं पयस्तन्मध्यऽआनयति यथा तत्प्रति पुरुषशीर्षमुपदध्यात् ॥४४॥ ब्राह्मणम् ॥१॥ ॥

प्रजापतिः प्रजा असृजत । स प्रजाः सृष्ट्वा सर्वमाज्जिमित्वा व्यस्रꣳसत तस्माद्विस्रस्तात्प्राणो मध्यत उदक्रामदथास्माद्वीर्यमुदक्रामत्तस्मिन्नुत्क्रान्तेऽपश्यत तस्मात्पन्नादन्नमस्रवद्यच्चनुरध्यशेत तस्मादस्यान्नमस्रवन्नो हेह तर्हि का चन प्रतिष्ठास ॥१॥ ते देवा अब्रुवन् । न वाऽइतोऽन्या प्रतिष्ठास्तीममेव पितरं प्रजापतिꣳ संस्करवाम सैव नः प्रतिष्ठा भविष्यतीति ॥२॥ तेऽग्निमब्रुवन् । न वाऽइतोऽन्या प्रतिष्ठास्ति त्वयीमं पितरं प्रजापतिꣳ संस्करवाम सैव नः प्रतिष्ठा भविष्यतीति किं मे ततो भविष्यतीति ॥३॥ तेऽब्रुवन् । अन्नं वाऽअयं प्रजापतिस्त्वन्मुखा एतदन्नमदाम त्वन्मुखानां न एषोऽन्नमसदिति तथेति तस्माद्वा अग्निमुखा अन्नमदन्ति यस्यै हि कस्यै च देवतायै जुह्वत्यग्नावेव जुह्वत्यग्निमुखा हि तद्देवा अन्नमकुर्वत ॥४॥ स योऽस्मात्प्राणो मध्यत उदक्रामत् । अयमेव स वायुर्योऽयं पवतेऽथ यदस्माद्वीर्यमुदक्रामदसौ स आदित्योऽथ यदस्मादन्नमस्रवद्यदेव संवत्सरेऽन्नं तत्तत्

॥ ५ ॥ तं देवा अग्नौ प्रावृञ्जन् । तस्य एनं प्रवृक्तमग्निरारोक्ष्य एवास्मात्स प्राणो मध्यत उदक्रामत्स एवैनꣳ स आपद्यत तमस्मिन्नदधुरथ यदस्माद्वीर्यमुदक्रामत्तदस्मिन्नदधुरथ यदस्मादन्नमस्रवत्तदस्मिन्नदधुस्तꣳ सर्वं कृत्स्नꣳ संस्कृत्योर्धमुदश्रयंस्तस्य तमुदश्रयन्निमे स लोकाः ॥ ६ ॥ तस्यायमेव लोकः प्रतिष्ठा । अथ योऽस्मिंल्लोकेऽग्निः सोऽस्यावाङ् प्राणोऽथास्यान्तरिक्षमात्माथ योऽन्तरिक्षे वायुर्य एवायमात्मन्प्राणः सोऽस्य स द्यौरेवास्य शिरः सूर्याचन्द्रमसौ चक्षुषी यच्चक्षुरध्यशेत स चन्द्रमास्तस्मात्स मीलिततरोऽन्नꣳ हि तस्मादस्रवत् ॥ ७ ॥ तदेषा वै सा प्रतिष्ठा । यां तद्देवाः समस्कुर्वन्सैवेयमद्यापि प्रतिष्ठा सोऽएवाप्यतोऽधि भविता ॥ ८ ॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयत तस्यदेषोखा रिक्ता शेते पुरा प्रवर्जनाद्यथैव तत्प्रजापतिरुत्क्रान्ते प्राणऽउत्क्रान्ते वीर्ये स्रुतेऽन्ने रिक्तोऽशयदेतदस्य तद्रूपम् ॥ ९ ॥ तामग्नौ प्रवृणक्ति । यथैवैनमदो देवाः प्रावृञ्जंस्तस्य एनां प्रवृक्तामग्निरारोक्षति य एवास्मात्स प्राणो मध्यत उदक्रामत्स एवैनꣳ स आपद्यते तमस्मिन्दधात्यथ यदुकं प्रतिमुच्य बिभर्ति यदेवास्माद्वीर्यमुदक्रामत्तदस्मिन्दधात्यथ याः समिध आदधाति यदेवास्मादन्नमस्रवत्तदस्मिन्दधाति ॥ १० ॥ ता वै सायं प्रातरादधाति । अङ्गश्च हि तद्रात्रेश्चान्नमस्रवत्तान्येतानि सर्वस्मिन्नेव संवत्सरे स्युः संवत्सरो हि स प्रजापतिर्यस्मात्तान्युदक्रामंस्तदस्मिन्नेतत्सर्वस्मिन्नेव सर्वं दधाति यस्मिन्ह्यस्यैतदतो न कुर्यान्न ह्यस्य तस्मिन्नेतद्ध्यान्नासंवत्सरभृतस्येक्षकेण चन भवितव्यमिति ह स्माह वामकक्षायणो नेदिमं पितरं प्रजापतिं विक्ष्यमानं पश्यानीति तꣳ संवत्सरे सर्वं कृत्स्नꣳ संस्कृत्योर्धमुक्ष्यति यथैवैनमदो देवा उदश्रयन् ॥ ११ ॥ तस्य गार्हपत्य एवायं लोकः । अथ यो गार्हपत्येऽग्निर्य एवायमस्मिंल्लोकेऽग्निः सोऽस्य सोऽथ यदन्तराहवनीयं च गार्हपत्यं च तदन्तरिक्षमथ य आग्नीध्रीयेऽग्निर्य एवायमन्तरिक्षे वायुः सोऽस्य स आहवनीय एव द्यौ-

रथ य आहवनीयेऽग्निस्तौ सूर्याचन्द्रमसौ सोऽस्येष आत्मैव ॥१२॥ तस्य शिर एवाहवनीयः । अथ य आहवनीयेऽग्निर्य एवायꣳ शीर्षन्प्राणः सोऽस्य स तद्यत्स पक्षपुच्छवान्भवति पक्षपुच्छवान्ह्ययꣳ शीर्षन्प्राणश्चक्षुः शिरो दक्षिणꣳ श्रोत्रं दक्षिणः पक्ष उत्तरꣳ श्रोत्रमुत्तरः पक्षः प्राणो मध्यमात्मा वाक्पुच्छं प्रतिष्ठा तद्यत्प्राणा वाचान्नं जग्धा प्रतितिष्ठन्ति तस्माद्वाक्पुच्छं प्रतिष्ठा ॥१३॥ अथ यदन्तराहवनीयं च गार्हपत्यं च । स आत्माथ य आग्नीध्रीयेऽग्निर्य एवायमन्तरात्मन्प्राणः सोऽस्य स प्रतिष्ठैवास्य गार्हपत्योऽथ यो गार्हपत्येऽग्निः सोऽस्यावाङ् प्राणः ॥१४॥ तꣳ केके त्रिचितं चिन्वन्ति । त्रयो वाऽइमेऽवाञ्चः प्राणा इति न तथा कुर्यादिति तेरेचयन्त्येकविꣳशसम्पदमथोऽअनुष्टुप्सम्पदमथो बृहतीसम्पदं ये तथा कुर्वन्त्येकꣳ ह्येवैतद्रूपं योनिरेव प्रजातिरेव यदेतेऽवाञ्चः प्राणा यद्धि मूत्रं करोति यत्पुरीषं प्रैव तज्जायते ॥१५॥ अथातः सम्पदेव । एकविꣳशतिरिष्टका नव यजूꣳषि तत्त्रिꣳशत्सादनं च सूददोहाश्च तद्वात्रिꣳशद्वात्रिꣳशदक्षरानुष्टुप्सैषानुष्टुप् ॥१६॥ एकविꣳशतिर्वैव परिश्रितः । यजुर्द्वाविꣳशं व्युदूहनस्य यजुरूषाश्च यजुश्च सिकताश्च यजुश्च पुरीषं च यजुश्च चतुर्भिः संनिवपति विमुञ्चति पञ्चमेन ततस्त्रिभिरियं द्वात्रिꣳशदक्षरानुष्टुप्सैषानुष्टुप् ॥१७॥ अथैते द्वे यजुषी । सोऽअनुष्टुबेव वाग्वाऽअनुष्टुप्तद्यदिदं द्वयं वाचो रूपं दैवं च मानुषं चोच्चैश्च शनैश्च तदेते द्वे ॥१८॥ ता वाऽएतास्तिस्रोऽनुष्टुभः । चित एष गार्हपत्यस्तद्यदेता अत्र तिस्रोऽनुष्टुभः सम्पादयत्यत्र ह्येवेमे तदा सर्वे लोका भवन्ति ततोऽन्यतरां द्वात्रिꣳशदक्षरामनुष्टुभमाहवनीयꣳ करोति स आहवनीयः सा द्यौस्तद्धिरोऽथैकान्यतरा परिशिष्यते स गार्हपत्यः सा प्रतिष्ठा स उऽअयं लोकः ॥११॥ अथ येऽएते द्वे यजुषी । एतत्तद्यदन्तराहवनीयं च गार्हपत्यं च तदन्तरिक्षꣳ स आत्मा तद्यत्ते द्वे भवतस्तस्मादेतत्तनीयो यदन्तराहवनीयं च गार्हपत्यं च तस्मादेषां लोकानामन्तरिक्षलोक-

स्तनिष्टः ॥ २० ॥ सैषा त्रेधाविहिता वागनुष्टुप् । तामेषोऽग्निः प्राणो भूत्वानुसंचरति य आहवनीयेऽग्निः स प्राणः सोऽसावादित्योऽथ य आग्नीध्रीयेऽग्निः स व्यानः स उऽअयं वायुर्योऽयं पवतेऽथ यो गार्हपत्येऽग्निः स उदानः स उऽअयं योऽयमस्मिंल्लोकेऽग्निरेवंविद्ध वाव सर्वा वाचं सर्वं प्राणꣳ सर्वमात्मानꣳ संस्कुरुते ॥ २१ ॥ सैषा बृहत्येव । ये वै द्वे द्वात्रिꣳशतौ द्वात्रिꣳशदेव तदथैते द्वे यजुषी तच्चतुस्त्रिꣳशदग्निरेव पञ्चत्रिꣳशो नाद्धराच्छन्दो व्येत्येकस्मान्न द्वाभ्याꣳ स उ द्यद्धरस्तत्षट्त्रिꣳशत्षट्त्रिꣳशदद्धरा बृहती बृहतीं वाऽएष संचितोऽभिसम्पद्यते यादृग्वै योनौ रेतः सिच्यते तादृङ्जायते तद्यदेतामत्र बृहतीं करोति तस्मादेष संचितो बृहतीमभिसम्पद्यते ॥ २२ ॥ तदाहुः । यदयं लोको गार्हपत्योऽन्तरिक्षं धिष्ण्या द्यौराहवनीयोऽन्तरिक्षलोक उ अस्माल्लोकादनन्तर्हितोऽथ कस्माद्गार्हपत्यं चित्वाहवनीयं चिनोत्यथ धिष्ण्यानिति सकृ द्धैवेमावग्रे लोकावासतुस्तयोर्वियतोर्योऽन्तरेणाकाश आसीत्तदन्तरिक्षमभवद्दीक्षꣳ कैतन्नाम ततः पुरान्तरा वाऽइदमीक्षमभूदिति तस्मादन्तरिक्षं तद्यद्गार्हपत्यं चित्वाहवनीयं चिनोत्येतौ ह्यग्रे लोकावसृज्येतामथ प्रत्येत्य धिष्ण्यान्निवपति कर्मण एवानन्तरायायाथोऽअन्तयोर्वाव संस्क्रियमाणयोर्मध्यꣳ संस्क्रियते ॥ २३ ॥ ब्राह्मणम् ॥ २ ॥ प्रथमोऽध्यायः [४४.] ॥ ॥

अथातो नैर्ऋतीर्हरन्ति । एतद्वै देवा गार्हपत्यं चित्वा समारोहन्नयं वै लोको गार्हपत्य इममेव तं लोकꣳ संस्कृत्य समारोहंस्ते तम एवानतिदृश्यमपश्यन् ॥ १ ॥ तेऽब्रुवन् । उप तज्जानीत यथेदं तमः पाप्मानमपकृन्तामहाऽइति तेऽब्रुवंश्चेतयध्वमिति चितिमिहतेति वाव तदब्रुवंस्तदिहत यथेदं तमः पाप्मानमपकृन्तामहाऽइति ॥ २ ॥ ते चेतयमानाः । एता इष्टका अपश्यन्नैर्ऋतीस्ता उपादधत ताभिस्तत्तमः पाप्मानमपाघ्नत पाप्मा वै निर्ऋतिस्तद्यदेताभिः पाप्मानं निर्ऋतिमपाघ्नत तस्मादेता नैर्ऋत्यः ॥ ३ ॥ तद्वाऽएतत्क्रियते । यद्देवा अकुर्वन्निदं नु तत्तमः

स पाप्मा देवैरेवापक्रतो यद्वेतत्करोति यदेवा अकुर्वंस्तत्करवाणीत्यथो य एव पाप्मा या निर्ऋतिस्तमेताभिरुपक्रते तद्यदेताभिः पाप्मानं निर्ऋतिमपक्रते तस्मादेता नैर्ऋत्यः ॥४॥ यद्वैवैता नैर्ऋतीर्हरन्ति । प्रजापतिं विस्रस्तं यत्र देवाः समस्कुर्वंस्तन्मुखायां योनौ रेतो भूतमसिञ्चन्योनिर्वाऽउखा तस्माऽएताꣳ संवत्सरे प्रतिष्ठाꣳ समस्कुर्वन्निममेव लोकमयं वै लोको गार्हपत्यस्तस्मिन्नेनं प्राजनयंस्तस्य यः पाप्मा यः श्लेष्मा यदुल्बं यज्जरायु तदस्यैताभिरुपाघ्नंस्तद्यदस्यैताभिः पाप्मानं निर्ऋतिमपाघ्नंस्तस्मादेता नैर्ऋत्यः ॥५॥ तथैवैतद्यजमानः । आत्मानमुखायां योनौ रेतो भूतꣳ सिञ्चति योनिर्वाऽउखा तस्माऽएताꣳ संवत्सरे प्रतिष्ठाꣳ संस्करोतीममेव लोकमयं वै लोको गार्हपत्यस्तस्मिन्नेनं प्रजनयति तस्य यः पाप्मा यः श्लेष्मा यदुल्बं यज्जरायु तदस्यैताभिरुपक्रन्ति तद्यदस्यैताभिः पाप्मानं निर्ऋतिमपक्रन्ति तस्मादेता नैर्ऋत्यः ॥६॥ पादमाद्यो भवन्ति । अधस्पदमेव तत्पाप्मानं निर्ऋतिं कुरुतेऽलक्षणा भवन्ति यद्वै नास्ति तदलक्षणमसत्तमेव तत्पाप्मानं निर्ऋतिं कुरुते तुषपक्वा भवन्ति नैर्ऋता वै तुषा नैर्ऋतैरेव तन्नैर्ऋतं कर्म करोति कृष्णा भवन्ति कृष्णꣳ हि तत्तम आसीद्यो कृष्णा वै निर्ऋतिः ॥७॥ ताभिरेतां दिशं यन्ति । एषा वै नैर्ऋती दिङ्नैर्ऋत्यामेव तद्दिशि निर्ऋतिं दधाति स यत्र स्वकृतं वेरिणꣳ श्वभ्रप्ररो वा स्यात्तदेनाꣳ उपदध्याद्यत्र वाऽअस्याऽअवदीर्यते यत्र वास्याऽओषधयो न जायन्ते निर्ऋतिर्हास्यै तद्गृह्णाति नैर्ऋतऽएव तद्भूमेर्निर्ऋतिं दधाति ताः पराचीर्लोकभाजः कृत्वोपदधाति ॥८॥ असुन्वन्तमयजमानमिच्छेति । यो वै न सुनोति न यजते तं निर्ऋतिर्गच्छति स्तेनस्येत्यामन्विहि तस्करस्येति स्तेनस्य चेत्यामन्विहि तस्करस्य चेत्येतद्यो यथा स्तेनस्तस्करः प्रलायमेत्येवं प्रलायमिहीत्यन्यमस्मदिह सा तऽइत्येत्यनित्यंविद्वाꣳसमिच्छेत्येतन्नमो देवि निर्ऋते तुभ्यमस्त्विति नमस्कारेणैवैनामुपक्रते ॥९॥ नमः सु ते निर्ऋते तिग्मतेज इति । तिग्मतेजा वै

निर्ऋतिस्तस्याऽएतन्नमस्करोत्ययस्मयं विचृता बन्धमेतमित्ययस्मयेन ह वै तं बन्धेन निर्ऋतिर्बध्नाति यं बध्नाति यमेन त्वं यम्या संविदानेत्यग्निर्वै यम इयं यम्या-भ्याꣳ ह्येदꣳ सर्वं यतमाभ्यां वꣳ संविदानेत्येतदुत्तमे नाकेऽधि रोहयैनमिति स्वर्गो वै लोको नाकः स्वर्गे लोके यजमानमधिरोहयेत्यतत् ॥१०॥ यस्यास्ते घोराऽआसन्नुहोमीति । घोरा वै निर्ऋतिस्तस्या एतदासन्नुहोति यत्तद्दैवत्यं कर्म करोत्येषां बन्धानामवसर्जनायेति यैर्बन्धैर्बद्धो भवति यां त्वा जनो भूमिरिति प्रमन्दतऽइतीयं वै भूमिरस्यां वै स भवति यो भवति निर्ऋतिं वाहं परिवेद विश्वत इति निर्ऋतिरिति वाहं परिवेद सर्वत इत्येतदियं वै निर्ऋतिरियं वै तं निर्-र्पयति यो निर्ऋच्छति तद्यथा वै ब्रूयादसावामुष्यायणोऽसि वेद वा मा मा हिꣳसीरित्येवमेतदाह नतरा꣡ꣳ हि विदित आमन्त्रितो हिनस्ति ॥११॥ नोपस्पृशति । पाप्मा वै निर्ऋतिर्नेत्याप्मना सꣳस्पृशाऽइति न सादयति प्रतिष्ठा वै सादनं नेत्याप्मानं प्रतिष्ठापयानीति न सूददोहसाधिवदति प्राणो वै सूददोहा नेत्याप्मानं प्राणेन संतनवानि संदधानीति ॥१२॥ ता ह्येके परस्तादर्वाचीरुपदधति । पाप्मा वै निर्ऋतिर्नेत्याप्मानं निर्ऋतिमन्ववायामेति न तथा कुर्यात्पराचीरेवोपदध्यात्पराञ्चमेव तत्पाप्मानं निर्ऋतिमपहते ॥१३॥ तिस्र इष्टका उपदधाति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत्पाप्मानं निर्ऋतिमपहते ॥१४॥ अथासन्दीꣳ शिक्यꣳ । रुक्मपाशमिण्ड्वे तत्परार्धे न्यस्यति नैर्ऋतो वै पाशो निर्ऋतिपाशादिव तत्प्रमुच्यते यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यमित्यनेवंविदुषा ह्याविचृत्यस्तं ते विष्याम्यायुषो न मध्यादित्यग्निर्वाऽआयुस्तस्यैतन्मध्यं यच्चितो गार्हपत्यो भवत्यचित आहवनीयस्तस्माद्यदि युवाग्निं चिनुते यदि स्थविर आयुषो न मध्यादित्येवाह्यैतं पितुमद्धि प्रसूत इत्यन्नं वै पितुरेतदन्नमद्धि प्रमुक्त इत्येतत्त्रिष्टुब्भिर्वज्रो वै त्रिष्टुब्वज्रेणैव तत्पाप्मानं निर्ऋतिमपहते ॥१५॥

तिस्र इष्टका भवन्ति । आसन्दी शिक्यꣳ रुक्मपाश इण्डे तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत्पाप्मानं निर्ऋतिमपहते ॥ १६॥ अथान्तरेणोदचमसं निनयति । वज्रो वाऽआपो वज्रेणैव तत्पाप्मानं निर्ऋतिमन्तर्धत्ते नमो भूत्यै येदं चकारेत्युपोत्तिष्ठन्ति भूत्यै वाऽएतदग्रे देवाः कर्माकुर्वत तस्याऽएतन्नमोऽकुर्वन्भूत्याऽउ एवायमेतत्कर्म कुरुते तस्याऽएतन्नमस्करोत्यप्रतीक्षमायन्त्यप्रतीक्षमेव तत्पाप्मानं निर्ऋतिं जहति ॥ १७॥ प्रत्येत्याग्निमुपतिष्ठते । एतद्वाऽएतद्यथायथं करोति यदग्नौ सामिचितऽएतां दिशमिति तस्माऽएवैतन्निर्ऋतेऽक्षिꣳसायै ॥ १८॥ यद्वेवोपतिष्ठते । अयं वै लोको गार्हपत्यः प्रतिष्ठा वै गार्हपत्य इयमु वै प्रतिष्ठाथैतद्पथमिवैति यदेतां दिशमेति तद्युपतिष्ठतऽइमामेवैतत्प्रतिष्ठामभिप्रत्येत्यस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥ १९॥ निवेशनः संगमनो वसूनामिति । निवेशनो ह्ययं लोकः संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिरिति सर्वाणि रूपाण्यभिचष्टे शचीभिरित्येतद्देव-इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनामिति यथैव यजुस्तथा बन्धुः ॥ २०॥ ब्राह्मणम् ॥ ३ [२. १.] ॥॥

अथ प्रायणीयं निर्वपति । तस्य हविष्कृता वाचं विसृजते वाचं विसृज्य स्तम्बयजुर्हरति स्तम्बयजुर्हृत्वा पूर्वेण परिग्रहेण परिगृह्य लिखित्वाक्रꣳ क्रꣳ त्रिरिति हरति त्रिराग्नीध्रः ॥ १॥ प्रत्येत्य प्रायणीयेन प्रचरति । प्रायणीयेन प्रचर्य सीरं युनक्त्येतद्वाऽएनं देवाः संस्करिष्यन्तः पुरस्ताद्ब्रह्मेन समार्धयंस्तथैवैनमयमेतत्संस्करिष्यन्पुरस्ताद्ब्रह्मेन समर्धयति सीरं भवति सेरꣳ ह्येतद्यत्सीरमिरामेवास्मिन्नेतद्दधाति ॥ २॥ औदुम्बरं भवति । ऊर्ग्वै रस उदुम्बर ऊर्जैवैनमेतद्रसेन समर्धयति मौञ्जं परिसीर्यं त्रिवृत्तस्योक्तो बन्धुः ॥ ३॥ सोऽग्रेर्दक्षिणाꣳ श्रोणिम् । जघनेन तिष्ठन्नुत्तरस्याꣳसस्य पुरस्ताद्युज्यमाननभिमन्त्रयते सीरा युञ्जन्ति कवयो युगा वितन्वते पृथगिति ये विद्वाꣳसस्ते कवयस्ते सीरं च युञ्जन्ति युगानि च

वितन्वते पृथग्धीरा देवेषु सुम्नयेति यज्ञो वै सुम्नं धीरा देवेषु यज्ञं तन्वाना इत्येतत् ॥४॥ युनक्त सीरा वि युगा तनुध्वमिति । युञ्जन्ति हि सीरं वि युगानि तन्वन्ति कृते योनौ वपतेह वीजमिति वीजाय वाऽएषा योनिष्क्रियते यत्सीता यथा ह वाऽअयोनौ रेतः सिञ्चेदेवं तद्यद्कृष्टे वपति गिरा च श्रुष्टिः सभरा असन्न इति वाग्वै गीरन्नꣳ श्रुष्टिर्नेदीय इत्सृण्यः पक्वमेयादिति यदा वाऽअन्नं पच्यतेऽथ तत्सृण्योपचरन्ति द्वाभ्यां युनक्ति गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ॥५॥ स दक्षिणमेवाग्रे युनक्ति । अथ सव्यमेवं देवत्रेतरथा मानुषं षड्वं भवति द्वादशगवं वा चतुर्विꣳशतिगवं वा संवत्सरमेवाभिसम्पद्म् ॥६॥ अथैनं विकृषति । अन्नं वै कृषिरेतद्वाऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तादन्नमदधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तादन्नं दधाति ॥७॥ स वाऽआत्मानमेव विकृषति । न पक्षपुच्छान्यात्मंस्तदन्नं दधाति यदु वाऽआत्मन्नन्नं धीयते तदात्मानमवति तत्पक्षपुच्छान्यथ यत्पक्षपुच्छेषु नैव तदात्मानमवति न पक्षपुच्छानि ॥८॥ स दक्षिणार्धेनाग्नेः । अन्तरेण परिश्रितः प्राचीं प्रथमाꣳ सीतां कृषति शुनꣳ सु फाला विकृषन्तु भूमिꣳ शुनं कीनाशा अभियन्तु वाहैरिति शुनꣳ शुनमिति यद्वै समृद्धं तत्कुनꣳ समर्धयत्येवैनामेतत् ॥९॥ अथ जघनार्धेनोदीचीम् । घृतेन सीता मधुना समज्यतामिति यथैव यज्ञस्तथा बन्धुर्विश्वैर्देवैरनुमता मरुद्भिरिति विश्वे च वै देवा मरुतश्च वर्षस्येशतऽऊर्जस्वती पयसा पिन्वमानेति रसो वै पय ऊर्जस्वती रसेनान्नेन पिन्वमानेत्येतदस्मात्सीते पयसाभ्याववृत्स्वेत्यस्मात्सीते रसेनाभ्याववृत्स्वेत्येतत् ॥१०॥ अथोत्तरार्धेन प्राचीम् । लाङ्गलं पवीरवदिति लाङ्गलꣳ रयिमदित्येतत्सुशेवꣳ सोमपित्सर्वित्यन्नं वै सोमस्तदुद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहनमित्येतद्धि सर्वꣳ सीतोद्वपति ॥११॥ अथ पूर्वार्धेन दक्षिणाम् । कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाश्विभ्यां पूष्ण्ये प्रजाभ्य ओषधी-

भ्य इति सर्वदेवत्या वै कृषिरेताभ्यो देवताभ्यः सर्वान्कामान्युङ्क्त्वेत्येतदित्यग्रे कृषत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥ १२ ॥ चतस्रः सीता यजुषा कृषति । तद्यच्चतसृषु दिक्ष्वन्नं तदस्मिन्नेतद्दधाति तद्वै यजुषाङ्गा वै तद्यद्यजुरङ्गो तद्यदिमा दिशः ॥ १३ ॥ अथात्मानं विकृषति । तद्यदेव संवत्सरेऽन्नं तदस्मिन्नेतद्दधाति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वाऽनिरुक्तꣳ सर्वेणैवास्मिन्नेतदन्नं दधातीत्यग्रे कृषत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥ १४ ॥ तिस्रस्तिस्रः सीताः कृषति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥ १५ ॥ द्वादश सीतास्तूष्णीं कृषति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥ १६ ॥ ता उभयतः षोडश सम्पद्यन्ते । षोडशकलः प्रजापतिः प्रजापतिरग्निरात्मसंमितमेवास्मिन्नेतदन्नं दधाति यदु वाऽआत्मसंमितमन्नं तदवति तन्न क्षिनस्ति यद्बह्वो क्षिनस्ति तद्यत्कनीयो न तदवति ॥ १७ ॥ यद्वैवैनं विकृषति । एतद्वाऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तात्प्राणानदधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तात्प्राणान्दधाति लेखा भवन्ति लेखासु क्षीमे प्राणाः ॥ १८ ॥ ॥ शतम् ४००० ॥ ॥ चतस्रः सीता यजुषा कृषति । तद्यऽइमे शीर्षञ्चत्वारो निरुक्ताः प्राणास्तानस्मिन्नेतद्दधाति तद्वै यजुषाङ्गा वै तद्यद्यजुरङ्गो तद्यदिमे शीर्षन्प्राणाः ॥ १९ ॥ यद्वैवात्मानं विकृषति । यऽएवेमेऽन्तरात्मन्प्राणास्तानस्मिन्नेतद्दधाति तूष्णीं को हि तद्वेद यावन्त इमेऽन्तरात्मन्प्राणाः ॥ २० ॥ अथैनान्विमुञ्चति । आत्वा तं कामं यस्मै कामायैनान्युङ्क्ते विमुच्यध्वमग्या इत्यग्या ह्येते देवत्रा देवयाना इति दैवꣳ क्षेमैः कर्म करोत्यगन्म तमसस्पारमस्येत्यशनाया वै तमोऽगन्मास्याऽअशनायायै पारमित्येतज्ज्योतिरापामेति ज्योतिर्ह्याप्नोति यो देवान्यो यज्ञमथैनानुदीचः प्राचः प्रसृजति तस्योक्तो बन्धुस्तानधर्यवे ददाति स हि तैः करोति तांस्तु दक्षिणानां काले ऽनुदिशेत्

॥ २१ ॥ ब्राह्मणम् ॥ ४ [२. २] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १०८ ॥ ॥

अथ दर्भस्तम्बमुपदधाति । एतद्वै देवा ओषधीरुपादधत तथैवैतद्यजमान ओषधीरुपधत्ते ॥ १ ॥ यद्वेव दर्भस्तम्बमुपदधाति । ज्ञायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय ज्ञायतऽउभयम्वेतदन्नं यद्दर्भा आपश्च क्षेता ओषधयश्च या वै वृत्राद्बीभत्समाना आपो धन्व दभत्य उदायंस्ते दर्भा अभवन्यद्बभत्य उदायंस्तस्माद्दर्भास्ता क्षेताः शुद्धा मेध्या आपो वृत्राभिप्रक्षरिता यद्दर्भा यद्वु दर्भास्तेनौषधय उभयेनैवैनमेतदन्नेन प्रीणाति ॥ २ ॥ सीतासमरे । वाग्वै सीतासमरः प्राणा वै सीतास्तासामयꣳ समयो वाचि वै प्राणेभ्योऽन्नं धीयते मध्यतो मध्यत एवास्मिन्नेतदन्नं दधाति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वाऽअनिरुक्तꣳ सर्वेणैवास्मिन्नेतदन्नं दधाति ॥ ३ ॥ अथैनमभिजुहोति । ज्ञायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय ज्ञायते सर्वस्योऽअस्यैष रसो यदाज्यमपां च क्षेष ओषधीनां च रसोऽस्यैवैनमेतत्सर्वस्य रसेन प्रीणाति यावानु वै रसस्तावानात्मानेनैवैनमेतत्सर्वेण प्रीणाति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ ४ ॥ यद्वैवैनमभिजुहोति । एतद्वै यत्रैतं प्राणा ऋषयोऽग्रेऽग्निꣳ समस्कुर्वंस्तदस्मिन्नेतं पुरस्ताद्भागमकुर्वत तस्मात्पुरस्ताद्भागास्तद्यदभिजुहोति यऽएवास्मिंस्ते प्राणा ऋषयः पुरस्ताद्भागमकुर्वत तानेवैतत्प्रीणात्याज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ५ ॥ यद्वैवैनमभिजुहोति । एतद्वै यान्येतस्मिन्नग्नौ रूपाण्युपधास्यन्भवति यास्तोमान्यानि पृष्ठानि यानि छन्दाꣳसि तेभ्य एतं पुरस्ताद्भागं करोति तान्येवैतत्प्रीणात्याज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ६ ॥ यद्वैवैनमभिजुहोति । एतद्वै देवा अबिभयुर्दीर्घं वाऽइदं कर्म यद्वै न इमामिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतामेतस्य कर्मणः पुरस्तात्सꣳस्थामपश्यंस्तमत्रैव सर्वꣳ समस्थापयन्नत्राचिन्वंस्तथैवैनमयमेतदत्रैव सर्वꣳ

सꣳस्थापयत्यत्र चिनोति ॥७॥ सन्नूरुब्द इति चितिः । अयवोभिरिति पुरीषꣳ सन्नूरुषा इति चितिरुरुणीभिरिति पुरीषꣳ सन्नोषसावश्विनेति चितिर्दꣳसोभिरिति पुरीषꣳ सन्नूः सूर इति चितिरेतशेनेति पुरीषꣳ सन्नूर्वैश्वानर इति चितिरिडयेति पुरीषं घृतिनेति चितिः स्वेति पुरीषꣳ स्केति चितिः ॥८॥ त्रयोदशैता व्याकृतयो भवन्ति । त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावत्तमेवैनमेतच्चिनोत्याज्येन जुहोत्यग्नेरेष यदाज्यमग्निमेवैतच्चिनोति पञ्चगृहीतिन पञ्चचिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तमेवैनमेतच्चिनोत्यूर्ध्वामुदूहन्जुहोत्यूर्ध्व तदग्निं चितिभिश्चिनोति ॥९॥ ब्राह्मणम् ॥ १ [२. ३.] ॥

अथोदचमसान्निनयति । एतद्वै देवा अब्रुवंश्चेतयधमिति चितिमिङ्केतेति वाव तदब्रुवंस्ते चेतयमाना वृष्टिमिव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१॥ उदचमसा भवन्ति । आपो वै वृष्टिर्वृष्टिमेवास्मिन्नेतद्दधात्यौडुम्बरेण चमसेन तस्योक्तो बन्धुश्चतुःस्रक्तिना चतस्रो वै दिशः सर्वाभ्य एवास्मिन्नेतद्दिग्भ्यो वृष्टिं दधाति ॥२॥ त्रींस्त्रीनुदचमसान्निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥३॥ द्वादशोदचमसान्कृष्टे निनयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥४॥ स वै कृष्टे निनयति । तस्मात्कृष्टाय वर्षति स यत्कृष्टऽएव निनयेन्नाकृष्टे कृष्टायैव वर्षेन्नाकृष्टायाथ यदकृष्टऽएव निनयेन्न कृष्टेऽकृष्टायैव वर्षेन्न कृष्टाय कृष्टे चाकृष्टे च निनयति तस्मात्कृष्टाय चाकृष्टाय च वर्षति ॥५॥ त्रीन्कृष्टे चाकृष्टे च निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥६॥ यद्वेवोदचमसान्निनयति । एतद्वाऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तादपो दधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तादपो दधाति ॥७॥ त्रींस्त्रीनुद-

चमसान्निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥८॥ द्वादशोदचमसान्कृष्टे निनयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥९॥ स वै कृष्टे निनयति । प्राणेषु तदपो दधाति स यत्कृष्टऽएव निनयेन्नाकृष्टे प्राणेष्वापः स्युर्नेतरस्मिन्नात्मन्नथ यदकृष्टऽएव निनयेन्न कृष्टऽआत्मन्नेवापः स्युर्न प्राणेषु कृष्टे चाकृष्टे च निनयति तस्मादिमा उभयत्रापः प्राणेषु चात्मंश्च ॥१०॥ त्रीन्कृष्टे चाकृष्टे च निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥११॥ पञ्चदशोदचमसान्निनयति । पञ्चदशो वै वज्र एतेनैवास्यैतत्पञ्चदशेन वज्रेण सर्वं पाप्मानमपहन्ति ॥१२॥ अथ सर्वौषधं वपति । एतद्वै देवा अब्रुवंश्चेतयध्वमिति चितिमिरुतेति वाव तदब्रुवंस्ते चेतयमाना अन्नमेव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतदधाति ॥१३॥ सर्वौषधं भवति । सर्वमेव तदन्नं यत्सर्वौषधꣳ सर्वमेवास्मिन्नेतदन्नं दधाति तेषामेकमन्नमुद्धरेत्तस्य नाश्नीयाद्यावज्जीवमौदुम्बरेण चमसेन तस्योक्तो बन्धुश्चतुःस्रक्तिना चतस्रो वै दिशः सर्वाभ्य एवास्मिन्नेतद्दिग्भ्योऽन्नं दधात्यनुष्टुब्भिर्वपति वाग्वाऽअनुष्टुब्वाचो वाऽअन्नमद्यते ॥१४॥ तिसृभिस्तिसृभिर्ऋग्भिर्वपति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥१५॥ द्वादशभिर्ऋग्भिः कृष्टे वपति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥१६॥ स वै कृष्टे वपति । तस्मात्कृष्टेऽन्नं पच्यते यत्कृष्टऽएव वपेन्नाकृष्टे कृष्टऽएवान्नं पच्येत नाकृष्टेऽथ यदकृष्टऽएव वपेन्न कृष्टेऽकृष्टऽएवान्नं पच्येत न कृष्टे कृष्टे चाकृष्टे च वपति तस्मात्कृष्टे चाकृष्टे चान्नं पच्यते ॥१७॥ तिसृभिः कृष्टे चाकृष्टे च वपति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥१८॥ यद्वै सर्वौषधं वपति । एतद्वाऽएन देवाः संस्करिष्यन्तः पुरस्तात्सर्वेण भेषजेनाभिषज्यं-

स्तथैवैनमयमेतत्संस्करिष्यन्पुरस्तात्सर्वेण भेषजेन भिषज्यति ॥ ११ ॥ सर्वौषधं भवति । सर्वमेतद्भेषजं यत्सर्वौषधꣳ सर्वेणैवैनमेतद्भेषजेन भिषज्यति ॥ २० ॥ तिसृभिस्तिसृभिर्ऋग्भिर्वपति । त्रिवृद्ग्नेर्यावानग्नेर्यावत्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ १२ ॥ द्वादशभिर्ऋग्भिः कृष्टे वपति । द्वादश मासाः संवत्सरः संवत्सरोऽग्नेर्यावानग्नेर्यावत्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ २२ ॥ स वै कृष्टे वपति । प्राणांस्तद्भिषज्यति स यत्कृष्टऽएव वपेन्नाकृष्टे प्राणानेव भिषज्येन्नेतरमात्मानमथ यदकृष्टऽएव वपेन्न कृष्टऽआत्मानमेव भिषज्येन्न प्राणान्कृष्टे चाकृष्टे च वपति प्राणांश्च तदात्मानं च भिषज्यति ॥ २३ ॥ तिसृभिः कृष्टे चाकृष्टे च वपति । त्रिवृद्ग्नेर्यावानग्नेर्यावत्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ २४ ॥ पञ्चदशोदचमसान्निनयति । पञ्चदशभिर्ऋग्भिर्वपति तत्त्रिꣳशत्त्रिꣳशदक्षरा विराड्विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति ॥ २५ ॥ या ओषधीः पूर्वा जाताः । देवेभ्यस्त्रियुगं पुरेत्यृतवो वै देवास्तेभ्य एतास्त्रिः पुरा जायन्ते वसन्ता प्रावृषि शरदि मनै नु बभ्रूणामहमिति सोमो वै बभ्रुः सौम्या ओषधय ओषधीः पुरुषः शतं धामानीति यदिदꣳ शतायुः शतार्घः शतवीर्य एतानि ह्यस्य तानि शतं धामानि सप्त चेति यऽएवमे सप्त शीर्षन्प्राणास्तानेतदाह ॥ २६ ॥ शतं वोऽम्ब धामानि । सहस्रमुत वो रुह इति यदिदꣳ शतधा च सहस्रधा च विरूढा अधा शतक्रत्वो यूयमिमं मेऽअगदं कृतेति यमिमं भिषज्यामीत्येतत् ॥ २७ ॥ ता एता एकव्याख्यानाः । एतमेवाभि यद्यैतमेव भिषज्येदेतं पारयेत्ता अनुष्टुभो भवन्ति वाग्वाऽअनुष्टुब्वागु सर्वं भेषजꣳ सर्वेणैवैनमेतद्भेषजेन भिषज्यति ॥ २८ ॥ अथातो निरुक्तानिरुक्तानामेव । यजुषा द्वावनड्वाहौ युनक्ति तूष्णीमितरान्यजुषा चतस्रः सीताः कृषति तूष्णीमितरास्तूष्णीं दर्भस्तम्बमुपदधाति यजुषाभिजुहोति तूष्णीमुदचमसान्निनयति यजुषा वपति ॥ २९ ॥ प्रजापतिरेषोऽग्निः । उभयम्वेतत्प्रजापतिर्निरुक्तान्यानिरुक्तान्य

परिमितश्चापरिमितश्च तस्मात्पशुषा करोति यद्वास्य निरुक्तं परिमितꣳ रूपं तदस्य तेन संस्करोत्यथ यत्तूष्णीं यद्वास्यानिरुक्तमपरिमितꣳ रूपं तदस्य तेन संस्करोति स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिं संस्करोति य एवं विद्वानेतदेवं करोति बाह्यानि रूपाणि निरुक्तानि भवन्त्यन्तराण्यनिरुक्तानि पशुरेष यदग्निस्तस्मात्पशोर्बाह्यानि रूपाणि निरुक्तानि भवन्त्यन्तराण्यनिरुक्तानि ॥३०॥ ब्राह्मणम् ॥२ [२. ४.] ॥ द्वितीयोऽध्यायः [४५.] ॥ ॥

चितो गार्हपत्यो भवति । अचित आहवनीयोऽथ राज्ञानं क्रीणात्ययं वै लोको गार्हपत्यो द्यौराहवनीयोऽथ योऽयं वायुः पवतऽएष सोम एतं तदिमौ लोकावन्तरेण दधाति तस्मादेष इमौ लोकावन्तरेण पवते ॥१॥ यद्वेव चिते गार्हपत्ये । अचितऽआहवनीयेऽथ राज्ञानं क्रीणात्यात्मा वाऽअग्निः प्राणः सोम आत्मंस्तत्प्राणं मध्यतो दधाति तस्मादयमात्मन्प्राणो मध्यतः ॥२॥ यद्वेव चिते गार्हपत्ये । अचितऽआहवनीयेऽथ राज्ञानं क्रीणात्यात्मा वाऽअग्नी रसः सोम आत्मानं तद्रसेनानुषजति तस्मादयमात्मैवात्मा रसेनानुषक्तः ॥३॥ राज्ञानं क्रीत्वा पर्युक्ष्य । अथास्माऽआतिथ्यꣳ हविर्निर्वपति तस्य हविष्कृता वाचं विसृजतेऽथ वाऽएतद्व्यतिषजत्यधरकर्म चाग्निकर्म च कर्मणः समानतायै समानमिदं कर्मासदिति ॥४॥ यद्वेव व्यतिषजति । आत्मा वाऽअग्निः प्राणोऽधर आत्मंस्तत्प्राणं मध्यतो दधाति तस्मादयमात्मन्प्राणो मध्यतः ॥५॥ यद्वेव व्यतिषजति । आत्मा वाऽअग्नी रसोऽधर आत्मानं तद्रसेनानुषजति तस्मादयमात्मैवात्मा रसेनानुषक्तोऽथाहवनीयस्यार्धमेति ॥६॥ तद्वैके । उभयत्रैव पलाशशाखया व्युद्वृह्त्युभयत्र वै चिनोतीति न तथा कुर्यादवस्यति वाव गार्हपत्येनोर्ध एवाहवनीयेन रोहति तस्मात्तथा न कुर्यात् ॥७॥ अथ गार्हपत्यऽएवोषान्निवपति । नाहवनीयेऽयं वै लोको गार्हपत्यः पशव ऊषा अस्मिंस्तल्लोके पशून्दधाति तस्माद्-

मेऽस्मिंल्लोके पशवः ॥८॥ अथाहवनीयऽएव पुष्करपर्णमुपदधाति । न गार्हपत्यऽआपो वै पुष्करपर्णं द्यौराहवनीयो दिवि तदपो दधात्युभयत्र सिकता निवपति रेतो वै सिकता उभयत्र वै विक्रियते तस्माद्रेतसोऽधि विक्रियाताऽइति ॥९॥ ता नाना मन्त्राभ्यां निवपति । मनुष्यलोको वै गार्हपत्यो देवलोक आहवनीयो नानो वाऽएतयद्दैवं च मानुषं च द्राघीयसा मन्त्रेणाहवनीये निवपति क्रसीयसा गार्हपत्ये द्राघीयो हि देवायुषꣳ क्रसीयो मनुष्यायुषꣳ स पूर्वाः परिश्रिञ्चो गार्हपत्ये सिकता निवपति रेतो वै सिकता अस्माद्रेतसोऽधीमा विक्रियान्ताऽइति ॥१०॥ तदाहुः । यद्योनिः परिश्रितो रेतः सिकता अथ पूर्वाः परिश्रिञ्चो गार्हपत्ये सिकता निवपति कथमस्यैतद्रेतोऽपरासिक्तं परिगृहीतं भवतीत्युल्बं वाऽऊषास्तद्यदूषान्पूर्वान्निवपत्येतेनो हास्यैतदुल्बेन रेतोऽपरासिक्तं परिगृहीतं भवत्यथाहवनीये परिश्रितोऽभिमन्त्रयते तस्योक्तो बन्धुरथ सिकता निवपति रेतो वै सिकता एतयोऽस्यैतद्योन्या रेतोऽपरासिक्तं परिगृहीतं भवति ॥११॥ अथाहवनीयऽएवाप्यानवतीभ्यामभिमृशति । न गार्हपत्येऽयं वै लोको गार्हपत्यः स्वर्गो लोक आहवनीयोऽङ्गो वाऽअयमस्मिंल्लोके ज्ञातो यज्ञमानः स्वर्गऽएव लोके प्रज्ञिज्ञनयिषितव्यस्तद्यदाहवनीयऽएवाप्यानवतीभ्यामभिमृशति न गार्हपत्ये स्वर्गऽएवैनं तल्लोके प्रज्ञनयति ॥१२॥ अथ लोगेष्टका उपदधाति । इमे वै लोका एषोऽग्निर्दिशो लोगेष्टका एषु तल्लोकेषु दिशो दधाति तस्मादिमा एषु लोकेषु दिशः ॥१३॥ बाह्येनाग्निमाहरति । आत्मा वाऽअस्य ता दिशो या एषु लोकेषथ या इमांल्लोकान्परेण दिशस्ता अस्मिन्नेतद्दधाति ॥१४॥ बर्हिर्वेदेरियं वै वेदिः । आत्मा वाऽअस्य ता दिशो या अस्यामथ या इमां परेण दिशस्ता अस्मिन्नेतद्दधाति ॥१५॥ यद्वै लोगेष्टका उपदधाति । प्रजापतेर्विस्रस्तस्य सर्वा दिशो रसोऽनु व्यद्रवत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेता-

भिर्लोगेष्टकाभिस्तꣳ रसमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ १६ ॥ बाह्येनाग्निमाकरति । आप्तो वाऽअस्य स रसो य एषु लोकेषथ य इमांल्लोकान्पराङ्सोऽत्यक्षरत्तमस्मिन्नेतद्दधाति ॥ १७ ॥ बर्हिर्वै देरियं वै वेदिः । आप्तो वाऽअस्य स रसो यो ऽस्यामथ य इमां पराङ्सोऽत्यक्षरत्तमस्मिन्नेतद्दधाति ॥ १८ ॥ स्फ्येनाकरति । वज्रो वै स्फ्यो वीर्यं वै वज्रो वित्तिरियं वीर्येण वै वित्तिं विन्दते ॥ १९ ॥ स पुरस्तादाकरति । मा मा क्हिꣳसीज्जनिता यः पृथिव्या इति प्रजापतिर्वै पृथिव्यै जनिता मा मा क्हिꣳसीत्प्रजापतिरित्येतद्यो वा दिवꣳ सत्यधर्मा व्यानडिति यो वा दिवꣳ सत्यधर्मासृजतेत्येतद्यश्चापश्चन्द्राः प्रथमो जज्ञानेति मनुष्या वाऽआपश्चन्द्रा यो मनुष्यान्प्रथमोऽसृजतेत्येतत्कस्मै देवाय क्हविषा विधेमेति प्रजापतिर्वै कस्तस्मै क्हविषा विधेमेत्येतत्तामाकृत्यान्तरेण परिश्रित आत्मन्नुपदधाति स यः प्राच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो प्राचीमेवास्मिन्नेतद्दिशं दधाति ॥ २० ॥ अथ दक्षिणतः । अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सहेति यथैव यजुस्तथा बन्धुर्वपां तेऽग्निरिषितोऽरोक्हदिति यद्वै किं चास्याꣳ सास्यै वपा तामग्निरिषित उपादीप्तो रोक्हति तामाकृत्यान्तरेण पक्षसंधिमात्मन्नुपदधाति स यो दक्षिणायां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो दक्षिणामेवास्मिन्नेतद्दिशं दधाति ॥ २१ ॥ अथ पश्चात् । अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियमितीयं वाऽअग्निरस्यै तदाक्हतद्देवेभ्यो भरामसीति तदस्मै दैवाय कर्मणे क्हराम इत्येतत्तामाकृत्यान्तरेण पुच्छसंधिमात्मन्नुपदधाति स यः प्रतीच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो प्रतीचीमेवास्मिन्नेतद्दिशं दधाति स न सम्प्रति पश्चादाक्हरेन्नेत्यज्ञपथाद्वसमाक्हराणीतीत्येवाकरति ॥ २२ ॥ अथोत्तरतः । इषमूर्जमक्हमित आदमितीषमूर्जमक्हमित आदद ऽइत्येतदृतस्य योनिमिति सत्यं वाऽऋतꣳ सत्यस्य योनिमित्येतन्महिषस्य धारामित्यग्निर्वै महिषः स क्हीदं ज्ञातो महात्सर्वमेष्यादा मा गोषु विशत्वा तनूषि-

त्यात्मा वै तनूरा मा गोषु चात्मनि च विशत्वित्येतज्जुहोमि सेदिमनिराममीवा-
मिति सिकताः प्रधꣳसयति तꣳयेव सेदिर्यानिरा यामीवा तामेतस्यां दिशि दधाति
तस्मादेतस्यां दिशि प्रजा अशनायुकास्तामाहृत्यान्तरेण पक्षसंधिमात्मन्नुपदधाति
स य उदीच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथोऽ उदीचीमेवास्मिन्नेतद्दिश
दधाति ॥२३॥ ता एता दिशः । ताः सर्वत उपदधाति सर्वतस्तद्दिशो दधाति त-
स्मात्सर्वतो दिशः सर्वतः समीचीः सर्वतस्तत्समीचीर्दिशो दधाति तस्मात्सर्वतः
समीच्यो दिशस्ता नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति ना-
ना हि दिशस्तिष्ठन्नुपदधाति तिष्ठतीव हि दिशोऽथो तिष्ठन्वै वीर्यवत्तरः ॥२४॥
ता एता यजुष्मत्य इष्टकाः । ता आत्मन्नेवोपदधाति न पक्षपुच्छेष्वात्मन्येव यजु-
ष्मत्य इष्टका उपधीयन्ते न पक्षपुच्छेषु ॥२५॥ तदाहुः । कथमस्यैताः पक्षाः शृता
उपरिता भवन्तीति रसो वाऽएताः स्वयꣳशृत उ वै रसोऽथो यद्वै किं चैतमग्निं
वैश्वानरमुपनिगच्छति तत एव तत्पक्षꣳ शृतमुपरितं भवति ॥२६॥ अथोत्तरवे-
दिं निवपति । इयं वै वेदिर्योत्तरवेदिर्दिशो लोगेष्टकास्तद्यदन्तरेण वेदिं चोत्त-
रवेदिं च लोगेष्टका उपदधातीमौ तल्लोकावन्तरेण दिशो दधाति तस्मादिमौ
लोकावन्तरेण दिशस्तां युगमात्रीं वा सर्वतः करोति चतुश्चत्वारिꣳशत्पदां वा यतर-
था कामयेताथ सिकता निवपति तस्योक्तो बन्धुः ॥२७॥ ता उत्तरवेदौ निवप-
ति । योनिर्वाऽउत्तरवेदिर्योनौ तद्रेतः सिञ्चति यद्वै योनौ रेतः सिच्यते तत्प्रज-
निष्णु भवति ताभिः सर्वमात्मानं प्रह्लादयति सर्वस्मिंस्तदात्मन्रेतो दधाति तस्मा-
त्सर्वस्मादेवात्मनो रेतः सम्भवति ॥२८॥ अग्ने तव श्रवो वय इति । धूमो वा
ऽअस्य श्रवो वयः स क्वेनममुष्मिंल्लोके श्रावयति महि श्रान्ते अर्चयो विभाव-
सविति महतो श्रान्तेऽर्चयः प्रभूवसवित्येतद्बृहद्भानो शवसा वाजमुक्थ्यमिति
बल वै शवो बृहद्भानो बलेनान्नमुक्थ्यमित्येतद्दधासि दाशुषे कवऽइति यजमानो

वै दाश्वान्दधासि यज्ञमानाय कवꣳइत्येतत् ॥२१॥ पावकवर्चाः शुक्रवर्चा इति । पावकवर्चा ह्येष शुक्रवर्चा अनूनवर्चा उदियर्षि भानुनेत्यनूनवर्चा उद्दीप्यसे भानुनेत्येतत्पुत्रो मातरा विचरन्नुपावसीति पुत्रो ह्येष मातरा विचरन्नुपावति पृणाञ्चि रोदसीꣳउभेꣳइतीमे वै द्यावापृथिवी रोदसी तेꣳएष उभे पृणक्ति धूमेनामूं वृष्येमाम् ॥३०॥ ऊर्जो नपाज्जातवेदः सुशस्तिभिरिति । ऊर्जो नपाज्जातवेदः सुष्टुतिभिरित्येतन्मन्द्रस्व धीतिभिर्हित इति दीप्यस्व धीतिभिर्हित इत्येतद्वेꣳइषः संदधुर्भूरिवर्पस इति वेꣳइषः संदधुर्बभ्रुवर्पस इत्येतच्चित्रोतयो वामजाता इति यथैव यजुस्तथा बन्धुः ॥३१॥ इरज्यन्नग्ने प्रथयस्व जन्तुभिरिति । मनुष्या वै जन्तवो दीप्यमानोऽग्ने प्रथस्व मनुष्यैरित्येतदस्मे रायोऽमर्त्येत्यस्मे रयिं दधदमर्त्येत्येतत्स दर्शतस्य वपुषो विराजसीति दर्शतस्य ह्येष वपुषो विराजति पृणाञ्चि सानसिं क्रतुमिति पृणाञ्चि सनातनं क्रतुमित्येतत् ॥३२॥ इष्कर्तारमधरस्य प्रचेतसमिति । अधरो वै यज्ञः प्रकल्पयितारं यज्ञस्य प्रचेतसमित्येतत्क्षयन्तꣳ राधसो महꣳ इति क्षयन्तꣳ राधसि महतीत्येतद्रातिं वामस्य सुभगां महीमिषमिति रातिं वामस्य सुभगां महतीमिषमित्येतद्दधासि सानसिꣳ रयिमिति दधासि सनातनꣳ रयिमित्येतत् ॥३३॥ ऋतावानमिति । सत्यावानमित्येतन्महिषमित्यग्निर्वै महिषो विश्वदर्शतमिति विश्वदर्शतो ह्येषोऽग्निꣳ सुम्नाय दधिरे पुरो जना इति यज्ञो वै सुम्नं यज्ञाय वाꣳएतं पुरो दधते श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगेत्याशृण्वन्तꣳ सप्रथस्तमं त्वा गिरा देवं मनुष्या ऋवामहꣳइत्येतत् ॥३४॥ स एषोऽग्निरेव वैश्वानरः । एतत्षड्चमारम्भायैवेमाः सिकता न्युप्यन्तेऽग्निमेवास्मिन्नेतद्वैश्वानरꣳ रेतो भूतꣳ सिञ्चति षड्चेन षड्ऋतवः संवत्सरः संवत्सरो वैश्वानरः ॥३५॥ तदाहुः । यद्रेतः सिकता उच्यन्ते किमासाꣳ रेतो रूपमिति शुक्ला इति ब्रूयाच्छुक्लꣳ हि रेतोऽथो पृश्नय इति पृश्नीव हि रेतः ॥३६॥ तदाहुः । यदार्द्रꣳ

रेतः शुष्काः सिकता निवपति कथमस्यैता आर्द्रा रेतोरूपं भवन्तीति रसो वै कृन्दाꣳस्यार्द्रꣳ ह वै रसस्तद्यदेनाश्छन्दोभिर्निवपत्येवमु ह्यास्यैता आर्द्रा रेतोरूपं भवन्ति ॥३७॥ तदाहुः । कथमस्यैता अहोरात्राभ्यामुपहिता भवन्तीति । द्वे वा ऽअहोरात्रे शुक्लं च कृष्णं च द्वे सिकते शुक्ला च कृष्णा चैवमु ह्यास्यैता अहोरात्राभ्यामुपहिता भवन्ति ॥३८॥ तदाहुः । कथमस्यैता अहोरात्रैः सम्पन्ना अन्यूना अनतिरिक्ता उपहिता भवन्तीत्यनन्तानि वाऽअहोरात्राण्यनन्ताः सिकता एवमु ह्यास्यैता अहोरात्रैः सम्पन्ना अन्यूना अनतिरिक्ता उपहिता भवन्त्यथ कस्मात्समुद्रियं कृन्द इत्यनन्तो वै समुद्रोऽनन्ताः सिकतास्तत्समुद्रियं कृन्दः ॥३९॥ तदाहुः । कथमस्यैताः पृथङ्नाना यजुर्भिरुपहिता भवन्तीति मनो वै यजुस्तदिदं मनो यजुः सर्वाः सिकता अनुविभवत्येवमु ह्यास्यैताः पृथङ्नाना यजुर्भिरुपहिता भवन्ति ॥४०॥ तदाहुः । कथमस्यैताः सर्वैश्छन्दोभिरुपहिता भवन्तीति यद्वैना एतेन षड्चेन निवपन्ति यावन्ति हि सप्तानां छन्दसामक्षराणि तावन्त्येतस्य षड्चस्याक्षराण्येवमु ह्यास्यैताः सर्वैश्छन्दोभिरुपहिता भवन्ति ॥४१॥ यद्वेव सिकता निवपति । प्रजापतिरेषोऽग्निः सर्वमु ब्रह्म प्रजापतिस्तद्वैतद्ब्रह्मण उत्सन्ने यत्सिकता अथ यदनुत्सन्नमिदं तद्योऽयमग्निश्चीयते तद्यत्सिकता निवपति यद्वेव तद्ब्रह्मण उत्सन्नं तदस्मिन्नेतत्प्रतिदधाति ता असंख्याता अपरिमिता निवपति को हि तद्वेद यावत्तद्ब्रह्मण उत्सन्नꣳ स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति य एवं विद्वान्सिकता निवपति ॥४२॥ तदाहुः । कैतासामसंख्यातानाꣳ संख्येति द्वेऽइति ब्रूयाद्द्वे हि सिकते शुक्ला च कृष्णा चाथो सप्त विꣳशतिशतानीति ब्रूयादेतावन्ति हि संवत्सरस्याहोरात्राण्यथो द्वे द्वापञ्चाशे शतेऽइत्येतावन्ति ह्येतस्य षड्चस्याक्षराण्यथो पञ्चविꣳशतिरिति पञ्चविꣳशꣳ हि रेतः ॥४३॥ ता एता यजुष्मत्य इष्टकाः । ता आत्मन्नेवोपदधाति न पक्षपुच्छेषात्मन्ह्येव यजुष्मत्य इष्टका

उपधीयन्ते न पक्षपुच्छेषु न सादयति नेद्रेतः प्रजातिꣳ स्थापयानीति ॥४४॥ अथैना आप्यानवतीभ्यामभिमृशति । इदमेवैतद्रेतः सिक्तमाप्याययति तस्माच्छोनौ रेतः सिक्तमाप्यायते सौमीभ्यां प्राणो वै सोमः प्राणं तद्रेतसि दधाति तस्माद्रेतः सिक्तं प्राणमभिसम्भवति पूयेद्ध यदते प्राणात्सम्भवेद्दोषो ह्येवात्र सूद्दोह्याः प्राणो वै सोमः प्राणः सूद्दोह्याः ॥४५॥ आप्यायस्व समेतु ते । विश्वतः सोम वृष्ण्यमिति रेतो वै वृष्ण्यमाप्यायस्व समेतु ते सर्वतः सोम रेत इत्येतद्वा वाजस्य संगथऽइत्यन्ने वै वाजो भवान्नस्य संगथऽइत्येतत्सं ते पयाꣳसि समु यन्ति वाजा इति रसो वै पयोऽन्ने वाजाः सं ते रसाः समु यन्त्वन्नानीत्येतत्सं वृष्ण्यान्यभिमातिषाह इति सꣳ रेताꣳसि पाप्मसह इत्येतदाप्यायमानोऽअमृताय सोमेति प्रजात्यां तदमृतं दधाति तस्मात्प्रजातिरमृता दिवि श्रवाꣳस्युत्तमानि धिष्वेति चन्द्रमा वाऽअस्य दिवि श्रव उत्तमꣳ स ह्येनममुष्मिंल्लोके श्रावयति द्वाभ्यामाप्यायति गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ॥४६॥ अथातः सम्पदेव । चतस्रो लोगेष्टका उपदधाति षड्चेन निवपति द्वाभ्यामाप्यायति तद्द्वादश द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥४७॥ ब्राह्मणम् ॥ ३ [३. १.] ॥

आप्यानवतीभ्यामभिमृश्य । प्रत्येत्यातिथ्येन प्रचरत्यातिथ्येन प्रचर्य प्रवर्ग्योपसद्भ्यां प्रचरति प्रवर्ग्योपसद्भ्यां प्रचर्याथैतां चर्माणि चितिꣳ समवशमयन्ति तच्चर्मणि चर्म वै रूपꣳ रूपाणामुपाप्त्यै लोमतो लोम वै रूपꣳ रूपाणामुपाप्त्यै रोहिते रोहिते ह सर्वाणि रूपाणि सर्वेषाꣳ रूपाणामुपाप्त्याऽआनडुहेऽग्निरिष यदनड्वानग्निꣳरूपाणामुपाप्त्यै प्राचीनग्रीवे तद्धि देवत्रा ॥१॥ तदग्नेण गार्हपत्यम् । अन्तर्वेद्युत्तरलोम प्राचीनग्रीवमुपस्तृणाति तदेतां चितिꣳ समवशमयत्यथ प्रोक्षति तत्यत्प्रोक्षति शुद्धमेवैतन्मेध्यं करोत्याज्येन तद्धि शुद्धं मेध्यमथोऽअनभ्यारोहाय न

हि किं चनान्यद्धविराज्येन प्रोक्षन्ति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वाऽअनिरुक्तꣳ सर्वेणैवैतद्धुङ्क्ते मेध्यं करोत्यथोऽअनभ्यारोहाय न हि किं चनान्यद्धविस्तूष्णीं प्रोक्षन्ति ॥२॥ यद्धेव प्रोक्षति । हविर्वाऽएतत्तद्देतदभिघार्यति यद्धि हविरभ्यक्तं यदभिघारितं तज्जुष्टं तन्मेध्यमाज्येनाज्येन हि हविरभिघार्यन्ति तूष्णीं तूष्णीꣳ हि हविरभिघार्यन्ति दर्भैस्ते हि शुद्धा मेध्या अग्नेरग्नꣳ हि देवानाम् ॥३॥ तदाहुः । यत्प्रथमामेव चितिं प्रोक्षति कथमस्येष सर्वोऽग्निः प्रोक्षितो भवति कथं चर्मणि प्रणीतः कथमश्वप्रणीत इति यदेवात्र सर्वासां चितीनामिष्टकाः प्रोक्षत्येवमु हास्येष सर्वोऽग्निः प्रोक्षितो भवत्येवं चर्मणि प्रणीत एवमश्वप्रणीत इत्यब्रूयादित्येतां चितिम् ॥४॥ अथाहाग्निभ्यः प्रक्रियमाणेभ्योऽनुब्रूहीति । एतद्वै देवानुपप्रैषत एतं यज्ञं तꣳस्यमानान्रक्षाꣳसि नाष्ट्रा अन्निघाꣳसन्न यक्ष्यधे न यज्ञं तꣳस्यधऽइति तेभ्य एतानग्नीनेता इष्टका वज्रान्नुरुपवीन्कृत्वा प्राकिरंस्तैरेनानस्तृणवत तान् नृत्वाभयेऽनाष्ट्रऽएत यज्ञमतन्वत ॥५॥ तद्वाऽएतत्क्रियते । यद्देवा अकुर्वन्निदं नु तानि रक्षाꣳसि देवैरेवोपकृतानि यद्वेतत्करोति यद्देवा अकुर्वंस्तत्करवाणीत्यथो यदेव रक्षो यः पाप्मा तेभ्य एतानग्नीनेता इष्टका वज्रान्नुरुपवीन्कृत्वा प्रकिरति तैरेनात्स्तृणुते तात्स्तृत्वाभयेऽनाष्ट्रऽएतं यज्ञं तनुते ॥६॥ तद्यदग्निभ्य इति । बकुवो ह्येतेऽग्नयो यदेताश्चितयोऽथ यत्प्रक्रियमाणेभ्य इति प्र हि किरति ॥७॥ तद्वैकेऽन्वाहुः । पुरीष्यासोऽग्नयः प्रावणेभिः सजोषस इति प्रायणवृपं न तथा कुर्यादाग्नेयीरेव गायत्रीः कामवतीरनुब्रूयादा ते वत्सो मनो यमत्तुभ्यं ता अङ्गिरस्तमाग्निः प्रियेषु धामस्विति ॥८॥ आग्नेयीरन्वाह । अग्निवृपाणामुपाप्त्यै कामवतीः कामानामुपाप्त्यै गायत्रीर्गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति तिस्रस्त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति ताः सप्त सम्पद्यन्ते सप्त वै शिरसि प्राणाः शीर्षन्नेवैतत्प्राणेषु रेतो दधाति सप्तचितिकोऽग्निः

सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्वत्युपाꣳश्वन्वाह रेतो वाऽअत्र यज्ञ उपाꣳशु वै रेतः सिच्यते पश्चादनुब्रुवन्नन्वेति छन्दोभिरेवैतद्यज्ञं पश्चादभिरुद्यन्नेति ॥ ९ ॥ अथाश्वꣳ शुल्कं पुरस्तान्नयन्ति । एतद्वै देवा अबिभयुर्यद्वै न इदꣳ रक्षाꣳसि नाष्ट्रा न कृन्युरिति तऽएतं वज्रमपश्यन्नमुमेवादित्यमसौ वाऽआदित्य एषोऽश्वस्तऽएतेन वज्रेण पुरस्ताद्रक्षाꣳसि नाष्ट्रा अपकृत्याभयेऽनाष्ट्रे स्वस्ति समाश्नुवत तथैवैतद्यजमान एतेन वज्रेण पुरस्ताद्रक्षाꣳसि नाष्ट्रा अपकृत्याभयेऽनाष्ट्रे स्वस्ति समश्नुतऽआगकृत्यग्निं दक्षिणातः पुच्छस्य चितिमुपनिदधत्युत्तरतोऽश्वमाक्रमयन्ति ॥ १० ॥ तमुत्तरार्धेनाग्निः । अन्तरेण परिश्रितः प्राञ्चं नयन्ति तत्प्राच्यै दिशः पाप्मानमपकृन्ति तं दक्षिणा तद्दक्षिणायै दिशः पाप्मानमपकृन्ति तं प्रत्यञ्चं तत्प्रतीच्यै दिशः पाप्मानमपकृन्ति तमुदञ्चं तदुदीच्यै दिशः पाप्मानमपकृन्ति सर्वाभ्य एवैतद्दिग्भ्यो रक्षाꣳसि नाष्ट्रा अपकृत्यथैनमुदञ्चं प्राञ्चं प्रसृजन्ति तस्योक्तो बन्धुः ॥ ११ ॥ ॥ शतम् ४१०० ॥ ॥ तं प्रत्यञ्चं यन्तम् । एतां चितिमवघापयत्यसौ वाऽआदित्य एषोऽश्व इमा उ सर्वाः प्रजा या इमा इष्टकास्तद्यदवघापयत्यसावेव तदादित्य इमाः प्रजा अभिजिघ्रति तस्मादु हैतत्सर्वोऽस्मीति मन्यते प्रजापतेर्वीर्येण तद्यत्प्रत्यञ्चं यन्तमवघापयति प्रत्यङ् ह्येष यन्निमाः सर्वाः प्रजा अभिजिघ्रति ॥ १२ ॥ यद्वेवावघापयति । असौ वाऽआदित्य एषोऽश्व इमऽउ लोका एताः स्वयमातृण्णास्तद्यदवघापयत्यसावेव तदादित्य इमांल्लोकान्सूत्रे समावयते तद्यत्तत्सूत्रमुपरि तस्य बन्धुः ॥ १३ ॥ यद्वेवावघापयति । अग्निर्देवेभ्य उदक्रामत्सोऽपः प्राविशत्ते देवाः प्रजापतिमब्रुवंस्त्वमिममन्विह स तुभ्यꣳ स्वाय पित्रऽआविर्भविष्यतीति तमश्वः शुल्को भूत्वान्वैहत्तमद्य उपोदासृप्तं पुष्करपर्णे विवेद तमभ्यवेत्तां चक्रे स ह्येनमुदवोष तस्मादश्वः शुल्क उदुष्टमुख-इवाथो ह दुरद्नो भावुकस्तमु वाऽऋत्वेव हिꣳसित्वेव मेते तꣳ होवाच वरं ते ददामीति

॥ १४ ॥ स क्रोवाच । यस्त्वानेन रूपेणान्विच्छाद्विन्दादेव त्वा स इति स यो कैन-मेतेन रूपेणान्विच्छति विन्दति कैनं वित्वा कैवैनं चिनुते ॥ १५ ॥ स शुल्कः स्यात् । तद्धेतस्य रूपं य एष तपति यदि शुल्कं न विन्देदप्यशुल्कः स्यादश्वस्त्वेव स्या-द्यद्यश्वं न विन्देदप्यनड्वानेव स्यादाग्नेयो वाऽअनड्वानग्निरु सर्वेषां पाप्मनामप-कृत्ता ॥ १६ ॥ अथातोऽधिरोहणस्यैव । तꣳ कैके पुरस्तात्प्रत्यञ्चमधिरोक्ष्यन्ति प-श्चाद्वा प्राञ्चं न तथा कुर्यात्पशुरेष यदग्निर्यो वै पशुं पुरस्तात्प्रत्यञ्चमधिरोक्ष्यति विषाणाभ्यां तꣳ क्रुत्यथ यः पश्चात्प्राञ्चं पद्भ्यां तमात्मनैवैनमारोक्ष्यं वाऽआत्म-ना पशुमारोक्ष्यन्ति स पारयति स न क्रिनस्त्युत्तरतो यꣳ हि कं च पशुमारो-क्ष्युत्तरत एवैनमारोक्ष्यारुक्ष्याग्निमौत्तरवेदिकं कर्म कृत्वात्मन्नग्निं गृह्णीतऽआ-त्मन्नग्निं गृहीत्वा सत्यꣳ साम गायति पुष्करपर्णमुपदधाति तस्यातः ॥ १७ ॥ अथै-तꣳ साये भूतिऽश्वं परिणयन्ति । एतद्वै देवा अबिभयुर्यद्वै न इममिꣳ रक्षाꣳसि नाष्ट्रा न क्रन्युरिति तस्माऽएतं वज्रमभिगोप्तारमकुर्वन्नमुमेवादित्यमसौ वाऽआ-दित्य एषोऽश्वस्तथैवास्माऽअयमेतं वज्रमभिगोप्तारं करोति ॥ १८ ॥ तं वाऽउपा-स्तमयमादित्यस्य परिणयति । एष वाऽअस्य प्रत्यङ्ङं दिवा गोप्ता भवति रात्रि-साचयान्यु वै रक्षाꣳसि रात्र्या एवास्माऽएतं वज्रमभिगोप्तारं करोति सर्वतः परि-णयति सर्वत एवास्माऽएतं वज्रमभिगोप्तारं करोति त्रिष्कृत्वः परिणयति त्रिवृ-तमेवास्माऽएतं वज्रमभिगोप्तारं करोत्यथैनमुदञ्चं प्राञ्चं प्रसृजति तस्योक्तो बन्धु-रथ स पुनर्विपल्ययते तस्योपरि बन्धुः ॥ १९ ॥ ब्राह्मणम् ॥ ४ [३. २.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १०५ ॥ तृतीयोऽध्यायः [४६.] ॥ ॥

आत्मन्नग्निं गृह्णीते चेष्यन् । आत्मनो वाऽएतमधिजनयति यादृशाद्वै जायते तादृङ्वै भवति स यदात्मन्नगृहीत्वाग्निं चिनुयान्मनुष्यादेव मनुष्यं जनयेन्मर्त्या-न्मर्त्यमनपकृतपाप्मनोऽनपकृतपाप्मानमथ यदात्मन्नग्निं गृहीत्वा चिनोति तदग्ने-

रेवाध्यग्निं जनयत्यमृतादमृतमपकृतपाप्मनोऽपकृतपाप्मानम् ॥ १ ॥ स गृह्णाति । मयि गृह्णाम्यग्रेऽग्निमिति तदात्मन्नेवाग्रेऽग्निं गृह्णाति रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेति तदु सर्वा आशिष आत्मन्गृह्णीते मामु देवताः सचन्तामिति तदु सर्वान्देवानात्मन्गृह्णीते तद्यत्किं चात्मनोऽधि जनयिष्यन्भवति तत्सर्वमात्मन्गृह्णीते स वै तिष्ठन्नात्मन्नग्निं गृह्णीवानूपविश्य चिनोति पशुरेष यदग्निस्तस्मात्पशुस्तिष्ठन्गर्भं धिवानूपविश्य विजायते ॥ २ ॥ अथ सत्यꣳ साम गायति । एतद्वै देवा अब्रुवन्त्सत्यमस्य मुखं करवाम ते सत्यं भविष्यामः सत्यं नोऽनुवर्त्स्यति सत्यो नः स कामो भविष्यति यत्कामा एतत्करिष्यामहꣳ इति ॥ ३ ॥ तꣳ एतत्सत्यꣳ साम पुरस्तादगायन् । तदस्य सत्यं मुखमकुर्वंस्ते सत्यमभवन्त्सत्यमेनानन्ववर्तत सत्य एषां स कामोऽभवद्यत्कामा एतदकुर्वत ॥ ४ ॥ तथैवैतद्यजमानः । यत्सत्यꣳ साम पुरस्ताद्गायति तदस्य सत्यं मुखं करोति स सत्यं भवति सत्यमेनमनुवर्तते सत्यो ऽस्य स कामो भवति यत्काम एतत्कुरुते ॥ ५ ॥ तद्यत्तत्सत्यम् । आप एव तदापो हि वै सत्यं तस्माद्येनापो यन्ति तत्सत्यस्य रूपमित्याहुरप एव तस्य सर्वस्यायमकुर्वंस्तस्माद्यदैवापो यत्त्यथेदꣳ सर्वं जायते यदिदं किं च ॥ ६ ॥ अथ पुष्करपर्णमुपदधाति । योनिर्वै पुष्करपर्णं योनिमेवैतदुपदधाति ॥ ७ ॥ यद्वेव पुष्करपर्णमुपदधाति । आपो वै पुष्करं तासामियं पर्णं यथा ह वाऽइदं पुष्करपर्णमप्स्वध्याहितमेवमियमप्स्वध्याहिता सेयं योनिरग्नेरियꣳ ह्यग्निरस्यै हि सर्वोऽग्निश्चीयतऽइमामेवैतदुपदधाति तामनन्तर्हिताꣳ सत्यादुपदधातीमां तत्सत्ये प्रतिष्ठापयति तस्मादियꣳ सत्ये प्रतिष्ठिता तस्माद्वियमेव सत्यमियꣳ ह्येवैषां लोकानामद्धातमाम् ॥ ८ ॥ अपां पृष्ठमसि योनिरग्नेरिति । अपाꣳ ह्येयं पृष्ठं योनिर्ह्येयमग्नेः समुद्रमभितः पिन्वमानमिति समुद्रो ह्येमामभितः पिन्वते वर्धमानो महाँ२॥ऽआ च पुष्करऽइति वर्धमानो महीयस्व पुष्करऽइत्येतद्दिवो मात्रया वरिम्णा प्रथ-

स्वेत्यनुविमार्ष्यसौ वाऽआदित्य एषोऽग्निर्नो कैतमन्यो दिवो वरिमा यत्तुमर्हति द्यौर्भूत्वैनं यच्छेत्येवैतदाह स्वराज्ञोपदधाति स्वाराज्यꣳ ह्येषाꣳ सादयित्वा सूददोह-साधिवदति तस्योक्तो बन्धुः ॥ १ ॥ अथ रुक्ममुपदधाति । असौ वाऽआदित्य एष रुक्म एष ह्येमाः सुर्वाः प्रजा अतिरोचते रोचो ह वै तꣳ रुक्म इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अमुमेवैतदादित्यमुपदधाति स ह्यरिष्टमयो भवति परिमण्डल एकविꣳशतिर्निर्बाधस्तस्योक्तो बन्धुरधस्तान्निर्बाधमुपदधाति रश्मयो वाऽएतस्य निर्बाधा अवस्ताद्वाऽएतस्य रश्मयः ॥ १० ॥ तं पुष्करपर्णेऽउपदधाति । योनिर्वै पुष्करपर्णं योनावेवैनमेतत्प्रतिष्ठापयति ॥ ११ ॥ यद्वेव पुष्करपर्णेऽउपदधाति । प्रतिष्ठा वै पुष्करपर्णमियं वै पुष्करपर्णमियमु वै प्रतिष्ठा यो वाऽअस्यामप्रतिष्ठितोऽपि दूरे सन्नप्रतिष्ठित एव स रश्मिभिर्वाऽएषोऽस्यां प्रतिष्ठितोऽस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति ॥ १२ ॥ यद्वेव पुष्करपर्णेऽउपदधाति । इन्द्रो वृत्रꣳ हत्वा नास्तृषीति मन्यमानोऽपः प्राविशत्ता अब्रवीद्विभेमि वै पुरं मे कुरुतेति स योऽपाꣳ रस आसीत्तमूर्धꣳ समुदौहंस्तामस्मै पुरमकुर्वंस्तद्यदस्मै पुरमकुर्वंस्तस्मात्पूष्करं पूष्करꣳ ह वै तत्पुष्करमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तद्यत्पुष्करपर्णेऽउपदधाति यमेवास्यैतमापो रसꣳ समुदौक्षन्यामस्मै पुरमकुर्वंस्तस्मिन्नेवैनमेतत्प्रतिष्ठापयति ॥ १३ ॥ ब्रह्म जज्ञानं प्रथमं पुरस्ता-दिति । असौ वाऽआदित्यो ब्रह्माहरहः पुरस्ताज्जायते वि सीमतः सुरुचो वेन आवरिति मध्यं वै सोमेमे लोकाः सुरुचोऽसावादित्यो वेनो यद्वै प्रजिज्ञानिषमाणोऽवेनत्तस्माद्वेनस्तानेष सीमतो मध्यतो विवृणवन्नुदेति स बुध्या उपमा अस्य विष्ठा इति दिशो वाऽअस्य बुध्या उपमा विष्ठास्ता ह्येष उपवितिष्ठते सतश्च योनिमसतश्च विवरितीमे वै लोकाः सतश्च योनिरसतश्च यच्च ह्यस्ति यच्च न तदेभ्य एव लोकेभ्यो जायते त्रिष्टुभोपदधाति त्रैष्टभो ह्येष सादयित्वा सूददोह-

साधिवदति तस्योक्तो बन्धुः ॥ १४ ॥ अथ पुरुषमुपदधाति । स प्रजापतिः सोऽग्निः स यज्ञमानः स हिरण्मयो भवति ज्योतिर्वै हिरण्यं ज्योतिरग्निरमृतꣳ हिरण्यममृतमग्निः पुरुषो भवति पुरुषो हि प्रजापतिः ॥ १५ ॥ यद्वेव पुरुषमुपदधाति । प्रजापतेर्विस्रस्ताद्रूम्या तनूर्मध्यत उदक्रामत्तस्यामेनमुत्क्रान्तायां देवा अब्रुवꣳस्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेताꣳ रूम्यां तनूं मध्यतोऽदधुस्तस्यामस्य देवा अरमन्त तद्यदस्यैतस्याꣳ रूम्यायां तन्वां देवा अरमन्त तस्माद्रिरम्यꣳ हिरम्यꣳ ह वै तद्धिरण्यमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तथैवास्मिन्नयमेताꣳ रूम्यां तनूं मध्यतो दधाति तस्यामस्य देवा रमन्ते प्राणो वाऽअस्य सा रूम्या तनूः प्राणमेवास्मिन्नेतं मध्यतो दधाति ॥ १६ ॥ तꣳ रुक्मऽउपदधाति । असौ वाऽआदित्य एष रुक्मोऽथ य एष एतस्मिन्मण्डले पुरुषः स एष तमेवैतदुपदधाति ॥ १७ ॥ उत्तानमुपदधाति । एतद्वै देवा अब्रुवन्यदि वाऽइमावर्वाञ्चाऽउपधास्यामः सर्वमेवेदं प्रधक्ष्यतो यद्यु पराञ्चौ पराञ्चावेव तप्स्यतो यद्यु सम्यञ्चावन्तरैवैतावेतज्ज्योतिर्भविष्यत्यथोऽअन्योऽन्यꣳ हिꣳसिष्यतऽइति तेऽर्वाञ्चमन्यमुपादधुः पराञ्चमन्यꣳ स एष रश्मिभिर्वाङ् तपति रुक्मः प्राणैरेष ऊर्ध्वः पुरुषः प्राञ्चमुपदधाति प्राङ् ह्येषोऽग्निश्चीयते ॥ १८ ॥ हिरण्यगर्भः समवर्तताग्रऽइति । हिरण्यगर्भो ह्येष समवर्तताग्रे भूतस्य जातः पतिरेक आसीदित्येष ह्यस्य सर्वस्य भूतस्य जातः पतिरेक आसीत्स दाधार पृथिवीं द्यामुतेमामित्येष वै दिवं च पृथिवीं च दाधार कस्मै देवाय हविषा विधेमेति प्रजापतिर्वै कस्तस्मै हविषा विधेमेत्येतत् ॥ १९ ॥ द्रप्सश्चस्कन्द पृथिवीमनु द्यामिति । असौ वाऽआदित्यो द्रप्सः स दिवं च पृथिवीं च स्कन्दतीत्यमूमितीमामिमं च योनिमनु यश्च पूर्व इतीमं च लोकममुं चेत्येतद्यो यच्चेदमेतर्हि चीयते यच्चादः पूर्वमचीयतेति समानं योनिमनु संचरन्तमिति समानꣳ ह्येष एतं योनिमनु संचरति द्रप्सं जुहोम्यनु सप्त होत्रा इत्यसौ वा

ऽआदित्यो द्रप्सो दिशः सप्त क्रोत्रा अमुं तदादित्यं दिक्षु प्रतिष्ठापयति ॥२०॥ द्वाभ्यामुपदधाति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तेवैनमेतदुपदधाति । त्रिष्टुब्भ्यां त्रैष्टुभो क्येष सादयित्वा सूदुदोहसाधिवदति तस्योक्तो बन्धुः ॥२१॥ अथ साम गायति । एतद्वै देवाऽएतं पुरुषमुपधाय तमेतादृशमेवापश्यन्यथैतक्रुष्कं फल्कम् ॥२२॥ तेऽब्रुवन् । उप तन्नानीत यथास्मिन्पुरुषे वीर्यं दधामेति तेऽब्रुवंश्चेतयधमिति चितिमिक्षेति वाव तदब्रुवंस्तदिक्षत यथास्मिन्पुरुषे वीर्यं दधामेति ॥२३॥ ते चेतयमानाः । एतत्सामापश्यंस्तदगायंस्तदस्मिन्वीर्यमदधुस्तथैवास्मिन्नयमेतद्दधाति पुरुषे गायति पुरुषे तद्वीर्यं दधाति चित्रे गायति सर्वाणि हि चित्राण्यग्निस्तमुपधाय न पुरस्तात्परीयान्नेन्मायमग्निर्हिनसदिति ॥२४॥ अथ सर्पनामिरुपतिष्ठत । ऽइमे वै लोकाः सर्पास्ते क्षानेन सर्वेण सर्पन्ति यदिदं किं च सर्वेषामु क्षैष देवानामात्मा यदग्निस्ते देवा एतमात्मानमुपधायाबिभयुर्यद्वै न इमे लोका अनेनात्मना न सर्पेयुरिति ॥२५॥ तऽएतानि सर्पनामान्यपश्यन् । तैरुपातिष्ठन्त तैरस्माऽइमांल्लोकानस्थापयंस्तैरनमयन्यदनमयंस्तस्मात्सर्पनामानि तथैवैतद्यजमानो यत्सर्पनामिरुपतिष्ठतऽइमानेवास्माऽएतल्लोकान्त्स्थापयतीमांल्लोकान्नमयति तथो क्षास्यैतऽएतेनात्मना न सर्पन्ति ॥२६॥ यद्वेव सर्पनामिरुपतिष्ठत । ऽइमे वै लोकाः सर्पा यद्धि किं च सर्पत्येष्वेव तल्लोकेषु सर्पति तद्यत्सर्पनामिरुपतिष्ठते यैवैषु लोकेषु नाष्ट्रा यो व्यद्वरो या शिमिदा तदेवैतत्सर्वꣳ शमयति ॥२७॥ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नम इति यऽएवैषु त्रिषु लोकेषु सर्पास्तेभ्य एतन्नमस्करोति ॥२८॥ या इषवो यातुधानानामिति । यातुधानप्रेषिता क्षैके दशन्ति ये वा वनस्पतीरनु ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नम इति ये चैव वनस्पतिषु सर्पा ये चावटेषु शेरते तेभ्य एतन्नमस्करोति ॥२९॥ ये वामी

रोचने दिवो । ये वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नम इति यत्र-यत्रैते तदेवैभ्य एतन्नमस्करोति नमो नम इति यज्ञो वै नमो यज्ञेनैवैनानेतन्नमस्कारेण नमस्यति तस्माद्वै नायज्ञियं ब्रूयान्नमस्तऽइति यथा वैनं ब्रूयाद्यज्ञस्तऽइति तादृक्तत् ॥३०॥ त्रिभिरुपतिष्ठते । त्रय इमे लोका अथो त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्माऽएतदिमांल्लोकान्त्स्थापयत्यथो तावतैवैतद्दृढं मर्वं शमयति तिष्ठन्नुपतिष्ठते तिष्ठन्तीव वाऽइमे लोका अथो तिष्ठन्वै वीर्यवत्तरः ॥३१॥ अथैनमुपविश्याभिजुहोति । आज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः सर्वतः परिसर्पं सर्वाभ्य एवैनमेतद्दिग्भ्योऽन्नेन प्रीणाति ॥३२॥ यद्वैवैनमभिजुहोति । एतद्वै देवा एतमात्मानमुपधायाबिभयुर्यद्वै न इममिमे रक्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतान्रात्रोघ्रान्प्रतिसरानपश्यन्कृणुष्व पाजः प्रसितिं न पृथ्वीमिति रात्रोघ्रा वै प्रतिसरास्तऽएतैः प्रतिसरैः सर्वाभ्यो दिग्भ्यो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतमात्मानꣳ समस्कुर्वत तथैवैतद्यजमान एतैः प्रतिसरैः सर्वाभ्यो दिग्भ्यो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतमात्मानꣳ संस्कुरुते ॥३३॥ आज्येन जुहोति । वज्रो वाऽआज्यं वज्रेणैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैतद्रक्षाꣳसि नाष्ट्रा अपहत्याग्नेयीभिरग्निर्वै ज्योती रात्रोऽग्निनैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति त्रिष्टुब्भिर्वज्रो वै त्रिष्टुब्वज्रेणैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति सर्वतः परिसर्पं सर्वाभ्य एवैतद्दिग्भ्यो रक्षाꣳसि नाष्ट्रा अपहन्ति ॥३४॥ पश्चाद्ग्नेः प्राङासीनो । ऽथोत्तरतो दक्षिणाथ पुरस्तात्प्रत्यङ्मुख जघनेन परीत्य दक्षिणत उदङ्मुखासीनस्तद्दक्षिणावृत्तद्धि देवत्राथानुपरीत्य पश्चात्प्राङासीनस्तथो ह्यस्यैतत्प्रागेव कर्म कृतं भवति ॥३५॥ अथ स्रुचाऽउपदधाति । बाह्वे वै स्रुचौ बाह्वेऽएवास्मिन्नेतत्प्रतिदधाति ते यत्स्रुचौ भवतः स्रुचौ हि बाह्वे

ऽइदमेव कपुरुलमयं दण्डो द्वे भवतो द्वौ स्रोमौ बाहू पाश्चत उपदधाति पार्श्वतो स्रोमौ बाहू ॥३६॥ कार्ष्मर्यमयीं दक्षिणत उपदधाति । एतद्वै देवा अबिभयुर्यद्वै नो यज्ञं दक्षिणतो रक्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतꣳ रक्षोहणं वनस्पतिमपश्यन्कार्ष्मर्यं तऽएतेन वनस्पतिना दक्षिणातो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्टृऽएतं यज्ञमतन्वत तथैवैतद्यज्ञमान एतेन वनस्पतिना दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्टृऽएतं यज्ञं तनुतऽआज्येन पूर्णा भवति वज्रो वाऽआज्यं वज्रेणैवैतद्दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहन्ति ॥३७॥ अथौदुम्बरीमुत्तरत उपदधाति । ऊर्ग्वै रस उदुम्बर ऊर्जमेवास्मिन्नेतद्रसं दधाति दध्ना पूर्णा भवति रसो वै दधि रसमेवास्मिन्नेतद्दधाति ॥३८॥ यद्वेव स्रुचाऽउपदधाति । प्रजापतेर्विस्रस्तस्याग्निस्तेज आदाय दक्षिणाकर्षत्सोऽत्रोदरमत्यत्कृष्टोदरमत्तस्मात्कार्ष्मर्योऽथास्येन्द्र ओज आदायोदङ्डुदक्रामत्स उदुम्बरोऽभवत् ॥३९॥ तावब्रवीत् । उप मेतं प्रति मऽएतद्धत्तं येन मे युवमुदक्रमिष्टमिति ताभ्यां वै नौ सर्वमन्नं प्रयच्छेति तौ वै मा बाहू भूत्वा प्रपद्येथामिति तथेति ताभ्यां वै सर्वमन्नं प्रायच्छतावेनं बाहू भूत्वा प्रापद्येतां तस्माद्बाहुभ्यामिवान्नं क्रियते बाहुभ्यामद्यते बाहुभ्याꣳ हि स सर्वमन्नं प्रायच्छत् ॥४०॥ स कार्ष्मर्यमयीं दक्षिणत उपदधाति । अग्नेष्ट्वा तेजसा सादयामीति यदेवास्य तदग्निस्तेज आदाय दक्षिणाकर्षत्तदस्मिन्नेतत्प्रतिदधात्यग्निर्मूर्धा दिवः ककुदित्येष उ सोऽग्निर्गायत्र्या गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतदुपदधाति घृतेन पूर्णा भवत्याग्नेयं वै घृतꣳ स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥४१॥ अथौदुम्बरीमुत्तरत उपदधाति । इन्द्रस्य त्वौजसा सादयामीति यदेवास्य तदिन्द्र ओज आदायोदङ्डुदक्रामत्तदस्मिन्नेतत्प्रतिदधाति भुवो यज्ञस्य रजसश्च नेतेत्येष उ स इन्द्रः सा यदाग्नेय्यग्निकर्म स्याथ यत्त्रिष्टुत्त्रैष्टुभो स्रोन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतदुपदधा-

तौन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतदुपदधाति दध्ना पूर्णा भवत्यैन्द्रं वै दधि स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥४२॥ तावस्यैताविन्द्राग्नी एव बाहू । तावेनं तेजसा च वीर्येण च सह प्रपद्येते स सम्प्रत्युरः पुरुषमाकाश्य यत्राभ्याप्नोति तदालिख्यैनेऽउपदधात्येष वै तयोर्लोकः ॥४३॥ ते वै के तिरश्च्याऽउपदधति । तिर्यञ्चौ वाऽइमौ बाहूऽइति न तथा कुर्यात्प्राच्यावेवोपदध्यात्प्राङ् क्येषोऽग्निश्चीयतेऽथोऽएवं वै बाहू वीर्यवत्तरौ ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना ह्येमौ बाहू ॥४४॥ तदाहुः । नैतस्य पुरुषस्य बाहू कुर्यादेतौ वाऽअस्य बाहू येऽएते स्रुचौ नेदतिरेचयानीति स वै कुर्यादेवैतौ वाऽअस्य बाहूऽअन्वेते स्रुचावथोऽएतौ पक्षावथो यान्येतस्मिन्नग्नौ रूपाण्युपधास्यन्भवति यात्स्तोमान्यानि पृष्ठानि यानि छन्दाꣳस्येतयोरेव सा संस्कृतिरेतयोर्वृद्धिस्तस्माद्ध कुर्यादेवैतस्य पुरुषस्य बाहू ॥४५॥ ब्राह्मणम् ॥ १ [४. १.] ॥ ॥

स्वयमातृण्णामुपदधाति । इयं वै स्वयमातृण्णेमामेवैतदुपदधाति तामनन्तर्हितां पुरुषादुपदधात्यन्नं वै स्वयमातृण्णेयं वै स्वयमातृण्णेयमु वाऽअन्नमस्याꣳ हि सर्वमन्नं पच्यतेऽनन्तर्हितमेवास्मादेतदन्न दधात्युत्तरामुत्तरमेवास्मादेतदन्नं दधाति ॥१॥ यद्वै व स्वयमातृण्णामुपदधाति । प्राणो वै स्वयमातृण्णा प्राणो क्येवैतत्स्वयमात्मन आतृन्त्ते प्राणमेवैतदुपदधाति तामनन्तर्हितां पुरुषादुपदधाति प्राणो वै स्वयमातृण्णेयं वै स्वयमातृण्णेयमु वै प्राणो यद्धि किं च प्राणीयं तत्सर्वं बिभर्त्यनन्तर्हितमेवास्मादेतत्प्राणं दधात्युत्तरामुत्तरमेवास्मादेतत्प्राणं दधाति ॥२॥ यद्वै व स्वयमातृण्णामुपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तासु व्युत्क्रामन्तीषु प्रतिष्ठामभिपद्योपाविशत् ॥३॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स यो ऽयमग्निश्चीयतेऽथ या सा प्रतिष्ठिषा सा प्रथमा स्वयमातृण्णा तद्यदेतामत्रोपदधाति

यदेवास्येषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतामत्रोपदधाति ॥४॥ तां वै प्रजापतिनोपदधाति । प्रजापतिर्ह्येवैतत्स्वयमात्मनः प्रत्यधत्त ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति धरुणेति प्रतिष्ठा वै धरुणास्तृता विश्वकर्मणेति प्रजापतिर्वै विश्वकर्मा तेनास्तृतासीत्येतन्मा त्वा समुद्र उद्वधीन्मा सुपर्ण इति रुक्मो वै समुद्रः पुरुषः सुपर्णस्तौ त्वा मोद्वधिष्टामित्येतद्व्यथमाना पृथिवीं दृꣳहेति यथैव यजुस्तथा बन्धुः ॥५॥ प्रजापतिष्ट्वा सादयत्विति । प्रजापतिर्ह्येतां प्रथमां चितिमपश्यदपां पृष्ठे समुद्रस्येमन्नित्यपाꣳ ह्रीयं पृष्ठꣳ समुद्रस्य ह्रीयमेम व्यचस्वतीं प्रथस्वतीमिति व्यचस्वती च ह्रीयं प्रथस्वती च प्रथस्व पृथिव्यसीति प्रथस्व पृथिवी चासीत्येतत् ॥६॥ भूरसीति । भूर्ह्रीयं भूमिरसीति भूमिर्ह्रीयमदितिरसीतीयं वाऽअदितिरियꣳ ह्रीदꣳ सर्वं ददते विश्वधाया इत्यस्याꣳ ह्रीदꣳ सर्वꣳ ह्रितं विश्वस्य भुवनस्य धर्त्रीति सर्वस्य भुवनस्य धर्त्रीत्येतत्पृथिवीं यह्व पृथिवीं दृꣳह पृथिवीं मा हिꣳसीरित्यात्मानं यह्वात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥७॥ विश्वस्मै प्राणायापानाय । व्यानायोदानायेति प्राणो वै स्वयमातृण्णा सर्वस्माऽउ वाऽएतस्मै प्राणः प्रतिष्ठायै चरित्रायेतीमे वै लोकाः स्वयमातृण्णा इमऽउ लोकाः प्रतिष्ठा चरित्रमग्निष्ट्वाभिपात्वित्यग्निष्ट्वाभिगोपायत्वित्येतन्मह्या स्वस्त्येति महत्या स्वस्त्येत्येतच्छर्दिषा शंतमेनेति यच्छर्दिः शंतमं तेनेत्येतत्सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुरथ साम गायति तस्योपरि बन्धुः ॥८॥ तदाहुः । कथमेष पुरुषः स्वयमातृण्णायानभिनिहितो भवतीत्यन्नं वै स्वयमातृण्णा प्राणः स्वयमातृण्णानभिनिहितो वै पुरुषोऽन्नेन च प्राणेन च ॥९॥ अथ दूर्वेष्टकामुपदधाति । पशवो वै दूर्वेष्टका पशूनेवैतदुपदधाति तयैरदोऽग्निरन्तर्हितैः पशुभिरुपैत्तऽएते तानेवैतदुपदधाति तामनन्तर्हिताꣳ स्वयमातृण्णाया उपदधातीयं वै स्वयमातृण्णानन्तर्हितांस्तदस्यै पशून्दधात्युत्तरामुत्तरांस्तदस्यै पशून्दधाति ॥१०॥ यद्वै व

दूर्वेष्टकामुपदधाति । प्रजापतेर्विस्रस्तस्य यानि लोमान्यशीयन्त ता इमा ओषधयोऽभवन्नथास्मात्प्राणो मध्यत उदक्रामत्तस्मिन्नुत्क्रान्तेऽपक्षत ॥ ११ ॥ सोऽब्रवीत् । अयं वाव माधूर्वीदिति यदब्रवीद्धूर्वीन्मिति तस्माद्धूर्वा धूर्वा ह वै तां दूर्वेत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तदेतत्क्षत्रं प्राणो ह्येष रसो लोमान्यन्या ओषधय एतामुपदधत्सर्वा ओषधीरुपदधाति ॥ १२ ॥ तं यत्र देवाः समस्कुर्व । स्तदस्मिन्नेतं प्राणꣳ रसं मध्यतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति तामनन्तर्हिताꣳ स्वयमातृण्णाया उपदधातीयं वै स्वयमातृण्णानन्तर्हितास्तदस्याऽओषधीर्दधात्युत्तरामुत्तरास्तदस्याऽओषधीर्दधाति सा स्यात्समूला साग्रा कृत्स्नतायै यथा स्वयमातृण्णायामुपहिता भूमिं प्राप्नुयादेवमुपदध्यादस्याꣳ ह्येवैता जायन्तऽइमामनु प्ररोहन्ति ॥ १३ ॥ काण्डात्काण्डात्प्ररोहन्ती । पुरुषः-पुरुषस्परीति काण्डात्काण्डाद्ध्येषा पर्वणाः-पर्वणाः प्ररोहत्येवा नो दूर्वे प्रतनु सहस्रेण शतेन चेति यथैव यजुस्तथा बन्धुः ॥ १४ ॥ या शतेन प्रतनोषि । सहस्रेण विरोहसीति शतेन ह्येषा प्रतनोति सहस्रेण विरोहति तस्यास्ते देवीष्टके विधेम हविषा वयमिति यथैव यजुस्तथा बन्धुर्द्वाभ्यामुपदधाति तस्योक्तो बन्धुः सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ १५ ॥ अथ द्वियजुषमुपदधाति । इन्द्राग्नीऽअकामयेताꣳ स्वर्गं लोकमियावेति तावेतामिष्टकामपश्यतां द्वियजुषमिमामेव तामुपादधातां तामुपधायास्यै प्रतिष्ठायै स्वर्गं लोकमैतां तथैवैतद्यजमानो यद्द्वियजुषमुपदधाति येन रूपेण यत्कर्म कृत्वेन्द्राग्नी स्वर्गं लोकमैतां तेन रूपेण तत्कर्म कृत्वा स्वर्गं लोकमयानीति सा यद्द्वियजुर्नाम द्वे ह्येतां देवतेऽअपश्यतां यद्वेव द्वियजुषमुपदधाति यजमानो वै द्वियजुः ॥ १६ ॥ तदाहुः । यदसावेव यजमानो योऽसौ हिरण्मयः पुरुषोऽथ कतमदस्येदꣳ रूपमिति दैवो वाऽअस्य स आत्मा मानुषोऽयं तद्यत्स हिरण्मयो भवत्यमृतं वाऽअस्य तद्रूपं देवरूपममृतꣳ हिरण्मयꣳ यदियं मृदः कृता भवति

मानुषꣳ क्ष्यस्येदꣳ रूपꣳ ॥ १७ ॥ स यदमूमेवोपदध्यात् । नेमामपशिꣳष्यात्क्षिप्रे क्षास्माल्लोकाच्च्यवमानः प्रेयादथ यदिमामपशिनष्टि यदेवास्येदं मानुषꣳ रूपं तदस्यैतदपशिनष्टि तथो क्षानेनात्मना सर्वमायुरेति ॥ १८ ॥ स यन्नानूपदध्यात् । न क्षैतं देवमात्मानमनुप्रज्ञानीयादथ यदनूपदधाति तथो क्षैतं देवमात्मानमनुप्रज्ञानाति तामनन्तर्हितां दूर्वेष्टकाया उपदधाति पशवो वै दूर्वेष्टका यजमानं तत्पशुषु प्रतिष्ठापयति ॥ १९ ॥ तदाहुः । कथमस्यैतावात्मानौ प्राणेन संततावव्यवहिन्नौ भवत इति प्राणो वै स्वयमातृण्णा प्राणो दूर्वेष्टका यजमानो द्वियजुः स यदनन्तर्हिताꣳ स्वयमातृण्णायै दूर्वेष्टकामुपदधाति प्राणेनैव तत्प्राणꣳ संतनोति संदधात्यथ यदनन्तर्हितां दूर्वेष्टकायै द्वियजुषमुपदधाति प्राणो वै दूर्वेष्टका यजमानो द्वियजुरेवमु क्षास्यैतावात्मानौ प्राणेन संततावव्यवहिन्नौ भवतः ॥ २० ॥ यास्तेऽग्ने सूर्ये रुचो । या वो देवाः सूर्ये रुच इति रुचꣳ रुचमित्यमृतत्वं वै रुगमृतत्वमेवास्मिन्नेतद्दधाति द्वाभ्यामुपदधाति तस्योक्तो बन्धुरथो द्वयꣳ क्ष्येवैतद्रूपं मृच्चापश्च सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ २१ ॥ अथ रेतःसिचाऽउपदधाति । इमौ वै लोकौ रेतःसिचाविमौ क्ष्येव लोकौ रेतः सिञ्चत इतो वाऽअयमूर्धꣳ रेतः सिञ्चति धूमꣳ सामुत्र वृष्टिर्भवति तामसावमुतो वृष्टिं तदिमा अन्तरेण प्रज्ञायन्ते तस्मादिमौ लोकौ रेतःसिचौ ॥ २२ ॥ विराड्ज्योतिरधारयदिति । अयं वै लोको विराट् स इममग्निं ज्योतिर्धारयति स्वराड्ज्योतिरधारयदित्यसौ वै लोकः स्वराट् सोऽमुमादित्यं ज्योतिर्धारयति विराड्क्षेमौ लोकौ स्वराट्च नानोपदधाति नाना क्षीमौ लोकौ सकृत्सादयति समानं तत्करोति तस्माद्व क्षानयोर्लोकयोरन्ताः समायन्ति ॥ २३ ॥ यद्वेव रेतःसिचाऽउपदधाति । आण्डौ वै रेतःसिचौ यस्य क्षाण्डौ भवतः स एव रेतः सिञ्चति विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयदिति विराड्क्षेमावाण्डौ स्वराट्च तावेतज्ज्योतिर्धारयतो रेत एव प्रजापतिमेव

नानोपदधाति नाना ह्येमावाण्डौ सकृत्सादयति समानं तत्करोति तस्मात्समानसम्बन्धनौ तेऽअनक्तर्हिते द्वियजुष उपदधाति यजमानो वै द्वियजुरनक्तर्हितौ तद्यजमानादाण्डौ दधाति ॥ २४ ॥ अथ विश्वज्योतिषमुपदधाति । अग्निर्वै प्रथमा विश्वज्योतिरग्निर्ह्येवास्मिंल्लोके विश्वं ज्योतिरग्निमेवैतदुपदधाति तामनक्तर्हिताꣳ रेतःसिग्भ्यामुपदधातीमौ वै लोकौ रेतःसिचावनक्तर्हितं तदाभ्यां लोकाभ्यामग्निं दधात्यक्तरेवोपदधात्यक्तरेव ह्येमौ लोकावग्निः ॥ २५ ॥ यद्वै विश्वज्योतिषमुपदधाति । प्रज्ञा वै विश्वज्योतिः प्रज्ञा ह्येव विश्वं ज्योतिः प्रज्ञाननमेवैतदुपदधाति तामनक्तर्हिताꣳ रेतःसिग्भ्यामुपदधात्याण्डौ वै रेतःसिचावनक्तर्हितां तदाण्डाभ्यां प्रज्ञातिं दधात्यक्तरेवोपदधात्यक्तरेव ह्याण्डौ प्रज्ञाः प्रजायन्ते ॥ २६ ॥ प्रजापतिष्ट्वा सादयत्विति । प्रजापतिर्ह्येतां प्रथमां चितिमपश्यत्पृष्ठे पृथिव्या ज्योतिष्मतीमिति पृष्ठे ह्ययं पृथिव्यै ज्योतिष्मानग्निः ॥ २७ ॥ विश्वस्मै प्राणायापानाय । व्यानायेति प्राणो वै विश्वज्योतिः सर्वस्माऽउ वाऽएतस्मै प्राणो विश्वं ज्योतिर्यच्छतीति सर्वं ज्योतिर्यच्छत्येतदग्निष्टेऽधिपतिरित्यग्निमेवास्या अधिपतिं करोति सादयित्वा सूद्दोहसाधिवदति तस्योक्तो बन्धुः ॥ २८ ॥ अथऽर्तव्येऽउपदधाति । ऋतव एते यदृतव्येऽऋतूनेवैतदुपदधाति मधुश्च माधवश्च वासन्तिकावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥ २९ ॥ तद्यदेतेऽअत्रोपदधाति । संवत्सर एषोऽग्निरिमेऽउ लोकाः संवत्सरस्तस्यायमेव लोकः प्रथमा चितिरयमस्य लोको वसन्त ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥ ३० ॥ यद्वै वैतेऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य प्रतिष्ठैव प्रथमा चितिः प्रतिष्ठोऽस्य वसन्त ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति तेऽअनक्तर्हिते वि-

श्वज्योतिष उपदधाति प्रज्ञा वै विश्वज्योतिरनन्तर्हितास्तत्प्रज्ञा ऋतुभ्यो दधाति तस्मात्प्रज्ञा ऋतूनेवानुप्रज्ञायन्तऽऋतुभिर्ह्येव गर्भे सन्त्स म्पश्यन्त्यृतुभिर्जातम् ॥३१॥ अथाषाढामुपदधाति । इयं वाऽअषाढेमामेवैतदुपदधाति तां पूर्वार्धऽउपदधाति प्रथमा ह्येयमसृज्यत ॥३२॥ सा यदषाढा नाम । देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त ते देवा एतामिष्टकामपश्यन्नषाढामिमामेव तामुपादधत तामुपधायासुरान्सपत्नान्भ्रातृव्यानस्मात्सर्वस्मादसहन्त यदसहन्त तस्मादषाढा तथैवैतद्यजमान एतामुपधाय द्विषन्तं भ्रातृव्यमस्मात्सर्वस्मात्सहते ॥३३॥ यद्वैवाषाढामुपदधाति । वाग्वाऽअषाढा वाचैव तद्देवा असुरान्सपत्नान्भ्रातृव्यानस्मात्सर्वस्मादसहन्त तथैवैतद्यजमानो वाचैव द्विषन्तं भ्रातृव्यमस्मात्सर्वस्मात्सहते वाचमेव तद्देवा उपादधत तथैवैतद्यजमानो वाचमेवोपधत्ते ॥३४॥ सेयं वामभृत् । प्राणा वै वामं यद्किं च प्राणीयं तत्सर्वं बिभर्ति तेनेयं वामभृद्वाग्घ वेव वामभृत्प्राणा वै वामं वाचि वै प्राणेभ्योऽन्नं धीयते तस्माद्वाग्वामभृत् ॥३५॥ तऽऋते सर्वे प्राणा यदषाढा । तां पूर्वार्धऽउपदधाति पुरस्तात्तत्प्राणान्दधाति तस्मादिमे पुरस्तात्प्राणास्तान्नान्यया यजुष्मत्येष्टकया पुरस्तात्प्रत्युपदध्यादेतस्यां चितौ नेत्प्राणानपिदधानीति ॥३६॥ यद्वपस्याः पञ्च पुरस्तादुपदधाति । अन्नं वाऽआपोऽनपिहिता वाऽअन्नेन प्राणास्तामनन्तर्हितामृतव्याभ्यामुपदधात्यृतुषु तद्वाचं प्रतिष्ठापयति सेयं वागृतुषु प्रतिष्ठिता वदति ॥३७॥ तदाहुः । यत्प्रज्ञा विश्वज्योतिर्वागषाढाथ कस्मादन्तरेणऽर्तव्येऽउपदधातीति संवत्सरो वाऽऋतव्ये संवत्सरेण तत्प्रज्ञाभ्यो वाचमन्तर्दधाति तस्मात्संवत्सरवेलायां प्रज्ञा वाचं प्रवदन्ति ॥३८॥ अषाढासि सहमानेति । असहन्त ह्येतया देवा असुरान्सहस्वारातीः सहस्व पृतनायत इति यथैव यजुस्तथा बन्धुः सहस्रवीर्यासि सा मा जिन्वेति सर्वं वै सहस्रꣳ सर्ववीर्यासि सा मा जिन्वेत्येतत्साद्यित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥३९॥ त-

दाङ्कः । कस्मादभिस्वयमातृण्णमन्या इष्टका उपधीयन्ते प्राच्य एता इति द्वे वै योनीऽइति ब्रूयाद्दैवयोनिरन्यो मनुष्ययोनिरन्यः प्राचीनप्रञ्जनना वै देवाः प्रतीचीनप्रञ्जनना मनुष्यास्तद्यदेताः प्राचीरुपदधाति देवयोनेरेवैतद्यजमानं प्रञ्जनयति ॥४०॥ ब्राह्मणम् ॥ २ [४. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या८५ ॥ चतुर्थोऽध्यायः [४७.] ॥ ॥

कूर्ममुपदधाति । रसो वै कूर्मो रसमेवैतदुपदधाति यो वै स एषां लोकानामप्सु प्रविद्धानां पराङ्रसोऽत्यक्षरत्स एष कूर्मस्तमेवैतदुपदधाति यावानु वै रसस्तावानात्मा स एष इमाऽएव लोकाः ॥१॥ तस्य यदधरं कपालम् । अयꣳ स लोकस्तत्प्रतिष्ठितमिव भवति प्रतिष्ठित-इव ह्ययं लोकोऽथ यदुत्तरꣳ सा द्यौस्तद्यवगृहीतात्तमिव भवति व्यवगृहीतात्तिव हि द्यौरथ यदन्तरा तदन्तरिक्षꣳ स एष इमाऽएव लोका इमानेवैतल्लोकानुपदधाति ॥२॥ तमभ्यनक्ति । दध्ना मधुना घृतेन दधि ह्येवास्य लोकस्य रूपं घृतमन्तरिक्षस्य मधमुष्य स्वेनैवैनमेतद्रूपेण समर्धयत्यथो दधि ह्येवास्य लोकस्य रसो घृतमन्तरिक्षस्य मधमुष्य स्वेनैवैनमेतद्रसेन समर्धयति ॥३॥ मधु वाता ऋतायतऽइति । यां वै देवतामृगभ्यनूक्ता यां यजुः सैव देवता सऽक्सो देवता तद्यजुस्तद्वैतन्मधवेष त्रिचो रसो वै मधु रसमेवास्मिन्नेतद्दधाति गायत्रीभिस्तिसृभिस्तस्योक्तो बन्धुः ॥४॥ स यत्कूर्मो नाम । एतद्वै रूपं कृत्वा प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद्यदकरोत्तस्मात्कूर्मः कश्यपो वै कूर्मस्तस्मादाङ्कः सर्वाः प्रजाः काश्यप्य इति ॥५॥ स यः स कूर्मोऽसौ स आदित्यो । ऽमुमेवैतदादित्यमुपदधाति तं पुरस्तात्प्रत्यञ्चमुपदधात्यमुं तदादित्यं पुरस्तात्प्रत्यञ्चं दधाति तस्मादसावादित्यः पुरस्तात्प्रत्यङ् धीयते दक्षिणतोऽषाढाऽग्नेऽ वृषा वै कूर्मो योषाषाढा दक्षिणतो वै वृषा योषामुपशेतेऽरत्निमात्रेऽरत्निमात्राद्धि वृषा योषामुपशेते सैषा सर्वासामिष्टकानां महिषी यदषाढैतस्यै

दक्षिणतः सत्सर्वासामिष्टकानां दक्षिणतो भवति ॥ ६॥ यद्वै कूर्ममुपदधाति । प्राणो वै कूर्मः प्राणो ह्येमाः सर्वाः प्रजाः करोति प्राणमेवैतदुपदधाति तं पुरस्तात्प्रत्यञ्चमुपदधाति पुरस्तात्तत्प्रत्यञ्चं प्राणं दधाति तस्मात्पुरस्तात्प्रत्यङ् प्राणो धीयते पुरुषमभ्यावृत्तं यजमाने तत्प्राणं दधाति दक्षिणतोऽषाढायै प्राणो वै कूर्मो वागषाढा प्राणो वै वाचो वृषा प्राणो मिथुनम् ॥७॥ ॥ शतम्४२०० ॥ ॥ अपां गम्भस्तीदिति । एतद्वापां गम्भिष्ठं यत्रैष एतत्तपति मा त्वा सूर्योऽभितापसीन्माग्निर्वैश्वानर इति मैव त्वा सूर्यो ह्यभितापसीन्मोऽग्निर्वैश्वानर इत्येतदाह्यिन्नपत्राः प्रजा अनुवीक्षस्वेतीमा वै सर्वाः प्रजा या इमा इष्टकास्ता अरिष्टा अनार्ता अनुवीक्षस्वेत्येतदनु त्वा दिव्या वृष्टिः सचतामिति यथैवैनं दिव्या वृष्टिरनुसचेतैवमेतदाह ॥ ८॥ अथैनमेजयति । त्रीत्समुद्रात्समसृपत्स्वर्गानितीमे वै त्रयः समुद्राः स्वर्गा लोकास्तानिष कूर्मो भूत्वानुसऽसर्पापां पतिर्वृषभ इष्टकानामित्यपाꣳ ह्येष पतिर्वृषभ इष्टकानां पुरीषं वसानः सुकृतस्य लोकऽइति पशवो वै पुरीषं पशून्वसानः सुकृतस्य लोक इत्येतत्तत्र गच्छ यत्र पूर्वे परेता इति तत्र गच्छ यत्रैतेन पूर्वे कर्मणेयुरित्येतत् ॥ ९॥ मही द्यौः पृथिवी च न इति । मरुती द्यौः पृथिवी च न इत्येतदिमं यज्ञं मिमिक्षतामितीमं यज्ञमवतामित्येतत्पिपृतां नो भरीमभिरिति बिभृतां नो भरीमभिरित्येतद्द्यावापृथिव्ययोत्तमयोपदधाति द्यावापृथिव्यो हि कूर्मः ॥ १०॥ त्रिभिरुपदधाति । त्रय इमे लोका अथो त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपदधाति त्रिभिरभ्यनक्ति तत्षट्स्योक्तो बन्धुरवका अधस्ताद्वल्यवका उपरिष्टादापो वाऽअवका अपामेवैनमेतन्मध्यतो दधाति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ ११॥ अथोलूखलमुसलेऽउपदधाति । विष्णुरकामयतान्नादः स्यामिति स एतेऽइष्टकेऽअपश्यदुलूखलमुसलेतेऽउपाधत्त तेऽउपधायान्नादोऽभवत्तथैवैतद्यजमानो यदुलूखलमुसलेऽउपदधाति

येन वृषेण यत्कर्म कृत्वा विष्णुरन्नादोऽभवत्तेन वृषेण तत्कर्म कृत्वान्नादोऽसानीति तदेतत्सर्वमन्नं यदुलूखलमुसलेऽउलूखलमुसलाभ्याꣳ क्षोवान्नं क्रियतऽउलूखलमुसलाभ्यामद्यते ॥ १२ ॥ ते रेतःसिचोर्वेलयोपदधाति । पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेतदन्नं दधात्युत्तरेऽउत्तरमेवास्मादेतदन्नं दधात्यरत्निमात्रेऽरत्निमात्राद्ध्यन्नमद्यते ॥ १३ ॥ प्रादेशमात्रे भवतः । प्रादेशमात्रो वै गर्भो विष्णुरन्नमेतदात्मसंमितमेवास्मिन्नेतदन्नं दधाति यदु वाऽआत्मसंमितमन्नं तदवति तन्न क्षिनस्ति यद्भूयो क्षिनस्ति तद्यत्कनीयो न तदवति ॥ १४ ॥ औदुम्बरे भवतः । ऊर्वै रस उदुम्बर ऊर्जमेवास्मिन्नेतद्रसं दधात्यथो सर्वऽएते वनस्पतयो यदुदुम्बर एतेऽउपदधत्सर्वान्वनस्पतीनुपदधाति रेतःसिचोर्वेलयेमे वै रेतःसिचावन्तयोस्तद्वनस्पतीन्दधाति तस्मादन्तयोर्वनस्पतयश्चतुःस्रक्ति भवति चतस्रो वै दिशः सर्वासु तद्दिक्षु वनस्पतीन्दधाति तस्मात्सर्वासु दिक्षु वनस्पतयो मध्ये संगृहीतं भवत्युलूखलवृषताये ॥ १५ ॥ यद्वैवोलूखलमुसलेऽउपदधाति । प्रजापतेर्विस्रस्तात्प्राणो मध्यत उदचिक्रमिषत्तमन्नेनागृह्णात्तस्मात्प्राणोऽन्नेन गृहीतो यो क्षोवान्नमत्ति स प्राणिति ॥ १६ ॥ प्राणे गृहीतेऽस्मादन्नमुदचिक्रमिषत्तत्प्राणेनागृह्णात्तस्मात्प्राणेनान्नं गृहीतं यो क्षोव प्राणिति सोऽन्नमत्ति ॥ १७ ॥ एतयोरुभयोर्गृहीतयोः । अस्माद्गुदचिक्रमिषत्तामेताभ्यामुभाभ्यामगृह्णात्तस्मादेताभ्यामुभाभ्यामूर्ग्गृहीता यो क्षोवान्नमत्ति स प्राणिति तमूर्जयति ॥ १८ ॥ ऊर्जि गृहीतायाम् । अस्मादेतेऽउभेऽउदचिक्रमिषतां तेऽऊर्जागृह्णात्तस्मादेतेऽउभे ऊर्जा गृहीते यꣳ क्षोवोर्जयति स प्राणिति सोऽन्नमत्ति ॥ १९ ॥ तान्येतान्यन्योऽन्येन गृहीतानि । तान्यन्योऽन्येन गृहीत्वात्मन्प्रापादयत तदेतदन्नं प्रपद्यमानꣳ सर्वे देवा अनुप्रापद्यन्तान्नजीवनꣳ क्षोदꣳ सर्वम् ॥ २० ॥ तदेष श्लोकोऽभ्युक्तः । तद्वै स प्राणोऽभवदिति तद्धि स प्राणोऽभवन्महा भूत्वा प्रजापतिरिति महान्हि स तदभवद्यदेन-

मेते देवाः प्रापश्यन्त भुज्यो भुञ्जिष्या विवेति प्राणा वै भुज्योऽन्नं भुञ्जिष्या एतत्सर्वं विवेत्येतच्चत्प्राणान्प्राणयत्पुरोत्यात्मा वै पूर्यदे प्राणान्प्राणयत्तस्मात्प्राणा देवा अथ यत्प्रजापतिः प्राणयत्तस्माद्व प्रजापतिः प्राणो यो वै स प्राण एषा सा गायत्र्यथ यत्तदन्नमेष स विष्णुर्देवताथ या सोऽर्गेष स उडुम्बरः ॥२१॥ सोऽब्रवीत्। अयं वाव मा सर्वस्मात्पाप्मन उदभार्षीदिति यदब्रवीदुदभार्षीन्मिति तस्मादुडुम्बर उडुम्बरो ह वै तमुडुम्बर इत्याचक्षते परोऽन्नं परोऽन्नकामा हि देवा उरु मे करदिति तस्मादुरुकरमुरुकरꣳ ह वै तदुलूखलमित्याचक्षते परोऽन्नं परोऽन्नकामा हि देवाः सैषा सर्वेषां प्राणानां योनिर्यदुलूखलꣳ शिरो वै प्राणानां योनिः ॥२२॥ तत्प्रादेशमात्रं भवति। प्रादेशमात्रमिव हि शिरश्चतुःस्रक्ति भवति चतुःस्रक्तीव हि शिरो मध्ये संगृहीतं भवति मध्ये संगृहीतमिव हि शिरः ॥२३॥ तं यत्र देवाः समस्कुर्वन्। तदस्मिन्नेतत्सर्वं मध्यतोऽदधुः प्राणमन्नमूर्ज तयैवास्मिन्नयमेतद्दधाति रेतःसिचोर्वेलया पृष्ट्यो वै रेतःसिचौ मध्यमु पृष्ट्यो मध्यत एवास्मिन्नेतत्सर्वं दधाति ॥२४॥ विष्णोः कर्माणि पश्यतेति। वीर्यं वै कर्म विष्णोर्वीर्याणि पश्यतेत्येतच्चतो व्रतानि पस्पशऽइत्यन्नं वै व्रतं यतोऽन्नꣳ स्याशयां चक्रऽइत्येतदिन्द्रस्य युज्यः सखेतीन्द्रस्य ह्येष युज्यः सखा द्विदेवत्ययोपदधाति द्वे ह्युलूखलमुमले सकृत्सादयति समानं तत्करोति समानꣳ ह्येतदन्नमेव सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥२५॥ अथोखामुपदधाति योनिर्वाऽउखा योनिमेवैतदुपदधाति तामुलूखलऽउपदधात्यन्तरिक्षं वाऽउलूखलं यद्वै किं चास्या ऊर्धमन्तरिक्षमेव तन्मध्यं वाऽअन्तरिक्षं मध्यतस्तद्योनिं दधाति तस्मात्सर्वेषां भूतानां मध्यतो योनिरुपि वनस्पतीनाम् ॥२६॥ यद्वैवोखामुपदधाति। यो वै स प्रजापतिर्व्यस्रꣳसतैषा सोखेमे वै लोका उखेमे लोकाः प्रजापतिस्तामुलूखलऽउपदधाति तदेनमेतस्मिन्त्सर्वस्मिन्प्रतिष्ठापयति प्राणोऽन्नऽऊर्ज्यथोऽएत-

स्मादेवैनमेतत्सर्वस्मादन्तर्हितं दधाति ॥ २७ ॥ अथोपशयां पिष्ट्वा । लोकभाज-मुखां कृत्वा पुरस्ताद्उखाया उपनिवपत्येष वै तस्यै लोकस्तथो खल्वेषानन्तरिता भवति ॥ २८ ॥ तदाहुः । कथमस्यैषा पक्वा शृतोपहिता भवतीति यदेव यजुष्कृता तेनाथो यद्वै किं चैतमग्निं वैश्वानरमुपनिगच्छति तत एव तत्पक्वꣳ शृतमुपहितं भवति ॥ २९ ॥ ध्रुवासि धरुणेति । तस्योक्तो बन्धुरितो जज्ञे प्रथममेभ्यो योनिभ्योऽधि ज्ञातवेदा इत्येतेभ्यो हि योनिभ्यः प्रथमं ज्ञातवेदा अजायत स गायत्र्या त्रिष्टुभानुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन्नित्येतैर्वाऽएष छन्दोभिर्देवेभ्यो हव्यं वहति प्रजानन् ॥ ३० ॥ इषे रायै रमस्व । सहसे युम्नऽऊर्जेऽअपत्यायेत्येतस्मै सर्वस्मै रमस्वेत्येतत्सम्राडसि स्वराडसीति सम्राट्ह्येष स्वराट्ह्य सारस्वतौ वोत्सौ प्रावतामिति मनो वै सरस्वान्वाक्सरस्वत्येतौ सारस्वताऽउत्सौ तौ वा प्रावतामित्येतद्द्वाभ्यामुपदधाति तस्योक्तो बन्धुरथो खल्वेवैतद्रूपं मृत्वा पश्च सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ ३१ ॥ अथैनामभिजुहोति एतद्वाऽअस्यामेतत्पूर्वꣳ रेतः सिक्तं भवति सिकतास्तदेतदभिकरोति तस्माद्योनौ रेतः सिक्तमभिक्रियतऽआज्येन जुहोति सुवेण स्वाहाकारेण द्वाभ्यामाग्नेयीभ्यां गायत्रीभ्यां तस्योक्तो बन्धुः ॥ ३२ ॥ अग्ने युङ्ध्वा हि ये तव । युङ्ध्वा हि देवहूतमानिति युक्तवतीभ्यामिदमेवैतद्योनौ रेतो युनक्ति तस्माद्योनौ रेतो युक्तं न निष्पद्यते ॥ ३३ ॥ स यदि संवत्सरभृतः स्यात् । अथाभिजुहुयात्सर्वं वै तद्यत्संवत्सरभृतः सर्वं तद्यदभिजुहोत्यथ यद्यसंवत्सरभृतः स्याद्उपैव तिष्ठेतासर्वं वै तद्यदसंवत्सरभृतोऽसर्वं तद्यदुपतिष्ठतेऽभि त्वेव जुहुयात् ॥ ३४ ॥ पशुरेष यदग्निः । सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्यावाङ् प्राणः स्वयमातृण्णा श्रोणी द्वियजुः पृष्ठयो रेतःसिचौ कोकसा विश्वज्योतिः ककुदमृतव्ये ग्रीवा अषाढा शिरः कूर्मो ये कूर्मे प्राणा ये शीर्षन्प्राणास्ते ते ॥ ३५ ॥ तं वाऽएतम् । इत ऊर्ध्वं प्राञ्चं चिनो-

त्यसौ वाऽआदित्य ऋषोऽग्निरमुं तदादित्यमित ऊर्ध्वं प्राञ्चं दधाति तस्मादसावादित्य इत ऊर्ध्वः प्राङ् धीयते ॥३६॥ अथैनं प्रसलव्यावर्तयति । अमुं तदादित्यं प्रसलव्यावर्तयति तस्मादसावादित्य इमांल्लोकान्प्रसल्व्यनुपर्यैति ॥३७॥ उदरमुखा । योनिरुलूखलमुत्तरोखा भवत्यधरमुलूखलमुत्तरꣳ क्युदरमधरा योनिः शिश्नं मुसलं तद्वृत्तमिव भवति वृत्तमिव हि शिश्नं तद्दक्षिणात उपदधाति दक्षिणतो वै वृषा योषामुपशेते यदु पशोः संस्कृतस्यान्नं तदूर्वेष्टका तस्य वाऽएतस्योत्तरोऽर्ध उदाहिततरो भवति पशुरेष यदग्निस्तस्मात्पशोः सुहितस्योत्तरः कुक्षिरुन्नततरो भवति ॥३८॥ ब्राह्मणम् ॥ १ [५. १.] ॥ ॥

पशुशीर्षाण्युपदधाति । पशवो वै पशुशीर्षाणि पशूनेवैतदुपदधाति तान्युखायामुपदधातीमे वै लोका उखा पशवः पशुशीर्षाण्येषु तल्लोकेषु पशून्दधाति तस्मादिमऽएषु लोकेषु पशवः ॥१॥ यद्वेवोखायाम् । योनिर्वाऽउखा पशवः पशुशीर्षाणि योनौ तत्पशून्प्रतिष्ठापयति तस्मादय्यमानाः पच्यमानाः पशवो न क्षीयन्ते योनौ क्येनान्प्रतिष्ठापयति ॥२॥ यद्वेव पशुशीर्षाण्युपदधाति । या वै ताः श्रिय एतानि तानि पशुशीर्षाण्यथ यानि तानि कुसिन्धान्येतास्ताः पञ्च चितयस्तथास्ताः पञ्च चितय इमे ते लोकास्तथे तऽइमे लोका एषा सोखा तथ्युखायां पशुशीर्षाण्युपदधात्येतैरेव तच्छीर्षभिरेतानि कुसिन्धानि संदधाति ॥३॥ तान्पुरस्तात्प्रतीच उपदधाति । एतद्वै यत्रैतान्प्रजापतिः पशूनालिप्सत तऽआलिप्स्यमाना उदचिक्रमिषंस्तान्प्राणेषु समगृह्णात्तान्प्राणेषु संगृह्य पुरस्तात्प्रतीच आत्मन्नधत्त ॥४॥ तद्वाऽएतत्क्रियते । यदेवा अकुर्वन्निदं न्वस्मात्ते पशवो नोच्चिक्रमिषन्ति यन्नेतत्करोति यदेवा अकुर्वंस्तत्करवाणीत्यथो प्राणेष्वेवैनानेतत्संगृह्य पुरस्तात्प्रतीच आत्मन्धत्ते ॥५॥ यद्वेव पशुशीर्षाण्युपदधाति । प्रजापतिर्वाऽइदमग्रऽआसीदेक एव सोऽकामयतान्नꣳ सृजेय प्रजायेयेति स प्राणेभ्य एवाधि प-

शून्निरमिमीत मनसः पुरुषं चन्नुषोऽश्वं प्राणाद्गाँ श्रोत्राद्विं वाचोऽजं तद्यदे-
नान्प्राणेभ्योऽधि निरमिमीत तस्मादाकुः प्राणाः पशव इति मनो वै प्राणानां
प्रथमं तद्यन्मनसः पुरुषं निरमिमीत तस्मादाकुः पुरुषः प्रथमः पशूनां वीर्यवत्तम
इति मनो वै सर्वे प्राणा मनसि हि सर्वे प्राणाः प्रतिष्ठितास्तद्यन्मनसः पुरुषं
निरमिमीत तस्मादाकुः पुरुषः सर्वे पशव इति पुरुषस्य क्वैवैते सर्वे भवन्ति
॥ ६ ॥ तदेतदन्नꣳ सृष्ट्वा । पुरस्तात्प्रत्यगात्मन्नधत्त तस्माद्यः कश्चान्नꣳ सृजते पुर-
स्तादेवैनत्प्रत्यगात्मन्धत्ते तद्वाऽउखायामुदरे वाऽउखोदरे तदन्नं दधाति ॥ ७ ॥
अथेषु हिरण्यशकलान्प्रत्यस्यति । प्राणो वै हिरण्यमथ वाऽएतेभ्यः पशुभ्यः सं-
ज्ञप्यमानेभ्य एव प्राणा उत्क्रामन्ति तद्यद्धिरण्यशकलान्प्रत्यस्यति प्राणानेवैषितद्-
धाति ॥ ८ ॥ सप्त प्रत्यस्यति । सप्त वै शीर्षन्प्राणास्तानस्मिन्नेतद्दधात्यथ यदि पञ्च
पशवः स्युः पञ्चैव कृत्वः सप्त-सप्त प्रत्यस्येत्पञ्च वाऽएतान्पशूनुपदधाति सप्त-सप्त
वाऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्दधाति ॥ ९ ॥ तद्वैकेऽपि । यद्येकः
पशुर्भवति पञ्चैव कृत्वः सप्त-सप्त प्रत्यस्यन्ति पञ्च वाऽएतान्पशूनुपदधाति सप्त-
सप्त वाऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्दध्म इति न तथा कुर्यादे-
तस्मिन्वै पशौ सर्वेषां पशूनाꣳ रूपं तद्यदेतस्मिन्प्रत्यस्यति तदेवैषु सर्वेषु प्रा-
णान्दधाति ॥ १० ॥ मुखे प्रथमं प्रत्यस्यति । सम्यक्स्रवन्ति सरितो न धेना इत्यन्नं
वै धेनास्तदिदꣳ सम्यङ्मुखमभिसꣳस्रवत्यन्तर्हृदा मनसा पूयमाना इत्यन्तर्वै हृद-
येन मनसा सतान्नं पूतं य ऋज्नुस्तस्य घृतस्य धारा अभिचाकशीमीति या एवैत-
स्मिन्नग्नावाकुतीर्होष्यन्भवति ता एतदाह हिरण्ययो वेतसो मध्येऽग्नेरिति य
एवैष हिरण्मयः पुरुषस्तमेतदाह ॥ ११ ॥ ऋचे वेतीह । प्राणो वाऽऋक्प्राणेन
ह्यर्चति रुचे वेतीह प्राणो वै रुक्प्राणेन हि रोचतेऽथो प्राणाय ह्रीदꣳ सर्वꣳ
रोचते भासे वेतीह ज्योतिषे वेतीह भास्वती ह्रीमे ज्योतिष्मती चन्नुषीऽभू-

दिद् विश्वस्य भुवनस्य वाज्ञिनमग्नेर्वैश्वानरस्य चेतीꣳहाग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वानितीꣳह विश्वावतीभ्यां विश्वꣳ हि श्रोत्रम् ॥ १२ ॥ अथ पुरुषशीर्षमुद्गृह्णाति । मक्षयत्येवैनदेतत्सꣳस्रदा असि सꣳस्राय त्वेति सर्वं वै सꣳस्रꣳ सर्वस्य दातासि सर्वस्मै त्वेत्येतत् ॥ १३ ॥ अथैनानुपदधाति । पुरुषं प्रथमं पुरुषं तद्वीर्येणाप्त्वा दधाति मध्ये पुरुषमभित इतरान्पशून्पुरुषं तत्पशूनां मध्यतोऽत्तारं दधाति तस्मात्पुरुष एव पशूनां मध्यतोऽत्ता ॥ १४ ॥ अश्वं चाविं चोत्तरत । एतस्यां तद्दिश्येतौ पशू दधाति तस्मादेतस्यां दिश्येतौ पशू भूयिष्ठौ ॥ १५ ॥ गां चाजं च दक्षिणत । एतस्यां तद्दिश्येतौ पशू दधाति तस्मादेतस्यां दिश्येतौ पशू भूयिष्ठौ ॥ १६ ॥ पयसि पुरुषमुपदधाति । पशवो वै पयो यजमानं तत्पशुषु प्रतिष्ठापयत्यादित्यं गर्भं पयसा समङ्ग्धीत्यादित्यो वाऽएष गर्भो यत्पुरुषस्तं पयसा समङ्ग्धीत्येतत्सꣳस्रस्य प्रतिमां विश्वरूपमिति पुरुषो वै सꣳस्रस्य प्रतिमा पुरुषस्य क्षेव सꣳस्रं भवति परिवृङ्ग्धि क्षरसा माभिमꣳस्था इति पर्येनं वृङ्ग्ध्यर्चिषा मैनꣳ हिꣳसीरित्येतद्धतायुषं कृणुहि चीयमान इति पुरुषं तत्पशूनाꣳ शतायुं करोति तस्मात्पुरुष एव पशूनाꣳ शतायुः ॥ १७ ॥ अथोत्तरतोऽश्वम् । वातस्य ज्रूतिमिति वातस्य वाऽएष ज्रूतिर्यदश्वो वरुणस्य नाभिमिति वारुणो क्ष्यश्वोऽश्वं जज्ञानꣳ सरिरस्य मध्यऽइत्यापो वै सरिरमप्सुजा उ वाऽअश्वः शिशुं नदीनाꣳ हरिमद्रिबुध्नमिति गिरिर्वाऽअद्रिर्गिरिबुधा उ वाऽआपोऽग्रे मा हिꣳसीः परमे व्योमन्नितीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतत् ॥ १८ ॥ अथ दक्षिणतो गाम् । अजस्रमिन्दुमरुषमिति सोमो वाऽइन्दुः स क्वैष सोमोऽजस्रो यद्गौर्भुरण्युमिति भर्तारमित्येतदग्निमीडे पूर्वचित्तिं नमोभिरित्याग्नेयो वै गौः पूर्वचित्तिमिति प्राञ्चꣳ क्ष्यग्निमुद्धरन्ति प्राञ्चमुपचरन्ति स पर्वभिर्ऋतुशः कल्पमान इति यद्वाऽएष चीयते तदेष पर्वभिर्ऋतुशः कल्पते गां मा हिꣳसीरदितिं विराजमिति

विराड्वै गौरन्नं वै विराडन्नमु गौः ॥ ११ ॥ अथोत्तरतोऽविम् । वडूत्रीं त्वष्टुर्वरुणस्य नाभिमिति वारुणी च हि त्वाष्ट्री चाविरविं जज्ञानाꣳ रजसः परस्मादिति श्रोत्रं वै परꣳ रजो दिशो वै श्रोत्रं दिशः परꣳ रजो महीꣳ साह्वसीमसुरस्य मायामिति महतीꣳ साह्वसीमसुरस्य मायामित्येतदग्रे मा हिꣳसीः परमे व्योमन्नितीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतत् ॥ २० ॥ अथ दक्षिणतोऽजम् । योऽअग्निरग्नेरध्यजायतेत्यग्निर्वाऽएषोऽग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परीति यद्वै प्रजापतेः शोकादजायत तद्दिवश्च पृथिव्यै च शोकादजायत येन प्रजा विश्वकर्मा जजानेति वाग्वाऽअजो वाचो वै प्रजा विश्वकर्मा जजान तमग्रे हेडः परि ते वृणक्तिति यथैव यजुस्तथा बन्धुः ॥ २१ ॥ तऽएते पशवः । नानानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना क्षेते पशवः ॥ २२ ॥ अथ पुरुषशीर्षमभिजुहोति । आकृतिर्वै यज्ञः पुरुषं तत्पशूनां यज्ञियं करोति तस्मात्पुरुष एव पशूनां यजते ॥ २३ ॥ यद्वैवैनदभिजुहोति । शीर्षन्तद्वीर्यं दधात्याज्येन जुहोति वज्रो वाऽआज्यं वीर्यं वै वज्रो वीर्यमेवास्मिन्नेतद्दधाति स्वाहाकारेण वृषा वै स्वाहाकारो वीर्यं वै वृषा वीर्यमेवास्मिन्नेतद्दधाति त्रिष्टुभा वज्रो वै त्रिष्टुब्वीर्यं वै वज्रो वीर्यं त्रिष्टुब्वीर्येणैवास्मिन्नेतद्वीर्यं दधाति ॥ २४ ॥ स वाऽअर्धर्चमनुद्रुत्य स्वाहाकरोति । अस्थि वाऽऋगिदं तद्दीर्षकपालं विस्राप्य यदिदमन्तरतः शीर्ष्णो वीर्यं तदस्मिन्दधाति ॥ २५ ॥ अथोत्तरमर्धर्चमनुद्रुत्य स्वाहाकरोति । इदं तद्दीर्षकपालꣳ संधाय यदिदमुपरिष्टाच्छीर्ष्णो वीर्यं तदस्मिन्दधाति ॥ २६ ॥ चित्रं देवानामुदगादनीकमिति । असौ वाऽआदित्य एष पुरुषस्तदेतच्चित्रं देवानामुदेत्यनीकं चक्षुर्मित्रस्य वरुणस्याग्नेरित्युभयेषाꣳ हैतद्देवमनुष्याणां चक्षुरापा द्यावापृथिवीऽअन्तरिक्षमित्युच्यन्वाऽएष इमांल्लोकानापूरयति सूर्य आत्मा जगतस्तस्थुषश्चेत्येष ह्यस्य सर्वस्यात्मा यच्च जगच्च तिष्ठति ॥ २७ ॥ अथो-

त्सर्गैरुपतिष्ठत । ऽएतद्वै यत्रैतान्प्रजापतिः पशूनालिप्सत तऽआलिप्स्यमाना अशोचंस्तेषामेतैरुत्सर्गैः शुचं पाप्मानमपाकृंस्तथैवैषामयमेतदेतैरुत्सर्गैः शुचं पाप्मानमपकृन्ति ॥ २८ ॥ तद्वैके । यं-यमेव पशुमुपदधति तस्य-तस्य शुचमुत्सृजन्ति नेकुचं पाप्मानमभ्युपदधामहाऽइति ते ह ते शुचं पाप्मानमभ्युपदधति याऽ हि पूर्वस्य शुचमुत्सृजन्ति तामुत्तरेण सकृोपदधति ॥ २९ ॥ विपरिक्रामम् हैकऽउपतिष्ठन्ते । ऊर्धाऽ शुचमुत्सृजाम इति ते ह ते शुचं पाप्मानमनूत्यूर्ध्वा क्वेतेन कर्मणीत्यूर्ध्वामु शुचमुत्सृजन्ति ॥ ३० ॥ बाक्येनैवाग्निमुत्सृजेत् । इमे वै लोका एषोऽग्निरेभ्यस्तल्लोकेभ्यो बर्हिर्धा शुचं दधाति बर्हिर्वेदीयं वै वेदिरस्यै तद्बर्हिर्धा शुचं दधात्युदङ् तिष्ठन्नेतस्याऽ ह दिश्येते पशवस्तस्यैते पशवस्तदेवैषितकुचं दधाति ॥ ३१ ॥ पुरुषस्य प्रथममुत्सृजति । तऽ हि प्रथममुपदधातीमं मा हिꣳसीर्द्विपादं पशुमिति द्विपाद्वाऽएष पशुर्यत्पुरुषस्तं मा हिꣳसीरित्येतत्सकृत्स्वाद्मो मेधाय चीयमान इति हिरण्यशकलैर्वाऽएष सकृत्स्वाद्मो मेधायेत्यन्नायेत्येतन्मयुं पशुं मेधमग्ने जुषस्वेति किम्पुरुषो वै मयुः किम्पुरुषमग्ने जुषस्वेत्येतत्तेन चिन्वानस्तन्वो निषीदेत्यात्मा वै तनूस्तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतन्मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छविति तन्मयौ च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥ ३२ ॥ अथाश्वस्य । इमं मा हिꣳसीरेकशफं पशुमित्येकशफो वाऽएष पशुर्यदश्वस्तं मा हिꣳसीरित्येतत्कनिक्रदं वाजिनं वाजिनेष्विति कनिक्रदो वाऽएष वाज्यु वाजिनेषु गौरमारण्यमनु ते दिशामीति तदस्मै गौरमारण्यमनुदिशति तेन चिन्वानस्तन्वो निषीदेति तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतद्गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छविति तद्गौरे च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥ ३३ ॥ अथ गोः । इमꣳ साकꣳसꣳ शतधारमुत्समिति साकꣳसो वाऽएष शतधार उत्सो यद्गौर्व्यच्यमानꣳ सरिरस्य मध्यऽइतीमे वै लोकाः सरिरमुपजीव्यमानमेषु लोकेषि-

त्येतद्घृतं दुह्यानामदितिं जनायेति घृतं वाऽएषादितिर्जनाय दुह्येऽग्ने मा हिꣳसीः परमे व्योमन्नितीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतद्भवय-मारण्यमनु ते दिशामीति तदस्मै गवयमारण्यमनुदिशति तेन चिन्वानस्तन्वो निषीदेति तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतद्भवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्विति तद्भवये च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३४॥ अथावेः । इ-ममूर्णायुमित्यूर्णावलमित्येतद्धरिणस्य नाभिमिति वारुणो व्यविस्त्वचं पशूनां द्वि-पदां चतुष्पदामित्युभयेषाꣳ हैष पशूनां त्वग्द्विपदां च चतुष्पदां च त्वष्टुः प्रजानां प्रथमं जनित्रमित्येतद्वै त्वष्टा प्रथमꣳ रूपं विचकाराग्ने मा हिꣳसीः परमे व्योमन्नि-तीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतदुष्ट्रमारण्यमनु ते दि-शामीति तदस्माऽउष्ट्रमारण्यमनुदिशति तेन चिन्वानस्तन्वो निषीदेति तेन चि-न्वान आत्मानꣳ संस्कुरुष्वेत्येतदुष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्विति तदुष्ट्रे च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३५॥ अथाजस्य । अजो व्यग्नेरजनिष्ट शो काद्दिति यद्वै प्रजापतेः शोकादजायत तदग्नेः शोकादजायत सोऽअपश्यदजनिता-रमग्यऽइति प्रजापतिर्वै जनिता सोऽपश्यत्प्रजापतिमग्यऽइत्येतत्तेन देवा देवता-मग्यऽआयन्निति वाग्वाऽअजो वाचो वै देवा देवतामग्यमायंस्तेन रोहमायन्नुप मेध्यास इति स्वर्गो वै लोको रोहस्तेन स्वर्गं लोकमायन्नुप मेध्यास इत्येतद्ह-रभमारण्यमनु ते दिशामीति तदस्मै शरभमारण्यमनुदिशति तेन चिन्वानस्तन्वो निषीदेति तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतद्धरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्विति तद्धरभे च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३६॥ तदाहुः । यां वै तत्प्रजापतिरेतेषां पशूनाꣳ शुचं पाप्मानमपाहंस्तऽएते पञ्च पशवोऽभवंस्त ऽएतऽउत्क्रान्तमेधा अमेध्या अयज्ञियास्तेषां ब्राह्मणो नाश्नीयात्तानेतस्यां दिशि द-धाति तस्मादेतस्यां दिशि पर्जन्यो न वर्षुको यत्रैते भवन्ति ॥३७॥ प्रत्येत्याग्निमु-

पतिष्ठते । एतद्वाऽएतद्यथायथं करोति यदग्नौ सामिचिते बर्हिर्वेद्येति तस्माऽएवैतन्निक्रुतेऽह्निऽसायाऽआग्नेय्याग्नेयऽएवैतन्निक्रुते गायत्र्या गायत्र्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्माऽएतन्निक्रुतेऽनिरुक्तया सर्वं वाऽअनिरुक्तꣳ सर्वेणैवास्माऽएतन्निक्रुते यविष्ठवत्येतद्वास्य प्रियं धाम यद्यविष्ठ इति यद्वै ज्ञात इदꣳ सर्वमयुवत तस्माद्यविष्ठः ॥३८॥ त्वं यविष्ठ दाशुष इति । यज्ञमानो वै दाश्वान्नँः पाह्रीति मनुष्या वै नरः शृणुधी गिर इति शृणु न इमाꣳ स्तुतिमित्येतद्वक्ता तोकमुत त्मनेति प्रजा वै तोकꣳ रत्न प्रजां चात्मानं चेत्येतत् ॥३९॥ आरुक्ष्याग्निं ज्ञघनेन स्वयमातृणां परीत्यापस्या उपदधाति । आप एता यदपस्या अथ वाऽएतेभ्यः पशुभ्य आप उत्क्रान्ता भवन्ति तद्यदपस्या उपदधात्येष्वेवैतत्पशुष्वपो दधात्यनन्तर्हिताः पशुभ्य उपदधात्यनन्तर्हितास्तत्पशुभ्योऽपो दधाति पञ्च-पञ्चोपदधाति पञ्च क्ष्येते पशवः सर्वत उपदधाति सर्वत एवैष्वेतदपो दधाति ॥४०॥ तद्याः पञ्चदश पूर्वाः । ता अपस्या वज्रो वाऽआपो वज्रः पञ्चदशस्तस्माद्येनापो यन्त्यपैव तत्र पाप्मानं घ्नन्ति वज्रो ह्येव तस्यार्धस्य पाप्मानमपहन्ति तस्माद्बर्हिषत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदिति ॥४१॥ अथ याः पञ्चोत्तराः । ताश्छन्दस्याः पशवो वै छन्दाꣳस्यन्नं पशवोऽन्नमु पशोर्माꣳसमथ वाऽएतेभ्यः पशुभ्यो माꣳसान्युत्क्रान्तानि भवन्ति तद्यच्छन्दस्या उपदधात्येष्वेवैतत्पशुषु माꣳसानि दधात्यनन्तर्हिताः पशुभ्य उपदधात्यनन्तर्हितानि तत्पशुभ्यो माꣳसानि दधात्यन्तरा अपस्या भवन्ति बाह्याश्छन्दस्या अन्तरा क्ष्यापो बाह्यानि माꣳसानि ॥४२॥ तदाहुः । यदिमा आप एतानि माꣳसान्यथ क्व त्वक्व लोमेत्यन्नं वाव पशोस्त्वगन्नं लोम तद्यच्छन्दस्या उपदधाति सैव पशोस्त्वक्छ्लोमाथो यान्यमून्युखायामञ्जलोमानि तानि लोमानि बाह्योखा भवत्यन्तराणि पशुशीर्षाणि बाह्यानि हि लोमान्यन्तर आत्मा यदीतरेण यदीतरेणेति ह स्माह शाण्डिल्यः सर्वानेव वयं कृ-

त्स्नान्यशून्त्संस्कुर्म इति ॥४३॥ यद्वेवापस्या उपदधाति । प्रजापतेर्विस्रस्तादाप आयंस्तास्वितास्वविशथ्यद्विशत्तस्माद्विꣳशतिस्तं। अस्याङ्गुलिभ्योऽध्यस्रवन्नन्तो वाऽअङ्गुलयोऽन्तत एवास्मात्ता आप आयन् ॥४४॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ या अस्मात्ता आप आयन्नेतास्ता अपस्यास्तथ्यदेता उपदधाति या एवास्मात्ता आप आयंस्ता अस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति ॥४५॥ अपां त्वेमत्सादयामीति । वायुर्वाऽअपामेम यदा क्वेवैष इतश्चेतश्च वात्यथापो यन्ति वायौ ताꣳ सादयति ॥४६॥ अपां त्वोब्मत्सादयामीति । ओषधयो वाऽअपामोब्म यत्र क्वाप उन्दन्त्यस्तिष्ठन्ति तदोषधयो ज्ञायन्तऽओषधिषु ताꣳ सादयति ॥४७॥ अपां त्वा भस्मत्सादयामीति । अभ्रं वाऽअपां भस्माभ्रे ताꣳ सादयति ॥४८॥ अपां त्वा ज्योतिषि सादयामीति । विद्युद्वाऽअपां ज्योतिर्विद्युति ताꣳ सादयति ॥४९॥ अपां त्वायने सादयामीति । इयं वाऽअपामयनमस्याꣳ क्वापो यन्त्यस्यां ताꣳ सादयति तया अस्यैतेभ्यो रूपेभ्य आप आयंस्ता अस्मिन्नेतत्प्रतिदधात्यथोऽएतान्येवास्मिन्नेतद्रूपाणि दधाति ॥५०॥ अर्णवे त्वा सदने सादयामीति । प्राणो वाऽअर्णवः प्राणे ताꣳ सादयति ॥५१॥ समुद्रे त्वा सदने सादयामीति । मनो वै समुद्रो मनसो वै समुद्राद्वाचाभ्रया देवास्त्रयीं विद्यां निरखनंस्तदेष श्लोकोऽभ्युक्तो ये समुद्रान्निरखनन्देवास्तोदृणाभिरभ्रिभिः सुदेवोऽअद्य तद्विद्याद्यत्र निर्वपणं दधुरिति मनः समुद्रो वाक्तोदृणाभिस्त्रयी विद्या निर्वपणमेतदेष श्लोकोऽभ्युक्तो मनसि ताꣳ सादयति ॥५२॥ सरिरे त्वा सदने सादयामीति । वाग्वै सरिरं वाचि ताꣳ सादयति ॥५३॥ अपां त्वा क्षये सादयामीति । चक्षुर्वाऽअपां क्षयस्तत्र हि सर्वदैवापः क्षियन्ति चक्षुषि ताꣳ सादयति ॥५४॥ अपां त्वा सधिषि सादयामीति । श्रोत्रं वाऽअपाꣳ सधिः श्रोत्रे ताꣳ सादयति तया अस्यैतेभ्यो रूपेभ्य आप आयंस्ता अस्मिन्नेतत्प्रतिदधात्यथोऽएतान्ये-

वास्मिन्नेतद्रूपाणि दधाति ॥५५॥ अपां वा सदने सादयामीति । द्यौर्वाऽअपाꣳ सदनं दिवि क्ष्यापः सन्ना दिवि ताꣳ सादयति ॥५६॥ अपां वा सधस्थे सादयामीति अन्तरिक्षं वा अपाꣳ सधस्थमन्तरिक्षे ताꣳ सादयति ॥५७॥ अपां वा योनौ सादयामीति । समुद्रो वाऽअपां योनिः समुद्रे ताꣳ सादयति ॥५८॥ अपां वा पुरीषे सादयामीति । सिकता वाऽअपां पुरीषꣳ सिकतासु ताꣳ सादयति ॥५९॥ अपां वा पाथसि सादयामीति । अन्नं वाऽअपां पाथोऽन्ने ताꣳ सादयति तस्या अस्यैतेभ्यो रूपेभ्य आप आयंस्ता अस्मिन्नेतत्प्रतिदधात्यथोऽएतान्येवास्मिन्नेतद्रूपाणि दधाति ॥६०॥ गायत्रेण वा छन्दसा सादयामि । त्रैष्टुभेन वा छन्दसा सादयामि जागतेन वा छन्दसा सादयाम्यानुष्टुभेन वा छन्दसा सादयामि पाङ्क्तेन वा छन्दसा सादयामीति तस्या अस्यैतेभ्यश्छन्दोभ्य आप आयंस्ता अस्मिन्नेतत्प्रतिदधात्यथोऽएतान्येवास्मिन्नेतच्छन्दाꣳसि दधाति ॥६१॥ ता एता अङ्गुलयः । ताः सर्वत उपदधाति सर्वतो ह्येमा अङ्गुलयोऽन्तेषूपदधात्यन्तेषु ह्येमा अङ्गुलयश्चतुर्धोपदधाति चतुर्धा ह्येमा अङ्गुलयः पञ्च-पञ्चोपदधाति पञ्च-पञ्च ह्येमा अङ्गुलयो नानोपदधाति नाना ह्येमा अङ्गुलयः सकृत्सकृत्सादयति समानं तत्करोति तस्मात्समानसम्बन्धनाः ॥६२॥ ब्राह्मणम् ॥ २ [५. २.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या१००॥ पञ्चमोऽध्यायः [४८.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या३१८ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे हस्तिघटनाम सप्तमं काण्डं समाप्तम् ॥७॥

EXTRACTS FROM THE COMMENTARY OF SÂYAṆÂCÂRYA.

उखासम्भरणाख्यं तु भस्मावहरणान्तकम् । चित्यस्याग्नेर्ब्राह्मणमङ्गं प्रोक्तं षष्ठेऽथ सप्तमे ॥ इष्टकाचयनात्पूर्वमग्निस्थानस्य संस्क्रिया । कर्तव्या यासन (?) सेह विस्पष्टमीर्यते ॥ ॥ अग्निं चिनुत इत्यनारभ्य विहितस्याग्निचयनस्याथा नोऽग्निमग्निष्टोमेनानुयजतीत्यादिवाक्येन सोमयागशेषत्वावगतेः साग्निकस्य सम्बन्धिनां गार्हपत्यादिधिष्ण्यानां सर्वेषामेव चयनं सं-

स्कुर्यवान् (AB. सस्कर्तव्यवात्?)। तत्र धिष्ण्येषु गार्हपत्याख्यस्य प्राथम्यात्तत्र प्रथमं चयनं विधित्सुस्ततः प्राच्यान्भूसंस्कारान्विधास्यन् (°च्याभू° AB.) तत्स्थानस्य समन्त्रकं व्युद्वहनं विधत्ते गार्हपत्यं चेष्यन्निति । गृहपतिना संयुक्तोऽग्निर्गार्हपत्यः इह तु तस्याग्नेराधारभूतो भूप्रदेशः आधाराधेययोरभेदोपचारेणाधेयवाचिना शब्देनोच्यते संस्कर्तव्यवप्रतिपत्तये। एतत्स्थानं गार्हपत्यस्याग्नेरधिकरणमतश्च चयनेन संस्कर्तव्यम्। यतोऽस्मिन्स्थाने चयनं कर्तव्यमतो हेतोरतत्पलाशवृक्षस्य शाखया व्युद्वहति लोष्टतृणादि संमार्ज्ञनेनापसारयति । गार्हपत्यस्याग्नेर्यत्स्थानं चयने संस्कारति मयात्र सोमेन यष्टव्यमिति तत्तेन व्युद्वहनेन अवस्यति निश्चिनोत्येव यद्वा गार्हपत्यस्य यच्चयनं तदेव देवयजनाध्यवसानम् तथा च ये केचिदग्निचितः अग्निं चितवन्तो यजमानाः तेऽस्यामेव पृथिव्यामवसिताः अवसानं प्राप्तास्तत्रैव प्रवर्तन्ते तत्तथा सति पलाशशाखया यत्स्थानं व्युद्वहतीति यत् तत्तेन अवसितानेव तत्र स्थितान्प्राक्तनान्यजमानान्व्युद्वहति विविधं निरस्यति व्युद्वहनं कुर्वतो यजमानस्याभिप्रायमाह नेदिति अग्निचयनमनुष्ठाय तत्रैवावस्थितान्यजमानानत्रैवाध्यवस्यामि तेषामुपरि अध्यवसानमवस्थानं न करिष्यामि ॥१॥ अवस्यत्यस्मिन्नित्यवसानं स्थानम् ॥२॥ यमः पितॄणां राजेति श्रुतिः । सविदानः संज्ञानानः ऐकमत्यं प्राप्तः सन् ॥३॥ अवसितानवसाय स्थितान्। उदस्यति उत्क्षिपति परित्यजति ॥५॥ क्षारमृत्तिका ऊषाः । ऊषरदेशस्य पशुभिरुपजीव्यत्वादूषाणां पशुव्यपदेशः ॥६॥ उल्वं गर्भवेष्टनम् ॥७॥ विक्रियते उत्पाद्यते ॥१०॥ यातयाम गतसारम् ॥११॥ एनं गार्हपत्यप्रदेशम्। परिश्रयन्त्येभिरिति परिश्रितः शर्कारापर्यायाः सूक्ष्मपाषाणाः तैः परिश्रयन्ति परिवेष्टयन्ति ॥१२॥ दक्षिणावृत् प्रदक्षिणमावृत् आवर्तनं यथा भवति तथा । खाते देशे परिश्रयणं विधाय स्तौति खातेनेति गार्हपत्यायजनस्य परितः खातेन प्रदेशेन परिश्रिद्भिः परिश्रयेत् ॥१३॥ ऊर्ध्व एव विज्ञते व्याप्नोति न तु तिर्यङ्ङ कृत्स्नां भूमिमावृणोति विज्ञतिव्याप्तिकर्मा । युगपदेवेदं सर्वं जगत्समुद्रो निर्मृज्यात् (!) निःशेषेण प्रक्षालयेत् स च समुद्रे प्रतिलीयेत । सादनं सूददोहसाधिवदनं चेष्टकाधर्मणा प्रसक्तमत्र निषेधति । उपधानकाले मन्त्रेणोपधाय ततस्तया [देवतये]त्युपहितस्य सादनम् ता अस्य सूददोहस इति मन्त्रः सूददोहाः तेनाधिवदनमुपरिष्टाद्वदनं सर्वेष्टकासाधारणो मन्त्रः तदुभयं परिश्रिदुपधाने न कर्तव्यम् । असन्ना ह्यापः क्वचित्क्वचित्सीदन्ति प्रवहणशीलत्वात् ॥१४॥ प्राण एव सूददोहाः अस्थिसंस्तुतासु परिश्रित्सु नासौ कर्तव्यः न खल्वस्थिषु प्राणोऽस्ति नाडीष्वेव हि तस्य संचारः । चित स्थेत्येकेनैव यजुषा ब्रह्मणां परिश्रितां स्थापनम् चोदितत्वात्परिश्रितामिष्टकात्वम् अत एवाहापस्तम्बः स्क्रावो (!) सप्त स्वयमातृष्णाः शर्करा हिरण्येष्टकाः पञ्च घृतेष्टका दूर्वास्तम्बः (पू°) कूर्म उलूखलमुसलं शूर्पमग्मानः पशुशिरांसि सर्पशिरश्चामृन्मयीरिष्टका इति । आप इति यत् एकरूपा एव हि लक्ष्यन्ते अत एकेन यजुषा परिश्रिद्रूपाणामपामुपधानं युक्तम् ॥१५॥ परिश्रितः शर्करा योनिः गर्भनिर्गमणमार्गः ॥१६॥ एनं व्युद्वहनादिभिः संस्कृतं गार्हपत्यदेशमिष्टकाभिश्चिनोति ॥१७॥ गार्हपत्यायतनस्य मध्ये प्रथमं चतस्रः प्रागायता इष्टका उपदध्यात् ततः पश्चाद्भागे तिर्यगायते द्वे तथा चतसृणां पुरस्तादपि । स आत्मा मध्यदेह इत्यर्थः बगसृङ्मांसास्थिभेदेन मनोबुद्ध्यहङ्कारचित्तैर्वा ज्ञाग्रदवस्थाचतुष्टयेन वा आत्मनश्चातुर्विध्यम्। सक्थिः श्रोणिः तेन च पादो लक्ष्यते ॥१८॥

गर्भाशयेऽवस्थितं रेतो गर्भः यादृशाकारं विक्रियते विशिष्टावयवं क्रियते जाननसमयेऽपि तादृगाकारविशिष्टमेवापत्यं जायते । तत् तत्र एतमग्निमत्र गार्हपत्यायतने यद्यस्मात्पक्त्रपुरुषवत्तं विकरोति सूक्ष्मरूपेण निर्मिमीते तस्मादेषोऽमुत्राहवनीयस्थाने पक्त्रपुरुषवान्जायते जायमान उपलभ्यते ॥ १९ ॥ एनमनभिव्यक्तरूपमग्निममुत्राहवनीयस्थाने अभिव्यक्तावयवं पश्यन्ति ॥ २० ॥ आत्मसंस्तुता इष्टकाः पूर्वमुपदध्यात् । उत्तरार्ध्यामुत्तरार्धे भवामुत्तमभागेऽवस्थिताम् । तथैव खल्वस्य दक्षिणतोऽवस्थितस्याधर्येरिषा अग्निः अभ्यात्ममात्माभिमुखमेव चितो भवति ॥ २१ ॥ प्रावणेभिरिति मन्त्रगतः प्रशब्दः प्रायणरूपं प्रायणस्य प्रगमनस्य प्रारम्भस्य रूपम् गार्हपत्यविविश्वाग्नेरग्निचयनस्य (? °चितिश्चा°?) प्रायणं प्रारम्भः अतः प्रशब्दोपेतो (°शाब्दाप्रवणे) मन्त्रोऽत्र योज्यः ॥ २५ ॥ नाना पृथगेकैकेष्टकामुपदध्यात् ततो यज्ञात्मन् आत्मस्थिताः नानाविधाः कामाः तान्सर्वानसंकीर्णं (°न् अस्रकी° AB.) पृथगेव स्थापयति । तया देवतयेति यत्साद्नं तच्चतसृणामिष्टकानां सम्भूय सकृदेव कर्तव्यम् । संतनोति संयोजयति ॥ २६ ॥ मध्येष्टकोपधानानन्तर्यमथशब्दार्थः । गार्हपत्यस्थानस्य पश्चात्परिक्रम्य उत्तरस्यां दिशि दक्षिणामुखः आसीनः सन्नपरयोः पश्चात्ययोरिष्टकयोर्दक्षिणां दक्षिणभागस्थामिष्टकां प्रथममुपदधाति इडामग्न ऽइति मन्त्रेण ॥ २७ ॥ सनातन इति ऋतव्यपदव्याख्यानमृत्वात्मकस्य कालस्य सर्वदा विद्यमानत्वात्तत्र भवोऽग्निः सनातनो नित्यः । यजुर्मन्त्रो यथैव प्रतिपादयति तथैव तस्य बन्धुः वधूनीयं (? बन्धनीयं ?) व्याख्यातः स्पष्टार्थतया न पृथग्व्याख्यायते ॥ २८ ॥ अस्याग्नेः सक्थ्यौ श्रोण्यौ । इमे मनुष्यसम्बन्धिन्यौ । नाना पृथगसंश्लिष्टे । अग्रप्रदेशेन तयोः परस्परसंसर्गं विधत्ते अग्राभ्यामिति आत्मसमीपऽग्रदेशः तत्रैते संस्पृष्टे भवतः ॥ २९ ॥ येन मार्गेण पश्चात्ययोरुपधाने परिक्रमणं कृतं तेनैव पुनर्दक्षिणतः परिक्रम्य ॥ ३० ॥ दक्षिणावृत्प्रादक्षिण्येन वर्तनम् ॥ ३१ ॥ पञ्च कृत्व इति मध्यऽउपधेयस्येष्टकाचतुष्टयस्यैकं सादनमन्यासां चतसृणीति पञ्च भवन्ति । पञ्चचितिकोऽग्निरिति पञ्च चितयः प्रस्तारा यस्मिन्स तथोक्तः । चित्यस्याग्नेः चितिपुरीषाणि त्रयोदश भवन्ति आदितश्चतस्रश्चितयः पुरीषनिवपनीतः (!) स्तोमभागीता (!) पञ्चमी चितिः तदनन्तरभाव्येकं पुरीषं नाकसत्प्रभृतिपुरीषनिवपनी ता (!) षष्ठी चितिरित्यादिना ॥ ३२ ॥ अवशिष्टे गार्हपत्यचितिस्थाने लोकम्पृणाख्यामिष्टकामुपदधाति । see ८. ७. २. १ । सकृदुच्चारितेन लोकं पृणेति मन्त्रेण तिसृणां युगपदुपधानं विधत्ते तिस्रः पूर्वा इति । अथ तेनैव सकृदुच्चारितेन मन्त्रेण दशानामिष्टकानामुपधानं विधत्ते दशोत्तरा इति उत्तरा उपरिभाविनीः । त्रेधाविभागपक्षमाह द्वे वाग्रऽइति तं लौकिकेन निदर्शनेनोपपादयति (निदेश° Codd.) एवं होति यत्र हि काष्ठादिभिश्चितिर्निर्मीयते तत्र एवमेव हि चितिं चिन्वन्ति मूलाग्रभागयोर्द्वे काष्ठे प्रथमं तिर्यक्स्थापयन्ति पश्चात्तयोरुपर्युपर्यन्यानि सर्वाणि प्रागग्राण्यवशिष्टानि स्थापयन्ति उपरिष्टाच्चलनाभावायैकं (? वाव्वेर्क Codd.) पुनः स्थापयन्ति ॥ ३३ ॥ गार्हपत्यचितेः परितश्चिताः शर्करा अप्येकविंशतिसंख्याका एव भवन्ति । अयमेव चीयमानोऽग्निरमुतोऽमुत्र परिश्रित्स्वेकविंशः एकविंशतिसंख्यापूरकः अधिः सप्तम्यर्थानुवादी । यस्मादेताः परिश्रित इष्टकाश्च एवं प्रत्येकमेकविंशतिसंख्याका उपदधाति एतेन एतावेव अग्न्यादित्यौ अन्योऽन्यस्मिन्प्रतिष्ठापयति । इमावग्न्यादित्यावुभावप्यत्र चित्यावग्नी संनिहितौ भवतः तत्राहवनीयचितिरूपेणादित्यो वर्तते गार्हपत्यचितिरूपेणाग्निः ॥ ३५ ॥ इष्टकासंधिषु क्षिद्रपूरणार्थाः

पांसवः पुरीषम् तत्रासामुपरि प्रक्षिपति । उत्तरवेद्यर्थानां पांसूनां निर्हरणस्थानं चाबालः उत्तरवेद्यंसदेशः तस्य या वेला समीपं ततः पुरीषमाहरेत् । आहवनीयाग्न्याधारोत्तरवेदिहेतुत्वाच्चाबालस्याग्न्यात्मकता तथैव खलु सति अस्य चित्याग्नेरेतत्पुरीषमप्याग्नेयमग्निसम्बन्धमेव भवति ॥ इत्थं पुरीषाला गार्हपत्यचितिरुक्ता अथ तस्याः प्रान्तेषु साम्यमाह समम्बिला समं समानं बाह्याभ्यन्तरभावेन न्यूनाधिकरहितं विलं परितः प्रान्तदेशो यस्याः सा ॥ ३६ ॥ चतुरस्रिव्यामः तिर्यक्प्रसारितौ बाहू यावत्परिमाणौ भवतः तस्य परिमाणस्य माते (!) ऽस्मिन्बाहुद्वयमिति व्युत्पत्त्या व्यायाम इति संज्ञा स एवात्र वर्णलोपेन व्याम इत्युच्यते ॥ ३७ ॥ गार्हपत्यचितिरूपस्याग्नेरुख्याग्नेश्च (च)तुर्भिर्मन्त्रैः संसर्जनं विधत्ते अथैनाविति चित्योख्यरूपावग्नी संगमयति इष्टकाभिश्चिते गार्हपत्याधिहत्ये (?) उख्यमग्निं स्थापयति । आभ्यामग्निभ्यां कर्तरि तृतीया अग्निद्वयकर्तृकं संज्ञानं परस्परैकमत्यम् ॥ ३८ ॥ The explanation of k. ३१-३३ is wanting in AB. । तत्पय उखाया मध्ये आसिञ्चति यथा तत्पयः प्रति उपधानसमये पुरुषशीर्षमुपदध्यात्तथेत्यर्थः ॥ ३३ ॥ १ ॥ १ ॥

उख्यरूपेण संस्कृतस्याग्नेर्विराड्रूपप्रजापत्यात्मकतां वक्ष्यन् तस्य प्रजापतिसंस्कृतिवक्तुकामस्तत्क्रोरविश्लेषं प्रतिपादयति प्रजापतिरिति आत्तः सन्विस्रस्तावयवोऽभवत् । यच्चक्षुरध्यशेत चक्षुरधि चक्षुषोर्मध्ये चक्षुषो ज्योतिरवस्थितमभवत् तस्मात् ज्योतिषोऽस्य प्रजापतेरेतं स्रुतमभवत् । प्रतिष्ठास्पदम् ॥ १ ॥ इतोऽस्मात्प्रजापतेः । स च संस्कृतो नोऽस्माकं पुनः प्रतिष्ठा आश्रयो भविष्यति ॥ २ ॥ यत्खलु संवत्सरस्य मध्ये व्रीहियवादिरूपमन्नं पच्यते तदात्मना प्रजापतिविस्रस्तमन्नं परिणतमभवत् ॥ ५ ॥ प्रावृञ्जन् प्रतपनेन समस्कुर्वन् एनं प्रवृक्तं प्रजापतिं योऽग्निरोहति संक्रामति तदात्मना प्राङ्निष्क्रान्तः प्राण एव एनं प्रजापतिं पुनरापद्यत प्राप्नोत् । उदश्रयन् उच्छ्रितमकुर्वन् ॥ ६ ॥ प्रतिष्ठाशब्देन पादाऽउच्यते । पार्थिवोऽग्निस्तस्यावाचीनः प्राणः येन मूत्रपुरीषादिकमुत्सृज्यते । आत्मा मध्यदेहः । यस्मात्तस्माच्चक्षुषोऽन्नमस्रवत्तस्मात्कारणात्तच्चक्षूरूपश्चन्द्रमाः अतिशयेन मीलितः सूर्यादल्पप्रकाशो दृश्यते ॥ ७ ॥ एषा प्रजापत्यात्मिका । न केवलमतीतकालऽएव प्रजापतेः प्रतिष्ठारूपता वर्तमानभविष्यत्कालयोरपीत्याह सैवेयमिति ॥ ८ ॥ योऽयमग्निः गार्हपत्यचितिरूपोऽग्निः । तयोः तादात्म्योपपत्तये प्रजापतेरवस्थाविशेषं तत्रापि दर्शयति तयदेषेति तत्तत्र आहवनीये ॥ ९ ॥ संस्कारसाम्यमाह तामुखामग्नौ आहवनीये प्रवृणक्ति प्रतपति । एनामुखां प्रतप्तामग्निरोहति आक्रमते अन्तर्जायतऽइति यत् । यज्ञमानः सौवर्णं रुक्मं कण्ठे सूत्रेण बद्धा तस्योपरि तमुख्यं बिभर्तीति यत् । उखायामग्नेरोहणानन्तरं तस्मिन्याः समिध आदधाति ॥ १० ॥ समिधामाधानं तस्मिन्संवत्सरे प्रत्यहं कालत्रयेऽपि कर्तव्यम् । रुक्मप्रतिमोचनोख्यभरणादीनां संवत्सरकालव्याप्तिमाह तान्येतानीति तानि रुक्मप्रतिमोचनोख्यभरणसामेदाधानविष्णुक्रमणादीनि पूर्वोक्तानि एतानि प्राणवीर्यान्नरूपेणानुक्रान्तानीत्यर्थः(!) । अत्र प्रतिपुस्तके पत्रकृषं (°त्रद्वयं A.) गतम् (A. B.) । the explanation of क° ११-१३. is wanting ॥ तयोरेकामनुष्टुभं बुद्ध्या विविच्याहवनीयस्थानं (विचिव्या°) हरन्ति अनुसंधानाय हरेयुः । इहास्मिन्गार्हपत्यस्थाने ॥ १३ ॥ आहवनीयगार्हपत्ययोर्मध्ये यदस्ति स्थानमाग्नीध्रीयाख्यमेतदेव सा यजुर्द्व्यात्मिकानुष्टुप् । तनीयः तनुतरोऽल्पपरिमाण एव ॥ २० ॥ एष उख्योऽग्निः ॥ २१ ॥ सैषा गार्ह-

पत्यचितिर्बृहत्येव सम्पद्यतऽइति शेषः । न चैकस्मादक्षराद्विद्यमानाच्छन्दो व्येति विगृह्णति अन्यथाभवति न च द्वाभ्यामक्षराभ्याम् एकेन द्वाभ्यां वा न्यूनं छन्दो न वैकल्यं प्राप्नोतीत्यर्थः तथा चैषां पञ्चत्रिंशत्संख्या[ग्राम]पि बृहत्येवेति तत्सम्पत्ति[र्]विरुद्धा । यथैव लोकवत्तथैवात्रापि योनिरूपायां गार्हपत्यचितौ यत् यस्मादेतां बृहतीं करोति तस्मादित उत्पद्यमान एष संचितो महाग्निरपि बृहतीमभिसम्पद्यते तां सम्पत्तिं यजुष्मतीनां षष्ट्युत्तरत्रिशतसंख्यया दश बृहत्यः सम्पद्यन्तऽइति दशमकाण्डे दर्शयिष्यामः ॥२२॥ गार्हपत्याग्नीध्रीयाहवनीयानां क्रमेण पृथिव्यन्तरिक्षद्युलोकात्मत्वात् क्रमेणैव तेषां संस्कारो युक्त इत्याशङ्क्य व्युत्क्रमानुष्ठानमुपपादयति तदाङ्गरिति । गार्हपत्याहवनीययोरन्तरालवर्तिनः आग्नीध्रीया धिष्ण्याः । गार्हपत्यचयनानन्तरं धिष्ण्यनिवपनमकृत्वा अथ कस्माद्येतोराहवनीयचयनमेव क्रियते अथानन्तरमेव धिष्ण्यान्निवपति उपसर्गश्रवणाद्योग्यक्रियाध्याहारः (but there is no upasarga here!) । इत्थमनुष्ठाने कारणं वक्तुमाह सह हेति ॥२३॥२॥१॥

अथ गार्हपत्यचयनानन्तरमतोऽस्मात्स्थानान्निर्ऋतिदेवता इष्टका हरन्ति नैर्ऋत्यां दिशि निरस्येयुः । अनतिदृश्यमतिक्रम्य ॥१॥ निर्ऋतिः दक्षिणापरदिगधिदेवता ॥३॥ विंशत्यधिकशताङ्गुलिपरिमितः पुरुषः तस्य दशमोंऽशः पादः । अधस्पदं पादस्याधस्तात् । एतेन पादमात्र इत्यत्र पादशब्दोऽङ्घ्रिपर्यायो न चतुर्थांशवाचकः । आलिखितादिकं लक्षणं तद्रहिताः ॥७॥ इरिणं निस्तृणमूषरस्थानम् श्वभ्रप्रदेशो वा श्वभ्राकारेण प्रदीर्णः प्रदेशः । तत् तस्मिन्स्थाने । अवदीर्यते भिद्यते । पराचोः पराञ्चनाः स्वस्वानभिमुखाः लोकभाजः स्थानभाजः ॥८॥ प्रलायं प्रलीय अदृश्यो भूत्वा एति गच्छति प्रलायमिति णमुलन्तः एवं वमपि प्रलयनमदर्शनं गच्छ ॥१॥ यो निःशेषेण ऋच्छति आर्तिं प्राप्नोति तं निरर्पयति निर्ऋतं प्रयुङ्क्ते ॥११॥ उपहिताया इष्टकायाः प्रथममुपस्पर्शनं कर्तव्यम् पश्चात्तया देवतयेति सादनम् ततस्ता अस्येति मन्त्रेण सूददोहसाधिवदनम् तदेतत्त्रितयमत्र न कर्तव्यम् ॥१२॥ परस्ताद्विप्रकृष्टादेशादारभ्यावाचोरात्माभिमुखमुत्तरोत्तरमात्माभिमुखीरुपदधति ॥१३॥ अथ समिदाधानानन्तरमुख्याग्निधारणार्था या आसन्दी यच्च (? पत्र) भरणसमये उख्यधारणार्थं शिक्यं यश्च सौवर्णस्य रुक्मस्य प्रतिमोचनार्थं पाशः सूत्रं ये च इण्डूवे अग्निसहिताया उखाया उभयतो धारणाय तृणमयौ पिण्डौ तत्सर्वं नैर्ऋतीनां परार्धे पश्चाद्भागे न्यस्यति क्षिपेत् । आसन्द्यादीनामुख्याग्नितन्त्रत्वात्प्रासनीयत्वं स्पष्टमित्यभिप्रेत्य रुक्मपाशस्य प्रासनीयत्वमुपपादयति नैर्ऋतो वाऽइति । आयुषो दातृत्वाद्ग्निरेवायुः । एतं पितुमग्निचयनफलभूतमन्नं प्रसूतो निर्ऋतिदेवतयानुज्ञातः सन्हे यजमान वमशान ॥१५॥ स्वात्मन इष्टकानां च मध्ये उदकपूर्णं चमसं निषिञ्चति । भूत्यै श्रिये भवनाय ऐश्वर्याय । प्रतिनिवृत्य नैर्ऋतस्थानस्येक्षणमकृत्वा शालामागच्छन्ति ॥१७॥ गार्हपत्यम् । the explanation of the end of क्° १८ to २, २ is wanting in AB. —

एतत् एतर्हि एतस्मिन्नवसरे खलु एनं पितरं प्रज्ञापतिं विस्रस्तावयवं चयनेन संस्करिष्यन्तो देवाः पुरस्तात्ततः प्रागेव सीरलक्षणेनास्त्रेण समूढमकुर्वन् । इरा अन्नम् ॥२॥ परिसीर्यं परितः सीरस्य योजनायोपयुज्यमानं दाम मुञ्जतृणैर्निर्मितं त्रिगुणं च कर्तव्यम् ॥३॥ चेष्यमाणस्याग्नेर्यावान्भूभागः शैल्वेन मानेन चतुरश्रीकृतः तस्य दक्षिणां श्रोणिं जघनेन दक्षिणापरकोणस्य (? परमेतस्य) पश्चात्तिष्ठन् उत्तरांसस्याग्निक्षेत्रसम्बन्धिन उत्तरपूर्वकोणस्य

पुरस्तायुज्यमानं सीरं युगबलीवर्दादिभिः सह ज्ञा (!) बध्यमानं मन्त्रद्वयेनाभिमन्त्रयते । अत्र च सीरयोज्ञनस्य तदभिमन्त्रणस्य(च) भिन्नदेशकर्तव्यतया यौगपद्याय कर्तृभेदोऽवसीयते तत्राभिमन्त्रणसंस्कार्यतया प्रधानत्वात्सीरयोज्ञनमध्वर्युः कुर्यात्तत्संस्कारात्मकमभिमन्त्रणं तद्द्वितीयः प्रतिप्रस्थाता कुर्यात् । सुखहेतुत्वाद्यज्ञः खलु सुखशब्दाभिधेयः ॥४॥ अत्र प्रतिपुस्तके पत्रद्वयं गतत् (AB.) । the explanation of क° ५-१२ is wanting । चतसृषु दिक्षु प्रादक्षिण्येन कृतं कर्षणमभिनयेन स्तौति इत्यग्रऽइति । दक्षिणावृत्प्रादक्षिण्येनावृत्ति ॥१२॥ यजुर्मन्त्रेण कर्षणं प्रकारान्तरेण स्तौति तद्वाऽइति ॥१३॥ सीतानां संवत्सरसम्बन्धिनां मासानां द्वादशसंख्यासाम्यात्कृत्स्ने संवत्सरे यदेव व्रीहियवादिकमन्नं पच्यते तत्सर्वमस्मिन्नग्नौ एतदेतेन द्वादशसीताकर्षणेन दधाति । पूर्ववदत्राप्यभिनयेन कर्षणप्रकारं निर्दिश्य स्तौति इत्यग्रऽइति । इत्यनेन प्रकारेण अग्रे प्रथममात्मनो दक्षिणार्धमारभ्योत्तरार्धपर्यन्तं कर्षणं कुर्यात् अथानन्तरमित्यनेन प्रकारेण दक्षिणां श्रोणिमारभ्योत्तरांसपर्यन्तमक्षणया विकृषेत् अथानन्तरमित्यनेन प्रकारेण पश्चाद्भागमारभ्य पूर्वार्धपर्यन्तं विकृषेत् एतदनन्तरमित्यनेन प्रकारेणोत्तरां श्रोणिमारभ्य दक्षिणांसपर्यन्तं विकृषेत् ॥२४॥ स्तोत्रियानवकात्मको हि त्रिवृत्स्तोमः अग्निरपि (ग्नेरपि) रुद्रादिनामाष्टकाभिधेयैरष्टाभिरग्निभूपैः स्वात्मना च नवसंख्योपेतत्वात्त्रिवृत् see ६, १.३.१८. ॥१५॥ षोडशावयवसमुदायो हि स्थूलशरीराभिमानी विराडात्मकः प्रजापतिः ज्ञानेन्द्रियाणि पञ्च तथा कर्मेन्द्रियाणि मन एकं पञ्चभिर्भूतैः (?र्भृतैः) प्राणैर्वा सह तस्य षोडश कलाः ॥१७॥ विकर्षणं प्रकारान्तरेण स्तोतुमनुवदति यद्वेवेति । चक्षुरादिगोलकात्मिकासु रेखासु ॥१८॥ चक्षुः श्रोत्रं नासिका मुखम् ॥१९॥ प्राणाः प्राणवृत्तयः प्राणापानादिलक्षणाः मनोबुद्ध्यादिरूपा अन्तःकरणवृत्तयश्च ॥२०॥ तं कामं कर्षणलक्षणं प्रयोज्ञनम् । ऋत्विक्परिक्रयहेतवो दातव्या गावो दक्षिणाः तासां यः कालो माध्यन्दिनसवनात्मकः तस्मिंस्तानन्डुहः अनुदिशेत् दद्यात् ॥२१॥२॥२॥

अत्र प्रतिपुस्तके पत्रत्रयं गतम् (AB.) । the explanation of ३. १. to ४. १४ is wanting । [ओ]षधिरूपस्य वीज्ञस्य वर्ज्ञनं विधत्ते तेषामेकमिति । उद्धरेत्पृथक्कुर्यात् नावपेत् ॥१४॥ एवमृग्द्वयं व्याख्याय उत्तरासामप्येवमेव व्याख्यानमित्यतिदिशति ता इति ता एता वीज्ञावपनार्था ऋचः एकव्याख्याना: समानव्याख्याना: अतो न पृथग्व्याख्यायन्ते अतिदिष्टं व्याख्यानं योज्ञयति एतमेवाभीति इमं मेऽग्रगदं कृतेति योऽयं पुरुषोऽनुक्रान्तः एतमेव भेषज्ञैर्युक्तं कुर्यात् तेन च भैषज्येन एतं व्याधिग्रस्तं पारयेत् पारमारोग्यं प्रापयेत् । एवं सति एनं पुरुषविधं चेष्यमाणमग्निमेतदेतेनानुष्टुप्छन्दसः प्रयोगेन सर्वेणैव भेषज्ञेन भिषज्यति ॥२८॥ विहितानां कर्मणां समन्त्रकामन्त्रकत्वं मन्भूय स्तौति अथात इति ॥२९॥४॥२॥

साग्निचित्यक्रतौ सोमक्रयस्य कालं विधाय स्तौति चित इति ॥१॥ तस्मादयमात्मा देहः आत्तं शिरःप्रभृति पादपर्यन्तं रसेन व्याप्तो दृश्यते ॥३॥ आतिथ्यहविष्कृदन्ते आहवनीयचितिसंस्कारं विधित्सुः ततः प्राक्तनं चोदकप्राप्तं प्रयोगज्ञातमनुक्रामति । तस्य कर्मणः हविष्कृता हविष्कृदेहेति मन्त्रेण प्राङ्नियमितां वाचं विसृज्ञते । अस्मिन्समये आहवनीयचितिसंस्कारं विधित्सुस्तदुपोद्घातत्वेन सौमिकाग्निकयोः कर्मणोः परस्परं व्यतिषङ्गं विधत्ते अथ वा इति अथ खल्वेतदेव कुर्वन्नध्वर्युर्व्यतिषज्ञति । सौमिकाग्निकभेदेन द्विविधस्य कर्मणः

एकीभवनार्थम् ॥४॥ वाग्विसर्जनानन्तरमाहवनीयसमीपदेशगमनम् ॥६॥ (गार्हपत्यवत्) आहवनीयस्थानस्यापि पलाशशाखया व्युह्यनं एकीयमतेनोपन्यस्य दूषयति तद्वैकऽइति । गार्हपत्यचयनेन हि यागदेशमध्यवस्यति अध्यवसानसमये भूशोधनार्थं व्युह्यनमपेक्षितम् ॥७॥ एवकारव्यवच्छेद्यमाह नाहवनीयऽइति । ऊषरप्रदेशस्य पशुभिर्लेक्ष्यमानत्वादूषाणां पश्चात्मकत्वम् ॥८॥ सितभास्वरत्वादिरूपसाम्यात्सिकतानां रेतस्त्वम् ॥९॥ भिन्नमन्त्राभ्याम् अग्नेर्भस्मासीति हि मन्त्रेण गार्हपत्ये सिकतानिवपनं विहितम् (१. १. ११.) अग्ने तव श्रव इत्याहवनीये सिकतानिवपनस्य मन्त्रो विधास्यते (क° २१.) । इमाः परिश्रितः विशिष्टरूपाः कृता भवेयुः ॥१०॥ आहवनीयचितौ सिकतानिवपनात्पूर्वं परिश्रित्संज्ञकान् शर्कराप्रपर्यायत्वदूपाषाणानभिमन्त्रयते चित स्थेति मन्त्रेण (१. १. १२.) ॥११॥ आहवनीयस्थानन्युप्तानामेव सिकतानामाप्ययनवतीभ्यां (!) आप्यायतिधातुनिष्पन्नशब्दयुक्ताभ्यामाप्यायस्व सं तऽइत्येताभ्यामृग्भ्यामभिमर्शनं कर्तव्यम् ॥१२॥ लोकसंस्तुताभिः तिसृभिः स्वयमातृण्णाभिर्युक्तत्वात् (भिपु°) लोकसारप्रसिद्धा (? सएवसिद्धा) लोष्टरूपा इष्टका लोकेष्टकाः (!) ॥१३॥ वेदेर्बाह्यदेशेनेष्टकानामाहरणं विधाय स्तौति बाह्येनेति ॥१४॥ आहरणस्याग्निक्षेत्रापेक्षया बहिर्देशसम्बन्धो वेद्यपेक्षयापि तथात्वं विधत्ते बहिर्वेदेरिति ॥१५॥ समस्कुर्वन् चित्याग्निरूपेण संस्कुर्वन्नः ॥१६॥ इयं वेदिलक्षणा भूमिर्वित्तिः लब्धव्यधनरूपा ॥१९॥ पूर्वस्या दिशः सकाशाल्लोकेष्टकां स्फ्येनाहरति । शर्कराणामभ्यन्तरदेशे आत्मनि स्थापयेत् ॥२०॥ इषितः प्रेरितः । पक्षसंधिमन्तरेण दक्षिणपक्षस्य आत्मभागस्य च यः संधिप्रदेशस्तस्याभ्यन्तरे आत्मभागे स्थापयेत् ॥२१॥ अत्राग्निशब्देन तदधिष्ठिता भूमिरेवाभेदोपचारेणोच्यते । पक्ष्याकारस्य चित्याग्नेः पुक्[स्य]त्मभागस्य च यः संधिः तमन्तरेण तस्य मध्ये आत्मन्नात्मनि । यज्ञपथः अग्नेः पश्चात्यो देशो हविर्धानादि ततः सकाशात् नेदृसमाहरणि रसस्याक्तत्वान्नत्र करिष्यमाणो यज्ञो नीरसः स्यात् । इतः प्रतीच्या दिशः इव न तु साक्षात्प्रतीच्या दिशः उत्तरापरस्या दिश आहरेत् ॥२२॥ इदं ज्ञातः इदानीं ज्ञातमात्र एव महानविवेको भूत्वा सर्वं जगदैष्णात् व्याप्नोत् । तस्यां दिशि सिकतानां प्रध्वंसनं विधत्ते जहामीति । सेदिः अवसादापरपर्याया हानिः । तस्मादेतस्यामुत्तरस्यां दिशि सर्वाः प्रजाः अशनेक्षा क्षुधा तया पीडिता दृश्यन्ते ॥२३॥ ताः प्राच्यादिदिक्षु क्रमेणोपहिता एता इष्टका दिगात्मिकाः । नाना पृथक् । आसीनात् ॥२४॥ अग्निक्षेत्रस्यात्मभागऽएवोपधानम् । यजुष्मत्यः कारणभूतैर्यजुर्मन्त्रैर्युक्ताः । आत्मभागऽएव हि यजुर्मन्त्रोपधेया वक्ष्यमाणा इष्टका उपधीयन्ते ॥२५॥ स्वयंमृतः खलु अग्न्यादिपाकानपेक्षः । तत एव तस्मादेव संसर्गात् ॥२६॥ षडशीत्यङ्गुलपरिमितं युगम् उक्तं व्यापस्तम्बेन अष्टाशीतिशतमीषा तिर्यगक्षश्चतुःशतं षडशीतिर्युगं वास्येति । सर्वतः सर्वासु दिक्षु तावन्मात्राम् । अनयोः प्रमाणयोर्मध्ये येन प्रकारेण कामयेत । तस्योक्तो बन्धुः (१. १. १०.) ॥२७॥ निखिलयागोत्पत्तिकारणाहवनीयस्थानत्वाद्उत्तरवेदिरपि योनिः अत एवाग्निप्रणयनीयास्वाम्नायते ऊर्णावत्तं प्रथमः सीद् योनिमिति ॥२८॥ इरज्यतिः कण्डूवादिर्दीप्तिमत्कर्मा । पृणाति फलेन संयोजयसि ॥३२॥ इष्कर्तारम् उपसर्गस्यादिलोपश्छान्दसः निष्कर्तारम् तथैव तैत्तिरीयैराम्नायते ॥३३॥ पृष्नयः सूक्ष्मपरिमाणविन्दुरूपाः ॥३६॥ अथैतदुपधानकारणस्य षड्वचस्य यच्छन्दः तस्य समुद्रियमिति नाम कस्मान्निमित्तादिति पृच्छति ॥३९॥ नन्वनक्षानां

सिकतानामुपधानं पृथक्पृथक् कथं समन्वकं स्यादिति पृच्छति मनो वाऽइत्युत्तरम् मन एव हि सर्वासां सिकतानां साधारणं यजुः तदिदं मनोरूपं यजुः सर्वाः सिकता अनुलक्ष्य विभवति प्रत्येकं व्याप्तुं शक्नोति ॥४०॥ शरोरस्य (शनोर्) हि प्रकृतिमहदादिचतुर्विंशतितत्त्वात्मत्वात्तदुत्पन्नं (? शतितत्वात्मततदु°) रेतः पञ्चविंशम् ॥४१॥ सिकतानामपीष्टकात्वादितरेष्टकास्विव प्रसक्तं सादनं निषेधति न सादयतीति तया देवतयेति मन्त्रेण स्थापनं सादनान्तं न कर्तव्यम् ॥४४॥ आप्यायनवतोभ्याम् (!) । यत्सौमोभ्यामभिमर्शनमेष (न एष) एव सिकतोपधाने सूददोहाः ता अस्य सूददोहस इति मन्त्रकरणकमधिवदनम् ॥४५॥ अस्य लतारूपेण वर्तमानस्य सोमस्य द्युलोके उत्कृष्टं अवो नाम चन्द्रमा एवोच्यते । अमुष्मिन्स्वर्गलोके स खलु चन्द्रमाः एनं सोममममृतात्मना पीयमानः सन् आवयति प्रख्यापयति ॥४६॥१॥३॥

एवमाहवनीयदेशस्य संस्कारसमनन्तरं कर्तव्यं प्राकृतं प्रयोगज्ञातमनुक्रामति प्रागुक्तमाग्निकसौमिकयोः कर्मणोर्व्यतिषङ्गं दर्शयितुम् आप्यायनवतोभ्यामित्यादिना । प्रत्येत्य उत्तरवेदिदेशात्प्राग्वंशं प्रत्यागत्य । अनन्तरमाग्निकस्य कर्मणः प्रवेशं दर्शयति अथैतामिति अथशब्दः प्रथमोपसदानन्तर्ये आनडुहे लोहिते चर्मणि एतां प्रथमां चितिं प्रथमचित्यर्थमिष्टकासमूहं समवशमयन्ति सम्यग्घृतावोक्षणेन तप्तानामिष्टकानां शमनं कुर्युः । लोमतः लोमप्रदेशे ॥१॥ गार्हपत्यचितेरग्नेण पूर्वभागे महावेदिमध्ये । तत्तत्र प्रथमचितेः पर्याप्तमिष्टकासंघातं (संघ्यंशं) अवशमयन्ति संशान्तौष्ण्यं (? सौणंत्यौष्णं) कुर्युः । अनतिक्रमणाय श्रैष्ठ्याय । न होति इष्टकाभ्योऽन्यत्पुरोडाशादिकं किमपि हविः आज्यकरणकेन (वज्याष्टकर°) प्रोक्षणेन संस्क्रियते उदकेनैव हि तस्य प्रोक्षणम् । चितेः पादसंस्पर्शविरहरूपानभ्यारोहणाय ॥२॥ अभ्यक्तमभितः सर्वत आज्येन सिक्तम् अभिघारितमुपरि घृतधारया संस्कृतम् ॥३॥ प्रथमचितिप्रोक्षणसमये द्वितीयतृतीयादिचित्यर्थानामिष्टकानां प्रोक्षणं विधित्सन्ब्रह्मवादिनां प्रश्नमवतारयति तदाङ्गरिति अस्योत्तरमाह अत्रास्मिन्समये सर्वासां चितीनां सम्बन्धिनीरिष्टकाः आज्येन दर्भाग्रैः प्रोक्षतीति यदस्ति एवमेव अनेनैव प्रकारेण खल्वस्य यज्ञमानस्य एष सर्वः सप्तचितिकोऽग्निः प्रोक्षितो भवति एवमेव चर्माधिकरणं प्रण[यनमश्वसहितं प्रण]यनं चास्मादेव प्रोक्षणात्सिध्यति । उद्यक्तीति चर्मणः इष्टका उद्गृह्णन्ति यज्ञमानपरिचारकाः ॥४॥ अथाहवनीयदेशं प्रति नयनं विधित्सुस्तदर्थं होतारमुद्दिश्याध्वर्योः सम्प्रैषवचनं विधत्ते अथाहेति । बङ्गवचनान्तेनाग्निशब्देनाग्नयवयवाश्वितयो विवक्षिताः आहवनीयदेशं प्रति प्राचोनं ह्रियमाणेभ्यः इष्टकारूपेभ्योऽग्नयवयवेभ्यः हे होतरनुब्रूहि । सम्प्रैषानन्तरं प्रथमचित्यर्थानामिष्टकानां पूर्वस्यां दिशि हरणं विधित्सुस्तदाख्यायिकया स्तौति एतद्वै देवानिति एतत् एतस्मिन्समये । एतान् चितिरूपानग्नीन् ॥६॥ सम्प्रैषं व्याचष्टे । सप्तचित्यभिप्रायेण बङ्गवचनम् । यस्मादध्वर्युः इमा इष्टकाः प्रहरति पुरस्तादाहवनीयदेशं प्रापयति अतः प्राचीनं ह्रियन्तऽइति प्रह्रियमाणास्तेऽग्नय उच्यन्ते ॥७॥ तत्र होत्रा अनुवक्तव्यामृचमेकीयमतेनोपन्यस्य व्याचष्टे तद्वैकऽइति एके के चन ऋक्शाखाध्यायिनः । प्रावणोभिरिति पदस्यार्थमाह प्रायणरूपमिति प्रायणस्य प्रगमनकर्मप्रवृत्तेः प्रवणोभिरिति प्रशब्दोपेतं (यश°) पदं सूचकं रूपम् । कामवतीः कामशब्दोपेताः ॥८॥ त्रिस्त्रिवारमनूक्ताभ्यामाद्योत्तमाभ्यां सह । अनुवचनं कुर्वन्होता स्वयम-

पोष्टका अनुगच्छति ॥१॥ इष्टकाहरणसमये श्वेतस्याश्वस्य पुरस्तान्नयनम्। अश्वप्रमुखास्ते ऋत्विग्यजमानाः इष्टकाभिः सह अग्निक्षेत्रसमीपमागच्छेयुः आगत्य च अग्निपुच्छस्य दक्षिणभागे चर्मणा चितिमुपनिदधति चित्यर्थमानीता इष्टका स्थापयन्ति ॥१०॥ अग्निक्षेत्रस्य उत्तरभागे परिश्रितामग्नेश्च मध्यदेशे। प्रसृजति विमुञ्चति ॥११॥ पुच्छस्य दक्षिणतो निहितामेतां चितिम् ॥१२॥ एताः उपधास्यमानाः तिस्रः स्वयमातृण्णाख्याः शर्कराः क्षुद्रपाषाणाः पृथिव्यादिलोकत्रयात्मिकाः। मणिवत्समावयते सम्यक्प्रोतान्करोति ॥१३॥ पक्षिनीपत्रे। दुष्टाक्षिभ्यां युक्तो भवितुं शीलवान्। ऋत्वा आर्तिं गमयित्वा ॥१४॥ अध्वर्युणा आज्ञप्तिप्रदानसमये अग्निक्षेत्रस्याधिरोहणमपेक्षितम् अग्निक्षेत्रस्योपरि पादनिधानलक्षणं क्रमणमधिरोहणम्। आत्मभागेन मध्यदेशेन। आरोहणानन्तरमुत्तरवेदिसंस्काररूपं कर्मजातं कृत्वा अध्वर्युः स्वात्मनि स्वकीयमग्निं गृह्णीते यथा बहिश्चित्याग्निप्रदेशे न निष्क्रामति तथा मयि गृह्णामीति मन्त्रपदेन (°पेन) स्वात्मनि धारयेत्। यत्सत्यं सामेति प्रसिद्धं सामवेदे तद्यजमानो गायेत् ॥१७॥ अस्तमयसमीपे। रात्रिं सचन्ते समवयन्तीति रात्रिसाचयानि रात्रौ संचरणशीलानि। सोऽश्वः पुनर्विपल्ययते विपरिवर्तते उपधानकाले कर्मणोऽङ्गभावं प्रतिपद्यतऽइत्यर्थः ॥१९॥२॥३॥

अग्नि(ग्र)हणसत्यसामगानपुष्करपर्णोपधानानि पूर्वस्मिन्ब्राह्मणे संग्रहेण विहितानि इदानीं तानि क्रमेण प्रपञ्चयति। चयनं करिष्यन्नध्वर्युः आत्मनि अग्निं गृह्णीते मन्त्रेण धारयेत् ॥१॥ अग्निग्रहणं च तिष्ठता कर्तव्यम् चयनसमयेऽनूपवेशनम् यत्र-यत्रेष्टकामुपदधाति तं देशं गत्वा समीपे उपविश्य चिनुयात्। विज्ञायते प्रसूते ॥२॥ इत्याङ्गः कथयन्ति ब्रह्मवादिनः। तेन सत्यसाम्नोऽग्रतो गानेन अस्य सर्वस्य जगतः अप एवाग्रं मुखमकुर्वन् देवा इत्यर्थः ॥६॥ तमश्च उपोदासृज[मित्यादिना] (३. २. १४.) पुष्करपर्णस्याग्नियोनित्वम् ॥७॥ आपो वै पुष्करमित्यादि पुष्करं सर्वतोमुखमित्यादिनिगदप्रसिद्धियोतको वैशब्दः। तासामपां प्रथमसृष्टानामियं पृथिवी पर्णस्थानीया। अस्यै अस्याः पृथिव्याः सकाशात् मृन्मयीभिरिष्टकाभिः कृत्स्नोऽग्निर्व्यायितश्चीयते (!) अतः पृथिवीमुपहितवान्भवतीत्यर्थः। सत्यसामगानाद्व्यवहितां तां पुष्करपर्णेष्टकामुपदध्यात्। अज्ञातमां प्रत्यक्षतमामापोरूपेण वर्तमाना (°तमा आपोरूपेण वर्तमाना) ॥८॥ पिन्वते सिञ्चति। चतुर्थपादावसाने पुष्करपर्णमुपदधानः तस्यानुलोमेन विमार्जनं कुर्यात्। उत्तरार्धे वैराजपादाभ्यां द्वेऽक्षरेऽधिके तदाधिक्यं स्वराडाख्यस्य छन्दसो लक्षणम् ॥९॥ आकाशात्मना (!) स्तुतस्य पुष्करपर्णस्य मध्ये सूर्यमण्डलात्मना ध्यातव्यस्य रुक्मस्योपधानम्। वर्तुलाकृतिः एकविंशतिसंख्याकैः पुलकैर्युक्तः। उपधानसमये निर्वाधानामधोभागेऽवस्थानं यथा भवति तथा कर्तव्यम् ॥१०॥ पुष्करनामनिर्वचनेन प्रतिष्ठारूपतां ब्रुवन्स्तौति। समुदौहन् समुत्क्षिप्तवान्। ॥१३॥ प्रजिज्ञानिषमाणः प्रज्ञानितुं प्रादुर्भवितुमुदेतमिङ्कन् अवेनत् कान्तियुक्तोऽभवत् वेनति दीप्यतऽइति वेन इति (वेनमिति) सूर्यस्य नाम सम्पन्नम् ॥१४॥ रुक्ममध्ये हिरण्मयपुरुषस्योपधानम्। स प्रजापतिः स्थूलप्रपञ्चाभिमानिविराडात्मकः स एवाग्निः सूक्ष्मप्रपञ्चाभिमानिहिरण्यगर्भात्मकः यजमानस्य तद्रूपप्राप्तेर्यजमानोऽपि सः। यस्माच्चित्याग्निरूपेण संस्कर्तव्यः प्रजापतिः पुरुषविधः तत्प्रतिरूपत्वाद्धिरण्मयस्योपधेयस्य पुरुषाकृतिर्युक्ता ॥१५॥ रम्या रमणीया ज्ञानक्रियाशक्तिरूपा सूक्ष्मा तनूः। चक्षुराद्यभिमानिदेवताः आदित्यादयः अजङ्गरत्यजन्। तं तथाविधं प्रजापतिं

देवास्तत्पुत्राः यस्मिन्देशे चित्याग्निरूपेण संस्कृतवन्तः । पुरा निष्क्रान्ता इन्द्रियदेवताः अरमन्त पुनः प्रविश्यातिष्ठन् ॥१६॥ आदित्यमण्डलमध्ये यो हिरण्मयः पुरुषः आस्ते ॥१७॥ उत्तानमुपरिष्टान्मुखम् । इमौ रुक्मपुरुषौ अर्वाञ्चौ अधोमुखौ । पराञ्चौ ऊर्ध्वमुखौ । सम्यञ्चौ परस्पराभिमुखौ । तस्मादेष मण्डलात्मकः सूर्यः किरणैरधोमुखस्तपति स एव रुक्मात्मकः एष प्राणात्मको मण्डलान्तर्वर्ती पुरुषः प्राणिनां प्राणैः सह ऊर्ध्वो वर्तते ॥१८॥ यदिदं चीयते आहवनीयस्य स्थानम् यच्चादो गार्हपत्याख्यं स्थानं पूर्वमचीयत ॥२०॥ नीरसं फलकं काष्ठमयम् ॥२२॥ अयं यजमानः । पुरुषेऽन्वारब्धे तत्साम गातव्यम् चित्रलिङ्गके मन्त्रे चित्रं देवानामित्यादिके । लोके यावन्ति हि चित्राणि विचित्ररूपाणि सन्ति तत्सर्वसमुदायरूपः चित्योऽग्निः ॥२४॥ यजमानकर्तृकं पुरुषस्योपस्थानम् एतमात्मानं हिरण्मयपुरुषमुपधाय ॥२५॥ अस्मै हिरण्मयपुरुषरूपायाग्नये । तैर्लोकैः (!) एनमनमयन् (!) वशीकृतवन्तः ॥२६॥ व्यद्धो (व्योो) व्यदनशीलो (ध्यदन°) दन्दशूकादिः शिमिदा विषहेतुर्लूताव्रिश्चिकादिः ॥२७॥ अयज्ञियं यज्ञानर्हम् ॥३०॥ एनं हिरण्मयपुरुषमभिजुहोति अभितः सर्वासु दिक्षु उपरिहोमेन संस्कुर्यात् । आङ्गतिपञ्चकार्थं पञ्चगृहीतमाज्यं स्रुचि गृहीत्वा । सर्वासु दिक्षु परिसृप्य-परिसृप्य तां च दिशं परिक्रम्य आभीद्ध्ये णमुल् ॥३२॥ एतान्राज्ञोघ्नान्पञ्च मन्त्रान् ॥३३॥ परिसर्पणप्रकारो निरूप्यते प्रथमं प्रतीच्यां दिशि प्राङ्मुख उपविष्टः सन्प्रथमेन मन्त्रेण पुरुषमभिजुहोति । अनुपरीत्य दक्षिणदिक्सकाशात्प्रतीचीं दिशं गत्वा ॥३५॥ जुह्वर्दक्षिणो हस्तः उपभृत्सव्यः । स्रुचोर्बाह्वङ्गरूपताप्रसिद्धिमभिनयेन दर्शयति इदमेवेति इदमेव हस्ताग्रं मुष्टिरूपेण (मुसतिरू°) दृश्यमानं कपृत्सलं (!) स्रुगग्रस्थानीयं (सृगस्था°) अयमेव बाह्वर्दण्डः अतः स्रुग्रूपता (सृग्रयता) अनयोः प्रत्यक्षसिद्धा । पार्श्वतः दक्षिणोत्तरपार्श्वयोः ॥३६॥ उदरमत् उत्कृष्टमरमत सुखमवात्सीत् ॥३१॥ तस्मिन्नुपधाने मन्त्रान्तरमपि दर्शयति अग्निर्मूर्धेति ॥४१॥ सोऽध्वर्युः उपहितस्य हिरण्मयपुरुष[स्य] उरः सम्प्रति उरःप्रदेशेन समानं स्रुचावुपदध्यात् (वृचानुप°) । तं पुरुषमाकाश्याभिज्ञाप्य(ज्ञाव) यस्मिन्स्थाने उपहितं स्रुग्द्वयं तदुरःप्रदेशमभ्याप्नोति तत्र चिह्नं कृत्वा एने स्रुचावुपदध्यात् एष उरोदेशः (द्वोदेशः) खलु तयोर्बाह्वङ्गसंस्तुतयोर्लोकः स्थानम् ॥४६॥ एतस्योपहितस्य हिरण्मयपुरुषस्य । स्रुग्व्यतिरिक्तबाह्वोरपि करणे अधिकाङ्गता स्यात् । अस्य पुरुषस्य सम्बन्धिनौ बाह्वङ्गे अनुलक्ष्येते (क्षयते) स्रुचौ उपधातव्ये अतो न तत्प्रतिनिधिरि[ति] तयोरनिवृत्तिः । बाह्वोः सद्भावं प्रकारान्तरेणोपपादयति अथोऽएताविति अपि च एतौ बाह्वङ्गे पक्त्री पक्त्र्यात्मनश्चित्याग्नेः पक्षस्थानीयौ (? पक्षिस्थानांसौ) । संस्कारस्य संस्कार्यमन्तरेणानुपपत्तेः (°रस्य संस्कारपर्यमन्त°) संस्कार्यौ बाह्वङ्गे अवश्यं कर्तव्यावित्याह अथो यानीत्यादिना रूपाणि पशुशीर्षादीनि (°र्षाणिवीनि) स्तोमास्त्रिवृत्पञ्चदशादयः बृहद्रथंतरादीनि पृष्ठानि छन्दांसि गायत्र्यादीनि एते च स्तोमादयः स्वस्वलिङ्गैर्मन्त्रैरिष्टकारूपेणोपधेयाः यान्येतानि पशुशीर्षादीनि सर्वाण्यध्वर्युरुपधास्यन्भवति (सर्वाएवर्वर्यु°) एतयोरेव पक्षसंस्तुतयोर्बाह्वोः सा संस्कृतिः गुणोत्कर्षहेतुः संस्कारः एतयोर्वृद्धिः अभिवृद्धिहेतुः ॥४५॥१॥४॥

अस्मिन्ब्राह्मणे स्वयमातृण्णाद्वैष्टकायुपधानं विधास्यते । या स्वत एव स्निग्धयुक्ता शर्करा क्षुद्रपाषाणविशेषः सा स्वयमातृण्णा तां स्वयमातृण्णाख्यामिष्टकां हिरण्मये पुरुषेऽउपद-

ध्यात्। उत्तरां पुरुषस्योपरि ॥१॥ प्राणो नाम शरीरात्तर्वर्तमानो वायुः स हि आत्मनोऽर्थे (!) स्वयमातृन्ते आतर्दनं कुरुते शरीरात्तर्नाडीष्ववकाशं कृत्वा प्रवर्तते ॥२॥ प्रतिष्ठारूपमङ्गं स्वयमभिपद्य गृहीत्वा ॥३॥ य एष इष्टकासंघातरूपोऽग्निश्चीयते। सा एषा इदानीमुपधीयमाना प्रथमा स्वयमातृषा। अस्य पुरुषरूपस्य प्रजापतेरात्मनः स्वस्य यदेतत्प्रतिष्ठालक्षणमङ्गं एष इति पुंलिङ्गव्यत्ययः (!) तदस्मिन्प्रजापतौ प्रतिनिहितवान्भवति (°पते च ते निहि°) ॥४॥ प्रजापतिशब्देन तद्विशिष्टं मन्त्रं लक्षयित्वा तेन लक्षितलक्षणया सर्वे मन्त्रा लक्ष्यन्ते प्रजापतिर्त्वेवेत्यनेन लक्षितलक्षणाकारणमुच्यते यतः प्रजापतिः स्वयमात्मनः एतत्प्रतिष्ठालक्षणमङ्गं प्रत्यधत्त अतस्तत्प्रतिष्ठात्मकस्वयमातृषोपधानमन्त्रेऽपि तत्सम्बन्धप्रतीतिर्यथा स्यादिति प्रजापतिनोपदध्यादित्युक्तम् ॥५॥ इयं पृथिवी ॥६॥ दद् दाने ॥७॥ तिस्रः स्वयमातृषाः पृथिव्यन्तरिक्षद्युलोकात्मिकाः। अस्यां प्रथमायां स्वयमातृषायां भूरिति व्याहृत्या साम गायेत् तदूव्याख्यानं तूत्तरत्राष्टमकाण्डावसाने (८. ७. ४. १.) प्रपञ्च्यते ॥८॥ लोके पुरुषस्योपरि पाषाणे निहि[ते] तस्य महानुपरोधो ज्ञायते। स्वयमातृषायाः पाषाणात्मकत्वात् ॥९॥ इष्टकाशब्दो मृन्मयेष्टकासु मुख्यः दूर्वायां (पूर्वा°) तूपधानसामान्याद्गौणः। पशुपुष्टिसाधनत्वेन दूर्वाणामपि पशुत्वात्तदुपधाने पशूनामेवोपधानं कृतम्। अनन्तर्हितैः अव्यवहितैः स्वस्य तेष्वनुप्रवेशादनन्तर्हितत्वम् तादृशैर्यैः पञ्चभिः पशुभिरन्यत्रोपज्ञगाम ते पशव एते दूर्वेष्टकात्मकाः (see ६. २. १. ३.) ॥१०॥ अशोयन्त अपतन् ॥११॥ यतो द्वे देवते एतामपश्यतामत एव द्वाभ्यां यजुर्भ्यामुपधीयते ॥१६॥ स हिरण्मयः पुरुषोऽस्य यजमानस्य देवत्वप्रयुक्त आत्मा शरीरम् द्वियजुरिष्टका मनुष्यत्वप्रयुक्त आत्मेत्यर्थः हिरण्मयत्वात्पुरुषस्य दैवशरीरत्वं मृन्मयत्वाद्द्वियजुषो मानुषशरीरात्मत्वम् ॥१७॥ अमूं हिरण्मयपुरुषलक्षणामिष्टकाम्। नावशेषयेत्। तर्हि मानुषशरीररूपद्वियजुरिष्टकाया अपरिशेषणात् ॥१८॥ यजमानस्य हिरण्मयपुरुषो दैवं शरीरं द्वियजुस्तु मानुषमित्युक्तम् तयोर्मध्ये स्वयमातृषादूर्वेष्टकयोरुपधानेन व्यवधानाच्छरीरद्वयस्यापि प्राणेन कथमव्यवक्षेद इति याज्ञिकानां प्रश्नमवतारयति ॥२०॥ एताभ्यां मन्त्राभ्यां द्वियजुषमुपदध्यात् ॥२१॥ अमुत्र द्युलोके ॥२२॥ अण्डशब्दात्स्वार्थिकोऽण्प्रत्ययः आण्डाविति पुरुषसम्बन्धिनौ वीजे उच्येते ॥२४॥ स्वयमातृषा इव विश्वज्योतिषोऽपि तिस्रो विद्यन्ते। अस्मिन्लोके यत्किं च ज्योतिरस्ति तत्सर्वमग्निमयमेव। अक्षरेव अक्षरा इवेति पदविभागः इवशब्द एवकारार्थः अनयोर्लोकयोर्मध्ये ॥२५॥ यतः प्रज्ञा ज्ञानशक्त्या पदार्थान्प्रकाशयति तस्मात्प्रज्ञा विश्वज्योतिः ॥२६॥ सर्वस्माऽउ वाऽएतस्मै सर्वस्य खल्वेतस्य लोकस्य षष्ठ्यर्थे चतुर्थी प्राणः आश्रयो (?आसाःस्यो) भवतीति शेषः अपानो व्यानश्चेति प्राण एव वृत्तिभेदभिन्नः ॥२८॥ अत्र प्रथमायां चितौ। अस्य प्रजापतेरात्मनः एतदिष्टकाद्वयलक्षणं यदङ्गमस्ति तदस्मिन्नवयवे प्रथमचितिलक्षणे एतेन पुनः प्रदधाति ॥३०॥ चयनस्थलस्य पूर्वभागे ॥३२॥ निर्भर्त्सनादिविशिष्टया वाचैव ॥३४॥ वामं वननीयं वस्तु प्राणाः सर्वैराशास्यमानत्वात्। इयं पृथिवी वामभृत्संज्ञा तदात्मिकाप्यषाढा वामभृत्संज्ञा। वाग्वामभृदिति तदात्मिकाषाढापि वामभृत् ॥३५॥ तां नान्ययेति पुरस्तान्नामषाढां प्रति अन्यया मन्त्रवत्येष्टकयोपधानं न सम्पादयेत् ॥३६॥ अपस्यानामन्नात्मकत्वं तद्विधायकब्राह्मणेऽभिधास्यते (८. २. ३. ६.) ॥३७॥ दूर्वेष्टकादीनां स्वयमातृषायाः प्राग्भागऽउपधाने कारणमाह तदाङ्गरिति

। अभिस्वयमातृष्णं स्वयमातृष्णामभिलक्ष्य स्वयमातृष्णाया उपरिभागे अन्या इष्टका इपरि वक्ष्यमाणाः उपधीयन्ते एता ह्वेष्टकादयस्तु तस्याः प्राच्यः प्रागपवर्गाः ॥४०॥२॥४॥

अस्मिन्ब्राह्मणे कूर्मादीनामुपधानं विधास्यते । एषां पृथिव्यादीनां लोकानामप्सु प्रविष्टानां मग्नानाम् ॥१॥ प्रतिष्ठितमधः सर्वत्र पृष्ठतलम् व्यवगृहीतान्तं विविधमवगृहीतो ऽवनतः प्रान्तो यस्य तत् तथोक्तं कूर्मस्योपरिकपालं सर्वतो मण्डलाकारेणावनतप्रान्तमिव भवति ॥२॥ यां देवतामभिलक्ष्य या ऋगनूक्ता तद्देवताप्रतिपादकत्वेनोच्यते (ऊरेवाताप्रति°) सा ऋक् तत्प्रतिपादकत्वात्सैव प्रतिपाद्या देवता तथा यजुरपि एवं च सत्यत्र तद्देवतास्वरूपमेतन्मधु मधु वाता ऋतायतऽइत्यनया ऋचा प्रतिपाद्यत्वात् ततश्चैष तृचः (!) प्रतिपाद्यत्वेन देवताभूतमध्वात्मकः । तिस्र ऋचो यस्मिन्समुदाये स तृचः ऋचि त्रेरुत्तरपदादिलोपश्छन्दसीति (पा° ६. १. ३७. वा° १.) त्रिशब्दसम्प्रसारणं ऋवर्णस्य च लोपः ऋक्पूरब्धूरिति (पा° ५. ४. ७४.) समासान्तः ॥३॥ कोरतेरौणादिकमप्रत्यये बञ्जलं कृन्दसीत्युवे (पा° ७. १. १०३.) हलि चेति (पा° ८. २. ७७.) दीर्घे च कृते कूर्म इति रूपम् । कूर्मशब्दस्य कारणप्रवृत्तिनिमित्तकत्वात्कश्यपस्य च प्रजापतित्वेन प्रजापतिकारकत्वात्कश्यपः (वाकश्यपः) कूर्मः खलु अत एव जनाः सर्वाः प्रजाः काश्याप्य इत्याहुः (त्याह) अतश्च कूर्मस्य कश्यपात्मकत्वात्तदुपधानं प्रशस्तम् ॥५॥ चयनप्रदेशपूर्वभागे प्रत्यङ्मुखत्वेनोपधानम् । उत्तरतो हि स्त्री पुमांसमुपशेत ऽइति श्रुतेः पुमान्दक्षिणभागे योषामुपशेते ॥६॥ The explanation of क° ७-१४ (end) and of १५ (end) -१६ is wanting (AB.) ॥ प्रापादयत प्रापयत् । सर्वे देवा इन्द्रियाणि ॥२०॥ तद्यि तदा अन्नलाभावसरेषु स प्राणोऽभवत् प्राणशब्देनेन्द्रियाण्युच्यन्ते (यानच्यंते) तत एव सेन्द्रियोऽभूदित्यर्थः । महान् (? नु) भूवेति यदा एनं प्रजापतिमेते देवा इन्द्रियाणि प्रापयन्न तदा स महानभूत् । वित्त्वा लब्धा । पुरि आत्मनि शरीरे प्राणान्प्राणयत् स्वस्वव्यापारसमर्थानकरोत् यत एवं प्राणयत् तस्मादेवा इन्द्रियाणि प्राण्यन्तऽइति प्राणा इति व्युत्पत्त्या प्राणा अभूवन् । स पूर्वोक्तः प्रजापतिसम्बन्धी यः प्राणोऽस्ति सैषा गायत्री विष्णोः कर्माणीत्यर्थः प्राणो वृत्तिभेदेन त्रिधा भिद्यते गायत्र्यपि पादभेदेन एतत्सादृश्यात्प्राणो गायत्रीत्युक्तम् । अथ यत्प्रजापतिसम्बन्ध्यन्नमस्ति (अष्मन्वः प्रजा°) स एष विष्णुर्देवता विष्णुरिति यज्ञोऽभिधीयते भोगसाधनत्वसामान्यादन्नस्य विष्णुरूपत्वम् । उदुम्बरस्य बलकारसत्वाद्वीर्यात्मकत्वम् ॥२१॥ अकरत् अकार्षीत् ॥२२॥ उलूखलस्य शिरःसाधर्म्यसम्पादनं तु उपपाद्यतऽइत्येतत्प्रदर्श्यते तत्प्रादेशमात्रमिति ॥२३॥ तं प्रजापतिम् । अयं यजमानः ॥२४॥ इष्टकाचितिषु विधास्यमानस्याग्नेरुखायां भृत्योत्पादनादुखायोनित्वेन तदुपधाने योनेरेवोपधानं भवति । वनस्पतीनामपि व्रीहीणां मध्यभागत उत्पत्तेर्मध्यतो (? गतिर्वोपत्तेर्म°) योनिः ॥२६॥ उपशयया नामोखाभेदे सति — the explanation of क° २८ to ३३ is wanting (AB.) । न निष्पद्यते न निष्पतति तत्रैवावतिष्ठते ॥३३॥ सोऽग्निर्यदि उखायां संवत्सरभृतः स्यात् अथैतस्यामभिभुञ्जयात् । संवत्सरस्य सर्वावयवैकत्वात्संवत्सरभृतोऽपि सर्वात्मकः । अभिभवेव भुञ्जयादिति एवकारोऽत्र विकल्पद्योतकः ॥३४॥ the explanation of क° ३५-३७ is wanting । प्रकारान्तरेणोखोलूखलयोरौत्तराधर्यं प्रशंसति उदरमुखेति उखायाः शक्तादग्नेरुत्पत्तेरुखा (!) उदरमुलूखलं तु हविर्निष्पादनाद्योनिः । शिम्नस्य वृत्ताकारतया तदाकारवत्त्वे[न]

मुसलमपि शिश्नम् तथाविधमुलूखलस्य दक्षिणभागे उपदध्यात् अस्य वर्षणसमर्थत्वेन वृषत्वाउलूखलस्य योनित्वेन स्त्रीत्वात्तदुपपन्नम् । उक्तमेवाग्नेः पशुरूपत्वं प्रकारान्तरेण दृढयति यदु पशोरिति पशोरग्निरूपस्य संस्कृतस्य पश्ववयवसम्पादनया (नाया) निष्पादितस्य यदन्नं तदूर्वेष्टका तस्मात्तस्य इर्वेष्टकारूपेणान्नेन सुहितस्यैषातस्याग्निरूपस्य (!) पशोरुत्तरभाग उदाहिततरः उन्नततरो भवति उत्तरभागऽएवोलूखलमुसलाद्युपधानात् । तस्मादिदानीमपि लोके तृणाद्यभ्यवहारेण तृप्तस्य पशोः ॥ ३८ ॥ १ ॥ ५ ॥

अथ पशुशीर्षाणामुपधानं विधाय प्रशंसति । पशुशीर्षाणां पश्ववयववत्वेन पशुत्वम् ॥ १ ॥ याः खलु ताः प्रागुक्ताः (६. २. १. ७.) श्रियः ता एवैतानि पशुशीर्षाणि अत एतेषामुपधाने श्रियामेवोपधानं भवति । उखायाः परम्परया कवन्धात्मकत्वम् तत्रोपधाने कवन्धशिरसां (°सा) संधानं भवतीति दर्शयति अथ यानीति तानीति अम्भः (!) सम्भरणावसरपरामर्शः यानि तानि कुसिन्धानि कवन्धानि तानि एताः अत्र सम्पद्यमानाः पञ्च चितयः चित्यात्मकत्वं तु कवन्धानां पञ्चवसंख्यासामान्यात् ततस्तथा पञ्चविधा याः पञ्च चितयः ता इमे पृथिव्यादयो लोकाः चितीनां प्रजापत्यवयवात्मकत्वाल्लोकानामपि तथाभावात् तथा च य एतयिमे (!) लोकास्ते एषा उखा तस्या (दुःखान्तस्या) लोकत्रयात्मकत्वस्य प्रागुक्तत्वात् अतश्चोखायां पशुशीर्षाणामुपधाने तैः कवन्धानि संश्लेषयति शीर्षभिरिति ॥ ३ ॥ उखायामुपधानं पुरस्तादारभ्य प्रत्यगपवर्गं कर्तव्यम् । प्राणेषु शीर्षे गतेषु सर्वप्राणाधारत्वाङ्किरसां प्राणत्वं प्राणा इतीन्द्रियाण्युच्यन्ते पलायने पशूनां (क्रूरवनांमूना) शिरांसि गृहीत्वा स्वाभिमुखमाकृष्य वशीकृतवान् ॥ ४ ॥ उखायां पशुशीर्षाणामुपधाने प्रजापत्युदरे अन्नं दधातीति दर्शयितुमाख्यायिकामवतारयति यद्वेवेति ॥ ६ ॥ एतत्पुरुषादिपशुलक्षणमन्नं सृष्ट्वा । मुखप्रदेशादेवान्नस्य प्रतीचीनमभ्यवहारात् ॥ ७ ॥ शिरसि वागेका नेत्रे द्वे श्रोत्रे द्वे नासाविवरे च द्वे इति सप्त प्राणाः ॥ १ ॥ य ऋजुरकुटिलाङ्गः तस्य अन्नः शरीरमध्ये हृदा हृदयदेशेन मनसा च सता (वसता) विद्यमानेनान्नं पूतं भवति सारासारभेदेन विवेचितं भवति हृदयदेशस्य अन्नावतरणप्रदेशत्वात् शोधकत्वम् । चतुर्थपादे अग्निमध्यावस्थितहिरण्यपुरुषाभिधानं क्रियते । तथाविधेऽस्मिन्मुखे शकलं निदधामि निहितं शकलं चेदमग्नेर्मध्ये यो हिरण्ययो वेतसः ॥ ११ ॥ ऋचे वेतीहेति दक्षिणनासाविवरस्याभिनयेन निर्देशः अनेकार्थत्वाद्धातूनामर्चतिरत्र प्राप्त्यर्थः । रुचे वेतीह सव्यनासाविवरे । भासे वेतीह दक्षिणनेत्रे ज्योतिषे वेतीह सव्यनेत्रे । अभूदिति दक्षिणश्रोत्रे ॥ १२ ॥ अथैतेषां पशूनामुपधानमनूद्य तत्र पुरुषस्य प्राधान्यं विधत्ते ॥ १४ ॥ उखामध्ये पयःपूरिते पुरुषमुपदध्यात् एवं च सति यज्ञमानस्य पुरुषत्वात्पयसः पशुकार्यत्वेन पशुत्वात्तत्र यज्ञमानं प्रतिष्ठापयति । हे अग्ने चोयमानस्त्वमादित्यगर्भरूपं सहस्रस्य सदृशमत एव विश्वरूपं पुरुषं पयसा आर्द्रीकुरु किं च एनं परितो वर्तय अर्चिषा मा हिंसीः शतायुषं च कुरु इति मन्त्रार्थः ॥ १७ ॥ दिग्भ्यश्चावय उत्पद्यन्ते दिशां सर्वोत्पत्तिमन्निमित्तकारणात् । असुरस्य मायां सुवर्भानोः सुतस्य (सुवर्तनोन सुनस्य) सम्बन्धित्वेन निर्मिताम् अत एव तैत्तिरीयके सुवर्भानुना (सुवर्णर्भानुना) सुतः सूर्यं तमसाविध्यत् तस्मै देवाः प्रायश्चित्तिमैक्षन् तस्य यत्प्रथमनगो (?) ऽपाघ्नन् सा कृष्णाविरभवदिति श्रूयते ॥ २० ॥ एषोऽग्निरग्नेऽग्नेः प्रजापतेरध्यजायत अग्नेः सकाशादुत्पन्नत्वादस्याग्नित्वम् ॥ २१ ॥ ऋचो विभागेन तदिदं पुरुषसम्ब-

न्धि शीर्षकपालं विहाप्य विक्रिय (विहिय) श्रोहाक् त्यागे एयत्तस्य ल्यपि लूपम् ॥२५॥ अभिहोमानन्तरमुपहितानां पुरुषशिरःप्रभृतीनां पशुशिरसामुत्सर्गनामकैर्मन्त्रैरुपस्थानम् ॥२८॥ उत्तरस्यां दिशि वक्ष्यमाणा मयुप्रभृतयः पशवोऽवतिष्ठन्तऽइति तत्र शोकनिधानायोदङ्मुखस्तिष्ठन्नुत्सृजेत् ॥३१॥ गौरः सिंहः ॥३३॥ स्वकीयवचा तेषामाछादनात् मनुष्यास्तावन्तनिवारणयाविज्ञमोन (? -°णायाविज्ञातेन) कम्बलेन शरीरमाछादयन्ति चतुष्पादोऽश्वा बलीवर्दाश्च (पदोश्वान्लोवदर्श) स्वभारवहने मार्दवाय पृष्ठे(थै) कम्बलेताछादिता भवन्ति ॥३५॥ शरभो नाम सिंहघातकः कश्चिन्मृगविशेषः ॥३६॥ अनिरुक्तया अविस्पष्टदेवतया यत्र देवताविशेषवाचकं पदं नास्ति तदनिरुक्तम् अनिरुक्तावादेतस्याग्नेयवम् अनिरुक्तो मन्त्र आग्नेयः प्राजापत्यो वा भवतीति ॥३८॥ उपस्थानानन्तरमग्निं पश्चाद्भागेनारुह्य स्वयमातृष्णां प्रदक्षिणीकृत्य गत्वापस्या (पश्चाष्ट्या) इष्टका उपदध्यात् । सर्वतः सर्वासु दिक्षु ॥४०॥ प्रतिदिशं पञ्चानामुपधाने विंशतिः सम्पद्यन्ते तत्र याः पञ्चदश पूर्वा इष्टकास्ता अपस्याख्या भवन्ति ॥४१॥ प्रकारान्तरेण पशूनां लोमसम्पत्तिमाह अथोऽइति कृष्णाजिनलोमानुबद्धया मृदोखाया निर्मीणाउखायां यानि लोमानि सन्ति (संतति) तान्येव पशूनां लोमानि भवन्ति । वयोमसम्पादने उक्तं पक्षद्वयमपि अभिमतमित्याह यदीति (!) यदि इतरेण अन्येन प्रकारेण तत्सम्पादनं भवति तर्हि तथैवास्तु अथ वा इतरेण प्रकारान्तरेण यदि भवति तर्हि तथैवास्तु । कृत्स्नान्कात्स्न्येन संस्कुर्मः सर्वावयवसम्पादनेन समृद्धान्कुर्मः ॥४३॥ अविशत् उपविष्टवान् अपां निर्गमिमा (मेन) दौर्बल्यादूनुमक्षमो भूवा ॥४४॥ उक्तमन्त्रसाध्योपधानाः पञ्चेष्टकाः पूर्वस्यां दिशि उपदध्यात् एवं वक्ष्यमाणमन्त्रसाध्योपधाना अपीष्टका पञ्च-पञ्च दक्षिणादिषु दिक्षूपधेयाः ॥५०॥ क्षियन्ति निवसन्ति ॥५४॥ श्रोत्रस्यान्तरार्द्रीभावात् ॥५५॥ गायत्रेण वेत्यादिभिः पञ्चभिर्मन्त्रैः उत्तरस्यां दिशि कन्दस्या उपदध्यात् ॥६१॥ अथासामपस्यानामङ्गुल्यात्मकवमाह ता एता इति ता अपस्याः । पञ्चानां-पञ्चानां सकृत्सादनमन्त्रः न तूपधानमन्त्रवत्प्रतीष्टकम् ॥६२॥२॥५॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये सप्तमकाण्डव्याख्या समाप्ता ॥७॥ ॥

VARIOUS READINGS.

Adhyâya १. १. १४ निर्मज्या° A. निर्म्रिज्या° B. निर्मृज्या° Sây. - २४ देवाँ३॥ ऊचिषे A. °वाँ३ ऊ° B. Read: देवाँ°. - २. ६ आरोक्षति Sây. —

Adhyâya २. २. ११ °ग्रथवाक्षणामि° AB. - १२ दक्षिणा AB. - १५ Read: मात्रा तावतीवा°. —

Adhyâya ३. १. १२ °प्यायनवतीभ्यां Sây. (thus also 88 and २. १.). - १३ (and whereever the word occurs) लोकेष्टका Sây. - ३१ °धुर्बडुवर्प° AB. - ३६ Read: रेतोवृपमिति. - ३८ Read: द्वे सिकते. - ४२ Read: °क्ष्णा उत्सन्नं. - ४५ °देषो ह्येवात्र A. Sây. (explained by एष). °देषां ह्येवात्र B. —

Adhyâya ४. १. १३ °स्मात्पूष्करं पूस्करश्च B. °स्मात्पुष्करं पूष्करश्च A. - २१ °स्पतीऽङरनु A. °स्पतींऽनु B. - ३६ कपुरुल° A. कपुत्सल B. कपृत्सल Sây. - २. ४ एष आत्मनः Sây. - २२ Read: प्रजाः प्रजायन्ते. - २३ विराड्ढेमौ A1. विराड् ढेमौ A2. B. विराट् व ढीमौ Sây. - २४ विराड्ढेमा° B. विराड् ढेमा° A. विराट् ढीमा° Sây. - २५. २६ दधात्यन्तरे° according to Sâyaṇa's reading अन्तरा + इव. - ३६ Read: °त्प्राणास्तां नान्यया. - ३१ सर्ववीर्या A1. सर्ववीर्या A2. B. —

Adhyâya ५. १. ४ तृचो Sây. - २१ °न्महान्भूवा B. Sây. - २२ Read: ऽकरदिति. - °मुद्रूकरश्च A. - २३ भवति मध्येसंगृहीतमिव A2. B. - २. १४ Read: र्थेणात्यादधाति. - २५ विहाय्य B. - ३१ दाश्वान्नृ पा° A1. दाश्वान्नृः पा° A2. दाश्वान्नेः पा° B. See पा° ८. ३. १०. - ४८° यामीति । अभ्रं A. यामीत्य । भ्रं B. —